Government Oriental L

BIBLIOTHECA SANSKR

तैत्तिरीयसंहिता

भट्टभास्करमिश्रविरचितभाष्यसहिता.

THE TAITTIRÍYA SAMHITÀ

OF THE

KRISHNA YAJUR-VEDA

WITH THE

COMMENTARY OF BHATTABHA'SKARAMIS'RA.

Vol. V.

(Kanda III—Prasnas 1 to 5).

EDITED BY

A. MAHA'DEVA.S'A'STRI, B. A.,

Curator, Government Oriental Library, Mysore,

AND

PANDITARATNAM K. RANGA'CHA'RYA,

Pandit, Government Oriental Library, Mysore.

Published under the Authority of the Government of His Highness the Maharaja of Mysore.

MYSORE:

PRINTED AT THE GOVERNMENT BRANCH PRESS,

1896.

PREFATORY NOTE.

The portion comprised in this volume has been edited from the manuscripts found in the Sarasvatí-Bhaṇḍára of His Highness the Mahárája of Mysore, in the Sarasvatí-Mahal in Tanjore, in the Sanskrit Library of His Highness the Raja of Pudukotta, and in the Adyar Library (Madras).

A. M. S.

तृतीयकाण्डविषयानुक्रमणिका.

प्रथमः प्रपाठकः.

अनुवाकः

सौमिकं ब्राह्मणं, मन्त्राश्च— १—१०

मेध्येतरदर्शनादौ दीक्षितजप्याः केचिन्मन्त्राः, तद्विधयश्च ... १

सोमाभिमन्त्रणमन्त्र तद्विधयः, तानूनप्त्रावघ्राणविधिस्समन्त्रः, आश्रावणं, स्तोत्रोपाकरणं च २

सोमक्रयणीपदाङ्गानं, पशुश्रपणार्थाग्नथाहरणादि, पश्ववदाननाशप्रायश्चित्तिः, पश्वर्थकलहायमानाभिचारश्च ३

पशूपाकरणहव्यहोमनीयमानपश्वभिमन्त्रणसंज्ञप्तहोमपशूपायनमुच्यमानपश्वभिमन्त्रणवपाहोमपरिवप्यहोमानुगता मन्त्राः ... ४

चतुर्थानुवाकान्नातमन्त्राणां ब्राह्मणम् ५

महापरिधिपरिधानस्रुगभिमर्शनपात्राभिमर्शनानि, तन्मन्त्राश्च... ६

यजमानात्मनोरार्तिपरिहाराय अध्वर्युकर्तृकः काश्चिद्धोमस्समन्त्रः, विद्विषाणयोर्यष्टोरेकस्य इतराभिभूषोः काश्चिन्नैमित्तिकः प्रयोगश्च ७

निग्राभ्यमन्त्रः, सोमाभिमन्त्रणांश्चभिमन्त्रणे समन्त्रके, द्रप्सानुमन्त्रणमन्त्रश्च ८

ग्रहमन्त्रस्वरविधिः, सवनाहुतिमन्त्राः, आधारविधिस्समन्त्रकः, संस्रावहोममन्त्रतद्ब्राह्मणे च ९

प्रवृतहोममन्त्रः, बर्हिष्पवमानप्रसर्पणं, सोमोपस्थानं याजमानं समन्त्रकं च १०

सहितायां २—४—६ वाकान्नातायांश्चित्रेष्टेर्याज्यापुरोनुवाक्याः, अन्तरा वर्षाभूस्तम्बप्रहरणतद्धूमान्वेक्षणमन्त्रौ, सं. २—४—१० वाकान्नातानां धामच्छदग्नयादिदेवताकानां त्रयाणां हविषां याज्यापुरोनुवाक्याः, उपहोममन्त्राश्च ११

द्वितीयः प्रपाठकः.

सौमिकं ब्राह्मणं, मन्त्राश्च— १—१०

अन्वारोहजपविधिः समन्त्रः, पवमानग्रहाभिमर्शनविधिः समन्त्रश्च १

अंशुप्रक्षेपादिविधिः, आधवनीयपूतभृतोर्दीर्णयोः प्रायश्चित्तहोममन्त्रौ, अध्वरशब्दनिरुक्तिपुरस्सरं सोमयागविधिश्च ... २

अनुवाक.

सोमावेक्षणमन्त्राः, काम्यास्सोमावेक्षणविधयश्च ... ३
वेद्याद्युपस्थानमन्त्राः, तद्विधयश्च ४
भक्षमन्त्राः ५
पृषदाज्यग्रहणमन्त्राः, तद्विधिः, दधिघर्ममन्त्रश्च ... ६
स्तुतशस्त्राभिमन्त्रणमन्त्राः, तद्ब्राह्मणं च ७
होत्रसंतर्पणमन्त्राः, वैश्वकर्मणहोममन्त्राः, तद्ब्राह्मणं, आशिरावनयनादि-
मन्त्राश्च ८
शंसनप्रतिगरसंबन्धिनो मन्त्राः, विधयश्च ९
प्रतिनिर्ग्राह्यग्रहणादिमन्त्राः १०
(सं. २–४–११) वाकाम्नातायास्त्रैधातवीयेष्टेर्याज्यादि ... ११

तृतीयप्रपाठकः.

सौमिकं ब्राह्मणं, मन्त्राश्च— १—८
अतिग्राह्यहोमादिमन्त्राः... ... ... १
स्तोत्रोपाकरणमन्त्रतद्विधी, प्रतिगराङ्गमन्त्रतद्विधी च ... २
अदाभ्यांशुग्रहार्था मन्त्राः ३
तन्मन्त्राणां ब्राह्मणम् ४
द्वादशाहशेषभूतानां पृश्निग्रहाणां विधिस्समन्त्रः ... ५
गवामयनगतानां परस्सामसंज्ञिकातिग्राह्याणां विधिः ... ६
सोमशेषभूतानामाश्रावणादिमन्त्राणां विधिः... ... ७
अवभृथाङ्गहोमवेदिदाहहोमयोर्विधिस्समन्त्रः ... ८
वृषालम्भाख्यकर्माङ्गमन्त्राः ९
वशागर्भनिमित्तकप्रायश्चित्ताङ्गमन्त्राः १०
(सं. २–४–१३) वाकाम्नातस्य ऐन्द्राबार्हस्पत्यचरोः, (ब्रा. ३–७–३) वाकाम्नाताया विविचीष्टेः, (सं. १–८–८, ३–४–९.) वाकयोराम्नातानां देविकाहविषां च याज्यापुरोनुवाक्याः. ११

चतुर्थप्रपाठकः,

काम्या नैमित्तिकाश्च केचन विधयः— १—१०
(सं ३–३–१०) वाकाम्नातानां मन्त्राणां ब्राह्मणम् ... १
वशालम्भार्थमन्त्राः २

	अनुवाक.
भूत्यादिकामस्य वशालम्भविधिः पूर्वानुवाकाम्नातमन्त्रब्राह्मणं च ...	३
जयसंज्ञिका मन्त्राः, तद्विनियोगश्च	४
अभ्यातानसंज्ञिका मन्त्राः	५
अभ्यातानहोमविधिः	६
राष्ट्रभृन्मन्त्राः	७
राष्ट्रभृद्धोमविधिः	८
(ब्रा. १–७–२) वाकाम्नातानां देविकाहविषां काम्याः प्रयोगभेदाः	९
अग्निहोत्रिप्रयाणे होमविधिः समन्त्रः	१०
(सं. १–८–१०) वाकाम्नातानां देवसुवां हविषां याज्यापुरोनुवाक्याः	११

पञ्चमप्रपाठकः.

आरम्भणीयेष्टिविधिः समन्त्रः	१
सौमिकब्रह्मत्वविधिः, स्तोमभागाख्यमन्त्रब्राह्मणं च	२
विष्ण्वतिक्रमणमन्त्राः	३
अतिमोक्षमन्त्राः. तद्ब्राह्मणं च	४
आदित्यग्रहार्था मन्त्राः, तद्ब्राह्मणं, यूपोपस्थानमन्त्रश्च ...	५
पत्नीविषयास्सन्नहनादिमन्त्राः सौमिकाः	६
इष्टघङ्गभूतानां स्रुचां ब्राह्मणम्	७
दधिग्रहमन्त्राः	८
दधिग्रहमन्त्रब्राह्मणम्	९
प्राजापत्यातिग्राह्यग्रहणमन्त्रः, प्राणग्रहब्राह्मणं च	१०
वरुणप्रघासेष्वग्निप्रणयनमन्त्राः, अग्निमन्थनमन्त्राश्च	११

हरिः ओम्.

तैत्तिरीयसंहिता

भट्टभास्करमिश्रविरचितभाष्यसहिता.

तृतीयः काण्डः.

प्रथमः प्रश्नः.

प्रजापतिरकामयत प्रजास्सृजेयेति
स तपोऽतप्यत स सर्पानसृजत

[1]प्रजापतिरिति प्रजा–पतिः । अकामयत । प्रजा इति प्र–जाः । सृजेय । इति । सः । तपः । अतप्यत । सः । सर्पान् । असृजत । सः । अकामयत ।

एष निष्पावके शाके कुशिकान्वयजन्मना ।
भट्टभास्करमिश्रेण ज्ञानयज्ञः प्रकीर्तितः ॥

[1]औपानुवाक्यं काण्डं वैश्वदेवमारभ्यते । मन्त्रानाम्नाय तदानीमेव ब्राह्मणैर्विनियुज्यते । अनारभ्याधीतत्वाच्च प्रकृत्यर्थमेतत् । अत्र लिङ्गवचनाभ्यां विनियोगः । प्रायश्चात्र व्यामिश्रलिङ्गा मन्त्राः, ते च यथालिङ्गं नियम्यन्ते । तत्र दीक्षितवादं विधास्यंस्तदर्थं पुराकल्पं विदधाति—प्रजापतिरकामयतेत्यादि ॥ पूर्वं प्रजानां पतिरकामयत, प्रजास्सर्वास्सृजेयेति । सृज विसर्गे,

सोऽकामयत प्रजास्सृजेयेति स द्वि-
तीयमतप्यत स वयाꣳस्यसृजत
सोऽकामयत प्रजास्सृजेयेति स तृ-
तीयमतप्यत स एतं दीक्षितवाद-

प्रजा इति प्र–जाः । सृजेय । इति । सः । द्वितीयम् । अतप्यत । सः । वयाꣳसि । असृजत । सः । अकामयत । प्रजा इति प्र–जाः । सृजेय । इति । सः । तृतीयम् । अतप्यत । सः । एतम् । दीक्षितवादमिति दीक्षित–वादम् । अपश्यत् । तम् ।

दैवादिकोऽनुदात्तेत् । तौदादिक उदात्तेत् । तत्राद्यस्य विकरणव्यत्ययः । द्वितीयस्य त्वात्मनेपदव्यत्ययः । स तथा कामयमानः तपोऽतप्यत 'अग्निष्टोमेन वै प्रजापतिः प्रजा असृजत'* इति प्रजासृष्टचर्थमग्निष्टोमेन यजमानः केवलं तप एवातप्यत । न दीक्षितवादमवदत् । 'तपस्तपः कर्मकस्यैव' इति कर्मवद्भावः । किन्नाम पुनस्ततपः यत्सोतप्यत? उच्यते—'अङ्गिरसस्सुवर्गं लोकं यन्तोप्सु दीक्षातपसी प्रावेशयन्नप्सु स्नाति साक्षादेव दीक्षातपसी अव रुन्धे'† इत्यादि ब्राह्मणं वेदितव्यम् । किं पुनस्तर्हि तपोऽङ्गिरसोप्सु प्रावेशयन्? उपवासादिनियममित्येके । उपसदात्मकमित्यन्ये । दीक्षित्वा दीक्षितवादमवदन्नेवोपसद उपासीददिति । स तथा कुर्वन् प्रजापतिः सर्पानेवासृजत न मनुष्यादीन् ।

*सं. ७-१-१. †सं. ६-१-१.

मंपश्यत्तमंवदत्ततो वै स प्रजा असृ-
जत यत्तपस्तप्त्वा दीक्षितवादं व-
दति प्रजा एव तद्यजमानः ॥ १ ॥

अवदत् । ततः । वै । सः । प्रजा इति प्र–जाः । असृजत । यत् । तपः । तप्त्वा । दीक्षित-वादमिति दीक्षित–वादम् । वदति । प्रजा इति प्र–जाः । एव । तत् । यजमानः ॥ १ ॥

मासा एवैत उक्ता भवन्तीत्याचार्याः । स पुनरप्यकामयत, सर्वाः प्रजास्सृजेयेति । स द्वितीयमतप्यत । द्वितीयं तृतीयमिति क्रिया-विशेषणम् । स पुनरपि तथा चरन् वयांसि पक्षिण एवासृजत । छन्दांस्येवैतान्युक्तानि भवन्तीत्याचार्याः । स भूयोऽप्यकामयत सर्वाः प्रजास्सृजेयेति । स तृतीयमतप्यत, अथ स तृतीयं तप्यमान एतं दीक्षितवादमपश्यत् । दीक्षितेन वेदितव्यं दीक्षितवादम् । संस्कृतवाणीत्येके । अन्य आहुः—एतमिति वचनादनन्तरवक्ष्यमाणविषयत्वात्, यद्दीक्षितेन वदितव्यमेमेध्यदर्शनादौ 'अवद्धं मनः'* इत्यादि तद्दीक्षितवाद इति । 'थाथवच्चुक्त' इत्युत्तरपदान्तोदात्तत्वम् । अथ तं दीक्षितवादमवदत्प्रजापतिः । ततस्सर्वाः प्रजा असृजत । यस्मादेवं तस्माद्यजमानोऽपि यत् यदि तपस्तप्त्वा दीक्षितवादं वदति तत्तेन हेतुना प्रजाः पुत्रपौत्रादीन् सृजते । तस्माद्दीक्षितेन वादः कर्तव्यः इति विधिरनुमीयते । 'व्यादाय स्वपिति' इतिवत्पूर्वकालता तत्राविवक्षिता । तपश्च तप्तव्यं दीक्षितवादश्च वदितव्य इत्युभयं विधीयते ॥

---

*तै. सं. ३-१-१.[3]

सृजते यद्वै दीक्षितोऽमेध्यं पश्यत्य-
पास्माद्दीक्षा क्रामति नीलमस्य ह-
रो व्येत्यबद्धं मनो दरिद्रं चक्षुस्सू-
र्यो ज्योतिषाꣳ श्रेष्ठो दीक्षे मा मा
हासीरित्याह नास्माद्दीक्षाऽपं क्राम-

सृजते । [2]यत् । वै । दीक्षितः । अमेध्यम् । पश्यं-
ति । अपेति । अस्मात् । दीक्षा । क्रामति । नीलम् । अस्य । हरः । वीति । एति । [3]अब-
द्धम् । मनः । दरिद्रम् । चक्षुः । सूर्यः । ज्योति-
षाम् । श्रेष्ठः । दीक्षे । मा । मा । हासीः । इति ।
आह । न । अस्मात् । दीक्षा । अपेति । क्राम-

---

[2]अथ दीक्षितस्यामेध्यदर्शने दोषमाह—यद्वा इति ॥ यद्य-
मेध्यं दीक्षितः पश्यति अस्माद्दीक्षाफलमपक्रामति । किञ्च—नीलं
पापं अमेध्यदर्शनाच्च अस्य भवति; दीक्षापक्रमणमात्रमेव मा ।
किञ्च—हरस्तेजस्तदप्यस्माद्वैयति विगच्छति । केचिदाहुः—नील
मितिरूपमात्रं गृह्यते; अस्य रूपं तेजश्च नश्यति ॥

[3]अथ प्रमादकृते जपं विदधाति—अबद्धं मन इत्यादि ॥
मा मा हासीः इत्यन्तं इमं मन्त्रमाह जपेदित्यर्थः । अथोक्तदो-
षाभावमाह—नास्मादिति । दीक्षा चास्मान्नापक्रामति, नीलं चास्य
न भवति, हरश्चास्मान्न व्येति ॥

ति नास्य नीलं न हरो व्येति यद्वै
दीक्षितमभिवर्षति दिव्या आपोशा-
न्ता ओजो बलं दीक्षाम् ॥ २ ॥
तपोस्य निर्घ्नन्त्युन्दतीर्बलं धत्तौ-

ति । न । अस्य । नीलम् । न । हरः । व्येति । एति । [4]यत् । वै । दीक्षितम् । अभिवर्षतीत्यभि-वर्षति । दिव्याः । आपः । अशान्ताः । ओजः । बलम् । दीक्षाम् ॥ २ ॥ तपः । अस्य । निरिति । घ्नन्ति । [5]उन्दतीः । बलम् । धत्त । ओजः । धत्त ।

मन्त्रार्थस्तु—अबद्धमनियतं मनः अन्तःकरणं शुभानशुभां-श्च विषयाननुधावति न नियन्तुं शक्यते । किञ्च—दरिद्रं कृपणं चक्षुः बाह्यं करणं न प्रभु* । इष्टमेव विषयं गृह्णाति नानि-ष्टमिति एतस्य नास्तीत्यर्थः । दरिद्रातेः पचाद्यचि छान्दसमन्त्या-त्पूर्वस्योदात्तत्वम् । किं च—सूर्यो ज्योतिषां प्रकाशकानां श्रेष्ठः ग्रहनान्यपि प्रकाशयति । न किं चिदप्यावरणं च प्रतीतमस्ति । तस्मादेभिरेव त्रिभिरेतत्कृतं न मयेति भावः । यस्मादेवं तस्मा-द्धे दीक्षे मा मा हासीः मा त्याक्षीः मत्तो मा क्रमीः । समानवाक्ये निघातादिविधानादपदात्परत्वादामन्त्रितानुदात्तत्वाभावे षाष्ठिकमामन्त्रि-ताद्युदात्तत्वमेव ॥

[4]अथ दीक्षितस्याभिवर्षणे दोषमाह—यद्वा इति ॥ यदीक्षित-

---

*क.—प्रभुवत्.

जो धत्त बलं धत्त मा मे दीक्षां मा तपो निर्वधिष्टेत्याहैतदेव सर्वमात्मन्धत्ते नास्यौजो बलं न दीक्षां न तपो निर्घ्नन्त्यग्निर्वै दीक्षितस्य

बलम् । धत्त । मा । मे । दीक्षाम् । मा । तपः । निरिति । वधिष्ट । इति । आह । एतत् । एव । सर्वम् । आत्मन् । धत्ते । न । अस्य । ओजः । बलम् । न । दीक्षाम् । न । तपः । निरिति । घ्नन्ति । [6]अग्निः । वै । दीक्षितस्य । देवता । सः ।

मभिवर्षति दिव्या अन्तरिक्ष्या अभूमिगता अशान्ताः असुखहेतवः आपः अस्य दीक्षितस्य ओजः बलं ओजिष्ठं बलं दीक्षां च तपश्च पुरोक्तं निर्घ्नन्ति निश्रेयेन नाशयन्ति ॥

[5]अथ प्रमादकृते परिहारार्थं जपमाह—उन्दतीरिति मा तपो निर्वधिष्टेत्यन्तम् ॥ अस्य जपेन एतत्पूर्वोक्तं सर्वमात्मन् आत्मनि धत्ते स्थापयति । दोषाभावमाह—नास्यौजिष्ठं बलं न दीक्षां निर्घ्नन्ति दिव्या आपः ॥

मन्त्रार्थस्तु—हे आपः उन्दतीः मां क्लेदयन्त्यो यूयं बलं मयि धत्त स्थापयत । ओजो दीप्तिं च बलं प्राणं जीवितं वा मयि धत्त । कर्मप्रेषादाध्वरिकं कर्म मा छेदि । किं च—मम दीक्षां तपश्च मा निर्वधिष्ट निष्कृष्य मा नीनशत ॥

[6]अथभद्रादभि श्रेय इत्यादिना 'दैवीं धियं मनामहे'* इत्यान्नातानां

---

*सं १-२-३ 18-21

देवता सोस्मादेतर्हि तिर इव यर्-
हि याति तमीश्वरꣳ रक्षाꣳसि ह-
न्तोः ॥ ३ ॥ भद्रादभि श्रेयः प्रेहि
बृहस्पतिः पुरएता ते अस्त्वित्याह
ब्रह्म वै देवानां बृहस्पतिस्तमेवान्वा-

अस्मात् । एतर्हि । तिरः । इव । यर्हि । याति । तम् । ईश्वरम् । रक्षाꣳसि । हन्तोः ॥ ३ ॥ भद्रात् । अभीति । श्रेयः । प्रेति । इहि । बृहस्पतिः । पुरएतेति पुरः–एता । ते । अस्तु । इति । आह । ब्रह्म । वै । देवानाम् । बृहस्पतिः । तम् । एव । अन्वारभत इत्यनु–आरभते । सः । एनम् । स-

---

आध्वरिकाणां प्रयाणादिमन्त्राणां ब्राह्मणम् । तत्र 'अच्छिन्नं तन्तुं पृथिव्या अनु गेषमित्याह सेतुमेव कृत्वाऽत्येति'* इति समाप्य शिष्टानां तेषां प्रकरणमुल्लङ्घ्यास्मिन्प्रदेशे ब्राह्मणमाम्नातं किमर्थमिति चिन्त्यम् । केचिदाहुः—उपानुवाक्यत्वेन काण्डविशेषप्रापणार्थमिति । अपरे तु ब्रुवते—एषां दीक्षितवादप्रसिद्ध्यर्थमस्मिन्ननुवाके एषां ब्राह्मणमाम्नायत इति । तत्र प्रयाणमन्त्रः—भद्रादभि श्रेय इति ॥ व्याख्यातश्चायम्† । अत्र किंचिद्विशेषं ब्राह्मणं दर्शयति—अग्निर्वै दीक्षितस्येति ॥ दीक्षितस्याग्निर्देवता । स चाग्निरस्माद्दीक्षितादेतर्हि अस्मिन् काले तिर

---

*सं. ६-१-४. †सं. १-२-३.[18]

रभते स एनꣳ सं पारयत्येदमगन्म देवयजनं पृथिव्या इत्याह देवयजनꣳ ह्येष पृथिव्या आगच्छति योयजते विश्वे देवा यदजुषन्त पूर्व

मिति । पारयति । एति । इदम् । अगन्म । देवयजनमिति देव—यजनम् । पृथिव्याः । इति । आह । देवयजनमिति देव—यजनम् । हि । एषः । पृथिव्याः । आगच्छतीत्या—गच्छति । [7]यः । यजते । विश्वे । देवाः । यत् । अजुषन्त । पूर्वे । इति ।

इव तिरोहित इव 'इदमो र्हिल्' 'एतेतौ रथोः' । कस्मिन् काले इत्याह—यर्हि यातीति । यस्मिन् काले अरण्योरग्नीन् समारोप्यायं याति तदास्मादग्निस्तिरोहित इव । सर्वात्मना तिरोधानं नास्तीति दर्शयितुमिवेत्युक्तम् । 'अनद्यतनेर्हिलन्यतरस्याम्' इति यच्छब्दाद्धिल् प्रत्ययः । ततश्च तं दीक्षितं तादृशमात्मनो देवतया अग्निना विहीनं रक्षांसि हन्तोः हन्तुमीश्वरमीश्वराणि । वचनव्यत्ययेनैकवचनम् । 'ईश्वरे तोसुन्कसुनौ' इति तोसुन् प्रत्ययः । यागविघ्नाचरणं हननम् । तत्र भद्रादभि श्रेय इत्यनया बृहस्पतिवत्यर्चा प्रयाणेन एतद्दोषप्रसङ्गाभावः । तथाहि—ब्रह्म वै देवानां बृहस्पतिः तमेवान्वारभते अनुसंधत्ते भवति । स एनं संपारयति अविघ्नेन निर्वर्तितयागं करोति । पार तीर कर्मसमाप्तौ । अथ देवयजनमेदमगन्मेत्युच्यते ॥

[7]विश्वे देवा इत्यादि ॥ एतद्धि विश्वे देवा जोषयन्ते सेवन्ते यद्ब्राह्म-

इत्याह विश्वे ह्येतद्देवा जोषयन्ते यद्ब्रा-
ह्मणा ऋक्सामाभ्यां यजुषा संतरन्त
इत्याहक्सामाभ्याꣳ ह्येष यजुषा संत
रति यो यजते रायस्पोषेण समिषा
मदेमेत्याहाशिषमेवैतामा शास्ते॥४

आह। विश्वे। हि। एतत्। देवाः। जोषयन्ते। यत्। ब्राह्मणाः। ऋक्सामाभ्यामित्यृक्साम-भ्याम्। यजुषा। सन्तरन्त इति सं-तरन्तः। इति। आह। ऋक्सामाभ्यामित्यृक्साम-भ्याम्। हि। एषः। यजुषा। सन्तरतीति सं-तरति। [8]यः। यजते। रायः। पोषेण। सामिति। इषा। मदेम। इति। आह। आशिषमित्या-शिषम्। एव। एताम्। एति। शास्ते॥ ४॥

यजमानो दीक्षाꣳ हन्तो ब्राह्मणाश्चतुर्विꣳशतिश्च॥१

णास्सेवन्ते। तस्माद्विश्वे देवा यदजुषन्त इति ब्राह्मणैः पूर्वैस्सेवित-मुच्यते। अचतुरादिसूत्रे ऋक्सामशब्दोऽचूप्रत्ययान्तो निपात्यते॥

[8]रायस्पोषेणेत्यादि॥ मदेमेत्येतामाशिषमनेनाशास्ते॥

इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये तृतीयकाण्डे
प्रथमप्रपाठके प्रथमोनुवाकः.

एष ते गायत्रो भाग इति मे सो-
माय ब्रूतादेष ते त्रैष्टुभो जागतो
भाग इति मे सोमाय ब्रूताच्छन्दो-
मानाꣳ साम्राज्यं गच्छेति मे सोमा-

[1–4]एषः । ते । गायत्रः । भागः । इति । मे । सोमाय । ब्रूतात् । एषः । ते । त्रैष्टुभः । जागतः । भागः । इति । मे । सोमाय । ब्रूतात् । छन्दोमानामिति छन्दः–मानाम् । साम्राज्यमिति सां–रा-

---

[1–4]पुरस्तात्सोमस्य क्रयाद्राजानमभिमन्त्रयते । एष वछीसोमस्तव गायत्रो भागः अंशः । 'कर्षात्वतः' इत्यन्तोदात्तत्वम् । एतदुक्तं भवति—गायत्रीविषयं यत्तव साम्राज्यं तस्येदं स्थानं इममधिष्ठाय तत्साम्राज्यं कुरुष्वेति । इत्थं मे मदर्थं मदीयं वा सोमं सोमाय राज्ञे ब्रूतात् ब्रूत । हे छन्दांसि । यद्वा—हे देवाः 'तस्य तात्' इति तादादेशः । एवं 'एष ते त्रैष्टुभः एष ते जागतः' इत्येतयोरपि वेदितव्यम् । भाग इत्युभयत्राप्यनुषज्यते । त्रिष्टुप्जगतीशब्दाभ्यामुत्सादित्वात्प्राग्दीव्यतीयोऽण् । छन्दांसि प्रधानानि वा । गायत्रीत्रिष्टुप्जगत्येतद्विषयं तत्संबन्धि यत्तव साम्राज्यादिकं तदेतेन वछीसोमेन गच्छ कुर्वित्यर्थः । एवं त्वां साम्राज्यं गमयामः अनेनाभिमन्त्रणेनेति भावः । शिष्टं स्पष्टम् । सम्यग्राजत इति सम्राट्, क्विप् 'मो राजिसमः क्वौ' इति मः । तस्य भावः साम्राज्यं गुणवचनत्वात् ष्यञ् । छन्दोविषयं तवैश्वर्यमित्यर्थः ॥

य व्रताद्यो वै सोमꣳ राजानꣳ साम्राज्यं लोकं गमयित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यं छन्दाꣳसि खलु वै सोमस्य राज्ञस्साम्राज्यो लोकः पुरस्तात्सोमस्य क्रयाज्यम् । गच्छ । इति । मे । सोमाय । व्रतात् । [5]यः । वै । सोमम् । राजानम् । साम्राज्यमिति सां–राज्यम् । लोकम् । गमयित्वा । क्रीणाति । गच्छति । स्वानाम् । साम्राज्यमिति सां–राज्यम् । छन्दाꣳसि । खलु । वै । सोमस्य । राज्ञः । साम्राज्य इति सां–राज्यः । लोकः । पुरस्तात् । सो-

---

[5]अथैतेषां मन्त्राणां ब्राह्मणम्—यो वै सोममिति ॥ लोकः प्रकाशः । साम्राज्यलक्षणं लोकं गमयित्वा यस्सोमं क्रीणाति स स्वानामात्मीयानां साम्राज्यं गच्छति । तिङः परत्वान्न निहन्यते । समानवाक्ये वा पदात्परत्वाभावात् । कः पुनः* साम्राज्यलक्षणो लोकः इत्याह—छन्दांसीत्यादि । साम्राज्यस्य छन्दोविषयत्वात् ताच्छब्द्यमुपचर्यते, व्यत्ययेन पुल्लिङ्गता । कथं-पुनस्तत्सोमो गमयितव्य इत्यत आह—पुरस्तादित्यादि । पुरस्तात् पूर्वस्मिन् काले । 'दिक्शब्देभ्यः' इत्यादिना अस्तातिः, 'अस्तात्ति च' इति पुरादेशः । एवमिति 'एष ते गायत्रः'†

---

*क—क्क पुनः. †सं. ३-१-२[1–4].

देवमभि मन्त्रयेत साम्राज्यमेव ॥५॥
एनं लोकं गमयित्वा क्रीणाति गच्छति स्वानाꣳ साम्राज्यं यो वै तानूनप्त्रस्य प्रतिष्ठां वेद प्रत्येव तिं

मंस्य । क्रयात् । एवम् । अभीति । मन्त्रयेत साम्राज्यमिति सां-राज्यम् । एव ॥ ५ ॥ एनम् लोकम् । गमयित्वा । क्रीणाति । गच्छति । स्वानाम् । साम्राज्यमिति सां-राज्यम् । [6]यः । वै तानूनप्त्रस्येति तानू-नप्त्रस्य । प्रतिष्ठामिति प्रति-

---

इत्यादिभिर्मन्त्रैरित्यर्थः । इष्टसिद्धिसमर्थनेन निगमयति—साम्राज्यमेवेत्यादि । एवं कुर्वन् साम्राज्यं लोकं गमयित्वैव एनं सो क्रीणाति, स्वयं च स्वानां साम्राज्यं गच्छति ॥

[6]अथ तानूनप्त्रस्यावघ्राणं विधास्यन्नाह—यो वै तानूनप्त्रस्येत्यादि ॥ तनूनामपां नप्ता चतुर्थस्तनूनपात् शरीरस्थोग्निः, तं यद्गृह्यते आज्यं तत्तानूनप्त्रम् । यद्यपि 'आपतये त्वा गृह्णामि' इत्याद्यापत्यादिभ्यः प्राणादिभ्यो ह्येतद्गृह्यते । तथाऽपि प्राधान्यात्तानूनप्त्रा व्यपदिश्यते । तस्य यः प्रतिष्ठां वेद स प्रतिष्ठत्येव ॥

---

[6]सं. १-२-१०[13—17].

ष्ठति ब्रह्मवादिनो वदन्ति न प्राभ-
न्ति न जुह्वत्यथ क्व तानूनप्त्रं प्रति
तिष्ठतीति प्रजापतौ मनसीति ब्रू-
यात्त्रिरव जिघ्रेत्प्रजापतौ त्वा मन-

स्थाम् । वेद । प्रतीति । एव । तिष्ठति । [7]ब्रह्मवा-
दिन इति ब्रह्म-वादिनः । वदन्ति । न । प्राभन्ती-
ति प्र-अभन्ति । न । जुह्वति । [8]अथ । क्व । तानू-
नप्त्रमिति तानू-नप्त्रम् । प्रतीति । तिष्ठति । इति ।
प्रजापताविति प्रजा-पतौ । मनसि । इति । ब्रू-
यात् । [9]त्रिः । अवेति । जिघ्रेत् । प्रजापताविति

---

[7]अधुना ब्रह्मवादिभिः पर्यनुयोजयति—ब्रह्मवादिन इत्यादि ॥ ब्रह्म वेदः तदर्थं वदितुं शीलमेषां ते ब्रह्मवादिनः । 'ब्रह्मणि वदः' इति णिनिः । वदन्ति प्रश्नं कुर्वन्ति—नेदं तानूनप्त्रं प्राभन्ति, न चेदं जुह्वति प्राश्नेन वा होमेन वा नास्य प्रतिष्ठेति ॥

[8]अथेदानीं तानूनप्त्रं क्व प्रति तिष्ठति, काऽस्य प्रतिपत्तिरिति इदानीं तेभ्य उत्तरं अन्येनैव दापयति—प्रजापताविति ॥ प्राजापत्यात्मनि प्रजानां वा पालके मनसि अस्य प्रतिष्ठेति ब्रूयात् ॥

[9]कः पुनस्तस्य प्रकार इत्यत्राह—त्रिरव जिघ्रेदिति ॥

मन्त्रमाह—प्रजापतावित्यादि ॥ गतम् ॥

सि जुहोमीत्येषा वै तानूनप्त्रस्य प्रतिष्ठा य एवं वेद प्रत्येव तिष्ठति यः ॥ ६ ॥ वा अध्वर्योः प्रतिष्ठां वेद प्रत्येव तिष्ठति यतो मन्येतानभिक्रम्य होष्यामीति तत्तिष्ठन्ना श्रावयेदेषा वा अध्वर्योः प्रतिष्ठा य ए-

प्रजा—पतौ । त्वा । मनसि । जुहोमि । इति । [10]एषा । वै । तानूनप्त्रस्येति तानू—नप्त्रस्य । प्रतिष्ठेति प्रति—स्था । यः । एवम् । वेद । प्रतीति । एव । तिष्ठति । [11]यः ॥ ६ ॥ वै । अध्वर्योः । प्रतिष्ठामिति प्रति—स्थाम् । वेद । प्रतीति । एव । तिष्ठति । यतः । मन्येत । अनभिक्रम्येत्यनभि—क्रम्य । होष्यामि । इति । तत् । तिष्ठन् । एति । श्रावयेत् । एषा । वै । अध्वर्योः । प्रतिष्ठेति प्रति—स्था । [12]यः ।

---

[10]एषा वा इत्यादि प्राजापत्यात्मब्राह्मणम् ॥ गतमेव ॥

[11]यो वा अध्वर्योः प्रतिष्ठामित्यादि ॥ अतीत्यावस्थानमभिक्रमणम् । यतोनभिक्रम्य होष्यामीति तत्तत्र तिष्ठन्नाश्रावयेत् ततो होष्यन्नाक्रामेदिति । एवमनुष्ठानं अध्वर्योः प्रतिष्ठाहेतुत्वात्प्रतिष्ठा ॥

[12]य एवमित्यादि ॥ गतम् ॥

वं वेद प्रत्येव तिष्ठति यदभिक्रम्य जुहुयात्प्रतिष्ठाया इयात्तस्मात्समानत्र तिष्ठता होतव्यं प्रतिष्ठित्यै यो वा अध्वर्योस्स्वं वेद स्ववानेव भवति स्रुग्वा अस्य स्वं वायव्यमस्य ॥ ७ ॥ स्वं चमसोस्य स्वं यद्वाय-

एवम् । वेद । प्रतीति । एव । तिष्ठति । [13]यत् । अभिक्रम्येत्यभि–क्रम्य । जुहुयात् । प्रतिष्ठाया इति प्रति–स्थायाः । इयात् । तस्मात् । समानत्र । तिष्ठता । होतव्यम् । प्रतिष्ठित्या इति प्रति–स्थित्यै । [14]यः । वै । अध्वर्योः । स्वम् । वेद । स्ववानिति स्व-वान् । एव । भवति । स्रुक् । वै । अस्य । स्वम् । वायव्यम् । अस्य ॥ ७ ॥ स्वम् । चमसः । अस्य । स्वम् ।

---

[13]विपर्यये दोषमाह—यदभिक्रम्येत्यादि ॥ यद्याश्रावणस्थानादभिक्रम्य जुहुयात् प्रतिष्ठाया इयात् च्यवेत । तस्मात्समानत्र समानदेशे तिष्ठता होतव्यं आश्रवणदेश एवेत्यर्थः । प्रतिष्ठित्यै भवति । तदेतदन्यत्र हविर्यज्ञेभ्योऽभिक्रामं जुहोति हविर्यज्ञेषु भवतीति ॥

[14]यो वा अध्वर्योस्स्वं वेदेत्यादि ॥ स्रुगादयः अध्वर्योस्स्वानि धनानि । तत्र सोमविषयत्वादनुवाकस्य वायव्यचमसयोरेव ग्रह-

व्यं वा चमसं वाऽनन्वारभ्याश्राव-
येत्स्वादियात्तस्मादन्वारभ्याश्राव्य ꣳ
स्वादेव नैति यो वै सोममप्रतिष्ठा-
प्य स्तोत्रमुपाकरोत्यप्रतिष्ठितस्सो-
मो भवत्यप्रतिष्ठितस्स्तोमोप्रतिष्ठिता-
न्युक्थान्यप्रतिष्ठितो यजमानोप्रति-

यत् । वायव्यम् । वा । चमसम् । वा । अनन्वा-
रभ्येत्यननु—आरभ्य । आश्रावयेदित्या—श्रावयेत् ।
स्वात् । इयात् । तस्मात् । अन्वारभ्येत्यनु—आर-
भ्य । आश्राव्यमित्या—श्राव्यम् । स्वात् । एव ।
न । एति । [15]यः । वै । सोमम् । अप्रतिष्ठाप्येत्य-
प्रति—स्थाप्य । स्तोत्रम् । उपाकरोतीत्युप—आक-
रोति । अप्रतिष्ठित इत्यप्रति—स्थितः । सोमः ।
भवति । अप्रतिष्ठित इत्यप्रति—स्थितः । स्तोमः ।

गम् । यद्वायव्यं वा चमसं वेति । तस्मादित्यादि । वाय-
व्यं वा चमसं वा हस्तेऽन्वारभ्य हस्ते गृहीत्वा आश्राव्यमेवं कुर्वन्
स्वादेव नैति ॥

[15]यो वै सोममप्रतिष्ठाप्येत्यादि ॥ सोममप्रतिष्ठाय अप्रतिष्ठां
गमयित्वा यः स्तोत्रमुपाकरोति तस्य सोमादयोप्रतिष्ठिताः स्वका-
र्यकरणे असमर्थाः भवेयुः । उक्थानि शस्त्राणि ॥

ष्ठितोऽध्वर्युर्वायव्यं वै सोमस्य प्रति-
ष्ठा चमसोस्य प्रतिष्ठा सोमस्स्तो-
मस्य स्तोम उक्थानां ग्रहं वा गृ-
हीत्वा चमसं वोन्नीय स्तोत्रमुपाकु-

अप्रतिष्ठितानीत्यप्रति-स्थितानि । उक्थानि । अप्र-
तिष्ठित इत्यप्रति-स्थितः । यजमानः । अप्रति-
ष्ठित इत्यप्रति-स्थितः । अध्वर्युः । [16]वायव्यम् ।
वै । सोमस्य । प्रतिष्ठेति प्रति-स्था । चमसः ।
अस्य । प्रतिष्ठेति प्रति-स्था । सोमः । स्तोमस्य ।
स्तोमः । उक्थानाम् । [17]ग्रहम् । वा । गृहीत्वा ।
चमसम् । वा । उन्नीयेत्युत्-नीय । स्तोत्रम् ।

---

[16]कदा पुनः प्रतितिष्ठतीत्याह—वायव्यं वा इत्यादि ॥ वायव्यं पात्रविशेषः । यत्र ग्रहा गृह्यन्ते तत्र सोमस्य प्रतिष्ठा तत्र सोमः प्रतितिष्ठतीति । चमसो वायव्यस्य प्रतिष्ठा तत्र वायव्यं प्रतितिष्ठतीति मुख्ये चमसे संपातमवनयतीति । अस्य सोमस्य प्रतिष्ठाभूतस्यापि वायव्यस्य चमसः प्रतिष्ठेति प्राधान्येन निर्दिष्टस्य वायव्यस्यापि अन्वादेशत्वादस्येत्यनुदात्तत्वम् । प्रत्येव सोममित्यादि । तेषामेव प्रस्तुतत्वात् चमसोस्य सोमस्य प्रतिष्ठेति ॥

[17]कथं पुनः सोमः प्रतिष्ठां गमयितव्य इत्याह—ग्रहं वेत्यादि ॥ ग्रहचमसशब्दाभ्यां विशिष्टाधारवर्तिसोम उच्यते । तत्र ग्रहणं

यात्प्रत्येव सोमꣳ स्थापयति प्रति स्तोमं प्रत्युक्थानि प्रति यजमानस्तिष्ठति प्रत्यध्वर्युः ॥ ८ ॥

उपाकुर्यादित्युप–आकुर्यात् । [18]प्रतीति । एव । सोमम् । स्थापयति । प्रतीति । स्तोमम् । प्रतीति । उक्थानि । प्रतीति । यजमानः । तिष्ठति । प्रतीति । अध्वर्युः ॥ ८ ॥

एव तिष्ठति यो वायव्यमस्य ग्रहं वैकान्न विꣳशतिꣳ ॥ २ ॥

ग्रहस्योन्नयनम् । उन्नयनमेव चमसस्य ग्रहणम् । तस्मादुच्यते ग्रहं वा गृहीत्वा चमसं वोन्नीयेति ॥

[18]एवं हि सोमः प्रतिष्ठां गमित एवेत्याह*—प्रत्येव सोममित्यादि ॥ ग्रहचमसशब्दाभ्यां स्तोत्रोपाकरणं कृतं भवति । ग्रहप्रतिष्ठात्वात् सोमस्य, तस्य चमसप्रतिष्ठात्वात् । ततश्च सोमादीन् प्रतिष्ठापयति, यजमानश्च प्रतितिष्ठति, अध्वर्युश्च प्रतितिष्ठतीत्येव ॥

इति तृतीये प्रथमे द्वितीयोनुवाकः.

---

* क–एवं हि सोमं प्रतिष्ठां गमयित्वैव इत्याह–

यज्ञं वा एतत्सं भरन्ति यत्सोमक्र-
यण्यै पदं यज्ञमुखꣳ हविर्धाने यर्-
हि हविर्धाने प्राचीं प्रवर्तयेयुस्तर्-
हि तेनाक्षमुपाञ्जयाद्यज्ञमुख एव य-
ज्ञमनु सं तनोति प्राञ्चमग्निं प्र हर-

[1]यज्ञम् । वै । एतत् । समिति । भरन्ति । यत् । सोमक्रयण्या इति सोम–क्रयण्यै । पदम् । यज्ञ-मुखमिति यज्ञ–मुखम् । हविर्धाने इति हविः–धाने । यर्हि । हविर्धाने इति हविः–धाने । प्राचीं इति । प्रवर्तयेयुरिति प्र–वर्तयेयुः । तर्हि । तेन । अक्षम् । उपेति । अञ्जयात् । यज्ञ-मुख इति यज्ञ–मुखे । एव । यज्ञम् । अनु । स-

---

[1]अथ हविर्धानयोरक्षोपाञ्जनं विधास्यन्नाह—यज्ञं वा इत्यादि॥ यज्ञमेवैतत्सम्भरन्ति यत्सोमक्रयण्याः पदं संभरन्ति । यज्ञस्य प्रधानोपकरणत्वात् । यज्ञमुखं हविर्धाने यज्ञस्य मुखमिव उपक्रमणमेवैते हविर्धाने भवतः । हवींषि निधीयन्ते अनयोरिति हविर्धाने शकटे । यस्मादेवं तस्मात् यर्हि यस्मिन् काले हविर्धाने प्राची प्रवर्तयेयुः तर्हि तस्मिन्काले तेन पदतृतीयेन अक्षं अक्षस्य धुरं उपाञ्जयात् पत्नी । यज्ञमुख एव उपक्रम एव यज्ञं समस्तं अनुसन्ततनोति अनुसन्ततं करोति ॥

न्त्युत्पत्नीमा नयन्त्यन्वनाꣳसि प्र
वर्तयन्त्यथ वा अस्यैष धिष्णियो
हीयते सोनु ध्यायति स ईश्वरो रु-
द्रो भूत्वा ॥ ९ ॥ प्रजां पशून् य-
जमानस्य शमयितोर्यर्हि पशुमा-

मितिं । तनोति । [2]प्राञ्चम् । अग्निम् । प्रेतिं । हर-
न्ति । उदितिं । पत्नीम् । एतिं । नयन्ति । अन्वि-
तिं । अनाꣳसि । प्रेतिं । वर्तयन्ति । अथं । वै ।
अस्य । एषः । धिष्णियः । हीयते । सः । अन्वि-
तिं । ध्यायति । सः । ईश्वरः । रुद्रः । भूत्वा ॥९॥
प्रजामितिं प्र—जाम् । पशून् । यजमानस्य । शा-
मयितोः । [3]यर्हि । पशुम् । आप्रीतमित्या—प्रीतम् ।

---

[2]प्राञ्चमग्निं प्र हरन्तीत्यादयो विधयः ॥ प्राञ्चं प्रहरन्ति । पत्नी-
मुदानयन्ति । अनांसि अनुप्रवर्तयन्ति । अथ वै इदानीं अस्याग्नेः
धिष्णियो हीयते प्रहीयते । ततश्च स हीनधिष्ण्योग्निरनुध्याय-
ति अनुचिन्तयति धिष्ण्यविरहितोहम् । स तादृशो रुद्रः क्रूरो
भूत्वा यजमानस्य प्रजां पशूंश्च शमयितोः शमयितुं नाशयितु-
मीश्वरश्शक्त एव स्यात् ॥

[3]तत्रायं समाधिरित्याह—यर्हीत्यादि ॥ यर्हि यस्मिन् काले
पशुमाप्रीतं इष्टकामत्वादीषत्प्रियमिति केचित् यदा—उदञ्चं नय-

प्रीतमुदश्रं नयन्ति तर्हि तस्य प-
शुश्रपण२ हरेत्तेनैवैनं भागिनं करो-
ति यजमानो वा आहवनीयो यज-
मानं वा एतद्धि कर्षन्ति यदाहव-

उदश्रम् । नयन्ति । तर्हि । तस्य । पशुश्रपणमिति पशु–श्रपणम् । हरेत् । तेन । एव । एनम् । भागिनम् । करोति । [4]यजमानः । वै । आहवनीय इत्या–हवनीयः । यजमानम् । वै । एतत् । वीति । कर्षन्ति । यत् । आहवनीयादित्या–हवनीयात् ।

न्ति तर्हि तदानीमेव पशुश्रपणं अग्निं तस्याहवनीयस्यैकदेशं हरेत् तेनैवैनं भागिनं करोति ततश्च भागलाभेन तृप्तः प्रजां पशूंश्च न शमयति ॥

[4]अथाहवनीयात्पशुश्रपणहरणे दोषमाह—यजमानो वा इत्यादि ॥ ततश्च यजमानो निरात्मकस्स्यादिति । समाधत्ते—स वैव स्यात् स एव आहवनीयैकदेशः पशुश्रपणस्स्यात् । ननु चोक्तम् यजमानो निरात्मकस्स्यादिति; ननु चेदमप्युक्तम् 'स ईश्वरो रुद्रो भूत्वा प्रजां पशून्यजमानस्य शमयितोः' इति । तस्मादग्नेर्भागवत्त्वाय स वैव स्यात् स एव भागतृप्तो यजमानं सात्मानं करिष्यतीति । पक्षान्तरमप्याह—निर्मन्थ्यं वा कुर्यात् पशुश्रपणं यजमानस्य सात्मत्वाय । ननु निर्भागोग्निः प्रजां पशून्यजमानस्य नाशयेत्, अत्र स्वयमाचार्येणैव समाधानमुक्तम्—आहवनी-

नीर्यात्पशुश्रपंणꣳ हरंन्ति स वैव स्यान्निर्मन्थ्यं वा कुर्याद्यजंमानस्य सात्मत्वाय यदि पशोरवदानं नश्ये-दाज्यस्य प्रत्याख्यायमवं द्येत्सैव

पशुश्रपंणमितिं पशु–श्रपंणम् । हरंन्ति । सः । वा । एव । स्यात् । निर्मन्थ्यमितिं निः–मन्थ्यम् । वा । कुर्यात् । यजंमानस्य । सात्मत्वायेतिं सात्म–त्वायं । यदिं । पशोः । अवदानमित्यंव–दानम् । नश्येत् । आज्यस्य । प्रत्याख्यायमितिं प्रति–आख्यायंम् । अवेतिं । द्येत् । सा । एव । ततः ।

यादुल्मुकमादाय अरणी उपसंगृह्य पूर्वं पशोः प्रतिपद्यते निर्म-न्थ्येन वा पशुं श्रपयन्ति वपया तत्सहोल्मुकमाहरन्तीति । एवमुल्मुकस्याग्रतः पशोर्नयनेन अग्निर्भागवान् भवति । तस्य पु-नराहरणेन यजमानश्च सात्मा संपद्यते इति । पुराणगार्हपत्यस्स इत्युच्यत इति केचित् । अस्मिन् पक्षे गार्हपत्यादुल्मुकमादाय दक्षिणया द्वारोपनिर्हृत्य दक्षिणेन सदः परीत्य दक्षिणेन मार्जा-लीयं शिष्ण्यं पर्याहृत्य दक्षिणेन यूपं चाहवनीयं च अतिहृत्य अन्तरेण चात्वालोत्करावुदङ्नुपनिर्हृत्य तेन पशुं श्रपयेयुः ॥

यदि पशोरित्यादि ॥ यावन्ति पशोरवदानानि नश्यन्ति तावत्कृत्व आज्यस्यावद्येत् । छान्दसो णमुल् । यद्वा—तत्प्रत्या-ख्यायं आज्यस्यावद्येत् प्रत्याम्नायतयेति यावत् । सैव ततोवदान-

तत॒ः प्रायश्चि॒त्तिर्ये प॒शुं वि॑मथी॒रन्
यस्ता॒न्का॒मये॒तार्ति॒मार्च्छे॑युरि॒ति कु-
वि॒द॒ङ्गेति॒ नमो॑वृक्ति॒वत्यृ॒चाऽऽग्नी॑ध्रे

प्रायश्चित्तिः । [6]ये । प॒शुम् । वि॒म॒थी॒रन्नि॒ति॑ वि-
म॒थी॒रन् । यः । तान् । का॒मये॑त । आर्ति॑म् ।
ए॒ति॑ । ऋ॒च्छे॒युः । इ॒ति॑ । कु॒वित् । अ॒ङ्ग । इ॒ति॑ ।
नमो॑वृक्ति॒व॒त्येति॒ नमो॑वृक्ति-व॒त्या । ऋ॒चा । आ-

विनाशदोषान्मोचनाय प्रायश्चित्तिः, दोषनिर्घातार्थं कर्म प्रायश्चित्तिः, । *प्रायः प्रायेण कर्मणोपगमः तदर्था चित्तिः ज्ञानं प्रायश्चित्तिः, तद्दोषनिर्घातार्थत्वात् । पारस्करादित्वात्सुट् । अमुन्नन्तो वा प्रायश्शब्दः, छान्दसमाद्युदात्तत्वम् ॥

[6]ये पशुमिति ॥ पश्वर्थं ये विमथ्नीरन् विमाथं कलहं कुर्वन्ति यस्तान् कामयेत एते आर्तिमार्छेयुरिति स आग्नीध्रे जुहुयात् नमोवृक्तिशब्दवत्या 'कुविदङ्ग यवमन्तः'† इत्येतया ऋचा । सोनेन होमेन एषां विमाथकारिणां नमोवृक्तिं वृङ्क्ते नमोन्नं तस्य वर्जनं वृङ्क्ते वर्जयति करोति । रायस्पोषं पुष्णातीति वद्रष्टव्यम् । यद्वा—तदेव वर्जनीयवृक्तिः तदेषां वर्जयति । ऊर्यादित्वेन गतित्वात् 'तादौ च' इति नमश्शब्दस्य प्रकृतिस्वरत्वम्, अव्ययपूर्वपदप्रकृतिस्वरत्वं वा । ततस्ते तादृक् तदानीमेव आर्तिमार्छन्ति नश्यन्ति । इयमृक्

---

* त–'प्रायः पापं विजानीयाच्चित्तं तस्य विनिष्कृतिः' इत्यधिकः पाठः.
† तै. सं. १-८-२१.[5]

जुहुयान्नमोवृक्तिमेवैषां वृक्ते ताजगार्तिमार्छन्ति ॥ १० ॥

ग्रीध्र इत्याग्निध्रे । जुहुयात् । नमोवृक्तिमिति नमः-वृक्तिम् । एव । एषाम् । वृक्ते । ताजक् । आर्तिम् । एति । ऋच्छन्ति ॥ १० ॥

भूत्वा ततष्षड्विंशतिश्च ॥ ३ ॥

'स्वाद्वीं त्वा'* इत्यत्र व्याख्याता* । यथा तु खलु यवमुद्गव्रीह्यादिबहुधान्यवन्तः पुरुषाः यवादीन् सहोत्पद्यमानान् अनुपूर्वं परिपाट्या वियूय पृथक्कृत्य परस्परतः काण्डफलादिभ्यो वा तुषकणादिभ्यो वा पृथक्कृत्य दधति तथा यूयमपि हे देवाः इहेह सर्वत्र एषां भोजनानि कृणुत । केषाम्? ये अस्माकमुपकारिणः बर्हिषः यज्ञस्य नमोवृक्तिं अन्नस्य पशुलक्षणस्य दोषं विनाशं न जग्मुः न गताः न कुर्वन्ति । ये पुनर्नमोवृक्तिं कुर्वन्ति हविर्विनाशयन्ति तेषां भोजनानि मा काष्टं ते तु तद्भावेनानेन होमेन नश्यन्त्विति ॥

इति तृतीये प्रथमे तृतीयोनुवाकः.

---

* तै. सं. १-८-२१.[5]

प्रजापतेर्जायमानाः प्रजा जाताश्च
या इमाः । तस्मै प्रति प्र वेदय चि-
कित्वाꣳ अनु मन्यताम् । इमं पशुं

[1]प्रजापतेरिति प्रजा–पतेः । जायमानाः । प्रजा इति प्र–जाः । जाताः । च । याः । इमाः । तस्मै । प्रति । प्रेति । वेदय । चिकित्वान् । अन्विति । मन्यताम् । [2]इमम् । पशुम् । पशुपत इति पशु–

---

[1]अथ पशोरुपाकरणमन्त्रौ—प्रजापतेर्जायमाना इति द्वौ ॥ तत्र प्रथमोनुष्टुप्, द्वितीयस्त्रिष्टुप् । तत्र 'प्राजापत्या वै पशवस्तेषां रुद्रोधिपतिः'* इति सर्वाः प्रजाः प्राजापत्याः प्रजापतेरपत्यानि । रुद्रस्तु तासामधिपतिः । तत एव ताभ्यां मन्त्राभ्यां पशुं प्रति प्रवेदयति आत्मनोनपराधाय । मन्त्रार्थस्तु—जायमानाः जाताश्च या इमास्तास्सर्वाः प्रजापतेः प्रजाः अपत्यानि । तस्मात्तस्मै प्रजापतये प्रजानामुत्पादयित्रे प्रतिप्रवेदय प्रतिबोधय । हे पशो स चिकित्वान् एतज्ज्ञातवान् अनुमन्यतां त्वदालम्भनमनुजानातु । यद्वा—चिकित्वान् सर्वार्थज्ञः । कित ज्ञाने, छान्दसस्य लिटः क्वसुरादेशः, 'दीर्घादटि समानपादे' इति रुत्वम् ॥

[2]अथ द्वितीयः—अत्र प्रत्यक्षवदुच्यते—हे पशुपते पशूनां स्वामिन् ते तव स्वभूतमिमं पशुं अद्येदानीं सुकृतस्यास्य कर्मणो मध्ये स्थाने बध्नामि । सूपमानात्कदुत्तरपदान्तोदात्तत्वम् । हे

---

* तै. सं. ३-१-५[1].

पशुपते ते अद्य बध्नाम्यग्ने सुकृतस्य मध्ये । अनु मन्यस्व सुयजा यजाम जुष्टं देवानामिदमस्तु हव्यम् । प्रजानन्तः प्रति गृह्णन्ति पूर्वे प्राणमङ्गेभ्यः पर्याचरन्तम् ।

पते । ते । अद्य । बध्नामि । अग्ने । सुकृतस्येति सु–कृतस्य । मध्ये । अन्विति । मन्यस्व । सुयजेति सु–यजा । यजाम । जुष्टम् । देवानाम् । इदम् । अस्तु । हव्यम् । [3]प्रजानन्त इति प्र–जानन्तः । प्रतीति । गृह्णन्ति । पूर्वे । प्राणमिति प्र–अनम् । अङ्गेभ्यः । परीति । आचरन्तमित्या–चरन्-

---

अग्ने अग्निरूपेण स्थित भगवन् तदनुमन्यस्व अनुजानीहि । सुयजा सुष्ठु यष्ट्रा शोभनयागहेतुना । यजेर्विच् । अनेन पशुना देवान् यजाम । जुष्टं प्रियं देवानामिदं हव्यं हविरस्तु । 'नित्यं मन्त्रे' इति जुष्टशब्दः आद्युदात्तः । हवमर्हतीति दण्डादित्वात् यः । त्वया ह्ययमनुमतः सुयट् स्यात् । तथा च सति [इदं हव्यं देवानां प्रियं भवेदिति भावः] ॥

[3]जुहोति—प्रजानन्त इति पञ्चभिः ॥ तत्र प्रथमा त्रिष्टुप् । प्रजानन्तः देवाः पर्याचरन्तं परितः सर्वतो निष्क्रम्य आचरन्तं आभिमुख्येन गच्छन्तं तव प्राणं आत्मानं प्रतिगृह्णन्तु । ततः स्वर्गं

सुवर्गं याहि पथिभिर्देवयानैरोषधीषु प्रतितिष्ठा शरीरैः । येषामीशे ॥ ११ ॥ पशुपतिः पशूनां चतुष्पदामुत च द्विपदाम् । निष्क्रीतोयं

न्तम् । सुवर्गमिति सुवः—गम् । याहि । पथिभिरिति पथि—भिः । देवयानैरिति देव—यानैः । ओषधीषु । प्रतीति । तिष्ठ । शरीरैः । [4]येषाम् । ईशे । ॥ ११ ॥ पशुपतिरिति पशु—पतिः । पशूनाम् । चतुष्पदामिति चतुः—पदाम् । उत । च । द्विपदामिति द्वि—पदाम् । निष्क्रीत इति निः—क्रीतः ।

लोकं याहि गच्छ पथिभिर्देवयानैः देवा यैर्यान्ति तैः पथिभिः ओषधीषु शरीरैः शरीरावयवैः यज्ञार्थमोषध्यात्मना प्रतितिष्ठ प्रतिष्ठितो वर्तस्व । 'द्व्यचोतस्तिङः' इति दीर्घत्वम् ॥

[4]अथ द्वितीया—येषामिति त्रिष्टुप् ॥ येषां पशूनामीशे ईष्टे पशुपतिः । 'लोपस्त आत्मनेपदेषु' इति तलोपः । चतुष्पदां गवादीनां उत च अपि च द्विपदां मनुष्यादीनां च येषामीष्टे । 'संख्यासुपूर्वस्य' इति पादशब्दस्य लोपः, 'पादः पत्' इति पद्भावः, 'द्वित्रिभ्यां पद्दन्' इति द्विपदामित्यस्योत्तरपदान्तोदात्तत्वम् । तेभ्यो निष्क्रीतः निष्कृष्य परिगृहीतः अयं पशुः यज्ञियं यज्ञार्हं भागं एतु गच्छतु यज्ञभागतां प्रतिपद्यताम् । यद्वा—पशुपतेस्स्वभूतेभ्यः पशुभ्यो निष्क्रीतोयं निष्कृष्य क्रीतः

यज्ञियं भागमेतु रायस्पोषा यजमानस्य सन्तु । ये बध्यमानमनु बध्यमाना अभ्यैक्षन्त मनसा चक्षुषा च । अग्निस्ताꣳ अग्रे प्र मुमोक्तु देवः प्रजापतिः प्रजया सं वि-

अयम् । यज्ञियम् । भागम् । एतु । रायः । पोषाः । यजमानस्य । सन्तु । [5]ये । बध्यमानम् । अन्विति । बध्यमानाः । अभ्यैक्षन्तेत्यभि—ऐक्षन्त । मनसा । चक्षुषा । च । अग्निः । तान् । अग्रे । प्रेति । मुमोक्तु । देवः । प्रजापतिरिति प्रजा—पतिः । प्र-

---

यज्ञभुजां स्वभूतो भवतु । 'यज्ञर्त्विग्भ्याम्' इति घः । किं च—रायो धनस्य पशुलक्षणस्य पोषाः पुष्टयः यजमानस्य सन्तु, माऽपक्रामिषुः अस्मात्पशवः । 'ऊडिदम्' इति रायष्षष्ठ्या उदात्तत्वम्, 'षष्ठ्याः पति पुत्र' इति सत्वम् ॥

[5]अथ तृतीया—ये बद्ध्यमानमनु बद्ध्यमाना इति त्रिष्टुप् ॥ ये बध्यमानमिमं पशुं अनुबध्यमानाः हृदयेनानुरज्यमानाः अभ्यैक्षन्त आभिमुख्येन पश्यन्ति मनसा चक्षुषा च न जहति स्नेहानुषङ्गात् कारुण्याद्वा । छान्दसो लङ् । तान् सर्वान् अग्निर्देवः अग्रे प्रथमं प्रमुमोक्तु प्रमुञ्चतु ततो मानसाद्दुःखात् । मुचेः छान्दसश्शपश्लुः । प्रजापतिः प्रजानां पतिश्च ततस्तान् मुञ्चतु प्रजया ऐकमत्यं गत इत्यर्थः । 'समो गमृच्छि' इत्यात्मनेपदम् ॥

दानः । य आरण्याः पशवो विश्व-
रूपा विरूपास्सन्तो बहुधैकरूपाः ।
वायुस्ताꣳ अग्रे प्र मुमोक्तु देवः प्र-
जापतिः प्रजया संविदानः । प्रमुञ्च-

जयेति प्र–जया । संविदान इति सं–विदानः । [6]ये । आरण्याः । पशवः । विश्वरूपा इति विश्व–रूपाः । विरूपा इति वि–रूपाः । सन्तः । बहुधेति बहु–धा । एकरूपा इत्येक–रूपाः । वायुः । तान् । अग्रे । प्रेति । मुमोक्तु । देवः । प्रजापतिरिति प्रजा–पतिः । पजयेति प्र–जया । संविदान इति सं–विदानः । [7]प्रमुञ्चमाना इति प्र–मुञ्चमानाः ॥१२॥

---

[6]अथ चतुर्थी—य आरण्या इति त्रिष्टुप् ॥ ये आरण्याः अरण्ये भवाः पशवः विश्वरूपाः सर्वरूपान्विताः विरूपाः विविधरूपाः । एवं बहुधा सन्तोपि एकरूपाः एकस्वभावाः नियतैकस्वभावाः अत एवेमं पशुं बध्यमानं अनुबध्यमाना मनसा चक्षुषा चाभ्येक्षन्त । तान् सर्वान्वायुर्देवः प्रमुमोक्तु वायुरारण्यानां पशूनामधिपतिरिति भावः । शेषं समानम् । एतेन होमेन सर्वे पशवः तृप्ता भवन्त्विति ॥

[7]अथ पञ्चमी—प्रमुञ्चमाना इति त्रिष्टुप् ॥ प्रमुञ्चमानाः इमं पशुं त्यक्त्वा गच्छन्तः यूयं भुवनस्य भूतजातस्य रेतः कारणं

मानाः ॥ १२ ॥ भुवनस्य रेतो गातुं धत्त यजमानाय देवाः । उपाकृतꣳ शशमानं यदस्थाज्जीवं देवानामप्येतु पाथः । नाना प्राणो यजमान-

भुवनस्य । रेतः । गातुम् । धत्त । यजमानाय । देवाः । उपाकृतमित्युप–आकृतम् । शशमानम् । यत् । अस्थात् । जीवम् । देवानाम् । अपीति । एतु । पाथः । [8]नाना । प्राण इति प्र–अनः । य-

---

यागद्वारेणोत्पत्तिहेतुं हे देवाः प्राणाः एतस्य हन्यमानस्य पशोः यूयं यजमानाय गातुं गतिं धत्त दत्त पुण्यान् लोकान् गन्तुं मार्गं कुरुत । यद्वा—यजमानाय गातुं गमनं यजमानेन संगतिं धत्त कुरुत वधादवध्यमानं मा कार्ष्ट । किं च—उपाकृतमिमं पशुं शशमानं संगच्छत् सर्वानवयवान् व्याप्नुवत् । शशप्लुतगतौ उदात्तेत्, ताच्छीलिकश्चानश् । अत एव लसार्वधातुकानुदात्तत्वाभावः । यदत्र पशौ अस्थात् तिष्ठति तत्सर्वं पाथः अन्नं मांसलक्षणं देवानां जीवं प्राणं अप्येतु अनु प्रविशतु । एतदुक्तं भवति—पशोरस्य हन्यमानस्य प्राणाः यजमानस्येष्टावाप्तिहेतवः सन्तु, मांसं तु देवतानां स्थितये भवत्विति । तिष्ठतेश्छान्दसो लुङ्, 'गातिस्थ' इति सिचो लुक् ॥

[8]पशुं नीयमानमभिमन्त्रयते—नानेति त्रिष्टुभा ॥ नाना ह्यस्त्वः पशुना पशुप्राणेन यजमानस्य प्राणः तेन तदन्वारम्भदो-

स्य पशुना यज्ञो देवेभिस्सह देव-
यानः । जीवं देवानामप्येतु पाथ-
स्सत्यास्सन्तु यजमानस्य कामाः ।
यत्पशुर्मायुमकृतोरौ वा पद्भिराह-
जमानस्य । पशुना । यज्ञः । देवेभिः । सह । देव-
यान इति देव–यानः । जीवम् । देवानाम् । अ-
पीति । एतु । पाथः । सत्याः । सन्तु । यजमान-
स्य । कामाः । [9]यत् । पशुः । मायुम् । अकृत ।
उरः । वा । पद्भिरिति पत्–भिः । आहृत इत्या–

षाभावः । 'मृत्यवे वा एष नीयते'* इत्यादि ब्राह्मणम् । यज्ञश्चः देवेभिः देवैः पशुप्राणैस्सह देवयानः देवान् गन्ता देवानां जीवमप्येतु । पाथः पशुशरीरलक्षणमन्नं च देवानां जीवमप्येतु । ततश्च सत्या अवितथा यजमानस्य कामास्सन्तु ॥

[9]संज्ञप्ते संज्ञप्तहोमं जुहोति—यत्पशुरित्यनुष्टुभा ॥ अकृतेति प्रथमपादान्तः । मायुः दुःखहेतुकश्शब्दः । पद्भिश्च उरआहननं दुःखेन शब्दादिचिकीर्षा सर्वस्य पशोर्जायते, अशक्त्या तु शब्दादिकं तत्र न करोति । अत्र शब्दादिकरणेन तन्निमित्तं चिकीर्षा लक्ष्यते, तेन नित्यो विधिः सत्यसति वा शब्दकरणादौ भवति । अयमर्थः—यद्यस्माद्दुःखात् पशुर्मायुं शब्दं अकृत करोति । छान्दसो लुङ् । यस्माद्वा दुःखाद्दुरः आत्मीयं पद्भिराहते आहन्ति अभिपीडयति एतदुभयं चिकीर्षति, तस्मात्ता-

* तै. सं. ३–१–५[3]

ते । अग्निर्मा तस्मादेनसो विश्वा-
न्मुञ्चत्वꣳहसः । शमितार उपेतन
यज्ञम् ॥ १३ ॥ देवेभिरिन्वितम् ।
पाशात्पशुं प्र मुञ्चत बन्धाद्यज्ञपतिं

हते । अग्निः । मा । तस्मात् । एनसः । विश्वात्। मुञ्चतु । अꣳहसः । [10]शमितारः । उपेतनेत्युप-एतन । यज्ञम् ॥ १३ ॥ देवेभिः । इन्वितम् । पाशात् । पशुम् । प्रेति । मुञ्चत । बन्धात् । यज्ञप-

---

दृशदुःखोपादानप्रभवात् एनसः पापात् विश्वात् विश्वस्मात् । छान्दसः स्मादादेशाभावः । अंहसः पापतमात् । पुनश्श्रुत्या अतिशयो गम्यते । ईदृशात्पापादग्निर्मा मुञ्चतु ॥

[10]वपाश्रपणीभ्यां पशुमुपेतोऽध्वर्युर्यजमानश्च—शमितार इत्यनुष्टुभा। 'उपेतन' इति प्रथमपादान्तः ॥ हे शमितारः शमयितारः संस्कर्तारः । ण्यन्तात्तृचि 'शमिता यज्ञे' इति णिलोपो निपात्यते, आमन्त्रिताद्युदात्तत्वम् । उपेतन उपगच्छत यज्ञं प्रवर्तयतेति यावत् । एतेर्लोटि 'तप्तनप्तनथनाश्च' इति तस्य तनबादेशः, पित्त्वेन कित्त्वाभावाद्गुणः, एङि पररूपत्वम्, 'एत्येधत्यूठ्सु' इति वृद्धिर्व्यत्ययेन न प्रवर्तते, 'चादिलोपे विभाषा' इति निघाताभावः । आमन्त्रितस्याविद्यमानत्वात् आख्यातं न निहन्यते इति केचित् । उपसर्गस्य तिङन्तेऽनुप्रवेशात् धातोरुदात्तत्वे 'तिङि चोदात्तवति' इति गतेरनुदात्तत्वं, 'उदात्तवता तिङा' इति

परि । अदितिः पाशं प्र मुमोक्त्वेतं
नमः पशुभ्यः पशुपतये करोमि ।
अरातीयन्तमधरं कृणोमि यं द्वि-
ष्मस्तस्मिन्प्रति मुञ्चामि पाशम् ।

तिमिति यज्ञ–पतिम् । परि । [11]अदितिः । पाशम् । प्रेति । मुमोक्तु । एतम् । नमः । पशुभ्य इति पशु–भ्यः । पशुपतय इति पशु–पतये । करोमि । [12]अरातीयन्तम् । अधरम् । कृणोमि । यम् । द्वि-

---

समासः । यज्ञो विशेष्यते—देवेभिः देवैः इन्वितं व्याप्तम् । इवि व्याप्तौ, इदित्त्वान्नुम् । किं च—इमं पशुं पाशात् प्रमुञ्चत, यज्ञपतिं यजमानं च बन्धात् सर्वस्माद्दणबन्धात् परिमुञ्चत सर्वतो मुञ्चत ॥

[11-12]पाशान्मुच्यमानं तमनुमन्त्रयते—अदितिरिति द्वाभ्यां जगतीत्रिष्टुभ्भ्यां द्विपदाभ्याम् ॥ अदितिः अदीना पृथिवी देवमाता वा एतं पाशं प्रमुमोक्तु । पूर्ववच्छपश्छुः । पशुभ्यः पशुपतये च नमः करोमि नमस्करोमि अपराधनिवृत्त्यर्थम् । किंच—अरातीयन्तं अस्माकमरातित्वं कर्तुमिच्छन्तं, अरातिमिवाचरन्तं वा । व्यत्ययेन परस्मैपदम् । अधरं मत्तो न्यूनं करोमि अस्माभिरविदितं गूढशत्रुं अनेन बद्ध्वा निपातयामीति । अथ यं च वयं द्विष्मः यः प्रकाशोस्माभिर्विदितः अस्माकं शत्रुः तस्मिन्नेतं पाशं प्रतिमुञ्चामीति सोनेन बद्धो म्रियतामिति ॥

त्वामु ते दधिरे हव्यवाहꣳ शृतं-
कर्तारमुत यज्ञियं च । अग्ने सदक्ष-
स्सतनुर् हि भूत्वाऽथा हव्या जात-
वेदो जुषस्व । जातवेदो वपया ग-

ष्मः । तस्मिन् । प्रतीति । मुञ्चामि । पाशम् । [13]त्वाम् । उ । ते । दधिरे । हव्यवाहमिति हव्य—वाहम् । शृतंकर्तारमिति शृतं—कर्तारम् । उत । यज्ञियम् । च । अग्ने । सदक्ष इति स—दक्षः । सतनुरिति स—तनुः । हि । भूत्वा । अथ । हव्या । जातवेद इति जात—वेदः । जुषस्व । [14]जातवेद इति जात—

[13]वपामभिजुहोति—त्वामु त इति त्रिष्टुभा ॥ उ इत्यवधारणे । ते देवाः, देवैभिरिन्वितमित्यत्र प्रकृतत्वात् । त्वामेव हव्यवाहं हविषां वोढारं दधिरे धारयामासुः कृतवन्त इत्यर्थः । वहतेर्ण्विः । शृतंकर्तारं शृतं पक्वं हविः कुर्वन्तम् । 'नित्यं पक्वहविषोः' इति शृभावः, पूर्वपदस्य मुमागमश्छान्दसः । उत अपि च यज्ञियं यज्ञसंपादनार्हं । 'यज्ञर्त्विग्भ्याम्' इति घः । हि यस्मादेवं तस्मात् अथेदानीमेव हे अग्ने सदक्षः सोत्साहः । दक्ष शैघ्र्ये । सतनुः सशरीरः दृढशरीरश्च भूत्वा हे जातवेदः जातप्रज्ञ जातानां वा वेदितः त्वमेवेदं कर्तुमर्हसि । तस्माद्धव्या हव्यानि जुषस्व प्रियस्व तानि वोढुम् । 'शेश्छन्दसि' इति शिलोपः । जातानि वेत्तीति 'गतिकारकयोरपि' इत्यसुन् ॥

[14]वपां जुहोति—जातवेद इति त्रिष्टुभा ॥ हे जातवेदः

च्छ देवान्त्वꣳ हि होता प्रथमो बभू-
थ । घृतेन त्वं तनुवो वर्धयस्व
स्वाहाकृतꣳ हविरदन्तु देवाः ।
स्वाहा देवेभ्यो देवेभ्यस्स्वा-

वेदः । वपया । गच्छ । देवान् । त्वम् । हि । होता । प्रथमः । बभूथ । घृतेन । त्वम् । तनुवः । वर्धय-स्व । स्वाहाकृतमिति स्वाहा–कृतम् । हविः । अ-दन्तु । देवाः । [15]स्वाहा । देवेभ्यः । [16]देवेभ्यः ।

वपया देवान् गच्छ वपासारं गृहीत्वा देवसकाशं गच्छ । कस्मादेवमु-च्यते? इति चेत्—त्वं हि होता प्रथमः अस्मान्मनुष्यहोतुः पूर्वो बभूथ तस्मादेवं ब्रूमः । तस्मात्ताढशस्त्वं घृतेन तनुवः तनूः देवानां वर्धयस्व । ते च देवाः वर्धिततनवः स्वाहाकृतं स्वाहाकारेण हुतमिदं हविरदन्तु । यद्वा—स त्वं घृतेन तनुवः आत्मीयाः वर्धयस्व । किमर्थम्? स्वाहा-कृतं हविर्देवा अदन्तु तदर्थं त्वयि हि वर्धमानतनौ देवा हविरत्तुं प्रभ-वन्तीति । 'तन्वादीनां छन्दसि बहुलम्' इति तनोरुवङादेशः । वृरण्य-न्तस्य अचित्तवत्कर्तृकत्वात् ण्यन्तात् 'अणावकर्मकात्' इति प-रस्मैपदाभावः । स्वाहाशब्दस्योर्यादित्वेन गतित्वात् 'गतिरनन्तरः' इति प्रकृतिस्वरत्वम्, निपाता आद्युदात्ताः ॥

[15]पूर्वं परिवप्यं जुहोति—स्वाहा देवेभ्य इति यजुषा ॥ स्वाहा हुतमिदमस्तु देवेभ्यः पुरस्तात्स्वाहाकृतिभ्य इति ॥

[16]उत्तरं जुहोति—देवेभ्यस्स्वाहेति यजुषैव ॥ देवेभ्यः उ-

हा ॥ १४ ॥

प्राजापत्या वै पशवस्तेषाꣳ रुद्रो-
धिपतिर्यदेताभ्यामुपाकरोति ता-

स्वाहा ॥ १४ ॥

ईशे प्रमुञ्चमाना यज्ञं त्वꣳ षोडश च ॥४॥

[1]प्राजापत्या इति प्राजा—पत्याः । वै । पशवः । तेषाम् । रुद्रः । अधिपतिरित्यधि—पतिः । यत् । एताभ्याम् । उपाकरोतीत्युप—आकरोति । ता-

---

परिष्टात्स्वाहाकृतिभ्यः स्वाहुतमस्त्विति । 'पुरस्तात्स्वाहाकृतयो वा अन्ये देवाः'* इत्यादि ब्राह्मणम् । तत्राभितो वपाया होमः स परितो वपां भवः परिवप्यः । द्वावप्येतौ एकार्थावेव मन्त्रौ । तत्र वपा भागिभिः अव्यवहितान् देवान् प्रतिपादयितुं प्रथमस्वाहाकारादिरभूत्, द्वितीयस्वाहाकारान्ता स्वाहाकारेण व्यवधानं मा भूदिति ॥

इति तृतीये प्रथमे चतुर्थोनुवाकः.

---

[1]अथ 'प्रजापतेर्जायमानाः'† इत्यादीनां मन्त्राणां ब्राह्मणम्—प्राजापत्या इत्यादि ॥ प्राजापत्याः प्रजापतेरपत्यभूताः सर्वेऽपि पशवः । तेषां सर्वेषामपि रुद्रोधिपतिः स्वामी । यद्यस्मादेताभ्यां 'प्रजापतेर्जायमानाः',† 'इमं पशुम्'† इत्यनुवाकस्य प्रथमा-

---

*तै. सं. ३-१-५[8]. † तै. सं. ३-१-४[1-2].

भ्यांमेवैनं प्रतिप्रोच्या लभत आत्म-
नोनाव्रस्काय द्वाभ्यांमुपाकरोति द्वि-
पाद्यजमानः प्रतिष्ठित्या उपाकृ-
त्य पञ्च जुहोति पाङ्क्ताः पशवः प-

भ्यांम् । एव । एनम् । प्रतिप्रोच्येति प्रति–प्रोच्य । एति । लभते । आत्मनः । अनाव्रस्कायेत्यनाव्रस्काय । द्वाभ्यांम् । उपाकरोतीत्युप–आकरोति । द्विपादिति द्वि–पात् । यजमानः । प्रतिष्ठित्या इति प्रति–स्थित्यै । [2]उपाकृत्येत्युप–आकृत्य । पञ्च । जुहोति । पाङ्क्ताः । पशवः । पशून् । एव । अवे-

---

भ्यां प्रजापतेः रुद्रस्य च प्रतिपादकाभ्यां पशुमुपाकरोति तस्मात्ताभ्यां देवाभ्यां पशूनां पितृस्वामिभ्यामेवैनं पशुं प्रतिप्रोच्य प्रत्यावेद्य आलभते । तदात्मनोनाव्रस्काय अनपराधाय भवति । अत्र व्रश्चर्ति सकारोपधं पठन्ति । तस्माद्व्रश्चि कुत्वं, निमित्ताभावात् श्चुत्वं निवर्तते । अथ सङ्ख्यां विशिष्टफलहेतुत्वेन स्तौति—द्वाभ्यामिति । द्वित्वान्वयाद्विपदो यजमानस्य प्रतिष्ठित्यै भवति । 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् । पादः प्रतिष्ठेति पर्यायौ । 'संख्यासुपूर्वस्य' इति पादस्य लोपः, 'द्वित्रिभ्यां पद्दन्' इत्युत्तरपदान्तोदात्तत्वम् ॥

[2]उपाकृत्येत्यादि ॥ पशूपाकरणानन्तरं प्रजानन्त इत्यादि पञ्च हव्यानि जुहोति । पङ्क्तिः पञ्चपदा तत्प्रभवाः पशवः । ततः पञ्चत्वान्वयेन तेऽवरुद्धा भवन्ति । पङ्क्तिशब्दादुत्सादित्वादञ् ॥

शूनेवावं रुन्धे मृत्यवे वा एष नी-
यते यत्पशुस्तं यदन्वारभेत प्रमायु-
को यजमानस्स्यान्नानां प्राणो यज-
मानस्य पशुनेत्याह व्यावृत्त्यै ॥ १५ ॥
यत्पशुर्मायुमकृतेति जुहोति शा-
न्त्यै शमितार उपेतनेत्याह यथा-

र्ति । रुन्धे । [3]मृत्यवे । वै । एषः । नीयते । यत् । पशुः । तम् । यत् । अन्वारभेतेत्यनु-आरभेत । प्रमायुक इति प्र-मायुकः । यजमानः । स्यात् । नानां । प्राण इति प्र-अनः । यजमानस्य । पशुना । इति । आह । व्यावृत्त्या इति वि-आवृत्त्यै ॥ १५ ॥ [4]यत् । पशुः । मायुम् । अकृत । इति । जुहोति । शान्त्यै । [5]शमितारः । उपेतने-

[3]मृत्यव इत्यादिना मारणार्थं नीयमानस्य पशोः अन्वारम्भः यजमानस्य पशुसमानधर्मतामावहेत्, अमङ्गल्यश्च भवति । ततश्च यजमानः प्रमायुको मरणशीलस्स्यात् । छान्दस उकञ् । तस्मादभिमन्त्रणं मन्त्रेण । नाना पृथग्भूतः प्राणो यजमानस्य पशुप्राणादिति यदाह तद्व्यावृत्त्यै यजमानस्य भवति । व्यावृत्तिः पृथग्धर्मता । पूर्ववद्गतेः प्रकृतिस्वरत्वम् ॥

[4]यत्पशुर्मायुमिति संज्ञपने जुहोति ॥ तदेनसः शान्त्यै भवति ॥

[5]शमितार उपेतन इति वपाश्रपणीभ्यां पशुमुपेतः यजमानो-

यजुरेवैतद्वपायां वा आह्रियमाणा-
यामग्नेर्मेधोप क्रामति त्वामु ते द-
धिरे हव्यवाहमिति वपामभि जु-
होत्यग्नेरेव मेधमव रुन्धेऽथो शृत-

त्युप–एतन । इति । आह । यथायजुरिति यथा–यजुः । एव । एतत् । [6]वपायाम् । वै । आह्रियमाणायामित्या–ह्रियमाणायाम् । अग्नेः । मेधः । अपेति । क्रामति । त्वाम् । उ । ते । दधिरे । हव्यवाहमिति हव्य–वाहम् । इति । वपाम् । अभीति । जुहोति । अग्नेः । एव । मेधम् । अवेति । रुन्धे । अथो इति । शृतत्वायेति शृत–त्वाय ।

ध्वर्युश्च ॥ तत्र यथा यजुर्वेदति बन्धाद्यज्ञपतिं परिमुञ्चतेति तथैवैतत्फलं भवति । यजमानस्य यजुर्वेदप्रभवत्वात् ऋगेव यजुरुच्यते ॥

[6]वपायामित्यादि ॥ वपाया आहरणकाले अग्निसकाशात् मेधः यज्ञः अपक्रामति तस्मात् 'त्वामु ते'* इति वपाहोमः तस्मिन् काले क्रियमाणस्य मेधस्यानपक्रमणाय भवति तेनाग्निरपक्रामन्तं मेधमवरुन्धे अनपक्रमणं करोति 'दधिरे'* इति मन्त्रपदात् । अथो अपि च शृतत्वाय पक्वत्वाय वपाया अभिहोमो भवति । 'शृतंकर्तारम्'* इति दर्शनात् ॥

---

*तै सं ३-१-४[13].

त्वार्यं पुरस्तात्स्वाहाकृतयो वा अन्ये देवा उपरिष्टात्स्वाहाकृतयोन्ये स्वाहा देवेभ्यो देवेभ्यस्स्वाहेत्यभितो वपां जुहोति तानेवोभयान्प्रीणाति ॥ १६ ॥

[7]पुरस्तात्स्वाहाकृतय इति पुरस्तात्-स्वाहाकृतयः । वै । अन्ये । देवाः । उपरिष्टात्स्वाहाकृतय इत्युपरिष्टात्-स्वाहाकृतयः । अन्ये । स्वाहा । देवेभ्यः । देवेभ्यः । स्वाहा । इति । अभितः । वपाम् । जुहोति । तान् । एव । उभयान् । प्रीणाति ॥ १६ ॥

व्यावृत्या अभितो वपां पञ्च च ॥ ५ ॥

---

[7]अथ परिवप्यहोममन्त्रयोस्स्वाहाकारस्य स्थानव्यत्यासकारणं प्रदर्शयितुमाह—पुरस्तात्स्वाहाकृतयो वा इत्यादि ॥ 'जातवेदो वपया गच्छ देवान्'* इति ये वपाभाजो देवाः तैरात्मनोऽव्यवधानार्थं अन्ये ये देवाः वपाहोमात्पूर्वं भाविनः पुरस्तात्स्वाहाकृतयोभवन् पुरस्तात्स्वाहाकृतेन मन्त्रेण होमः । एवं कुर्वन् तानुभयान् देवान् प्रीणाति ॥

इति तृतीये प्रथमे पञ्चमोनुवाकः.

---

*तै. सं. ३-१-४[4].

यो वा अयथादेवतं यज्ञमुपचरत्या
देवताभ्यो वृश्चयते पापीयान्भवति
यो यथादेवतं न देवताभ्य आ वृ-
श्चयते वसीयान्भवत्याग्नेय्यर्चाऽऽग्नी-

[1–5]यः । वै । अयथादेवतमित्ययथा–देवतम् । यज्ञम् । उपचरतीत्युप–चरति । एति । देवताभ्यः । वृश्च्यते । पापीयान् । भवति । यः । यथादेवतमिति यथा–देवतम् । न । देवताभ्यः । एति । वृश्च्यते । वसीयान् । भवति । आग्नेय्या । ऋचा । आग्नीध्रमित्याग्नि–इध्रम् । अभीति । मृशेत् । वैष्ण-

---

[1–5]यो वा इत्यादि ॥ या यस्य देवता तद्यथादेवतं, ततोन्यदयथादेवतम् । तृतीयाया आमादेशः । यथायथमनवगते देवतासम्बन्धे यज्ञसाधनैर्यो यज्ञमुपचरति अनुतिष्ठति स देवताभ्यः अज्ञाताभ्य आवृश्चते परिहीयते ततः पापीयान् भवति पापतरो भवति। यो यथादेवतमित्यादि । गतम् । वसीयान् वसुमत्तरः । आग्नेय्यर्चेत्यादि । 'अग्ने नय '* इत्याग्नेयी ऋक् । 'इदं विष्णुः '† इति वैष्णवी । 'अग्न आयूंषि '‡ इति ऋगाग्नेयी । 'आ वायो भूष '§ इति वायव्या । 'आघा ये अग्निमिन्धते '¶ इत्यैन्द्री । एवं कुर्वन् यथायथमवगताभिर्देवताभिः यज्ञमुपचरति ततो देवताभ्यो न वृश्चते

---

* सं १–१–१४.[9] † सं १–२–१३[4]. ‡ सं १–३–१४[23].
§ सं १–४–४[1]. ¶ ब्रा २–४–५.

ध्रमभि मृशेद्वैष्णव्या हविर्धानमाग्नेय्या स्रुचौ वायव्यया वायव्यान्यैन्द्रिया सदो यथादेवतमेव यज्ञमुप चरति न देवताभ्य आ वृश्चयते वसीयान्भवति युनज्मि ते पृथिवीं ज्योतिषा सह युनज्मि वायुमन्तरिक्षेण ॥१७॥ ते सह युनज्मि वाचꣳस-

व्या । हविर्धानमिति हविः—धानम् । आग्नेय्या । स्रुचः । वायव्यया । वायव्यानि । ऐन्द्रिया । सदः । यथादेवतमिति यथा—देवतम् । एव । यज्ञम् । उपेति । चरति । न । देवताभ्यः । एति । वृश्चयते । वसीयान् । भवति । [6]युनज्मि । ते । पृथिवीम् । ज्योतिषा । सह । [7]युनज्मि । वायुम् । अन्तरिक्षेण ॥ १७ ॥ ते । सह । [8]युनज्मि । वाचम् । सह ।

वसीयान् भवति । आग्नेय्यादिषूदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वे 'उदात्तयणः' इति तृतीयाया उदात्तत्वम् ॥

[6–8]महापरिधीन् परिदधाति—युनज्मि त इति तिसृभिरेकपदाभिः जगतीभिः । तत्र मध्यमं—युनज्मीति ॥ हे अग्ने ते तव पृथिवीं पृथिवीस्थानीयं मध्यमं परिधिं ज्योतिषा दीप्त्या सह तव समीपे युनज्मि । यद्वा—हे मध्यमपरिधे अनेन यागेन पृथिवीं ज्योतिषा अग्निना सह युनज्मि दक्षिणं वायुमन्तरिक्षेण सह तव युनज्मि ।

ह सूर्येण ते युनज्मि तिस्रो विपृच-
स्सूर्यस्य ते । अग्निर्देवता गायत्री
छन्द उपाꣳशोः पात्रमसि सोमो
देवता त्रिष्टुप्छन्दोन्तर्यामस्य पात्र-

सूर्येण । ते । [9]युनज्मि । तिस्रः । विपृच इति वि–पृचः । सूर्यस्य । ते । [10]अग्निः । देवता । गायत्री । छन्दः । उपाꣳशोरित्युप–अꣳशोः । पात्रम् । असि । [11]सोमः । देवता । त्रिष्टुप् । छन्दः । अन्तर्यामस्येत्यन्तः–यामस्य । पात्रम् । असि ।

समानमन्यत् । उत्तरं सूर्येण सह वाचं तव युनज्मि । शिष्टं समानम् ॥

[9]स्रुचोऽभिमृशति—युनज्मि तिस्र इति जगत्यैकपदया ॥ युनज्मि तिस्रः स्रुचः जुहूपभृद्ध्रुवाः विपृचः विपृक्ताः पृथग्भूताः सूर्यस्य सोमस्य* सूर्यस्य सम्बन्धिनो वा तव संबन्धिनीः युनज्मि । त्वदर्थं वा ॥

[10]पात्राणि सादितान्यभिमृशति—अग्निर्देवतेत्यादिभिः ॥ दर्शैते मन्त्रा निगदव्याख्याताः । अग्निस्तव देवता, गायत्री छन्दः उपांशोः ग्रहस्य पात्रमसि त्वामिति । एवं सर्वत्र । 'उपाद्द्यजजिनम्' इत्युपांशुशब्दस्योत्तरपदान्तोदात्तत्वम् ॥

[11]अन्तर्यामग्रहस्य पात्रमसि । 'अन्तरपरिग्रहे' इति गतित्वात्तथादिनोत्तरपदान्तोदात्तत्वम् ॥

*क—पावकस्य.

मसीन्द्रो देवता जगती छन्द इन्द्र-
वायुवोः पात्रमसि बृहस्पतिर्देव-
तानुष्टुप्छन्दो मित्रावरुणयोः पात्र-
मस्यश्विनौ देवता पङ्क्तिश्छन्दोश्वि-

[12]इन्द्रः । देवता । जगती । छन्दः । इन्द्रवायुवोरि-
तीन्द्र—वायुवोः । पात्रम् । असि । [13]बृहस्पतिः ।
देवता । अनुष्टुबित्यनु—स्तुप् । छन्दः । मित्रावरु-
णयोरिति मित्रा—वरुणयोः । पात्रम् । असि ।
[14]अश्विनौ । देवता । पङ्क्तिः । छन्दः । अश्विनोः ।

---

[12]इन्द्रवाय्वोस्सम्बन्धी ऐन्द्रवायवो ग्रहः; तस्य पात्रमसि । 'उभयत्र वायोः प्रतिषेधः' इत्यनङ् न क्रियते । 'देवता-द्वन्द्वे च' इति प्राप्तस्य पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरस्य 'नोत्त-रपदेऽनुदात्तादौ' इति प्रतिषेधे समासान्तोदात्तत्वे च कृते 'उ-दात्तयणः' इति विभक्तेरुदात्तत्वम् ॥

[13]बृहस्पतिर्देवता । 'तद्बृहतोः' इति सुट्, वनस्पत्यादित्वा-त्पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् । समासे बृहच्छब्दः प्रायेणा-द्युदात्तः । मित्रावरुणयोस्सम्बन्धिनः मैत्रावरुणस्य वा ग्रहस्य पा-त्रमसि । 'देवताद्वन्द्वे च' इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् ॥

[14]पङ्क्तिः पञ्चपदा । अश्विनोस्सम्बन्धिनः आश्विनस्य ग्रहस्य पात्रमसि ॥

नोः पात्रमसि सूर्यो देवता बृहती ॥ १८ ॥ छन्दश्शुक्रस्य पात्रमसि चन्द्रमा देवता सतोबृहती छन्दो मन्थिनः पात्रमसि विश्वे देवा देवतोष्णिहा छन्द आग्रयणस्य पा-

पात्रम् । असि । [15]सूर्यः । देवता । बृहती ॥ १८ ॥ छन्दः । शुक्रस्य । पात्रम् । असि । [16]चन्द्रमाः । देवता । सतोबृहतीति सतः—बृहती । छन्दः । मन्थिनः । पात्रम् । असि । [17]विश्वे । देवाः । देवता । उष्णिहा । छन्दः । आग्रयणस्य । पात्रम् ।

---

[15]बृहतीशब्दे 'बृहन्महतोरुपसङ्ख्यानम्' इति नद्या उदात्तत्वम् । शुक्रस्य ग्रहस्य पात्रमसि ॥

[16]सतोबृहती नाम बृहतीविशेषः । 'त्रिभिर्द्वादशकैर्महाबृहती । सतोबृहती ताण्डिनः'* । छान्दसत्वष्ष्ठ्या अलुक्, दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम्, 'शतुरनुमः' इति षष्ठ्या उदात्तत्वम् ॥

[17]उष्णिक्, उष्णिहा इति पदद्वयमपि भवति । आग्रयणस्य ग्रहस्य पात्रं स्थाल्यसि ॥

---

*पं. सू. ३-३५, ३६. 'त्रिभिर्जागतैर्महाबृहती' इति पाठः.

त्रंमसीन्द्रो देवता ककुच्छन्द उक्था-
नां पात्रंमसि पृथिवी देवता विरा-
ट्छन्दो ध्रुवस्य पात्रंमसि ॥ १९ ॥
इष्टर्गो वा अध्वर्युर्यजमानस्येष्टर्गः

असि । [18]इन्द्रः । देवता । ककुत् । छन्दः । उक्था-
नाम् । पात्रम् । असि । [19]पृथिवी । देवता । विराडिति
वि–राट् । छन्दः । ध्रुवस्य । पात्रम् । असि ॥ १९ ॥

अन्तरिक्षेण बृहती त्रयस्त्रिꣳशच्च ॥ ६ ॥

[1]इष्टर्गः । वै । अध्वर्युः । यजमानस्य । इष्टर्गः ।

---

[18]ककुप् उष्णिग्विशेषः । 'मध्ये चेद्वादशाक्षरः ककुप्'* । उक्थानां सम्बन्धिनः उक्थस्य ग्रहस्य पात्रं स्थाली वा ॥

[19]विराट् दशाक्षरा । ध्रुवस्य ग्रहस्य पात्रं स्थाल्यसि ॥

इति तृतीये प्रथमे षष्ठोनुवाकः.

---

[1]इष्टर्ग इत्यादि ॥ यागेन निमित्तेनार्तेः प्रयोजयिता इष्टर्गः अध्वर्युः यजमानस्य । घृषोदरादिः । यजेरिष्टः, ऋच्छतेरर्गः । प्रमा-

---

*पिं. सू. ३-१९. 'ककुम्मध्ये चेदन्त्यः' इति पाठः,

खलु वै पूर्वोऽर्ष्टुः क्षीयत आसन्या-
न्मा मन्त्रात्पाहि कस्याश्चिदभिशं-
स्त्या इति पुरा प्रातरनुवाकाज्जुहुया-
दात्मन एव तदध्वर्युः पुरस्ताच्छर्म

खलु । वै । पूर्वः । अर्ष्टुः । क्षीयते । आसन्यात् । मा । मन्त्रात् । पाहि । कस्याः । चित् । अभिशंस्त्या इत्यभि–शस्त्याः । इति । पुरा । प्रातरनुवाकादिति प्रातः–अनुवाकात् । जुहुयात् । आत्मने । एव । तत् । अध्वर्युः । पुरस्तात् । शर्म ।

दालस्यादिना अध्वर्योरपचारेण तन्निमित्तेन वा परापचारादिना यजमानस्यार्तिमार्छति इष्टर्गः इत्येतदुक्तं * भवतीत्याचार्याः । दर्वीस्थानीय इत्येके । भवतु इष्टर्गस्य का क्षतिरिति चेदाह—इष्टर्गो हि अर्ष्टुः आर्तिं गच्छतः पूर्वः क्षीयते प्रथममेव आर्तिं गच्छति; तन्निबन्धनत्वादार्तेः । ऋच्छतेस्तुः, षकारोपजनः छान्दसः । तस्मादध्वर्युणा आत्मनश्शर्मणे यत्कर्तव्यम् । तद्विदधाति—आसन्यादिति । महारात्र उत्थाय पुरा पुरस्तात्प्रातरनुवाकात् आग्नीध्रीये अनेन मन्त्रेण जुहुयात् । ततोऽध्वर्युरात्मन एवार्थं पुरस्तात् शर्म सुखं आर्त्यभावं नह्यते बध्नाति करोतीत्यर्थः, तद्यजमानस्याप्यनार्त्यै भवतीति । मन्त्रार्थस्तु—आसन्यात् आस्ये भवान्मन्त्रात् अभिचारमन्त्रात् । यद्वा—शापादिस्वरूपात् । आनुपूर्व्या व्या-

---

*क.—उष्णगृह इत्येवेदमुक्तम्.

नह्यतेऽनार्त्यै संवेशायं त्वोपवेशायं
त्वा गायत्रियास्त्रिष्टुभो जगत्या अभि-
भूत्यै स्वाहा प्राणापानौ मृत्योर्मा पा-

नह्यते । अनार्त्यै । [2-4]संवेशायेति सं—वेशायं । त्वा । उपवेशायेत्युप—वेशायं । त्वा । गायत्र्याः । त्रिष्टुभः । जगत्याः । अभिभूत्या इत्यभि—भूत्यै । स्वाहा । [5]प्राणापानाविति प्राणं—अपानौ । मृत्योः । मा । पातम् । [6]प्राणापानाविति प्राणं—अपानौ ।

हरणेन वा आसन्यो मन्त्रः इत्याचार्याः । कस्याश्चित् कुतश्चित् अभिशस्त्या अभिशंसनात् पापात् मा पाहि । 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् । आस्यशब्दस्य छान्दस आसन्भावः । अथ वै भवति यो वै छन्दोभिरभिभवति संसुन्वतोरभिभवतीति परस्परस्पर्धया कृतः संवादो विद्विषाणयोरेव एककाले यष्ट्रोः; न पितापुत्रादीनाम् । अतः परमान्तादनुवाकस्य तद्विषया मन्त्रा ब्राह्मणानि च ॥

[2—4]तत्र संसुन्वतोर्यथा य इतरमभिबुभूषति स महारात्र उत्थायाग्नीध्रे तिस्रोभिभूतीर्जुहोति—संवेशाय त्वेत्यादिभिः ॥ संवेशः शयनं उपवेशः आसनम् । तदर्थं गायत्र्या अभिभूत्यै । यया गायत्र्या विश्वमभिभवति तस्यै तदर्थम् । तद्वदहमपि प्रतिपक्षमभिभूयासम् । त्वां स्वाहुतं करोमीति । एवं त्रिष्टुब्जगत्योरपि । उभयत्रापि 'संवेशाय त्वा' इत्यादिकमनुषज्यते । संवे-

तं प्राणापानौ मा मां हासिष्टं देवतासु वा एते प्राणापानयोः॥२०॥
व्यायच्छन्ते येषाꣳ सोमꣳसमृच्छते

मा । मा । हासिष्टम् । [7]देवतासु । वै । एते । प्राणापानयोरिति प्राण–अपानयोः ॥ २० ॥ व्यायच्छन्त इति वि–आयच्छन्ते । येषाम् । सोमः ।

शाय त्वोपवेशाय त्वा त्रिष्टुभोभिभूत्यै स्वाहा संवेशाय त्वोपवेशाय त्वा जगत्या अभिभूत्यै स्वाहा इति ॥

[5–6]अथ द्वे प्राणाहुती जुहोति—प्राणापानावित्यादि ॥ हे प्राणापानौ मा मृत्योः मरणात् पातं रक्षतम् । हे प्राणापानौ मा मा हासिष्टं त्यक्त्वा मां मा गच्छतम् । 'यमरमनमाताम्' इतिसागिटौ ॥

[7]अनयोर्मन्त्रयोर्ब्राह्मणम्—देवतास्वित्यादि ॥ एते खलु देवतासु प्राणापानयोः प्राणापाननिमित्तं व्यायच्छन्ते विप्रतिपद्यन्ते ममैतौ स्यातामिति । अकर्मसंयोगेऽपि हि सप्तमी दृश्यते यथा—'तस्यै पयसि व्यायच्छन्त'* इति । येषां सोमः समृच्छते संगच्छते स्पर्धया सोमान्तरेण सह सूयते । यद्वा—समृच्छते विनश्यति सोमान्तरेण संसर्गात् । 'समो गमृच्छि' इत्यात्मनेपदम् । यमेस्तु 'आङो यमहनः' इति तस्मादनेन मन्त्रेण प्राणापानयोरात्मनो लाभं प्रार्थयतः इति भावः ॥

---

*तै. ब्रा. २-१-६.

संवेशाय त्वोपवेशाय त्वेत्याह छन्दाꣳसि वै संवेश उपवेशश्छन्दोभिरेवास्य छन्दाꣳसि वृङ्क्ते प्रतिवन्त्याज्यानि भवन्त्यभिजित्यै मरुत्सम्मृच्छत इति सं–ऋच्छते । [8]संवेशायेति सं–वेशाय । त्वा । उपवेशायेत्युप–वेशाय । त्वा । इति । आह । छन्दाꣳसि । वै । संवेश इति सं–वेशः । उपवेश इत्युप–वेशः । छन्दोभिरिति छन्दः–भिः । एव । अस्य । छन्दाꣳसि । वृङ्क्ते । [9]प्रतिवन्तीति प्रति–वन्ति । आज्यानि । भवन्ति । अभिजित्या इत्यभि–जित्यै । मरुत्वतीः । प्रतिपद

[8]अथ संवेशायेत्यादीनामभिभूतिमन्त्राणां ब्राह्मणम्—संवेशाय त्वेत्यादि ॥ तद्धेतुत्वात्तच्छब्द्यम् । छन्दांसि वै संवेश उपवेश इति । संवेशोपवेशहेतवः छन्दांसीत्यर्थः । तस्मादीदृशैश्छन्दोभिः प्रथममेवाभिभूतिहोमेन आत्मसात्कृतैः कृतकृत्यः केन चिदनभिभवनीयः सुखी सम्पन्नोयं अस्य प्रतियष्टुस्सम्बन्धीनि छन्दांसि वृङ्क्ते वर्जयति तत्सकाशादपनयति ततः सोभिभूतो भवतीति । एवमेकयाजिनः । सत्रिणां तु पञ्चाभिभूतीर्विधास्यति—संवेशाय त्वोपवेशाय त्वा गायत्रियास्त्रिष्टुभो जगत्या अनुष्टुभः पङ्क्त्या अभिभूत्यै स्वाहा इति ॥

[9]संसुन्वतोरध्वर्यूणामुक्तम् । अथ छन्दोगानां विषय एवेदमुच्यते—

त्वतीः प्रतिपदो विजित्या उभे बृह-
द्रथन्तरे भवत इयं वाव रथन्तर-
मसौ बृहदाभ्यामेवैनमन्तरेत्यद्य वा-
इति प्रति-पदः । विजित्या इति वि-जित्यै । उ-
भे इति । बृहद्रथन्तरे इति बृहत्-रथन्तरे । भवतः ।
[10]इयम् । वाव । रथन्तरमिति रथं-तरम् । असौ ।
बृहत् । आभ्याम् । एव । एनम् । अन्तः । एति ।
अद्य । वाव । रथन्तरमिति रथं-तरम् । श्वः । बृ-

प्रेतिवन्तीति ॥ प्रेतिवन्ति चैतिवन्ति चेत्याचार्याः, ब्राह्मणान्तरे दर्शनात् 'एतिवन्ति'* इति । आज्यानि स्तोत्राणि प्रेतिवन्ति प्रगमनवन्ति, एतिवन्ति आगमनवन्ति च भवन्ति 'प्र वो वाजाः,'† 'अग्न आ याहि'† इति यथा । प्रकृष्टगत्यन्वयादभिजित्यै आभिमुख्येन जयाय भवति । यद्वा प्रथममेव योभिजयस्तीत्सद्वचै भवति । मरुत्वतीरिति । आज्यानां प्रतिपदः प्रथमा ऋचः मरुत्वतीः मरुत्वत्यः मरुच्छब्दवत्यो भवन्ति यथा 'इन्द्रायेन्द्रो मरुत्वते'‡ इत्याद्याः । 'तसौ मत्वर्थे' इति भत्वम् । 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । 'मरुतो वै देवानामपराजितमायतनम्'* इति प्रतिपत्सु मरुदन्वयः विजित्यै विशेषेण जयाय भवति । पूर्ववद्गतेः प्रकृतिस्वरत्वम् । उभे इति । उभे अपि बृहद्रथन्तरे सामनी भवतः ॥

[10]अथ ते प्रशंसति—इयमित्यादि ॥ इयं पृथिवी रथन्तरं, असौ द्यौः बृहत्, तस्मादीदृशे उभे अपि सामनी गायेत् ।

---

*तै. ब्रा. १-४-६. † तै. ब्रा. ३-५-२. ‡ऋ. ७-१-४०.

व रथन्तरꣳ श्वो बृहदद्याश्वादेवैनम-
न्तरेति भूतम् ॥ २१ ॥ वाव रथ-
न्तरं भविष्यद्बृहद्भूताच्चैवैनं भवि-
ष्यतश्चान्तरेति परिमितं वाव रथ-
न्तरमपरिमितं बृहत्परिमिताच्चैवैन-
मपरिमिताच्चान्तरेति विश्वामित्र-

हत् । अद्याश्वादित्यद्य—श्वात् । एव । एनम् । अ-
न्तः । एति । भूतम् ॥ २१ ॥ वाव । रथन्तर-
मिति रथं—तरम् । भविष्यत् । बृहत् । भूतात् ।
च । एव । एनम् । भविष्यतः । च । अन्तः ।
एति । परिमितमिति परि—मितम् । वाव । रथ-
न्तरमिति रथं—तरम् । अपरिमितमित्यपरि—मितम् ।
बृहत् । परिमितादिति परि—मितात् । च । एव ।
एनम् । अपरिमितादित्यपरि—मितात् । च । अ-
न्तः । एति । [11]विश्वामित्रजमदग्नी इति विश्वामि-

आभ्यां द्यावापृथिवीभ्यां एनं शत्रुमन्तरेति अन्तरितं करोति आभ्यां प्रच्यावयति । यागनिर्वृत्तिद्वारेण द्यावापृथिव्यादीनां प्रवृत्तिहेतुत्वात् तादात्म्येन स्तुतिः । अद्याश्वादस्मादह्नः उत्तरस्मादह्नश्चेत्यर्थः । अद्य च श्वश्च अद्याश्वम् । 'अचू' इति योगविभागादच्समासान्तः, अव्ययानां भमात्रे टिलोपः, 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घत्वम् । परिमितात् देशादेः । इति छन्दोगानाम् ॥

[11]अथ होतृणाम्—विश्वामित्रजमदग्नी इति ॥ वीर्यनिमित्तं स्प-

जमद॑ग्नी वसि॑ष्ठेनास्पर्धेता॒ꣳ स ए॒त-
ज्जम॑दग्निर्वि॑ह॒व्यं॑मपश्य॒त्तेन॒ वै स व-
सि॑ष्ठस्येन्द्रि॒यं वी॒र्यं॑मवृ॒ङ्क्त॑ यद्वि॑ह॒व्य॑ꣳ
श॒स्यते॑ इन्द्रि॒यमे॒व तद्वी॒र्यं॑ यज॑मा-
नो॒ भ्रातृ॑व्यस्य वृ॒ङ्क्ते॒ यस्य॒ भूया॑ꣳ-

त्र–ज॒मद॑ग्नी । व॒सि॑ष्ठेन । अ॒स्प॒र्धे॒ता॒म् । सः । ए॒त॒त् । ज॒मद॑ग्निः । वि॒ह॒व्य॑मिति॑ वि–ह॒व्य॑म् । अ॒प॒श्य॒त् । तेन॑ । वै । सः । व॒सि॑ष्ठस्य । इ॒न्द्रि॒यम् । वी॒र्य॑म् । अ॒व॒वृ॒ङ्क्त॑ । यत् । वि॒ह॒व्य॑मिति॑ वि–ह॒व्य॑म् । श॒स्यते॑ । इ॒न्द्रि॒यम् । ए॒व । तत् । वी॒र्य॑म् । यज॑मा-
नः । भ्रातृ॑व्यस्य । वृ॒ङ्क्ते॒ । [12]यस्य॑ । भूया॑ꣳसः ।

र्धां कृतवन्तौ । तत्र जमदग्निवसिष्ठयोः स्पर्धया संसुन्वतोः जमदग्निः एतद्विहव्यं अपश्यत् अस्त्रविशेषो विहव्यम् । 'अगस्त्यस्य कयाशुभीयं शस्यम्' इत्याचार्याः; ब्राह्मणान्तरे* दर्शनात् । तत्र 'सजनीयं'* सजनशब्दवन्मन्त्रो भवति । विहवे साधु विहव्यम् इति । निष्केवल्ये 'इन्द्रस्य नु वीर्याणि'† इत्यस्य स्थाने 'यो जात एव'‡ इति भवति । 'कयाशुभीयं'* कयाशुभाशब्दवत्, मरुत्वतीये 'कया शुभा सवयसस्सनीळाः'§ इति । इति होतृणाम् ॥

[12]यस्येत्यादि ॥ यज्ञक्रतवः सोमयागाः भूयांसो बहुतराः

---

*सं. ७-५-५.
†तै ब्रा २–५–४.
‡सं. १-७-१३.[5]
§ऋ. २–३–२४.

सो यज्ञक्रतव इत्याहुस्स देवता वृ-
ङ्क्त इति यद्यग्निष्टोमस्सोमः परस्ता-
त्स्यादुक्थ्यं कुर्वीत यद्युक्थ्यस्स्यादे-
तिरात्रं कुर्वीत यज्ञक्रतुभिरेवास्य

यज्ञक्रतव इति यज्ञ-क्रतवः । इति । आहुः । सः । देवताः । वृङ्क्ते । इति । [13]यदि । अग्निष्टोम इत्यग्नि-स्तोमः । सोमः । परस्तात् । स्यात् । उक्थ्यम् । कुर्वीत । यदि । उक्थ्यः । स्यात् । अति-रात्रमित्यति-रात्रम् । कुर्वीत । यज्ञक्रतुभिरि-

---

महत्तराः । एतदुक्तं भवति—यस्य आत्मियः क्रतुः परकीयात्क्रतोर्भूयान्भवति स भूयःक्रतुः अल्पीयःक्रतोः देवता वृङ्क्ते इत्याहुः यज्ञविदः ॥

[13]तस्माद्यदि अग्निष्टोमः सोमः परस्तात्स्यात् परत्र प्रतियष्टरि स्यात् यद्यसावग्निष्टोमं कुर्यात् स्वयमुक्थ्यं ततो भूयांसं कुर्वीत । अथ यद्युक्थ्यस्सोमः परस्तात्स्यात् स्वयं ततो भूयांसं अतिरात्रं कुर्वीत । एवं यज्ञक्रतुभिरपि कृतैरेवास्य प्रतियष्टुः देवता वृङ्क्ते ततस्स देवताभिर्हीनो भवति । स्वयन्तु देवतावत्तया वसीयान् भवति वसुमत्तरो भवति । 'विन्मतोर्लुक्', 'टेः' इति टिलोपः ॥

देवता वृद्धे वर्षीयान्भवति ॥ २२ ॥
निग्राभ्यास्स्थ देवश्रुत आयुर्मे तर्प-
यत प्राणं मे तर्पयतापानं मे तर्प-
यत व्यानं मे तर्पयत चक्षुर्मे तर्प-

तिं यज्ञक्रतु-भिः । एव । अस्य । देवताः । वृद्धे । वर्षीयान् । भवति ॥ २२ ॥

प्राणापानयोर्भूतं वृद्धेऽष्टाविंशतिश्च ॥ ७ ॥

[1]निग्राभ्या इति नि-ग्राभ्याः । स्थ । देवश्रुत इति देव-श्रुतः । आयुः । मे । तर्पयत । प्राण-मिति प्र-अनम् । मे । तर्पयत । अपानमित्यप-अनम् । मे । तर्पयत । व्यानमिति वि-अनम् । मे । तर्पयत । चक्षुः । मे । तर्पयत । श्रोत्रम् ।

इति तृतीये प्रथमे सप्तमोनुवाकः.

---

[1]निग्राभ्यासु यजमानं वाचयति—निग्राभ्यास्स्थेति ॥ निगृह्यते नियमेन गृह्यते सोम आभिरिति निग्राह्याः । 'कृत्यल्युटो बहुलम्' इति करणे कृत्यः, 'हृग्रहोर्भः' इति भत्वम् । हे आपः निग्राभ्याः स्थ । देवश्रुतः देवैश्श्रूयते इति कर्मणि

यत॒ श्रोत्रं॑ मे तर्पयत॒ मनो॑ मे तर्प-
यत॒ वाचं॑ मे तर्पयतात्मानं॑ मे तर्प-
यताङ्गा॑नि मे तर्पयत प्र॒जां मे॑ तर्प-
यत प॒शून्मे॑ तर्पयत गृ॒हान्मे॑ तर्पयत
ग॒णान्मे॑ तर्पयत स॒र्वगं॑णं मा तर्पयत
त॒र्पय॑त मा ॥ २३ ॥ ग॒णा मे॒ मा

मे॒ । त॒र्प॒य॒त॒ । मनः॑ । मे॒ । त॒र्प॒य॒त॒ । वाच॑म् । मे॒ । त॒र्प॒य॒त॒ । आ॒त्मान॑म् । मे॒ । त॒र्प॒य॒त॒ । अङ्गा॑-नि । मे॒ । त॒र्प॒य॒त॒ । प्र॒जामिति॑ प्र—जाम् । मे॒ । त॒र्प॒य॒त॒ । प॒शून् । मे॒ । त॒र्प॒य॒त॒ । गृ॒हान् । मे॒ । त॒र्प॒य॒त॒ । ग॒णान् । मे॒ । त॒र्प॒य॒त॒ । स॒र्वग॑ण॒मिति॑ स॒र्व—ग॒ण॒म् । मा॒ । त॒र्प॒-य॒त॒ । त॒र्प॒य॑त । मा॒ ॥ २३ ॥ ग॒णाः । मे॒ । मा ।

क्विप् । देवानामपि सदसि प्रख्याता इत्यर्थः । ता यूयं मे मम आयुस्तर्पयत वर्धयत । सर्वं निगदसिद्धम् । ण्यन्तात्पचाद्यच्, 'पुंसि संज्ञायाम्' इति वा घः । ते प्राणादयः । णेश्च लुक् । व्यानमिति । छान्दसं दीर्घत्वम् । आत्मानं शरीरम् । गणास्सम्बन्धिनो मित्रादयः । सर्वगणं सर्वैर्गणैस्संवृतम् । किं बहुना—मां सर्वदा तर्पयत । तिङः परत्वान्न निहन्यते । किं च—मे गणाः मा वितृषन् वितृष्णा मा भूवन् सस्नेहा एव नित्यं भूयासुः । पुषादित्वादङ् ॥

वि तृष॒न्नोष॑धयो वै सोम॑स्य॒ विशो॒
विश॒ः खलु॒ वै राज्ञ॒ः प्रदा॑तोरीश्व॒रा
ऐन्द्र॒स्सोमोऽवी॑वृधं व॒ो मन॑सा सु-
वीर्ति । तृष॒न्न् । [2]ओष॑धयः । वै । सोम॑स्य । विश॑ः ।
विश॑ः । खलु॑ । वै । राज्ञ॑ः । प्रदा॑तो॒रिति॒ प्र—
दा॒तो॒ः । ई॒श्व॒राः । ऐन्द्रः । सोम॑ः । अवी॑वृधम् ।
व॒ः । मन॑सा । सु॒जा॒ता इति॑ सु—जा॒ताः । ऋत॑-

[2]अभिप्रोष्यन् ओषधीभ्यो राजानं निर्याचते—अवीवृधं व इति त्रिष्टुभा । तस्येदं प्रथममेव ब्राह्मणम्—ओषधयो वा इत्यादि ॥ सोमस्य राज्ञः ओषधयो विशः प्रकृतयः । राज्ञश्च प्रदातोः राजानं प्रदातुं विशः खलु ईश्वरास्समर्थाः । तस्य तदधीनयोगक्षेमत्वात् । 'ईश्वरे तोसुन्कसुनौ' इति तोसुन् । 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणस्सम्प्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । यथा—'समुद्रस्य न पिबन्ति'* इति । 'न लोकाव्यय' इति कर्मणि षष्ठ्या न प्रतिषेधः । 'तोसुन्कसुनोरप्रतिषेधः' इति वचनात् । किं च—सोमोयमैन्द्रः इन्द्रदेवत्यः । तस्मात् 'अवीवृधम्' इत्यादिकामृचं यदाह सोमं याचमानं तेनौषधीभ्य एनं निर्याच्य निष्कृष्य याचित्वा अभिषुणोति । कीदृशीभ्यः? स्वायै विशः आत्मीयाभ्यः प्रकृतिभ्यः । व्यत्ययेनैकवचनं चतुर्थी च । किं च—स्वायै देवतायै आत्मीयायाश्च देवतायाः इन्द्रात् एनं निर्याच्याभिषुणोतीति । मन्त्रार्थस्तु—अवीवृधं वर्धयामि वः युष्मान् मनसा हे ओषधयः । छान्दसो लुङ्, 'उर्ऋत्'

*तै. ब्रा. २-२-९.

जाता ऋतप्रजाता भग इद्वस्स्याम।
इन्द्रेण देवीर्वीरुधस्संविदाना अनु
मन्यन्ताꣳ सवनाय सोममित्याहौ-
षधीभ्य एवैनꣳ स्वायै विशस्स्वायै

प्रजाता इत्यृत-प्रजाताः । भगे । इत् । वः । स्याम । इन्द्रेण । देवीः । वीरुधः । संविदाना इति सं-विदानाः । अन्विति । मन्यन्ताम् । सवनाय । सोमम् । इति । आह । ओषधीभ्य इत्योषधि-भ्यः। एव । एनम् । स्वायै । विशः । स्वायै । देवतायै ।

इत्युपधाया ऋकारः । हे सुजाताः शोभनजन्मानः सर्वलोकहितार्थं जातत्वात् । हे ऋतप्रजाताः ऋतार्थं यज्ञार्थं प्रकृष्टं जन्म यासां तादृश्यः । आनुषङ्गिको हि लोकोपकारो भवतीनामिति भावः । पदादित्वात् षाष्ठिकमामन्त्रितादुदात्तत्वम् । वः युष्माकं भग इत् भजने एव सदा स्याम । यद्वा—युष्मत्सम्बन्धिनि यज्ञे भगे कर्मणि फललक्षणे ऐश्वर्ये स्याम सर्वे वयमृत्विग्यजमानाः प्रवर्तेमहि । तदर्थं किं कुर्म इति चेत् उच्यते—देव्यः देवनवत्यो भगवत्यः । पूर्ववत्पूर्वसवर्णदीर्घत्वम् । वीरुधः विविधं रोहन्त्यः । यद्वा—भगवत्यश्च वीरुधो लतादयश्च सर्वा इन्द्रेण संविदानाः प्रत्येकमिन्द्रेणैकमत्यं गताः । 'समो गमृच्छि' इत्यात्मनेपदम् । सवनाय यज्ञाय सोममनुमन्यन्तां यथा वयं

देवतायै निर्याच्याभिषुणोति यो वै
सोमस्याभिषूयमाणस्य ॥ २४ ॥
प्रथमोंऽशुस्स्कन्दति स ईश्वर इन्द्रि-
यं वीर्यं प्रजां पशून् यजमानस्य
निर्हन्तोस्तमभि मन्त्रयेता मांऽस्का-

निर्याच्येति निः—याच्यं । अभीति । सुनोति । [3]यः । वै । सोमस्य । अभिषूयमाणस्येत्यभि—सूय-माणस्य ॥ २४ ॥ प्रथमः । अंशुः । स्कन्दति । सः । ईश्वरः । इन्द्रियम् । वीर्यम् । प्रजामिति प्र—जाम् । पशून् । यजमानस्य । निर्हन्तोरिति निः—हन्तोः । तम् । अभीति । मन्त्रयेत । एति । मा । अस्कान् । सह । प्रजयेति प्र—जया । सह । रायः ।

भवतीभिः स्वयूध्याभिः इन्द्रेण च स्वामिना सहिताभिः अनुज्ञाताः कर्मणि स्याम तथाऽनुमन्यन्तां सोममिति ॥

[3]यो वा इत्यादि ॥ अभिषूयमाणस्य अभिषवे क्रियमाणे सोमस्य यः प्रथमोंशुः स्कन्दति निपतति स यजमानस्य इन्द्रियं चक्षुरादिकं वीर्यं बलं प्रजां पुत्रादिकां पशूंश्च गवादींश्च निर्हन्तोः निष्कृष्य हन्तुमीश्वरस्समर्थस्स्यात् । पूर्ववत्तोसुन् । तस्मात्तत्परिहारार्थं तत्प्रथमं स्कन्नं अंशुमभिमन्त्रयते—आ माऽस्कानिति । मां अस्कान् आगतोसि सह प्रजया सह च रायो धनस्य पशुलक्षणस्य पोषेण पुष्ट्या । इत्थमभ्युदयायैव मदा-

न्त्सह प्रजया सह रायस्पोषेणेन्द्रियं
मे वीर्यं मा निर्वधीरित्याशिषमेवै-
तामा शास्त इन्द्रियस्य वीर्यस्य
प्रजायै पशूनामनिर्घाताय द्रप्सश्च-

पोषेण । इन्द्रियम् । मे । वीर्यम् । मा । निरिति । वधीः । इति । आशिषमित्या–शिषम् । एव । एताम् । एति । शास्ते । इन्द्रियस्य । वीर्यस्य । प्रजाया इति प्र–जायै । पशूनाम् । अनिर्घातायेत्यनिः–घाताय । द्रप्सः । चस्कन्द । पृथिवीम् । अ-

---

भिमुख्येन अस्कान् हे अंशो । 'ऊडिदम्' इति रायष्षष्ठ्या उदात्तत्वम्, 'षष्ठ्याः पतिपुत्र' इत्यादिना विसर्जनीयस्य सकारः । स त्वं मयीन्द्रियं वीर्यं च मा निर्वधीः । यद्वा—'अस्कान्' इति लोडर्थे छान्दसो लुङ् । सह प्रजया सह रायस्पोषेण मामास्कन्द आगच्छेति । 'वदव्रज' इति वृद्धिः, 'बहुलं छन्दसि' इतीडभावः संयोगान्तलोपः । अनेन मन्त्रेण, 'आ माऽस्कान्' 'मा निर्वधीः' इत्येतामाशिषमाशास्ते इन्द्रियादीनामनिर्घाताय तद्भवति ॥

[4]द्रप्साननुमन्त्रयते—द्रप्सश्चस्कन्देति त्रिष्टुभा ॥ द्राणेन प्सानीयो भक्षणीयस्सर्वैरत्यल्पत्वाद्द्रप्सः । ईदृशो रसः पृथिवीमनु चस्कन्द, द्यामन्तरिक्षं वाऽनु चस्कन्द स्कन्नः रसभावेन प्रविष्टः। अधुना तस्य स्कन्नस्य इत्थं परिणामं करोमीति दर्शयितुमाह—तद्द्रप्समिमं पृथिव्याख्ययोनिस्थानीयं अनु अनन्तरं यः पूर्वः पूर्व-

स्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः । तृतीयं योनिमनु सञ्चरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः ॥ २५ ॥

न्विति । द्याम् । इमम् । च । योनिम् । अन्विति । यः । च । पूर्वः । तृतीयम् । योनिम् । अन्विति । सञ्चरन्तमिति सं–चरन्तम् । द्रप्सम् । जुहोमि । अन्विति । सप्त । होत्राः ॥ २५ ॥

तर्पयत माऽभिषूयमाणस्य यश्च दर्शं च ॥८॥

स्यामृच्यव्यवहितः द्यामिति च पुनरन्तरिक्षाख्या योनिः तं च तृतीयं चादित्यात्मकं योनिं एवं त्रीनपि लोकाननु सञ्चरन्तं अनुक्रमेणाहुतिभावेन सञ्चरन्तम् । 'अग्नौ प्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते' इति प्रथममादित्ये सञ्चरन्तं, 'आदित्याज्जायते वृष्टिः' इत्यनन्तरमन्तरिक्षे सञ्चरन्तं, 'वृष्टेरन्नम्' इति पृथिव्यां सञ्चरन्तं, 'ततः प्रजाः' इत्यनेन क्रमेण अनुसंचरन्तं द्रप्सं जुहोमि हुतमिव प्रतिष्ठापयामि नासौ विनष्ट इत्यग्नौ हुतमिवैतत्करोमीति । ननु पृथिव्यामन्तरिक्षे वा वृथा निपतितः इति मन्तव्य इति कावस्थाप्यते—सप्त होत्राः अनुवषट्कर्तारो होत्रादयस्सप्त होत्राः तासु स्थापयामि यथाहुत इवायमनष्टो भवति । यद्वा—सप्त होत्राः सप्तदिशः स्कन्नव्यतिरिक्ताः तासु सर्वास्विमं जुहोमि हुतमिव लोकानां स्थितये स्थापयामि । लक्षणेऽर्थे अनोः कर्मप्रवचनीयत्वम् ॥

इति तृतीये प्रथमे अष्टमोनुवाकः.

यो वै देवान्देवयशसेनार्पयति मनु-
ष्यान्मनुष्ययशसेन देवयशस्येव दे-
वेषु भवति मनुष्ययशसी मनुष्ये-
षु यान्प्राचीनमाग्रयणाद्ग्रहान्गृह्णीया-
त्तानुपाꣳशु गृह्णीयाद्यानूर्ध्वाꣳस्तानु-
पब्दिमतो देवानेव तद्देवयशसेनार्प-

[1]यः । वै । देवान् । देवयशसेनेति देव–यशसे-
न । अर्पयति । मनुष्यान् । मनुष्ययशसेनेति म-
नुष्य–यशसेन । देवयशसीति देव–यशसी । एव ।
देवेषु । भवति । मनुष्ययशसीति मनुष्य–यशसी ।
मनुष्येषु । यान् । प्राचीनम् । आग्रयणात् । ग्रहान् ।
गृह्णीयात् । तान् । उपाꣳश्वित्युप–अꣳशु । गृह्णी-
यात् । यान् । ऊर्ध्वान् । तान् । उपब्दिमत इत्यु-
पब्दि–मतः । देवान् । एव । तत् । देवयशसेनेति
देव–यशसेन । अर्पयति । मनुष्यान् । मनुष्यय-

[1]यो वै देवानित्यादि ॥ देवानां यशो देवयशसं स्वकीर्तिः बलं वा देवानां योग्यं यशः । 'अनसन्तान्नपुंसकात्' इत्यच्समासान्तः । अर्पयति प्रापयति । अर्तेर्णिचि 'अर्तिह्री' इत्यादिना पुक् । एवं मनुष्ययशसेनार्पयति । देवयशसीति । देवानां योग्येन यशसा देवानां मध्ये अतिशयेन तद्वान् भवति,

यति मनुष्यान्मनुष्ययशसेनं देव-
यशस्येव देवेषु भवति मनुष्ययश-
सी मनुष्येष्वग्निः प्रातस्सवने पा-

शसेनेति मनुष्य—यशसेनं । देवयशसीति देव—य-
शसी । एव । देवेषु । भवति । मनुष्ययशसीति
मनुष्य—यशसी । मनुष्येषु । [2]अग्निः । प्रातस्सवन
इति प्रातः—सवने । पातु । अस्मान् । वैश्वानरः ।

मनुष्ययशसी च मनुष्येषु भवति । 'चादिलोपे विभाषा' इति प्रथमो भवतिशब्दो न निहन्यते, विभाषेति वचनात् द्वितीयो निहन्यते । कथं पुनः क्रियमाणेन तेन तेऽर्पिता भवन्तीत्याह— यानित्यादि । आग्रयणाद्ग्रहात्प्राचीनं यान् ग्रहान् गृह्णीयात् । 'विभाषाञ्चेरदिक्स्त्रियाम्' इति खः । तानुपांशु अव्यक्तमन्त्रं गृह्णीयात्, यानूर्ध्वान् तत उपरितनान् ग्रहान् तानुपब्दिमतः किंचिदुच्चशब्दवतो गृह्णीयात्; नात्युच्चशब्दान् । बदिर् निशमने, 'इन् सर्वधातुभ्यः' इत्युपपूर्वात् बदेश्छान्दस उपधालोपः । समीपस्थैर्यो निशम्यते न दूरस्थैः स उपब्दिश्शब्दविशेषः । तद्वतः उपब्दिमतः । 'ह्रस्वनुड्भ्यां मतुप् । इति मतुप उदात्तत्वम् । 'उपाद्यजजिनम्' इत्युपांशुशब्दे उत्तरपदान्तोदात्तत्वम् । देवानित्यादि । तत् तेन तथाकरणेनेत्यर्थः । गतमन्यत् ॥

[2]यत्र बहिष्पवमानं साम आरब्धुमाग्नीध्रस्य पुरस्तात् प्रसृप्स्यन्तो भवन्ति तत्रान्वारब्धेषु तेषु आहवनीये स्रुवेणाहुतिं जुहोति—

त्वस्मान् वैश्वानरो महिना विश्व-
शंम्भूः । स नंः पावको द्रविणं द-
धातु ॥ २६ ॥ आयुष्मन्तस्सहभं-
क्षास्स्याम । विश्वे देवा मरुत इ-
न्द्रो अस्मानस्मिन्द्वितीये सवने न

महिना । विश्वशंम्भूरितिं विश्व—शम्भूः । सः । नः ।
पावकः । द्रविणम् । दधातु ॥२६॥ आयुष्मन्तः ।
सहभंक्षा इतिं सह—भक्षाः । स्याम । [3]विश्वे । दे-
वाः । मरुतः । इन्द्रः । अस्मान् । अस्मिन् । द्वि-
तीयें । सवने । न । जह्युः । आयुष्मन्तः । प्रियम् ।

अग्निः प्रातस्सवने इति त्रिष्टुभा ॥ अस्मिन् प्रातस्सवने अग्निः अस्मान् पातु रक्षतु वैश्वानरः विश्वेषां नराणां स्वामित्वेन सम्बन्धी । महिना महत्त्वेन विश्वशंभूः विश्वेषां सुखस्य भावयिता । महेरिनिप्रत्ययान्तात् 'सुपां सुलुक्' इति तृतीयाया आकारः । स नः अस्मभ्यं द्रविणं धनं दधातु ददातु पावकः अस्माकं शोधयिता । किञ्च—वयमायुष्मन्तः दीर्घायुषः सहभक्षाः भक्षयितृभिस्सह सर्वैः सहिताश्च सर्वदा स्याम ॥

[3]माध्यन्दिने पवमाने तथैवान्वारब्धेषु आहवनीये स्रुवाहुतिं जुहोति—विश्वे देवा इति त्रिष्टुभा ॥ विश्वे देवाः मरुतश्च इन्द्रश्चास्मानस्मिन् द्वितीये सवने न जह्युः माध्यन्दिने मा हासिषुः ।

जह्युः । आयुष्मन्तः प्रियमेषां व-
दन्तो वयं देवानाꣳ सुमतौ स्याम ।
इदं तृतीयꣳ सवनं कवीनामृतेन
ये चमससमैरयन्त । ते सौधन्वनास्सु-
वरानशानास्स्विष्टिं नो अभि वसी-

एषाम् । वदन्तः । वयम् । देवानाम् । सुमताविति
सु–मतौ । स्याम । [4]इदम् । तृतीयम् । सवनम् ।
कवीनाम् । ऋतेन । ये । चमसम् । ऐरयन्त । ते ।
सौधन्वनाः । सुवः । आनशानाः । स्विष्टिमिति सु–

ततश्च वयमपि आयुष्मन्तस्सन्तः एषां देवानां प्रियं स्तोत्रशस्त्रादिकं वदन्तः देवानां सुमतौ कल्याणायां सानुग्रहायां बुद्धौ स्याम । सुष्ठु मननं सुमतिः । कृदुत्तरपदप्रकृतिस्वरत्वम्, 'मन्त्रे वृष' इति क्सिन उदात्तत्वम् ॥

[4]आर्भवे पवमाने तथैव समन्वारब्धेषु आहवनिये स्रुवाहुतिं जुहोति—इदं तृतीयमिति त्रिष्टुभा ॥ इदं तृतीयं सवनं कवीनां मेधाविनामृत्विजां सम्बन्धि 'वसीयो नयन्तु' इति वक्ष्यमाणेन सम्बध्यते । नः अस्मान् अस्मदाभिमुख्येन इदं सवनं वसीयः वसुमत्तरं कृत्वा अस्मान् नयन्तु प्रापयन्तु । ते के? ये ऋतेन सत्येन चमसं चमसान् । जातावेकवचनम् । ऐरयन्त प्रेरितवन्तः कृतवन्त इत्यर्थः । ते सौधन्वनाः सुधन्वनः इन्द्रस्य सम्बन्धिनो देवाः ऋभुनामानः सुवः स्वर्गं आनशानाः व्या-

यो नयन्तु । आयतनवतीर्वा अन्या आहुतयो हूयन्तेऽनायतना अन्या या आघारवतीस्ता आयतनवती-र्याः ॥ २७ ॥ सौम्यास्ता अनाय-

इष्टिम् । नः । अभीति । वसीयः । नयन्तु । [5]आयत-नवतीरित्यायतन–वतीः । वै । अन्याः । आहुतय इत्या–हुतयः । हूयन्ते । अनायतना इत्यना–यत-नाः । अन्याः । याः । आघारवतीरित्याघार–वतीः । ताः । आयतनवतीरित्यायतन–वतीः । याः ॥ २७ ॥ सौम्याः । ताः । अनायतना इत्यना–यतनाः ।

प्रुवन्तः इदं सवनं वसीयः कुर्वन्तु स्विष्टिं शोभनं च यागम-स्माकं कुर्वन्तु । शोभना इष्टिः स्विष्टिः इति प्रादिसमासः, अव्ययपूर्वपदप्रकृतिस्वरत्वम् । गतिसमासे 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् । 'उदात्तस्वरितयोर्यणः' इति संहितायां ततः परः इकारस्स्वर्यते । अश्नोतेर्लिटः कानजादेशः, 'अश्नोतेश्च' इति नुट् । वसीयश्शब्दो व्याख्यातः* ॥

[5]आयतनवतीरित्यादि ॥ आयतनवतीः आयतनवत्यः विभक्ता-वकाशं स्थानमायतनं तद्वत्यः अन्याः काश्चिदाहुतयः हूयन्ते, काश्चिदनायतना एव हूयन्ते । 'एकान्याभ्यां समर्थाभ्याम्' इति प्रथमा तिङ्विभक्तिर्न निहन्यते । काः पुनस्ता उभय्य इत्याह—

---

* सं ३–१–६.1–5

तना ऐन्द्रवायवमादायाधारमाधारयेदध्वरो यज्ञोऽयमस्तु देवा ओषधीभ्यः पशवे नो जनाय विश्वस्मै भूतायाध्वरोसि स पिन्वस्व घृतवद्देव सोमेति सौम्या एव तदाहुतीरायतनवतीःकरोत्यायतनवान्भवति

ऐन्द्रवायवमित्यैन्द्र–वायवम् । आदायेत्या–दायं । आधारमित्या–धारम् । एति । धारयेत् । अध्वरः । यज्ञः । अयम् । अस्तु । देवाः । ओषधीभ्य इत्योषधि–भ्यः । पशवे । नः । जनाय । विश्वस्मै । भूताय । अध्वरः । असि । सः । पिन्वस्व । घृतवदितिं घृत–वत् । देव । सोम । इति । सौम्याः । एव । तत् । आहुतीरित्या–हुतीः । आयतनवतीरित्यायतन–वतीः । करोति । आयतनवानित्यायतन–वान् । भवति । यः । एवम् । वेद । अथो

या इत्यादि । आधारवतीः आधारोक्षणया होमः, तद्वत्यो या आहुतयः आज्यपुरोडाशादीनां ता आयतनवत्यः । यास्सौम्याः सोमाहुतयः ता अनायतनाः, अधाराभावात् । 'सोमाष्टचण्' । तत्र ऐन्द्रवायवमादाय जुहोति—अध्वरो यज्ञ इति त्रिष्टुभा । आधारे दक्षिणं परिधिसन्धिमन्ववहृत्य प्राञ्चमुदञ्चमाधारयेत् । तेन

य एवं वेदाथो द्यावापृथिवी एव
घृतेन व्युनत्ति ते व्युत्ते उपजीवनीये
भवत उपजीवनीयो भवति ॥२८॥
य एवं वेदैष ते रुद्र भागो यं निर-

इति । द्यावापृथिवी इति द्यावा-पृथिवी । एव । घृतेन । वीति । उनत्ति । ते इति । व्युत्ते इति वि-उत्ते । उपजीवनीये इत्युप-जीवनीये । भवतः । उपजीवनीय इत्युप-जीवनीयः । भवति ॥ २८ ॥ यः । एवम् । वेद । [6]एषः । ते । रुद्र । भागः ।

सौम्या अप्याहुतीरायतनवतीः करोति । य एवं वेदिता आयतनवान् गृहवान् भवति । मन्त्रार्थस्तु—अयं यज्ञः अध्वरः हिंसकरहितः अस्तु हे देवाः । किमर्थम्? ओषधीभ्यः, पशवे पशुभ्यः, । जातावेकवचनम् । नः अस्माकं जनाय पुत्रादये । किं बहुना—विश्वस्मै भूताय सर्वस्मै भूतजाताय । किं च—अध्वरस्त्वमसि । हे देव सोम त्वं घृतवत् घृताहँ घृतयुक्तं वा अस्मान् पिन्वस्व प्रीणय । पिवि प्रीणने, इदित्त्वान्नुम् । अथो अपि च अनेनाघारेण द्यावापृथिवी एव घृतेन उदकेन व्युनत्ति विविधं क्लेदयति । ते व्युत्ते क्लेदिते उपजीवनीये सर्वेषां भवतः । उन्दी क्लेदने, 'श्वीदितो निष्ठायाम्' इतीट्प्रतिषेधः, 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्, 'उदात्तस्वरितयोर्यणः' इति ततः परस्य संहितायां स्वरितत्वम् । एवं वेदिता उपजीवनीयो भवति बन्धूनामिति ॥

[6]प्रतिप्रस्थाता उत्तरार्धे आहवनीयस्य मन्थिनस्संस्रावं जुहोति—

यांचथास्तं जुषस्व विदेगौपत्यꣳ
रायस्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ
स्वस्तिम् । मनुः पुत्रेभ्यो दायं व्य-

यम् । निरयाचथा इति निः—अयाचथाः । तम् । जुषस्व । विदेः । गौपत्यम् । रायः । पोषम् । सु-वीर्यमिति सु—वीर्यम् । संवत्सरीणामिति सं—व-त्सरीणाम् । स्वस्तिम् । [7]मनुः । पुत्रेभ्यः । दायम् ।

एष ते रुद्र भाग इति ॥ हे रुद्र एष संस्रावभागः । यं त्वं निरयाचथाः निष्कृष्य देवेभ्यः स्वतन्त्रमयाचथाः 'यज्ञे माऽऽभजाथ ते पशून्नाभि मंस्ये'* इति । सोयं त्वदीयो भागः, तं जुषस्व सेवस्व विदेः वेदय लम्भय । विदेरन्तर्भावितण्यन्ताल्लिङि छान्दसो नुमभावः । ण्यन्तादेव वा लिङि 'बहुलं संज्ञाछन्दसोः' इति णिलुक् । यद्वा—विदेः विद्याः । वेत्तेर्विकरणव्यत्ययेन शः । गौपत्यादिकमस्मान् लम्भय । गौपत्यादिलक्षणं वा आत्मीयं माहात्म्यं अनेन होमेन वेदितुमर्हसीति । गौपत्यं गवां स्वामित्वम् । पतिलक्षणो ण्यत् । रायो धनस्य पश्वादेः पोषं पुष्टिं कीदृशं? सुवीर्यं शोभनपुत्रादिं बलम् । पूर्ववत्सत्वम्, स्वरश्च । संवत्सरीणां संवत्सरभाविनीं स्वस्तिं अविनाशम् । 'संपरिपूर्वात्ख च' इति खः ॥

[7]अथैतस्य मन्थिसंस्रावहोमस्य ब्राह्मणम्—मनुः पुत्रेभ्य इत्या-

---

* सं. ३-१-९.[9]

भजत्स नाभानेदिष्ठं ब्रह्मचर्यं वसन्तं
निरभजत्स आऽगच्छत्सोब्रवीत्कथा
मा निरभागिति न त्वा निरभाक्ष-
वीति । अभजत् । सः । नाभानेदिष्ठम् । ब्रह्मच-
र्यमिति ब्रह्म—चर्यम् । वसन्तम् । निरिति । अभ-
जत् । सः । एति । अगच्छत् । सः । अब्रवीत् ।
कथा । मा । निरिति । अभाक् । इति । न ।

दि ॥ मनुः प्रजापतिः आत्मीयेभ्यः पुत्रेभ्यो दायं व्यभजत् । क्रयादिभिर्विनाऽपि पित्रादिसकाशात्पुत्रादिभिः प्राप्यं धनं दायः । स पुत्रेभ्यः तद्व्यभजत् मनुः । नाभानेदिष्ठं नाम पुत्रं ब्रह्मचर्यं वसन्तं ब्रह्म वेदः तदर्थानां व्रतानां चरणं ब्रह्मचर्यम् । 'गद मदचर' इति यत् । तदुपसंप्राप्य वसन्तम् । यद्वा—ब्रह्मचर्यं निषेवमाणं निरभजत् निर्भागमकरोत् । भानां नेदिष्ठः प्रत्यासन्नतमः भानेदिष्ठः न भानेदिष्ठः अभानेदिष्ठः, तद्विपरीतः नाभानेदिष्ठः तेजस्वितमः । व्युत्पत्तिमात्रमिदम् । संज्ञैषा तत्रभवतः । अत एव नावगृह्यते । 'अयं नाभा वदति'* इत्यत्र तु एकदेशस्य ग्रहणं यथा भीमसेनो भीम इति । तत्र व्यत्ययेन पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् । वनस्पत्यादिर्वा द्रष्टव्यः । सः नाभानेदिष्ठः समाप्तब्रह्मचर्यं आगच्छत्, आगत्य च सोब्रवीत् पितरम् । कथा केन हेतुना मां निरभाक् निर्भागमकार्षीः इति । 'था हेतौ च छन्दसि' इति थाप्रत्ययः । भजेर्लङि 'वदव्रज' इति वृद्धौ 'बहुलं छन्दसि' इतीडभावे इतश्च लोपः,

*ऋ. सं. ८-२-१-४.

मित्यब्रवीदङ्गिरस इमे सत्त्रमासते
ते ॥ २९ ॥ सुवर्गं लोकं न प्र जा-
नन्ति तेभ्य इदं ब्राह्मणं ब्रूहि ते
सुवर्गं लोकं यन्तो य एषां पशव-
स्ताꣳस्ते दास्यन्तीति तदेभ्योऽब्र-

त्वा । निरिति । अभाक्षम् । इति । अब्रवीत् ।
[8]अङ्गिरसः । इमे । सत्रम् । आसते । ते ॥ २९ ॥
सुवर्गमिति सुवः—गम् । लोकम् । न । प्रेति ।
जानन्ति । तेभ्यः । इदम् । ब्राह्मणम् । ब्रूहि । ते ।
सुवर्गमिति सुवः—गम् । लोकम् । यन्तः । ये ।
एषाम् । पशवः । तान् । ते । दास्यन्ति । इति ।
तत् । एभ्यः । अब्रवीत् । ते । सुवर्गमिति
सुवः—गम् । लोकम् । यन्तः । ये । एषाम् ।

हल्ङ्यादिसंयोगान्तलोपे अभागिति रूपम् । अथ न त्वा निर-
भाक्षं निर्भागमकार्षमिति पिताऽब्रवीत् ॥

[8]कस्तर्हि मम भाग इति चेत्तदपि ब्रूमः—अङ्गिरस इमे सत्त्रमासते सत्त्रमुपसंप्राप्यासते सत्त्रयागं कुर्वन्ति, ते सुवर्गं लोकं न प्रजानन्ति तज्ज्ञानसाधनानामज्ञानात् । तेभ्य इदं ब्राह्मणं ब्रूहि ततस्ते ब्राह्मणोक्तार्थानुष्ठानेन सुवर्गं लोकं यन्तः ये एषां तदात्वे पशव आसन् सहस्रसङ्ख्याः तांस्ते सत्रान्ते दास्यन्ति स

वीत्ते सुवर्गं लोकं यन्तो य एषां प-
शव आसन्तानस्मा अददुस्तं पशु-
भिश्चरन्तं यज्ञवास्तौ रुद्रआऽगच्छ-
त्सोब्रवीन्मम वा इमे पशव इत्य-
दुर्वै ॥ ३० ॥ मह्यमिमानित्यब्रवीन्न
वै तस्य त ईशत इत्यब्रवीद्यद्यज्ञवा-

पशवः । आसन् । तान् । अस्मै । अद-
दुः । [9]तम् । पशुभिरितिं पशु-भिः । चरन्तम् ।
यज्ञवास्ताविति यज्ञ-वास्तौ । रुद्रः । एति । अग-
च्छत् । सः । अब्रवीत् । मम । वै । इमे । पशवः ।
इति । अदुः । वै ॥ ३० ॥ मह्यम् । इमान् । इति ।
अब्रवीत् । न । वै । तस्य । ते । ईशते । इति ।
अब्रवीत् । यत् । यज्ञवास्ताविति यज्ञ-वास्तौ ।

ते भाग इति पिता पुत्रमब्रवीत् । स च पुत्रः तेभ्यः ब्राह्मणमब्रवीत् । ते सुवर्गमित्यादि । गतम् । किं पुनस्तद्ब्राह्मणं। उच्यते—अवाप्यानि सन्तीति द्रप्सा अनुमन्त्रणीया अच्छावाक्यास्स्तोत्रियाश्शस्त्रियास्सत्यवदनश्रद्धाहोमादिनादिति[?] ॥

[9]तमित्यादि ॥ यज्ञवास्तौ यज्ञगृहे पशुभिस्सह चरन्तं रुद्र आगच्छत्, आगत्य चाब्रवीत्—मम स्वभूता इमे एते पशव इति । अथादुर्वै मह्यमिमान् पशूनङ्गिरसः इति देवमब्रवीत् ।

स्तौ हीयते मम वै तदिति तस्मा-
द्यज्ञवास्तु नाभ्यवेत्यꣳ सोब्रवीद्यज्ञे
माऽऽ भजार्थं ते पशून्नाभि मꣳस्य
इति तस्मा एतं मन्थिनꣳसꣳस्राव-
मजुहोत्ततो वै तस्य रुद्रः पशून्ना-

हीयते । मम । वै । तत् । इति । तस्मात् । यज्ञ-
वास्त्विति यज्ञ–वास्तु । न । अभ्यवेत्यमित्यभि–
अवेत्यम् । सः । अब्रवीत् । यज्ञे । मा । एति ।
भज । अर्थ । ते । पशून् । न । अभीति । मꣳ-
स्ये । इति । तस्मै । एतम् । मन्थिनः । सꣳस्राव-
मिति सं–स्रावम् । अजुहोत् । ततः । वै । तस्य ।

मानवः अदुरिति वा । पदादित्वान्न निहन्यते । अथ समाप्ते यागे तेषां पशूनां स्वामित्वं अङ्गिरसां नास्ति । ततोस्वामिदत्तैः कोर्थस्तवेति दर्शयितुं देव आह—न वा इति । यज्ञवास्तौ यद्धीयते कृतकार्यत्वात् यज्ञसाधनभावं हित्वा तिष्ठति तस्य ते नेशते स्वामिनो न भवन्ति । न केवलं पशूनामेव, अन्यस्यापि यस्य कस्यचित् यागोपयुक्तस्य नेश्वरा इति प्रतिपादयितुं यादित्युक्तम् । कस्य तर्हि स्वं तदिति जिज्ञासायामाह—ममेति । कृतकार्यं तत्पूर्वभाविनो ममैव स्वमिति सिद्धमेवैतत् इति । यागार्थं प्रथमं पशवः पशुमध्यान्निष्क्रीयन्ते । यागोत्तरं तु पश्वन्तरसमानधर्मतां भजन्ते । उक्तं च—'अनु मन्यस्व सुयजा यजाम'* इति ।

*सं. ३-१-४,[2]

भ्यमन्यत यत्रैतमेवं विद्वान्मन्थिनंस्सꣳस्रावं जुहोति न तत्र रुद्रः पशूनभि मन्यते ॥ ३१ ॥

रुद्रः । पशून् । न । अभीति । अमन्यत । [10]यत्र । एतम् । एवम् । विद्वान् । मन्थिनः । सꣳस्रावमिति सं-स्रावम् । जुहोति । न । तत्र । रुद्रः । पशून् । अभीति । मन्यते ॥ ३१ ॥

दधात्वायतनवतीर्या उपजीवनीयो भवति तेऽदुर्वै यत्रैतमेकादश च ॥ १ ॥

त्वदनुमत्या हि पशोर्यागसाधनभावोपि भवतीति । तस्मादित्यादि । यस्मादेवं तस्मात्स्वामिनोनुज्ञामन्तरेण यज्ञवास्तु नाभ्यवेत्यं न प्रवेष्टव्यं अहोरात्राविति्येवं यावदभ्रयश्शीतास्स्युरित्येके । यावदेनमभिवर्षेदित्यपरे । यज्ञाङ्गभागो निषिद्ध्यते इत्येके । व्यतिरिक्तविषयमित्यन्ये । आहुश्च—'न यज्ञमतिव्रजेत्' इति । अथ सोब्रवीत् देवः यज्ञे मा भज येन केनचिद्धविषा मामाराधयन्नाश्रय । अथ यदि तथा क्रियते ततस्ते पशून् त्वया लब्धान् पशून् नाभिमंस्ये न विनाशयिष्यामि मदीयानामेतच्छाभं सोढाऽस्मीति तस्मा इति । अजुहोत् अहावयत् ॥

[10]यत्रैतमित्यादि ॥ गतम् ॥

इति तृतीये प्रथमे नवमोनुवाकः.

जुष्टो वाचो भूयासं जुष्टो वाचस्प-
तये देवि वाक् । यद्वाचो मधुमत्त-
स्मिन्मा धास्स्वाहा सरस्वत्यै । ऋ-
चा स्तोमꣳ समर्धय गायत्रेण रथ-

[1]जुष्टः । वाचः । भूयासम् । जुष्टः । वाचः । पतये । देवि । वाक् । यत् । वाचः । मधुमदिति मधु–मत् । तस्मिन्न् । मा । धाः । स्वाहा । सरस्वत्यै । [2]ऋचा । स्तोमम् । समिति । अर्धय । गायत्रेण । रथन्तरमिति रथं–तरम् । बृहत् । गा-

---

[1]अथ प्रवृताहुती जुहोति—जुष्टो वाचः, ऋचा स्तोममिति द्वाभ्याम् । प्रथमाऽनुष्टुप् विषमपादा, द्वितीया गायत्री ॥ जुष्टः इष्टः वाचः भूयासम् । वाचस्पतये मनसे प्राणाय जुष्टः भूयासमित्येव । षष्ठचर्थे चतुर्थी । 'सावेकाचः' इति वाचः षष्ठचा उदात्तत्वम् । 'षष्ठचाः पतिपुत्र' इति सत्वम् । 'नित्यं मन्त्रे' इति जुष्टशब्द आद्युदात्तः । हे देवि वाक् यद्वाचः पदं वास्तवं मधुमत् मधुरं तस्मिन् मा धाः धेहि स्थापय । सरस्वत्यै तुभ्यं स्वाहुतमिदमस्तु । दधातेर्लोटि 'बहुलं छन्दसि' इति शपो लुक् ॥

[2]अथ द्वितीया—ऋचा योनिभूतया स्तोमं स्तोत्रं समर्धय समृद्धं कुरु । गायत्रेण साम्ना रथन्तरं समर्धय । बृहच्च साम गायत्रवर्तनि गायत्रपदभक्तिकं समर्धय तदनुगतं कुर्विति समर्धय

न्तरम् । बृहद्गायत्रवर्तनि । यस्ते द्रप्सस्स्कन्दति यस्ते अꣳशुर्बाहुच्युतो धिषणयोरुपस्थात् । अध्वर्योर्वा परि यस्ते पवित्रात्स्वाहाकृतमिन्द्रा-

यत्रवर्तनीति गायत्र—वर्तनि । [3]यः । ते । द्रप्सः । स्कन्दति । यः । ते । अꣳशुः । बाहुच्युत इति बाहु—च्युतः । धिषणयोः । उपस्थादित्युप—स्थात् । अध्वर्योः । वा । परीति । यः । ते । पवित्रात् । स्वाहाकृतमिति स्वाहा—कृतम् । इन्द्राय । तम् ।

हे वाक् । प्रवृतेषु ऋत्विक्षु सम्यग्यज्ञप्रवृत्तौ यथोक्तसमृद्धिकं सर्वं भवतीति ॥

[3]द्रप्सानानुमन्त्रयते—यस्ते इति तिसृभिस्त्रिष्टुभिः । तत्र प्रथमा—यस्ते इति ॥ 'अंशुः' इति प्रथमपादान्तः । हे सोम यस्तेऽभिषूयमाणस्य द्रप्सो रसस्स्कन्दति । यो वा तवांशुः सूक्ष्मलतावयवः बाहुच्युतः बाह्वोर्हस्तयोश्चुतः निपतितः संलग्नः । थाथादिस्वरं बाधित्वा व्यत्ययेन सप्तमीपूर्वपदप्रकृतिस्वरत्वम् । धिषणयोरुपस्थात्—अधिषवणफलके धिषणे । दृश्यते हि 'धिषणे वीडू' इति* । तयोरुपस्थादुत्सङ्गात् हस्तयोश्चुतः । अध्वर्योरिति । यद्वा यो वा तव रसः पवित्रात् दशापवित्रात् विततात्पतितः सर्वतस्स्कन्दति तं सर्वं स्वाहाकृतं स्वाहाकारेण प्रक्षिप्तं स्वाहाकृ-

---

*सं. १-४-१[10].

य तं जुहोमि । यो द्रप्सो अꣳशुः
पतितः पृथिव्यां परिवापात् ॥३२॥
पुरोडाशात्करम्भात् । धानासोमा-
न्मन्थिनं इन्द्र शुक्रात्स्वाहाकृतमि-

जुहोमि । [4]यः । द्रप्सः । अꣳशुः । पतितः । पृ-
थिव्याम् । परिवापादिति परि—वापात् ॥ ३२ ॥
पुरोडाशात् । करम्भात् । धानासोमादिति धाना-
—सोमात् । मन्थिनः । इन्द्र । शुक्रात् । स्वाहाकृ-
तमिति स्वाहा—कृतम् । इन्द्राय । तम् । जुहोमि ।

तवद्वृधानिपतितं कृत्वा इन्द्राय जुहोमि स्वाहुतमेव करोमि । स्वाहाशब्दस्योर्यादित्वेन गतित्वात् 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरत्वम् ॥

[4]अथ द्वितीया—यो द्रप्स इति ॥ सोमात् यो द्रप्सो वा अंशुर्वा पृथिव्यां पतितः परिवापादिभ्यश्च । हे इन्द्र तं स्वाहाकृतं इन्द्रायेश्वराय तुभ्यं जुहोमि हुतमेव करोमि । परिवापाः व्रीहिप्रभवा लाजाः । पुरोडाशः पिष्टमयः । करम्भः सक्त्वाज्यसंयोगविशेषः । धानाश्च सोमश्च धानासोमम् । 'जातिरप्राणिनाम्' इत्येकवद्भावः । धानाः तण्डुलप्रभवाः लाजप्रकाराः । सोमो लतात्मा । यद्वा—सवनीयैः साहचर्यात् पारिशेष्याच्च सोमविषया मैत्रावरुणी पयस्या सोमशब्देनोच्यते । यथा धानाः

न्द्रा॑य॒ तं जु॑होमि । यस्ते॒ द्रप्सो मधु॑-
मा॑ꣳ इन्द्रि॒यावा॒न्त्स्वाहा॑कृतः पुनर॒-
प्येति॑ दे॒वान् । दि॒वः पृ॑थि॒व्याः पर्य॒-
न्तरि॑क्षात्स्वाहा॑कृत॒मिन्द्रा॑य॒ तं जु॑हो-
मि । अ॒ध्व॒र्युर्वा ऋ॒त्विजा॑ प्रथ॒मो
यः । ते॒ । द्रप्सः॑ । मधु॑मानिति॒ मधु॑-मान् । इ॒न्द्रि॒यावा॒नितीन्द्रि॑य-वान् । स्वाहा॑कृत॒ इति॒ स्वा-
हा॑-कृतः । पुनः॑ । अ॒प्येती॒त्यपि॑-एति॑ । दे॒वान् । दि॒वः । पृ॒थि॒व्याः । परीति॑ । अ॒न्तरि॑क्षात् । स्वा-
हा॑कृत॒मिति॒ स्वाहा॑-कृत॑म् । इन्द्रा॑य । तम् । जु॒-
होमि॒ । [6]अ॒ध्व॒र्युः । वै । ऋ॒त्विजा॑म् । प्र॒थ॒मः ।

करम्भः परिवापः पुरोडाशः पयस्या पङ्क्तिराप्यत इति । मन्थी शुक्रश्च ग्रहौ ॥

[5]अथ तृतीया—यस्ते इति ॥ हे सोम यस्ते द्रप्सो मधुमान् मधुररसवान् इन्द्रियावान् वीर्यवांश्च भूत्वा स्वाहाकृतः पुनर्देवान-प्येति गच्छति । दिवो वा पृथिव्या वा अन्तरिक्षाद्वा यत्र यत्र स्कन्नः ततस्सर्वस्मादागत्य पुनरपि देवान्प्राप्नोति मम स्वाहा-कारेण तमहमिन्द्राय स्वाहाकृतं कृत्वा जुहोमि साऽपि तथा क-रोत्विति । 'मन्त्रे सोमाश्च' इतीन्द्रियशब्दस्य दीर्घत्वम् । 'ऊडिदम्' इति दिवो विभक्तिरुदात्ता । 'उदात्तयणः' इति पृथिव्याः ॥

[6]अथ 'वागग्रेगाः' इत्यस्य वक्ष्यमाणस्य मन्त्रस्य ब्राह्मणं

युज्यते तेन स्तोमो योक्तव्य इत्या-
हुर्वाग्रेगा अग्रं एत्वृजुगा देवेभ्यो
यशो मयि दधती प्राणान्पशुषु प्रजां
मयि ॥३३॥ च यजमाने चेत्याह
वाचमेव तद्यज्ञमुखे युनक्ति वास्तु

युज्यते । तेन । स्तोमः । योक्तव्यः । इति । आहुः । वाक् । अग्रेगा इत्यग्रे-गाः । अग्रे । एतु । ऋजुगा इत्यृजु-गाः । देवेभ्यः । यशः । मयि । दधती । प्राणानिति प्र-अनान् । पशुषु । प्रजामिति प्र-जाम् । मयि ॥३३॥ च । यजमाने । च । इति । आह । वाचम् । एव । तत् । यज्ञमुख इति यज्ञ-मुखे । युनक्ति । वास्तु । वै । एतत् । यज्ञस्य ।

—अध्वर्युर्वा इत्यादि ॥ ऋत्विजां मध्ये अध्वर्युः प्रथमः बहिष्पमानाय संसर्पणे युज्यते । अथ तस्य प्राथम्यात्तेनैव प्रथमं स्तोमो योक्तव्य इत्याहुः । तस्मात्सर्पणकाले 'वागग्रेगाः' इत्यादिकं यजुर्यदाह तेन प्रथममध्वर्युः वाचं यज्ञमुखे बहिष्पवमानारम्भे युनक्ति यद्वाचं बहिष्पवमानं यज्ञमुखेऽध्वर्युर्युनक्ति एवं स्तोमो युक्तो योजितो भवति । मन्त्रार्थस्तु—वागग्रेगाः सर्वस्याग्रे गच्छन्ती अग्रे प्रथमं बहिष्पवमानमेतु । 'जनसन' इति विट्' 'विड्वनोरनुनासिकस्यात्' इत्यात्वम् । ईदृशी सती गच्छत्वित्याह —ऋजुगाः ऋजुमार्गेण गच्छन्ती देवेभ्यः देवार्थमवक्रगमना देवानेवं गच्छन्तीत्यर्थः । पूर्ववद्विट् । मयि यशो दधती स्थाप-

वा एतद्यज्ञस्य क्रियते यद्ग्रहान्गृहीत्वा बहिष्पवमानꣳ सर्पन्ति पराञ्चो हि यन्ति पराचीभिस्स्तुवते वैष्णव्यर्चा पुनरेत्योप तिष्ठते यज्ञो वै विष्णुर्यज्ञमेवाकर्विष्णो त्वं नो अन्तमꣳशर्म

क्रियते । यत् । ग्रहान् । गृहीत्वा । बहिष्पवमानमिति बहिः—पवमानम् । सर्पन्ति । [7]पराञ्चः । हि । यन्ति । पराचीभिः । स्तुवते । वैष्णव्या । ऋचा । पुनः । एत्येत्या—इत्य । उपेति । तिष्ठते । यज्ञः । वै । विष्णुः । यज्ञम् । एव । अकः । विष्णो इति । त्वम् । नः । अन्तमः । शर्म । यच्छ । सहन्त्य ।

यान्ती सुष्ठु प्रचारणात्प्राणान् पशुषु दधती सम्यग्यागनिष्पत्तेः प्रजां मयि च यजमाने दधती अग्रे गच्छत्विति । वास्तु वा एतद्यज्ञस्येत्यादि । वास्तुग्रहणं एतद्यज्ञस्य क्रियते यद्ग्रहान् गृहीत्वा बहिष्पवमानं सर्पन्ति तस्मात्प्रथममेव ग्रहा गृहीतव्याः । ततो बहिष्पवमानं संसर्पेयुरिति । एवं हि यज्ञो वास्तुमान् भवति ॥

[7]पराञ्चो हीत्यादि ॥ हि यस्मादर्थे । यस्मात्पराञ्चोपुनरावृत्ता बहिष्पवमानाय यन्ति सर्पन्ति तस्मादानुरूप्याय पराचीभिः अनावृत्ताभिः त्रिवृत्त्वान्नवभिः ऋग्भिस्स्तुवते । अकर्त्रभिप्रायत्वाद्वचत्ययेनात्मनेपदम्, परापूर्वादञ्चतेः क्विपि 'अनिगन्तादञ्चतौ' इति गतेः प्रकृतिस्वरत्वम् । वैष्णव्येत्यादि । पुनरेत्यागत्य वैष्णव्यर्चा वक्ष्यमाणया अनुष्टुभा राजानमुपतिष्ठते—तस्मादनेनोपस्थानेन यज्ञमे-

यच्छ सहन्त्य । प्र ते धारा मधुश्चुत
उत्सं दुहते अक्षितामित्याह यदेवास्य
शयानस्योपशुष्यति तदेवास्यैतेना
प्यायया॑ति ॥ ३४ ॥

प्रेति । ते । धाराः । मधुश्चुत इति मधु–श्चुतः । उत्सम् । दुहते । अक्षितम् । इति । आह । यत् । एव । अस्य । शयानस्य । उपशुष्यतीत्युप–शुष्यति । तत् । एव । अस्य । एतेन । एति । प्यायया॑ति ॥ ३४ ॥

परिवापात्प्रजां मयि दुहते चतुर्दश च ॥१०॥

वाकः करोति । करोतेः छान्दसे लुङि 'मन्त्रे घस' इति च्लेर्लुक् । किं च—यदेव यत्किंचित् अपि शयानस्योपशुष्यति तत्सर्वमप्यस्यानेनोपस्थानेन आप्याययति आपूरयति अक्षितं दुहते इति दर्शनात् । मन्त्रार्थस्तु—हे विष्णो यज्ञात्मन् सोम त्वं नः अस्माकं अन्तिमः अन्तिकतमः प्रत्यासन्नतमः । 'तमेतादेश्च' इति कलोपः । सः त्वमस्मभ्यं शर्म सुखं यच्छ देहि । हे सहन्त्य परेषामभिभवितः महाप्रभाव । सहतेरौणादिको झच् । सहन्ताः सोढारः, ततस्स्वार्थिको यः । सहन्त्य ते तव धाराः रसप्रवाहाः, मधुश्चुतः मधुरं रसं क्षरन्त्यः उत्सं कूपभूतं अक्षितं अनुपक्षीणं सोमरसं प्रदुहते प्रकर्षेण दुहताम् । तेन यच्छुष्यति तदाप्यायितं भवति । दुहेश्छान्दसे लेटि 'बहुलं छन्दसि' इति रुडागमः ॥

तृतीये प्रथमे दशमोनुवाकः.

अग्निना रयिमश्नवत्पोषमेव दिवेदिवे । यशसं वीरवत्तमम् । गोमाꣳ अग्नेऽविमाꣳ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः । इडावाꣳ एषो अं-

[1]अग्निना । रयिम् । अश्नवत् । पोषम् । एव । दिवेदिव इति दिवे-दिवे । यशसम् । वीरवत्तमम् इति वीरवत्-तमम् । [2]गोमानिति गो-मान् । अग्ने । अविमानित्यवि-मान् । अश्वी । यज्ञः । नृवत्सखेति नृवत्-सखा । सदम् । इत् । अप्रमृ-

[1]अथोपानुवाक्यामध्ये याज्यानुवाक्याः । अस्ति चित्रा नाम यागः । 'चित्रया यजेत पशुकामः'* इति । तत्राग्नेयादीनि सप्तहवींषि भवन्ति । तेषां 'प्रैवाग्नेयेन वापयति'* इत्यस्याग्नेयस्य पुरोनुवाक्या—अग्निना रयिमश्नवदिति गायत्री ॥ अग्निना हि रयिं धनं पशुलक्षणं अश्नवत् अश्नुते । पोषं चैव तस्य धनस्य अश्नुते अग्निना दिवेदिवे दिनेदिने । अश्नोतेर्लेटि व्यत्ययेन परस्मैपदम्, इतश्च लोपः, 'लेटोडाटौ' इत्यडागमः । रयिर्विशेष्यते—यशसं यशस्विनम् । मत्वर्थीयो लुप्यते, तेनानञ्विषयत्वादाद्युदात्तत्वं निवर्तते, अर्शआदित्वादचि व्यत्ययेन प्रत्ययात्पूर्वस्योदात्तत्वम् । वीरवत्तमं अतिशयेन वीरैः पुरुषैस्तद्वन्तम् । यस्मादीदृशं रयिं अग्निना सर्वो जनः अश्नुते तस्मादहमप्यग्निना ईदृशं रयिं अश्नुवीयेति ॥

[2]तत्रैव याज्या—गोमानिति त्रिष्टुप् ॥ व्याख्यातेयम् 'अगन्म

*सं. २-४-६[1-2].

सुर प्रजावान्दीर्घो रयिः पृथुबुध्नस्त्स-
भावान् । आ प्यायस्व सं ते । इ-
ह त्वष्टारमग्रियं विश्वरूपमुप ह्वये ।

ष्य इत्यंप्र–मृष्यः । इडावानितीडा–वान् । एषः । असुर । प्रजावानिति प्रजा–वान् । दीर्घः । रयिः । पृथुबुध्न इति पृथु–बुध्नः । सभावानिति सभा–वान् । [3]एति । प्यायस्व । [4]समिति । ते । [5]इह । त्वष्टा-

---

सुवः '* इत्यत्र । गोमत्त्वादिगुणविशिष्टस्सर्वं दैवाप्रमृष्यो यज्ञो ममास्तु इति ॥

[3]अथ 'रेतस्सौम्येन दधाति '† इत्यस्य पुरोनुवाक्या याज्या च—आ प्यायस्व सं ते इति गायत्रीत्रिष्टुभौ ॥ एते च 'मा नो हिंसीज्जनिता '† इत्यत्र व्याख्यास्येते यत्राम्नायेते । इह तु प्रतीकग्रहणमेतयोः । हे सोम आप्यायस्व वर्धस्व । ते तव विश्वतः वृष्णियं वीर्यं समेतु । तत्र आप्यायितस्त्वं वाजस्यान्नस्य क्षीरादेः संगथे संगमने अस्माकं भवेति ॥

[4]अथ द्वितीया—हे सोम तवाभिमातीनां पाप्मनां हन्तुः पयांसि पातव्यानि क्षीरादीनि संयन्तु संगच्छन्तां, वाजा अन्नानि च संयन्तु, वृष्णियानि वीर्याणि च संयन्तु । ततश्चाप्यायमानः अमरणत्वायास्माकं उत्तमानि श्रेयांसि अन्नानि धिष्व धारय देवार्थमस्मदर्थं वा ॥

[5]अथ 'रेत एव हितं त्वष्टा रूपाणि वि करोति '‡ इत्यस्य

---

*सं. १-६-६[15]. †सं. ४-२-७. ‡सं. २-४-६[2].

अस्माकमस्तु केवलः । तन्नस्तुरी-
पमध पोषयित्नु देव त्वष्टर्वि रराण-
स्स्यस्व । यतो वीरः ॥३५॥ कर्म
ण्यस्सुदक्षो युक्तग्रावा जायते देव-

रम् । अग्रियम् । विश्वरूपमिति विश्व-रूपम् । उपेति । ह्वये । अस्माकम् । अस्तु । केवलः । [6]तत् । नः । तुरीपम् । अध । पोषयित्नु । देव । त्वष्टः । वीति । रराणः । स्यस्व । यतः । वीरः ॥ ३५॥ कर्मण्यः । सुदक्ष इति सु-दक्षः । युक्तग्रावेति युक्त-ग्रावा । जायते । देवकाम इति देव-

---

पुरोनुवाक्या—इह त्वष्टारमिति गायत्री । इहास्मिन् कर्मणि त्वष्टारं अग्रियं मुख्यम् । 'घच्छौ च' इति घच् । विश्वरूपं विश्वेषां रूपाणां विकरणसमर्थम् । 'बहुव्रीहौ विश्वम्' इति पूर्वपदान्तोदात्तत्वम् । उपह्वये आह्वयामि । 'निसमुपविभ्यो ह्वः' इत्यात्मनेपदम् । अस्माकमेवास्तु केवलः सम्भन्धीत्येवमर्थमुपह्वये ॥

[6]तत्रैव याज्या—तन्न इति त्रिष्टुप् ॥ 'सुदक्षः' इति तृतीयपादान्तः । तत् धनं तुरीपं तूर्णमाप्नोतीति तुरीपं । षोदरादिः । पोषयित्नु पोषयितृ । हे देव त्वष्टः रराणः दानशीलस्त्वम् । व्यत्ययेन रातेरात्मनेपदम्, शपश्श्लुः । नः अस्मभ्यं अधेदानीं विष्यस्व विसृज विमुच्य देहीत्यर्थः । व्यत्ययेनात्मनेपदम् । तादि-

कामः । शिवस्त्वष्टरिहा गहि विभुः
पोषं उत त्मना । यज्ञेयज्ञे न उदव ।

कामः । [7]शिवः । त्वष्टः । इह । एति । गहि । वि-
भुरिति वि–भुः । पोषे । उत । त्मना । यज्ञेयज्ञ

त्युक्तं, किं तदित्याह—यतः यस्माद्धनाच्छब्धात् वीरः विक्रान्तः कर्मण्यः कर्मणि साधुः कुशलः सुदक्षः सुष्ठु शीघ्रः उत्साही । दक्ष शीघ्रकरणे, 'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । युक्तग्रावा युक्ता ग्रावाणो यस्य तादृशः । ग्रावभिः तत्साध्यं कर्मोपलक्ष्यते कर्मशील इत्यर्थः । अत एव देवकामः । देवान् कामयते इति 'शीलिकामि' इत्यादिना णः पूर्वपदप्रकृतिस्वरत्वं च । देवैः काम्यते इति वा देवकामः । दासीभारादिर्द्रष्टव्यः । ईदृशः पुरुषः यस्माद्धनाज्जायते तत्पशुलक्षणं धनं देहीति ॥

[7]अथापरं याज्यानुवाक्यायुगळं विकल्पार्थं अत्रैव वा अन्यत्र वा त्वाष्ट्रे विनियोज्यम् । तत्र पुरोनुवाक्या—शिव इति गायत्री ॥ हे त्वष्टः शिवः सुखकरः त्वमिहास्मिन् कर्मणि आगहि आगच्छ । शपो लुक् । विभुः व्याप्तिमान् पोषे पुष्टचर्थमस्माकम् । निमित्तात्सप्तमी । उत त्मना आत्मना केवलेनाप्यात्मना अन्यनिरपेक्ष एव पोषं कर्तुं समर्थः । 'मन्त्रेष्वाङ्यादेः' इति लोपः । किञ्च—यज्ञेयज्ञे सर्वस्मिन् यज्ञे नः अस्मान् उदव उत्कृष्टं पाहि प्रतियज्ञमुत्कृष्टं पाहीत्यर्थः । 'अनुदात्तं च' इति द्वितीयो यज्ञशब्दोनुदात्तः ॥

पिशङ्गरूपस्सुभरो वयोधाश्श्रुष्टी
वीरो जायते देवकामः । प्रजां त्व-
ष्टा विष्यतु नाभिमस्मे अथा देवा-

इति यज्ञे—यज्ञे । नः । उदिति । अव । [8]पिशङ्गरूप
इति पिशङ्ग—रूपः । सुभर इति सु—भरः । वयो-
धा इति वयः—धाः । श्रुष्टी । वीरः । जायते ।
देवकाम इति देव—कामः । प्रजामिति प्र—जाम् ।
त्वष्टा । वीति । स्यतु । नाभिम् । अस्मे इति ।
अथ । देवानाम् । अपीति । एतु । पाथः । [9]प्रेति ।

[8]अथ याज्या—पिशङ्गरूपः इति त्रिष्टुप् ॥ पिशङ्गरूपः चित्ररूपः । त्रिवर्गस्य सेविता सुभरः शोभनभरणः स्वजनस्य सम्यग्भर्तेत्यर्थः । 'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । यद्वा—देवैस्सुखेन भरणीयः । खल्प्रत्ययात्पूर्वस्योदात्तत्वम् । वयोधाः वयसोन्नस्य दाता धाता वा । श्रुष्टी क्षिप्रकारीत्येके । सत्यवादीत्यन्ये । श्रोतृषु स्त्यायते श्रुष्टी । षुंस्तोदरादिः । वीरो देवकामश्च इत्येवंगुणः जायते त्वष्टुः प्रसादात् । तस्मादीदृशीं प्रजां त्वष्टा अस्मे अस्मभ्यं विष्यतु विमुच्य ददातु नाभिं नहनीं कुलस्य । 'नहोभश्च' इति । 'सुपां सुलुक्' इति अस्मच्छब्दात्परस्या विभक्तेस्स्मे आदेशः । अथानन्तरं देवानामपि पाथोन्नं सामर्थ्यात् देवानामपि एतु अस्मान् प्राप्नोतु । यद्वा—कर्मणि षष्ठी । पाथोन्नं हवीरूपं देवानप्येतु-प्रविशतु । यागाश्च यथोक्तमनुष्ठीयन्तामित्यर्थः ॥

[9]अथ 'द्वौ सारस्वतौ मिथुनं सारस्वत्या करोति' इति ब्राह्म-

नामप्येतु पार्थः । प्रणो देव्या नो
दिवः । पीपिवाꣳसꣳ सरस्वतस्त-
नं यो विश्वदर्शतः । धुक्षीमहि प्र-

नः । देवी । [10]एति । नः । दिवः । [11]पीपिवाꣳसम् ।
सरस्वतः । स्तनम् । यः । विश्वदर्शत इति वि-
श्व–दर्शतः । धुक्षीमहि । प्रजामिति प्र–जाम् ।

णम् । एकस्सरस्वत्यै, इतरस्सरस्वते । तत्र सरस्वत्याः पुरोनुवाक्या याज्या च 'प्रणो देवी सरस्वती', 'आ नो दिवो बृहतः' इति च गायत्रीत्रिष्टुभौ ॥ व्याख्याते चैते 'अग्नाविष्णू महि तद्वाम्'* इत्यत्र, इह तु प्रतिकग्रहणं तयोः । सरस्वती देवी वाजेभिरन्नैः तद्वती धीनां धियां कर्मणां बुद्धीनां वा अवित्री पालयित्री अस्मान् प्रकर्षेणावत्विति ॥

[10]अथ याज्या—नोस्माकं यज्ञं सरस्वती यजता यजनीया दिवोन्तरिक्षादागच्छतु, बृहतो वा पर्वतादागच्छतु । सर्वं हवं जुषाणा सेवमाना घृताची उदकस्याञ्चती उशती हवींषि कामयमाना नोस्माकं शग्मां शक्तां वाचं शृणोत्विति ॥

[11]अथ सरस्वतः पुरोनुवाक्या—पीपिवांसमिति गायत्री ॥ पीपिवांसं वर्धितवन्तम् । 'लिड्यडोश्च' इति पीभावः । धातोर्ह्रस्वत्वम् । छान्दसस्य वा लिटः क्वसुरादेशः । वर्धयन्तमित्यर्थः । कम्? स्तनं स्तनस्थानीयं यागं यथा स्तनो बालान् वर्धयति एवं सर्वलोकं वर्धयन्तम् । कस्य स्तनम्? सरस्वतः सरस्वान्वाग्देवताविशेषः तस्य

---

*सं १–८–२२.३–४

जामिषम् ॥ ३६ ॥ [12]ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः । तेषाँ ते सुम्नमीमहे । यस्य व्रतं पशवो

इषम् ॥ ३६ ॥ [12]ये । ते । सरस्वः । ऊर्मयः । मधुमन्त इति मधु–मन्तः । घृतश्चुत इति घृत–श्चुतः । तेषाम् । ते । सुम्नम् । ईमहे । [13]यस्य । व्रतम् । पशवः । यन्ति । सर्वे । यस्य । व्रतम् ।

स्तनम् । कीदृशस्सः ? यो विश्वदर्शतः । विश्वं दर्शनीयं यस्य । दृशेरौणादिकोतच्प्रत्ययः । तादृशो योसौ सरस्वान् तस्य स्तनस्थानीयं विश्वं वर्धयितुं पर्याप्तं यागम् । वयमपि प्रजां पुत्रादिकां तस्याश्च जीवनार्थं इषमन्नं च धुक्षीमहि । 'लिङ्सिचावात्मनेपदेषु' इति कित्वम् ॥

[12]अत्रैव पुरोनुवाक्या विकल्प्यते । अन्यत्र वा विनियुज्यते—ये ते इति गायत्री ॥ हे सरस्वः सरस्वन् उदकवन् । 'मतुवसोः' इति रुत्वम् । ते तव ये ऊर्मयः उदकसंघाताः मधुमन्तः मधुररसाः । घृतश्चुतः उदकं क्षारयन्त्यः । यद्वा ऊर्मयः अरणशीलाः गावः मधुमन्तः घृतश्चुतः । तेषां सम्बन्धि यत् सुखं सुम्नं यत्तद्वतां भवति तत्ते ईमहे । कर्मणि षष्ठी । त्वां याचयामहे तदस्मभ्यं देहि । ई गतौ, तत्र याच्ञायां वर्तते, 'बहुलं छन्दसि' इति शपो लुक् ॥

[13]अथ तत्रैव याज्या—यस्येति त्रिष्टुप् ॥ यस्य सरस्वतः

यन्ति सर्वे यस्य व्रतमुपतिष्ठन्त आपः। यस्य व्रते पुष्टिपतिर्निविष्ट-स्तꣳ सरस्वन्तमवसे हुवेम । दि-व्यꣳ सुपर्णं वयसं बृहन्तमपां गर्भं-

उपतिष्ठन्त इत्युप–तिष्ठन्ते । आपः । यस्य । व्रते । पुष्टिपतिरिति पुष्टि–पतिः । निविष्ट इति नि–विष्टः । तम् । सरस्वन्तम् । अवसे । हुवेम । [14]दिव्यम् । सुपर्णमिति सु–पर्णम् । वयसम् । बृहन्तम् । अपाम् । गर्भम् । वृषभम् । ओषधी-

---

व्रतं कर्म सर्वे पशवो यन्ति अनुगच्छन्ति; तन्निमित्तत्वाद्दृष्टेः। यस्य च व्रतं कर्म आप उपतिष्ठन्ते; तन्निमित्तत्वाद्दृष्टेः । सङ्गतिकरण आत्मनेपदम् । यस्य च व्रते पुष्टिपतिः तत्तत्पोषणपतिः निविष्टः; तदधीनत्वात् वृष्टेः पुष्टेश्च । 'परादिश्छन्दसि बहुळम्' इति पतिशब्दस्याद्युदात्तत्वम् । 'गतिरनन्तरः' इति निविष्टशब्दे गतेः प्रकृतिस्वरत्वम् । तं सरस्वन्तं अवसे रक्षणाय तृप्त्यर्थं वा हुवेम आह्वयेम । 'लिङ्याशिष्यङ्', 'बहुलं छन्दसि' इति संप्रसारणम् ॥

[14]अथात्रैव याज्या विकल्प्यते—दिव्यमिति त्रिष्टुप् ॥ दिव्यं दिवमर्हतीति । 'छन्दसि च' इति यः । सुपर्णं शोभनपतनम् । 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । वयसं अन्नवन्तं तन्निमित्तत्वात् । अर्शआदित्वादच् । बृहन्तं महान्तं अपां गर्भं

वृषभमोषधीनाम्। अभीपतो वृष्ट्या
तर्पयन्तं तꣳ सरस्वन्तमवसे हुवेम।
सिनीवालि पृथुष्टुके या देवानाम-

नाम्। अभीपतः। वृष्ट्या। तर्पयन्तम्। तम्।
सरस्वन्तम्। अवसे। हुवेम। [15]सिनीवालि। पृ-
थुष्टुक इति पृथु–स्तुके। या। देवानाम्। अ-

मध्यगतं वृषभं वर्षितारं कामानां सेक्तारं वृद्धिकरं वा। ओषधीनामुपलक्षणमिदम्। सर्वेषामपि वृषभं, ओषधीनां गर्भमित्यन्ये। अभीपतः अभितः सर्वतः वृष्ट्या विश्वं तर्पयन्तम्। अभिगताः आपः अस्मिन्निति। 'ऋक्पूरब्धूः' इति समासान्तः, 'द्व्यन्तरुपसर्गेभ्योप ईत्' इतीत्, 'आद्यादिभ्यस्तसिः'। अन्य आह—अभिपतनशीलान् सर्वप्राणिनो वृष्ट्या तर्पयन्तम्। पततेः क्विपि छान्दसमुपसर्गस्य दीर्घत्वम्, विभक्त्युदात्तत्वं च। 'मन्त्रे वृष' इति क्तिन उदात्तत्वाद्वृष्टिशब्दोन्तोदात्तः, ततः 'उदात्तयणः' इति तृतीयाया उदात्तत्वम्। तमित्यादि। गतम्॥

[15]अथ 'सिनीवाल्यै चरुर्भवति'* इत्यस्य चरोः पुरोनुवाक्या सिनीवालीत्यनुष्टुप्॥ दृष्टचन्द्रामावास्या सिनीवाली स्त्रीत्वेन रूप्यते। हे सिनीवालि पृथुष्टुके पृथुजघने पृथुसंहते वा। स्त्यायतेस्स्तुकः, पूर्वस्याविद्यमानत्वादिदं न निहन्यते। या त्वं देवानां स्वसा स्वयं सारिण्यसि। वृष्ट्यादीनां भगिन्येव वा; ग्मानकार्यत्वात्। सा त्वं जुषस्व सेवस्व हव्यं आहुतम्।

---

* तै. सं. २-४-६.

सि॒ स्वसा॑ । जु॒षस्व॑ ह॒व्यम् ॥३७॥
आहु॑तं प्र॒जां दे॑वि दिदिड्ढि नः । या
सु॑पा॒णिस्स्व॑ङ्गु॒रिस्सु॒षू॒मा ब॑हु॒सू॒वरी ।
तस्यै॑ वि॒श्पत्नि॑यै ह॒विस्सि॑नीवा॒ल्यै

सि॑ । स्वसा॑ । जु॒षस्व॑ । ह॒व्यम् ॥ ३७ ॥ आहु॑त॒-मित्या—हु॒त॒म् । प्र॒जामिति॑ प्र—जाम् । दे॒वि॒ । दि॒-दिड्ढि॑ । न॒ः । [16]या । सु॒पा॒णिरिति॑ सु—पा॒णिः । स्व॒ङ्गु॒रिरिति॑ सु—अ॒ङ्गु॒रिः । सु॒षू॒मेति॑ सु—सू॒मा । ब॒हु॒सू॒व॒रीति॑ बहु—सू॒वरी । तस्यै॑ । वि॒श्पत्नि॑यै ।

पूर्ववद्गतेः प्रकृतिस्वरत्वम् । किं च—हे सिनीवालि नः अस्मभ्यं प्रजां पुत्रादिकां दिदिड्ढि उपचिनु देहीत्यर्थः । दिहेर्लेटि शपश्लुः ॥

[16]अथ तत्रैव याज्या—या सुपाणिरित्यनुष्टुप् ॥ या सुपाणिः शोभनहस्ता स्वङ्गुरिः शोभनाङ्गुलिः । कपिलकादित्वाल्लत्वविकल्पः, उभयत्रापि 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । सुषूमा सुष्ठु प्रसवित्री । सूतेः 'अन्येभ्योपि दृश्यते' इति मनिन्, गुणाभावश्छान्दसः, 'मनः' इति ङीप्प्रतिषेधः, कृदुत्तरपदप्रकृतिस्वरत्वम् । यद्वा—सूतेरौणादिको मनिन्प्रत्ययः । सुष्ठु सूमा सूतिः यस्य सुषूमा । बहुव्रीहौ 'सोर्मनसी' इत्युत्तरपदान्तोदात्तत्वम्, सुषामादित्वात् षत्वम् । बहुसवरी बह्वीनां प्रजानां सवित्री । तेनैव क्वनिप्, 'वनो र च' इति ङीब्रेफौ, कृदुत्तरपदप्रकृति-

जुहोतन । इन्द्रं वो विश्वतस्परीन्द्रं नरः । असितवर्णा हरयस्सुपर्णा हविः । सिनीवाल्यै । जुहोतन । [17]इन्द्रम् । वः । विश्वतः । परीति । [18]इन्द्रम् । नरः । [19]असितवर्णा इत्यसित-वर्णाः । हरयः । सुपर्णा इति सु-पर्णाः ।

स्वरत्वम् । तस्यै सिनीवाल्यै विश्पत्न्यै विशां पालयित्र्यै । 'विश्पूर्वस्य' इति पत्युर्नकारः, 'अयस्मयादीनि छन्दसि' इति भत्वेन विशो जस्त्वाभावः, 'परादिश्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । हविर्जुहोतन जुहुत हे ऋत्विग्यजमानाः । 'तप्तनप्तनथनाश्च' इति तनबादेशः, पित्त्वेन ङित्त्वाभावाद्गुणः ॥

[17]'ऐन्द्र उत्तमो भवति'* इत्यस्यैन्द्रस्य पुरोनुवाक्या याज्या च—इन्द्रं वो विश्वतस्परीन्द्रं नर इति गायत्रीत्रिष्टुभौ । व्याख्याते चैते† । इह तु प्रतीकग्रहणमनयोः । हे ऋत्विग्यजमानाः वो युष्मदर्थं विश्वेभ्यो जनेभ्यः उपरि इन्द्रं हवामहे आह्वयामः । अस्माकमेव केवलः स्वामी भवत्विति ॥

[18]द्वितीया—यदा पार्याः परलोकसाधनभूताः धियः कर्माणि युनजते युञ्जन्ति तदा मनुष्याः इन्द्रमेवाह्वयन्ति । हविषामर्धेन धार्यमाणं अर्धार्हं 'यत्सर्वेषामर्धमिन्द्रः प्रति'‡ इति । तस्मात् हे इन्द्र शूरः वीरः शवसो बलस्य मनुष्येभ्यः संभक्तौ चकानः दीप्यमानः । ईदृशस्त्वं गोमति व्रजे गोसमूहे अस्मानाभज भागिनः कुर्विति ॥

[19]अथ कारीर्यां पिण्डीर्हुत्वा धूममन्वीक्षते—असितवर्णा इति

---

*सं. २-४-६. † सं. १-६-१२. ‡ सं. ५-४-८.

मिहो वसाना दिवमुत्पतन्ति । त आ-
ववृत्रन्त्सदनानि कृत्वाऽऽदित्पृथिवी
घृतैर्व्युद्यते । हिरण्यकेशो रजसो

मिहः । वसानाः । दिवम् । उदिति । पतन्ति । ते । एति । अववृत्रन् । सदनानि । कृत्वा । आत् । इत् । पृथिवी । घृतैः । वीति । उद्यते । [20]हिरण्य-केश इति हिरण्य–केशः । रजसः । विसार इति

त्रिष्टुभा ॥ असितवर्णाः कृष्णवर्णाः; उदकपूर्णत्वात् । हरयः रसहरणशीलाः रश्मयः सुपर्णाः शोभनपतनाः । 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । मिहः आपः । मिह्यन्ते सिच्यन्ते इति कर्मणि क्विप् । वसानाः आच्छादयन्त्यः । अनुदात्तत्वा-च्छसार्वधातुकानुदात्तत्वम् । दिवमादित्यमण्डलं उत्पतन्ति उत्क्रम्यो परिगच्छन्ति । उत्तरायणे आपस्तत्र गर्भभूताः वर्तन्ते । ते च रश्मयः तत्र सदनानि कृत्वा अष्टौ मासानतिवाह्य पक्वमुदकं गृहीत्वा दक्षिणायने आववृत्रन् आवर्तन्ते मध्यमस्थानं प्रतियन्तः असितवर्णा उदपतन् । वृतेर्लेटि व्यत्ययेन परस्मैपदम्, शपश्लुः, 'बहुलं छन्दसि' इति रुट् । यद्वा—छान्दसो लुङ् । 'द्यु-द्रुभ्यो लुङि' इति परस्मैपदं, व्यत्ययेन च्लेश्चङ्, 'बहुलं छन्दस्यमाङ्योगेपि' इत्यडभावः । अथ यदा ते आवृत्ता भवन्ति आदित् अनन्तरमेव पृथिवी घृतैः उदकैः व्युद्यते विशेषेण क्लिद्यते । उन्दी क्लेदने ॥

[21]वर्षाभूस्तम्बमग्नौ प्रहरति—हिरण्यकेश इति त्रिष्टुभा ॥ आ-

विसारेऽहिर्धुनिर्वात इव ध्रजीमान्।
शुचिं भ्राजा उषसः ॥ ३८ ॥ न वे-
दा यशस्वतीरपस्युवो न सत्याः।
आ ते सुपर्णा अमिनन्त एवैः कृ-

वि-सारे। अहिः। धुनिः। वातः। इव। ध्रजी-
मान्। शुचिभ्राजा इति शुचि-भ्राजाः। उषसः॥
३८॥ नवेदाः। यशस्वतीः। अपस्युवः। न।
सत्याः। [21]एति। ते। सुपर्णा इति सु-पर्णाः।

दित्यात्मना अग्निरस्तूयते—हिरण्यकेशः रसहरणशीलरश्मिः हिरण्य वर्णरश्मिर्वा आदित्यः रजसः उदकस्य विसारे निस्सारणे निस्सारणार्थं अहिः आगत्य हन्ता मेघानाम्। आङ्पूर्वाद्धन्तेः ङि-प्रत्ययः, उपसर्गस्य ह्रस्वत्वम्। धुनिः कम्पयिता मेघानाम्। धुनोतेरौणादिको निप्रत्ययः। वात इव ध्रजीमान् गतिमान्। धृजेः 'इन्सर्वधातुभ्यः' इतीन्। शीघ्रमुदकं निस्सारयतीत्यर्थः। शुचिभ्राजाः निर्मलदीप्तिः उषसः अह्नः नवेदाः न विन्दतीति नवेदाः। पचाद्यच्, 'नभ्राण्नपान्नवेदाः' इति नञो नलोपाभावः। हिरण्यकेश एव रजसो निस्सारणं वेत्ति उषस्तु न विन्दति। यशस्वतीः यशस्वत्यः साध्येनान्नेन तद्वत्यः अपस्युवो न उदकमिच्छन्त्य इव भवन्ति सत्याः अमोघारम्भाः। अप इच्छन्तीति क्यच्, द्वितीयाबहुवचनस्य लुक्, 'क्याच्छन्दसि' इत्युप्रत्ययः, तन्वादित्वादुवङ्। तस्माद्धिरण्यकेशः सर्वं जानाति, अस्माकमुदकं निस्सारयति॥

[21]स्तम्बस्य धूममन्वीक्षते—आ ते सुपर्णा इति त्रिष्टुभा॥ हे

ष्णो नोनाव वृषभो यदीदम् । शि-
वाभिर्न स्मयमानाभिरागात्पतन्ति
मिहस्तनयन्त्यभ्रा । वाश्रेव वि-

अमिनन्त । एवैः । कृष्णः । नोनाव । वृषभः ।
यदि । इदम् । शिवाभिः । न । स्मयमानाभिः ।
एति । अगात् । पतन्ति । मिहः । स्तनयन्ति ।
अभ्रा । [22]वाश्रा । इव । विद्युदिति वि–द्युत् । मि-

आदित्यात्मन् अग्ने ते तव सुपर्णाः शोभनपतनाः रश्मयः अमिनन्त आमिन्वते आनयन्ति वृष्टिम् । डुमिञ् प्रक्षेपणे, व्यत्ययेन श्ना, अन्तादेशश्च, संहितायां परेण वृद्ध्यभावश्च । एवैः अयनैः इत उदकमादाय मण्डलं यान्ति, ततो मध्यमस्थानं यान्ति । एवमयनैर्वृष्टिमानयन्ति । अथ यदीदं रश्मयः कुर्वन्ति तदा कृष्णो मेघः वृषभः वर्षिता मध्यमस्थानमागत्य नोनाव प्रशस्तं शब्दं भृशं करोति । नौतेर्यङ्लुगन्ताच्छान्दसो लिट् । तदानीं शिवाभिर्न सानुग्रहाभिरिव स्मयमानाभिः हसन्तीभिरिव फेनवत्तया अद्भिस्सह आगात् आगच्छति वर्षन् मेघः । एतेः छान्दसो लुङ् । स्मयतेर्ङित्त्वात्सार्वधातुकानुदात्तत्वम् । तदनन्तरं मिहः आपः पतन्ति सर्वतः पृथिव्याम्, स्तनयन्तिच समन्तात् अभ्रा अभ्राणि । 'शेश्छन्दसि' इति लोपः ॥

[22]वक्ष्यमाणस्य मारुतस्य पुरोनुवाक्या याज्या च—वाश्रेव, पर्वतश्रिदिति गायत्रीत्रिष्टुभौ ॥ केचित्तु—'आ ते सुपर्णाः' इत्या-

द्युन्मिमाति वत्सं न माता सिषक्ति।
यदेषां वृष्टिरसर्जि । पर्वतश्चिन्महि
वृद्धो बिभाय दिवश्चित्सानु रेजत
स्वने वः । यत्क्रीडथ मरुतः॥३९॥

माति । वत्सम् । न । माता । सिषक्ति । यत् ।
एषाम् । वृष्टिः । असर्जि । [23]पर्वतः । चित् । महि ।
वृद्धः । बिभाय । दिवः । चित् । सानु । रेजत ।
स्वने । वः । यत् । क्रीडथ । मरुतः ॥ ३९ ॥ ऋष्टि-

दय ऋचस्तिस्रोपि धूमान्वीक्षणमन्त्रा इत्याहुः । वाश्रेव वाश्यमानेव मरुतः प्रति । यथा प्रस्नवनी माता वत्सं प्रति वाश्यमाना भवति; तथा विद्युत् मरुतः प्रति वाश्यमाना मिमाति मिमीते । माङ् माने, जौहोत्यादिकः, अत्र तु सेचनकर्मा, व्यत्ययेन परस्मैपदम् । सिषक्ति सेवते च माता वत्समिव । षञ्जेः शपः श्लुः 'बहुलं छन्दसि' इत्यभ्यासस्येत्वम् । यत् यदा वृष्टिः असर्जि सृज्यते । छान्दसो लुङ् । एषां मरुतां सम्बन्धिनी वृष्टिः तदारम्भे इत्थं विद्युन्मरुतो मिमाति सिषक्ति चेति । तस्मादस्माकमेवं भवत्वित्याशास्यते ॥

[23]पर्वतश्चिदित्यादि ॥ अप्यर्थे चिच्छब्दः । महि महत् वृद्धः पर्वतो बिभाय बिभेति वः स्वने गर्जिते । किं च—दिवोप्युपरिगतस्य पर्वतस्य सानु रेजत रेजते कम्पते स्वने युष्माकम् । रेजृ कम्पने, टेरेत्वाभावश्छान्दसः । छान्दसे वा लङि 'बहुलं छन्द-

ऋष्टिमन्त आपं इव सध्रियञ्चो ध-
वध्वे । अभि क्रंन्द स्तनय गर्भमा
धा उदन्वता परि दीया रथेन ।

मन्त इत्यृष्टि–मन्तः । आपः । इव । सध्रियञ्चः । धवध्वे । [24]अभीति । क्रन्द । स्तनय । गर्भम् । एति । धाः । उदन्वतेत्युदन्–वता । परीति । दीय । रथेन । दृतिम् । स्विति । कृधि । विषित-

---

स्यमाङ्योगेऽपि' इत्यडभावः । कदेत्याह—यदा हे मरुतः ऋष्टिमन्तः वज्रायुधवन्तः यूयं क्रीडथ । तदानीं युष्माकं गर्जितं श्रुत्वा पर्वतोपि बिभेति सान्वपि कम्पते इति । 'ह्रस्वनुड्भ्यां मतुप्' इति मतुपः उदात्तत्वम् । किं च—तस्मिन् काले यूयं आप इव व्यापका इव सध्रियञ्चः सहाञ्चन्त्यः 'सहस्य सध्रिः' इति सध्रिचादेशः । अध्रिसध्र्योरन्तोदात्तनिपातनं कृत्स्वरनिवृत्त्यर्थम् । धवध्वे धावत छान्दसं ह्रस्वत्वम् । धुनोतिर्वा गतिकर्मा, व्यत्ययेन शप् । तस्मादस्माकं वृष्ट्यर्थं गर्जन्तः क्रीडन्तश्च धावध्वमिति ॥

[24]अथाश्वं वाससा अभिवेष्टयति—अभिक्रन्देति त्रिष्टुभा ॥ अभिक्रन्द अभितस्सर्वतः शब्दं कुरु स्तनय उच्चैर्गर्ज । तिङः परत्वान्न निहन्यते । ततश्च गर्भं मेघस्योदकं आधाः गर्भमाधेहि । लेटि शपो लुक् । किंच—उदन्वता उदकवता रथेन रंहणेन परि दीय सर्वतो गच्छ, दीयतिः छान्दसो गतिकर्मा । उदकस्योद-

दृतिꣳ सु कर्ष विषितं न्यञ्चꣳ स-
मा भवन्तूद्वतो निपादाः । त्वं त्या
चिदच्युताग्ने पशुर्न यवसे । धामा

मिति वि-सितम् । न्यञ्चम् । समाः । भवन्तु । उद्वतेत्युत्-वतः । निपादा इति नि-पादाः । [25]त्वम् । त्या । चित् । अच्युत । अग्ने । पशुः । न । यवसे । धाम । ह । यत् । ते । अजर । वना ।

न्भावश्छान्दसः, 'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वम् । ततस्तं मेघं चर्ममयो जलाधारविशेषो दृतिः तद्वत्सुकर्ष सुखेन कर्ष विषितं विमुक्तद्वारम् । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । न्यञ्चं अवाञ्चमुखीकृतम् । 'न्यधी च' इति गतेः प्रकृतिस्वरत्वम् । ततश्चैवं त्वया कृते समा भवन्तु तुल्या भवन्तु । उद्वता उन्नतेन स्थलेन निपादाः निम्नाः उदकेन सर्वं समीकृतमस्तु । पदैर्वञ्, थाथादिनोत्तरपदान्तोदात्तत्वम् । एवमश्वात्मनाऽग्निस्तूयते 'उपसर्गाच्छन्दसि' इति उच्छब्दाद्वृतिः ॥

[25]अथ 'अग्नये धामच्छदे पुरोडाशमष्टाकपालं निर्वपेन्मारुतं सप्तकपालं सौर्यमेककपालम्'* इत्येतेषां त्रयाणां हविषां याज्यानुवाक्याः । तत्राग्नेयस्य पुरोनुवाक्या—त्वं त्या चिदच्युतेत्यनुष्टुप् ॥ 'अच्युत' इति प्रथमपादान्तः । अग्ने इति पादादित्वान्न निहन्यते । हे अग्ने त्वमेव त्याचित् तान्यपि वना वनानि उदकानि

---

*तै. सं. २-४-१०.

ह॒ यत्ते॑ अजर॒ वना॑ वृ॒श्चन्ति॒ शिक्व॑सः।
अग्ने॒ भूरी॑णि॒ तव॑ जातवेदो॒ देव॑
स्वधावो॒ऽमृत॑स्य॒ धाम॑। याश्च ॥४०॥

वृ॒श्चन्ति॑। शिक्व॑सः। [26]अग्ने॑। भूरी॑णि। तव॑। जात॒-
वे॒द॒ इति॑ जात—वेदः। देव॑। स्व॒धा॒व॒ इति॑ स्वधा-
व॒ः। अ॒मृत॑स्य। धाम॑। याः। च॒ ॥ ४० ॥ मा-

अच्युत अच्युतानि अविनाशीनि । उभयत्रापि 'शेश्छन्दसि' इति लोपः । तानि यानि वनानि तव शिक्वसः अर्चींषि वृश्चन्ति भक्षयन्ति तानि त्वमेव भूत्वा अच्युतानि तिष्ठन्ति । अत्र दृष्टान्तमाह—पशुर्न यवसे । यथा यवसे घासे भक्षिते पशुरेव भवति सोपि पश्चात्मना अवतिष्ठते । यद्वा—तान्यपि त्वमेव यवसे मिश्रयसि स्थापयसि । विकरणादिव्यत्ययः 'चनचिदिव' इति निघाताभावः । तस्मात्तवैवात्र धाम जन्मस्थानं वा त्वमेव तत्तदात्मना जायसे तिष्ठसि वा । हे अजर विनाशरहित त्वं खलु अविनाशः उदकात्मना वर्षकाले जायसे । अन्यथा तान्यप्युपसंहृत्य स्वरूपेणावतिष्ठसे इति 'अन्येषामपि दृश्यते' इति धामशब्दस्य संहितायां दीर्घत्वम् । स त्वमस्मदर्थं वर्षेति ॥

[26]तत्रैव याज्या—अग्ने इति त्रिष्टुप् ॥ हे अग्ने जातवेदः जातप्रज्ञ । यद्वा—जातानां वेदितः देव देवनशील स्वधावः अन्नवन् । 'मतुवसोः' इति रुत्वम् । तवामृतस्यामरणस्य भूरीणि बहूनि धाम धामानि तेजांसि 'सुपां सुलुक्' इति लुक् । याश्च मायाः कर्माणि मायिनां कर्मिणां यजमानानां सम्बन्धिनीः पूर्वीः

माया मायिनाँ विश्वमिन्व त्वे पूर्वी-
स्सँदधुः पृष्टबन्धो । दिवो नो वृ-
ष्टिं मरुतो ररीध्वं प्र पिन्वत वृष्णो

याः । मायिनाम् । विश्वमिन्वेति विश्वं–इन्व । त्वे
इति । पूर्वीः । सन्दधुरिति सं–दधुः । पृष्टबन्धो
इति पृष्ट–बन्धो । [27]दिवः । नः । वृष्टिम् । मरुतः ।
ररीध्वम् । प्रेति । पिन्वत । वृष्णः । अश्वस्य ।

पुरातनीः । गौरादित्वात् ङीष् । त्वे त्वयि सन्दधुः स्थापितवन्तः पूर्वे यजमानाः । ताश्च त्वयि भूरयः त्वामेवेष्टवन्तः सर्वे तेन त्वमेव सर्वाणि तेजांसीति । हे विश्वमिन्व विश्वस्य प्रीणयितः । इवि प्रीणने, छान्दसः खश्, 'अरुर्द्विषदजन्तस्य मुम्' । हे पृष्ट-बन्धो स्पर्शवतां बन्धो । स्पृशेश्छान्दससस्सलोपः, धात्वन्तरं वा द्रष्टव्यम् । व्रीह्यादित्वान्मायाशब्दादिनिः । त्वे इति 'सुपां सुलुक्' इति शे आदेशः । ईदृशस्त्वं अस्मान्वर्षेण रक्षेति ॥

[27]अथ मारुतस्य चतस्रो याज्यानुवाक्या विकल्प्यन्ते । तत्र प्रथमा—दिवो न इति त्रिष्टुप् ॥ हे मरुतः नः अस्मदर्थं दिवो वृष्टिं ररीध्वं स्रावयत । री स्रवणे, व्यत्ययेन शपश्श्लुः, वर्णव्यत्ययेनाभ्यासस्येत्वम् । वृष्णः वर्षितुः इन्द्रस्य अश्वस्य व्याप्तिमतः धाराः वर्षधाराः प्रपिन्वत प्रकर्षेण आसिञ्चत । पिवि मिवि सेचने, चङ् । हे वृषन् इन्द्र त्वमपि अर्वाङ् अस्मद-

अश्वस्य धाराः । अर्वाङेतेन स्तन-
यित्नुनेह्यपो निषिञ्चन्नसुरः पिता नः ।
पिन्वन्त्यपो मरुतस्सुदानवः पयो
घृतवद्विदथेष्वाभुवः । अत्यं न मिहे

धाराः । अर्वाङ् । एतेन । स्तनयित्नुना । एति । इहि । अपः । निषिञ्चन्निति नि–सिञ्चन् । असुरः । पिता । नः । [28]पिन्वन्ति । अपः । मरुतः । सुदानव इति सु–दानवः । पयः । घृतवदिति घृत –वत् । विदथेषु । आभुव इत्या–भुवः । अत्यम् । न । मिहे । वीति । नयन्ति । वाजिनम् । उत्सम् ।

भिमुखं याहि आगच्छ । एतेन मेघेन स्तनयित्नुना शब्दयता सहागच्छ । 'ओमाडोश्च' इति पररूपत्वम् । अपो निषिञ्चन् वर्षन् असुरः आसनकुशलः । असेरुरन् । असुमान्वा, असुप्रदो वा । प्रजानां नोस्माकं पिता पाता ॥

[28]अथ द्वितीया—पिन्वन्तीति जगती ॥ पिन्वन्ति सिञ्चन्ति क्षारयन्ति अपः । 'ऊडिदम्' इति शप उदात्तत्वम् । मरुत-स्सुदानवः शोभनदानाः । आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदा-द्युदात्तत्वम् । पयः पयस्सदृशीरपः पिन्वन्ति घृतवत् घृतमिव विदथेषु यज्ञेषु आभुवः आभुवन्तीत्याभुवः ऋत्विजः ते यदा यज्ञेषु घृतं पिन्वन्ति एवमपो मरुतः पिन्वन्ति । हेतुमाह—अत्यं न अश्वमिव यथा अश्वमश्वसादिनो विनयन्ति शिक्षयन्ति एवं मरु-

वि नयन्ति वाजिनमुत्सं दुहन्ति स्तनयन्तमक्षितम् । उदप्रुतो मरुतस्ताꣳ इयर्त वृष्टिम् ॥ ४१ ॥ ये विश्वे मरुतो जुनन्ति । क्रोशाति गदुहन्ति । स्तनयन्तम् । अक्षितम् । [29]उदप्रुत इत्युद–प्रुतः । मरुतः । तान् । इयर्त । वृष्टिम् ॥ ४१ ॥ ये । विश्वे । मरुतः । जुनन्ति । क्रोशाति । गर्दी ।

तोपि मिहे उदकार्थं वर्षार्थं वाजिनं वेगवन्तं मेघं विनयन्ति विधेयीकुर्वन्ति, 'सावेकाचः' इति मिहश्चतुर्थ्या उदात्तत्वम् । ततस्तं विधेयीकृत्य उत्सं उन्दनशीलं स्तनयन्तं गर्जन्तं अक्षितं अनुपक्षयं दुहन्ति मरुतः, यस्मादेवमेते कुर्वन्ति तस्मादुच्यते पिन्वन्त्यप इति । एवं अस्माकमपि पिन्वन्त्यपो मरुत इति । स्तन शब्दे, चुरादिः अदन्तः ॥

[29]अथ तृतीया—उदप्रुत इति त्रिष्टुप् ॥ उदप्रुतः उदकस्य प्रापयितॄन् । च्युङ् ज्युङ् प्रुङ् पुङ् गतौ । तानास्माकीनान् मरुतः इयर्त गच्छत भजत यजमानार्थं हे ऋत्विजः । ऋ गतौ, जौहोत्यादिकः, 'तप्तनप्तनघनाश्च' इति तस्य तनबादेशः, 'अर्तिपिपर्त्योश्च' इति अभ्यासस्येत्वम् । ये यूयं विश्वे वृष्टिं जुनन्ति प्रार्थयन्ते मरुतः ते यूयमास्माकीनान् मरुतः इयर्त । तानित्यस्य संहितायां 'दीर्घादटि समानपादे' इति रुत्वम् । अत्र प्रार्थयितुः प्रदातुश्च द्वौ दृष्टान्तौ दर्शयति—यथा गर्दी निगरणशीला कन्या तुन्ना बुभुक्षया पीडिता क्रोशाति क्रोशति । लेट्याडागमः । अभ्यवहार्यं प्रार्थयमाना रोदितीत्यर्थः । एवं वृष्टिं प्रार्थयमाना ऋत्विजः मरुत

दीं कन्येव तुन्ना पेरुं तुञ्जाना पत्येव जाया । घृतेन द्यावापृथिवी मधुना समुक्षत पयस्वतीः कृणुताप

कन्या । इव । तुन्ना । पेरुम् । तुञ्जाना । पत्या । इव । जाया । [30]घृतेन । द्यावापृथिवी इति द्यावा-पृथिवी । मधुना । समिति । उक्षत । पयस्वतीः । कृणुत । आपः । ओषधीः । ऊर्जम् । च । तत्र ।

आह्वयन्तीति भावः । यथा च तां कन्यां पेरुं पातुकामां, उपलक्षणत्वाद्बुभुक्षितां च, सामर्थ्यात् क्रोशन्तीं तुञ्जाना भाषमाणा मा रोदीः किं ते अभिलषितमिति वदन्ती पत्या सह जाया तस्या अभिमतं प्रयच्छति अभिप्रेतदानेन मातापितरौ तां प्रीणयत इत्यर्थः । एवं वृष्टिं प्रार्थयमानेभ्यो ऋत्विग्भ्यः तां मरुतः प्रयच्छन्तीति । तस्मादास्माकीनान् ऋत्विजः वर्षदानेन मरुतः प्रीणयतेति । 'मापोरिरुन्' इति पिबतेरिरुन्प्रत्यये पेरुः । तुजि भाषायाम्, चुरादिः, 'बहुलं छन्दसि' इति शपो लुक्, 'छन्दस्युभयथा' इति शानच्, आर्धधातुकत्वाण्णिलोपः ॥

[30]अथ चतुर्थी—घृतेनेति अतिजगती विवृद्धपादा । 'घृतेन' इति त्रिभिरक्षरैः प्रथमः पादो विवृद्धः । हे नरः नेतारः मरुतः 'नयतेर्डिच्च, इति ऋप्रत्ययः । घृतेनोदकेन मधुना रसेन मधुरसेन द्यावापृथिवी समुक्षत सिञ्चत । 'दिवो द्यावा' इति द्यावादेशः, 'देवताद्वन्द्वे च' इति पुर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम्। ततस्तस्य मधुरसस्योदकस्य उपर्युक्षणेन आपः पूर्वस्थिताः पय-

ओषधीः । ऊर्जं च तत्र सुमतिं च पिन्वथ यत्रा नरो मरुतस्सिञ्चथा मधु । उदुत्यं चित्रम् । और्वभृ-

सुमतिमिति सु-मतिम् । च । पिन्वथ । यत्र । नरः । मरुतः । सिञ्चथ । मधु । [31]उदिति । उ । त्यम् । [32]चित्रम् । [33]और्वभृगुवदित्यौर्वभृगु-वत् ।

स्वतीः पानार्हरसवतीः कृणुत कुरुत । विभक्तिव्यत्ययेन द्वितीयास्थाने प्रथमा । ओषधीश्च पयस्वतीः कृणुतेत्येव । इदं चाप्यस्तु—यूयं मधु मधुरं उदकं सिञ्चथ । तत्र ऊर्जमन्नं बलं वा सुमतिं च कल्याणीं मतिं पिन्वथ सिञ्चथ दत्तेत्यर्थः । अबहुव्रीहेरपि 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । बहुव्रीहिर्वा, सुमतिं च प्रजामिति । यत्रसिंचथशब्दयोः 'अन्येषामपि दृश्यते' इति सांहितिकं दीर्घत्वम् ॥

[31]अथ सौम्यस्य पुरोनुवाक्या याज्या च—'उदु त्यं जातवेदसम्,' 'चित्रं देवानाम्' इति गायत्रीत्रिष्टुभौ ॥ व्याख्याते चैते* । अत्र प्रतीकग्रहणम् । तमिमं जातवेदसं जातप्रज्ञानं सूर्यं देवं केतवः उद्वहन्ति यथा सर्वेषां द्रष्टुं योग्यो भवतीति ॥

[32]द्वितीया—चित्रं चायनीयं देवानां सर्वेषामनीकं अनीकभूतं मित्रस्य वरुणस्य च अग्नेश्चक्षुस्थानीयं जङ्गमस्य स्थावरस्य आत्मभूतः सूर्य उदगात् उदेति । उदेत्य च द्यावापृथिवी अन्तरिक्षं च रश्मिभिरापूरयतीति ॥

[33]अथोपहोमार्थाः तिस्रो गायत्र्यः—और्वभृगुवदित्याद्याः तत्र ॥

---

*सं. १-४-४३[1-2].

गुवच्छुचिंमग्नवानवदा हुवे। अग्निꣳ
समुद्रवांससम्। आ सवꣳ सवितु-
र्यथा भगस्येव भुजिꣳ हुवे। अग्नि-
ꣳ समुद्रवांससम्। हुवे वातस्वनं
शुचिम्। अग्नवानवदित्यग्नवान–वत्। एति। हु-
वे। अग्निम्। समुद्रवांससमिति समुद्र–वाससम्।
[34]एति। सवम्। सवितुः। यथा। भगस्य। इव।
भुजिम्। हुवे। अग्निम्। समुद्रवांससमिति समु-
द्र–वाससम्। [35]हुवे। वातस्वनमिति वात–स्वनम्।

प्रथमा। 'शुचिम्' इति प्रथमपादान्तः। और्वाग्नवानौ भार्गवावृषी। यथोक्तं भृगूणां पञ्चार्षेयप्रवरे—'जमदग्निवदौर्ववदग्नवानवच्च्यवन-वद्भृगुवत्' इति। और्वश्चासौ भृगुश्च और्वभृगुः। भृगुरिति भार्गवोऽभेदेनोच्यते। यथा और्वो भार्गवोऽग्निमाह्वयत्, यथा चाग्नवानोऽग्निं तद्वदहमपि अग्निं शुचिं समुद्रवाससं आहुवे आह्वयामि आजुहोमि वा। शपो लुक्। समुद्रे वासो यस्य स समुद्रवासाः। अन्तरिक्षे वसतीति के चित्। अपामाच्छादयितेत्यन्ये॥

[34]द्वितीया—यथा सवितुस्सवमनुज्ञां आह्वयामि प्रार्थये, यथा च भगस्यादित्यस्य भुजिं भोगं प्रार्थये, तद्वदग्निं समुद्रवाससं हुवे। 'जवसवौ छन्दसि' इत्यजन्तौ निपात्येते। भुजेरौणादिकः किप्रत्ययः, भुजिरिति। यद्वा—'इक्तिपौ' इति धातुनिर्देशे विधीयमानोर्थनिर्देशेपि प्रवर्तते॥

[35]तृतीया—वातस्वनं वातस्वनवन्तं कविं क्रान्तदर्शनं पर्जन्य-क्रन्द्यं पर्जन्यवत्सर्वैराह्वातव्यं सर्वेषां प्रियम्। उभयत्राप्युपमानपू-

कविं पर्जन्यक्रन्द्यꣳ सहः । अग्निꣳ
समुद्रवाससम् ॥ ४२ ॥

कविम् । पर्जन्यक्रन्द्यमिति पर्जन्य—क्रन्द्यम् । सहः । अग्निम् । समुद्रवाससमिति समुद्र—वाससम् ॥

वीर इषꣳ हव्यमुषसो मरुतश्च वृष्टिं
भगस्य द्वादश च ॥ ११ ॥

प्रजापतिरकामयतैष तं गायत्रो यज्ञं वै प्रजापतेर्जायमानाः प्राजापत्या यो वा अयथादेवतमिष्टगौ निग्राभ्यास्स्थ यो वै देवाञ्छुष्टोग्निना रयिमेकादश ॥ ११ ॥

प्रजापतिः प्रजापतेर्जायमाना व्यार्यच्छन्ते मह्यमिमान्माया मायिनां द्विचत्वारिꣳशत् ॥ ४२ ॥

प्रजापतिरकामयताग्निꣳ समुद्रवाससम् ॥

र्वपदप्रकृतिस्वरत्वम् । सहः सर्वेषां बलं; तद्धेतुत्वात् । यद्वा—सहस्वन्तम् । मत्वर्थीयो लुप्यते । ईदृशमग्निं समुद्रवाससं हुवे आह्वयामीति ॥

इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये
तृतीयकाण्डे प्रथमप्रपाठके एकादशोनुवाकः.

समाप्तश्च प्रपाठकः.

द्वितीयप्रपाठकः.

यो वै पवमानानामन्वारोहान्
विद्वान् यजतेऽनु पवमानाना रोहति
न पवमानेभ्योऽवच्छिद्यते श्येनोसि
गायत्रछन्दा अनु त्वाऽऽ रभे स्वस्ति

[1]यः । वै । पवमानानाम् । अन्वारोहानित्यनु—आरोहान् । विद्वान् । यजते । अन्विति । पवमानान् । एति । रोहति । न । पवमानेभ्यः । अवेति । छिद्यते । श्येनः । असि । गायत्रछन्दा इति गायत्र—छन्दाः । अन्विति । त्वा । एति । रभे ।

अथ द्वितीयप्रपाठकः.

[1]यो वै पवमानानामित्यादि ॥ पवमानाः बहिष्पवमानादयः । 'पूङ्चजोश्शानन्' । तेषामन्वारोहाः तान् । यैरन्वारुह्यन्ते अनुक्रमेण प्राप्यन्ते तेषामन्वारोहाः मन्त्राः । तान् विद्वान्यजमानः पवमानानन्वारोहति । न पवमानेभ्योवच्छिद्यते । के पुनरन्वारोहा इत्यत आह—श्येनोसीति । तत्र बहिष्पवमाने पञ्चम्यां स्तोत्रियायां प्रस्तुतायां वाचयति । श्येनः पक्षिविशेषः । स शयनीयः शीघ्रगतिः । स एव त्वमसि । गायत्रछन्दाः गायत्रछन्दस्कः । गायत्र्येव गायत्रम्, 'छन्दसः प्रत्ययविधाने नपुंसके स्वार्थ उपसंख्यानम्' इत्यण् । तं त्वामहमन्वारभे अनुक्रमेण रोहामि ।

मा सं पारय सुपर्णोसि त्रिष्टुप्छन्दा अनु त्वाऽऽरभे स्वस्ति मा सं पारय सघाऽसि जगतीछन्दा अनुत्वाऽऽरभे स्वस्ति मा सं पारयेत्याहैते ॥ ॥१॥ वै पवमानानामन्वारोहास्तान् य एवं विद्वान् यजतेऽनु पवमानाना

स्वस्ति । मा । समिति । पारय । [2]सुपर्ण इति सु-पर्णः । असि । त्रिष्टुप्छन्दा इति त्रिष्टुप्-छन्दाः । अन्विति । त्वा । एति । रभे । स्वस्ति । मा । समिति । पारय । [3]सघा । असि । जगतीछन्दा इति जगती-छन्दाः । अन्विति । त्वा । एति । रभे । स्वस्ति । मा । समिति । पारय । इति । आह । एते ॥ १ ॥ वै । पवमानानाम् । अन्वारोहा इत्यनु-आरोहाः । तान् । यः । एवम् । विद्वान् । यजते । अन्विति । पवमानान् । एति । रोहति ।

किंच—मा स्वस्ति अविघ्नेन संपारय समाप्तकर्माणं कुरु । पार तीर कर्मसमाप्तौ ॥

[2]अथ माध्यन्दिने पवमाने अष्टम्यां स्तोत्रियायां प्रस्तुतायां वाचयति—सुपर्णोसीति ॥ सुपर्णः श्येनः वृद्धतरः शोभनपतनः । प एव त्वमसि । त्रिष्टुप्छन्दाः । गतमन्यत् ॥

[3]अथार्भवे पवमाने नवम्यां प्रस्तुतायां वाचयति—सघाऽसीति ॥

रोहति न पवमानेभ्योऽवच्छिद्यते यो
वै पवमानस्य संततिं वेद सर्वमा-
युरेति न पुराऽऽयुषः प्र मीयते पशु-
मान्भवति विन्दते प्रजां पवमानस्य
ग्रहा गृह्यन्तेऽथ वा अस्यैतेऽगृहीता
द्रोणकलश आधवनीयः पूतभृत्तान्
यदगृहीत्वोपाकुर्यात्पवमानं वि ॥२॥
छिन्द्यात्तं विच्छिद्यमानमध्वर्योः प्रा-

न । पवमानेभ्यः । अवेति । छियते । यः । वै । पवमानस्य । सन्ततिमिति सं-ततिम् । वेद । सर्वम् । आयुः । एति । न । पुरा । आयुषः । प्रेति । मीयते । पशुमानिति पशु-मान् । भवति । विन्दते । प्रजामिति प्र-जाम् । पवमानस्य । ग्रहाः । गृह्यन्ते । अथ । वै । अस्य । एते । अगृहीताः । द्रोणकलश इति द्रोण-कलशः । आधवनीय इत्या-धवनीयः । पूतभृदिति पूत-भृत् । तान् । यत् । अगृहीत्वा । उपाकुर्यादित्युप-आकुर्यात् । पवमानम् । वीति ॥ २ ॥ छिन्द्यात् । तम् । वि-च्छिद्यमानमिति वि-छिद्यमानम् । अध्वर्योः ।

गृध्रो वा भासो वा सुपर्णादपि वृद्धतरः । स एव त्वमसि ।

णोऽनु विच्छ्येतोपयामगृहीतोसि
प्रजापतये त्वेति द्रोणकलशमभि
मृशेदिन्द्राय त्वेत्याधवनीयं विश्वे-
भ्यस्त्वा देवेभ्य इति पूतभृतं पर्व-

प्राण इति प्र–अनः । अनु । वीति । छिद्येत । उपयामगृहीत इत्युपयाम–गृहीतः । असि । प्रजापतय इति प्रजा–पतये । त्वा । इति । द्रोणकलशमिति द्रोण–कलशम् । अभीति । मृशेत् । [5]इन्द्राय । त्वा । इति । आधवनीयमित्याधवनीयम् । [6]विश्वेभ्यः । त्वा । देवेभ्यः । इति । पूतभृ-

---

जगतीछन्दाः । समानमन्यत् । इत्याहेति । निगदव्याख्यातम् ॥

[4–6]यो वै पवानस्येत्यादि ॥ सन्तानः सन्ततिः अविच्छेदः । 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् । आयुषः शतसंवत्सरप्रमाणात् पुरा प्राक् मध्ये न प्रमीयते न म्रियते, पशुमान् भवति बहुपशुर्भवति । 'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वम् । का पुनस्सन्ततिरित्याह—पवमानस्य ग्रहाः द्रोणकलशादयः । ते पवमानोपाकरणात्प्राक् ये गृह्यन्ते सा पवमानस्य सन्ततिः । तर्हि कस्य ते गृह्यन्तामित्यत आह—अथेति । एते खलु पवमानस्य ग्रहास्स्युः अस्य पवमानस्य सम्बन्धितया गृहीता एव ग्रहा भवन्ति । के पुनस्ते इत्यत आह—द्रोणकलश इत्यादि । तर्हि

मानमेव तत्सं तनोति सर्वमायुरेति
न पुराऽऽयुषः प्र मीयते पशुमा-
न्भवति विन्दते प्रजाम् ॥ ३ ॥

तमितिं पूत–भृतंम् । पवंमानम् । एव । तत् । समितिं । तनोति । सर्वंम् । आयुः । एति । न । पुरा । आयुषः । प्रेतिं । मीयते । पशुमानितिं पशु–मान् । भवति । विन्दतें । प्रजामितिं प्र–जाम् ॥ ३ ॥

एते वि द्विचंत्वारिꣳशच्च ॥ १ ॥

ते मा ग्राहिषतेत्यत आह—तान्यदित्यादि । यद्येवं का गतिः, यदि गृह्यन्ते पवमानग्रहास्स्युः, यदि न गृह्यन्ते पवमानो विच्छिद्येत । नहि भवन्ति गृह्यन्ते न गृह्यन्ते चेति । तत्राह—उपयामगृहीतोसि प्रजापतये त्वेत्यादि । इयं वा उपयामः तयैव गृहीतस्त्वमसीति व्याख्यातम्* । तं त्वां प्रजापतये प्रजापत्यर्थं अभिमृशामीति शेषः । अनेन मन्त्रेण द्रोणकलशमभिमृशेत् उपयामगृहीतोसीति त्रयाणामनुषङ्गः । उपयामगृहीतोसीन्द्राय त्वेत्याधवनीयमभिमृशेत् । उपयामगृहीतोसि विश्वेभ्यस्त्वा देवेभ्य इति पूतभृतमभिमृशेत् । सर्वे पुरस्तादुपयामाः । एतेनाभिमर्शनेन ग्रहपर्यायेण ते गृहीता भवन्ति । तेन पवमानं सन्तनोति । सर्वमायुरेतीत्यादि । गतम् ॥

इति तृतीये द्वितीये प्रथमोनुवाकः.

---

*सं. १-४-३[1].

त्रीणि वाव सवनान्यथ तृतीयꣳ
सवनमवं लुम्पन्त्यनꣳशु कुर्वन्तं
उपाꣳशुꣳ हुत्वोपाꣳशुपात्रेऽꣳशुम-
वास्य तं तृतीयसवनेऽपिसृज्याभि-
षुणुयाद्यदाप्याययति तेनाꣳशुमद्य-

[1]त्रीणि । वाव । सवनानि । अथ । तृतीयम् । सवनम् । अवेति । लुम्पन्ति । अनꣳशु । कुर्वन्तः । उपाꣳशुमित्युप–अꣳशुम् । हुत्वा । उपाꣳशुपात्र इत्युपाꣳशु–पात्रे । अꣳशुम् । अवास्येत्यव–अस्य । तम् । तृतीयसवन इति तृतीय–सवने । अपिसृज्येत्यपि–सृज्य । अभीति । सुनुयात् । यत् । आप्याययतीत्या–प्याययति । तेन । अꣳशुमदित्यꣳ-

---

[1]त्रीणि वाव सवनानीत्यादि ॥ त्रीण्येतानि सवनानि प्रातस्सवनादीनि तैः त्रिभिरपि सवनैः सवनवद्भिर्भवितव्यम् । अथैवं सति तृतीयसवनं अनंशु कुर्युः इदं लुंपेयुर्विनाशयेयुः, सवनस्वभाववैधुर्यात् । तस्मात् उपांशु हुत्वा उपांशुपात्रे प्रागेव प्रातस्सवन एव योंशुः तं तृतीयसवने माध्यन्दिनीये ऋजीषे अपिसृज्य प्रक्षिप्य अभिषुणुयात् । यदाप्याययतीत्यादि । केचिदाहुः—अंशोः प्रक्षेप आप्यायनमिति । अन्ये आहुः—अद्भिराप्यायनं कर्तव्यमिति । तेनाप्यायनेन अंशुमद्भवति । तृतीयसवनस्याभिषवणे च ऋजीषवत्त्वं, तेन सर्वाणि सवनानि

दंभिषुणोति तेनंर्जीषि सवींण्येव त-
त्सवंनान्यश्शुमन्ति शुक्रवंन्ति स-
मावंद्वीर्याणि करोति द्वौ संमुद्रौ वि-
तंतावजूर्यौ पर्यावंर्तते जठरेंव पा-
दांः। तयोः पश्यंन्तो अतिं यन्त्यन्य-

शु-मत् । यत् । अभिषुणोतीत्यंभि-सुनोतिं । तेनं । ऋजीषि । सवींणि । एव । तत् । सवंनानि । अश्शुमन्तीत्यश्शु-मन्तिं । शुक्रवन्तीतिं शुक्र-वन्ति । समावंद्वीर्याणीतिं समावंत्-वीर्याणि । करोति । [2]द्वौ । समुद्रौ । वितंतावितिं वि-ततौ । अजूर्यौ । पर्यावंर्ततं इतिं परि-आवंर्तते । जठ-रां । इव । पादांः । तयोः । पश्यंन्तः । अतीतिं ।

अंशुमन्ति शुक्रवन्ति रसवन्ति च भवन्ति । अतस्सर्वाणि सवनानि समावद्वीर्याणि तुल्यवीर्याणि च करोति । समादावतुप् ॥

[2]आधवनीये दीर्णे प्रवृत्ते [अपवृत्ते] वा पात्र्यां चतुर्गृहीतं गृहीत्वा आहवनीये प्रायश्चित्तं जुहोति अन्वारब्धे यजमाने—द्वौ समुद्राविति त्रिष्टुभा ॥ द्वौ समुद्रौ समुद्रसदृशौ आनन्त्यसाम्यात् अहोरात्रावुच्येते । तौ विततौ विस्तीर्णौ । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । अजूर्यौ अहिंस्यौ अप्रतिबद्धौ । जुरी हिंसाहान्योः, 'ययतोश्चातदर्थे' इत्युत्तरपदान्तोदात्तत्वम् । पर्यावर्तेते पर्यायेणावर्तेते जठरा जठरे । 'सुपां सुलुक्' इति सप्तम्या

**मपश्यन्तः ॥ ४ ॥ सेतुनाऽतिं य-
न्त्यन्यम् । द्वे द्रधंसी सततीं वस्त
एकः केशी विश्वा भुवनानि विद्वा-**

**यन्ति । अन्यम् । अपश्यन्तः ॥ ४ ॥ सेतुना ।
अतीतिं । यन्ति । अन्यम् । [3]द्वे इतिं । द्रधंसी
इतिं । सततीं इतिं स—ततीं । वस्ते । एकः । के-
शी । विश्वा । भुवनानि । विद्वान् । तिरोधायेतिं**

आकारः । यथा समुद्रस्य जठरे उदरे इव पादाः ऊर्मिप्रवाहाः पर्यावर्तन्ते उपर्युपरि पर्यायेणापतन्ति; एवमेतौ समुद्रौ पर्यावर्तेते । तयोरिति निर्धारणे । तयोर्मध्ये अन्यमेकमहरात्मकं समुद्रं पश्यन्तः अतियन्ति अहनि वृत्तं प्रेक्षमाणाः जनास्तदतिवाहयन्ति । अन्यमेकं रात्र्यात्मकं समुद्रं अपश्यन्तोतियन्ति, अदर्शने हेतुमाह—सेतुना । यथा उदकरोधकृता सेतुना समुद्रान्तर्गतमुदकं न पश्यन्ति, एवं प्रबोधनिरोधकारिणा स्वप्नेन रात्रिवृत्तमपश्यन्तः अतियन्ति । इत्थं महानुभावौ तावेव प्रमादकृतमेतत्समृद्धं कुरुतामिति ॥

[3]अथ पूतभृति दीर्णे प्रवृत्ते [अपवृत्ते] वा तथैव पात्र्यां चतुर्गृहीतं गृहीत्वा आहवनीये जुहोत्यन्वारब्धे यजमाने—द्वे द्रधसी इति त्रिष्टुभा॥ द्वे द्रधसी वाससी अहोरात्रात्मके । द्रोणे विधार्येते इति द्रधसी, द्रधतिर्वा छान्दसो धातुराच्छादनकर्मा । सतती सविस्तारे सन्तते वा अन्योन्यानुषक्ते ते वासस्थानीये द्वे । एकः अयनशीलः आ-

न् । तिरोधायैत्यसितं वसानश्शुक्र-
मा दत्ते अनुहाय जार्यै । देवा वै
यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत ते

तिरः—धाय । एति । असितम् । वसानः । शुक्रम् ।
एति । दत्ते । अनुहायेत्यनु—हाय । जार्यै । [4]देवाः ।
वै । यत् । यज्ञे । अकुर्वत । तत् । असुराः । अ-

दित्यः वस्ते आच्छादयति । केशी रश्मिवान् । विश्वा विश्वानि भुवनानि भूतजातानि विद्वान् जानन् । तयोरसितं कृष्णं रात्र्यात्मकं वासो वसानः स आत्मा तिरोधाय अन्तर्हितं कृत्वा एति गच्छति । शुक्रं शुक्लं अहरात्मकं वास आदत्ते धारयति अनुहाय जीर्णाया रात्रेः पश्चादागत्य । यद्वा—जीर्णां वासस्थानीयां रात्रिं अनुक्रमेण हित्वा शुक्रमभिनवं वास आदत्ते तद्वसानः प्रकाशं गच्छतीति । 'नञजादिभ्यः'(?) इति जीर्यतेरिन्प्रत्ययः, 'कृदिकारादक्तिनः' इति ङीष् 'उदात्तयणः' इति विभक्तेरुदात्तत्वम्, 'क्रियाग्रहाणं कर्तव्यम्' इति कर्मणस्संप्रदानत्वाच्चतुर्थी । एवमहोरात्रयोरपि प्रवर्तयिता देवः इदं समृद्धं करोत्विति ॥

[4]देवा वा इत्यादि ॥ यन्नाम यत्किंचित्कर्म देवा असुरजयार्थं यज्ञे विषये अकुर्वत, तत्सर्वं असुरा अप्यकुर्वत । ततोसुरान् जेतुमशक्नुवन्तः तद्विजयोपायमन्विच्छन्तो देवा एतं वक्ष्यमाणं महायज्ञमपश्यन् । ततस्तमतन्वत अतिष्ठन् । कः पुनस्स महायज्ञ इत्याह—अग्निहोत्रमित्यादि । अत्रोक्तमाचार्येण—'तत्पृच्छति कः पुनस्स महायज्ञ इति । अयमेवैष चातुर्मास्यः सोम उक्तो भवति इति ।

देवा एतं महायज्ञमपश्यन्तमतन्व-
ताग्निहोत्रं व्रतमकुर्वत तस्माद्द्विव्रत-
स्यादद्विह्यग्निहोत्रं जुह्वति पौर्णमासं
यज्ञमग्नीषोमीयम् ॥ ५ ॥ पशुमकु-

कुर्वत । ते । देवाः । एतम् । महायज्ञमिति महा-
यज्ञम् । अपश्यन्न् । तम् । अतन्वत । अग्निहोत्र-
मित्यग्नि-होत्रम् । व्रतम् । अकुर्वत । तस्मात् ।
द्विव्रत इति द्वि-व्रतः । स्यात् । द्विः । हि । अग्नि-
होत्रमित्यग्नि-होत्रम् । जुह्वति । पौर्णमासमिति
पौर्ण-मासम् । यज्ञम् । अग्नीषोमीयमित्यग्नी-
सोमीयम् ॥ ५ ॥ पशुम् । अकुर्वत । दार्श्यम् । य-

अथ खलु य एव कश्चन सौम्योध्वरस्स महायज्ञः' इति । अ-
ग्निहोत्रादिरूपेण प्रच्छन्नं व्रतोपाकरणादि कुर्वन्तः सोममाहरन् ।
यथाधिगतपरमार्थां असुरास्स्वयमनुष्ठातुं न शक्नुयुः, यथा चा-
ग्निहोत्रादिकमेवैते कर्म कुर्वन्तीति मन्येरन् तथा प्रच्छन्नं सोम-
माहरन्निति । द्वयोः कालयोः व्रतं यस्य स द्विव्रतः ।
जुह्वतीति । 'हि च' इति निघातप्रतिषेधः 'अभ्यस्तानामादिः'
इत्याद्युदात्तत्वम् । अग्नीषोमीयमिति । द्यावापृथिव्यादिना छः,
'अग्नेस्तुत्स्तोमसोमाः' इति षत्वम्, 'ईदग्नेस्सोमवरुणयोः' इती-
रः । दर्शे भवो दार्श्यः, छान्दसो ण्यः । आग्नेयमिति ।

वैत दार्श्यै यज्ञमाग्नेयं पशुमकुर्वत
वैश्वदेवं प्रातस्सवनमकुर्वत वरुणप्र-
घासान्माध्यन्दिनꣳ सवनꣳ साकमे-
धान्पितृयज्ञं त्र्यम्बकाꣳस्तृतीयसव-
नमकुर्वत तमेषामसुरा यज्ञमन्ववा-

ज्ञम् । आग्नेयम् । पशुम् । अकुर्वत । वैश्वदेवमिति वैश्व–देवम् । प्रातस्सवनमिति प्रातः–सवनम् । अकुर्वत । वरुणप्रघासानिति वरुण–प्रघासान् । माध्यन्दिनम् । सवनम् । साकमेधानिति साक–मेधान् । पितृयज्ञमिति पितृ–यज्ञम् । त्र्यम्बकानिति त्रि–अम्बकान् । तृतीयसवनमिति तृतीय–सवनम् । अकुर्वत । तम् । एषाम् । असुराः ।

अग्नेर्ढक् । वैश्वदेवादयः चातुर्मास्ययागाः । साकमेधादित्रयं तृतीयसवनमकुर्वत । तमेषामित्यादि । एषां देवानां तादृशं यज्ञं महायज्ञात्मकं असुरा अन्ववाजिगांसन् अन्वेवैतुमनुष्ठातुमैच्छन् । 'सनि च' इति गमिरादेशः, 'अज्झनगमां सनि' इति दीर्घत्वम् । तमन्वेतुं नाशक्नुवन् । तेऽब्रुवन्नसुराः अध्वर्तव्या अस्माभिर्बाधितुमशक्याः इमे देवा अभूवन्निति । 'कृत्योकेष्णुच्चार्वादयश्च' इत्युत्तरपदान्तोदात्तत्वम् । तदध्वरस्येत्यादि । अध्वर्तव्या अनेन देवा अभूवन्नित्यध्वरः । ध्वररहितत्वादध्वरः । ध्वरतेः पचाद्यच्, बहु-

जिगाꣳसन्तं नान्ववायन्तेऽब्रुवन्नध्वर्तव्या वा इमे देवा अभूवन्निति तदध्वरस्याध्वरत्वं ततो देवा अभवन्पराऽसुरा य एवं विद्वान्त्सोमेन यजते भवत्यात्मना पराऽस्य भ्रातृव्यो भवति ॥ ६ ॥

यज्ञम् । अन्ववांजिगाꣳसन्नित्यनु—अवांजिगाꣳसन् । तम् । न । अन्ववायन्नित्यनु—अवायन् । ते । अब्रुवन् । अध्वर्तव्याः । वै । इमे । देवाः । अभूवन् । इति । तत् । अध्वरस्य । अध्वरत्वमित्यध्वर—त्वम् । ततः । देवाः । अभवन् । परेति । असुराः । यः । एवम् । विद्वान् । सोमेन । यजते । भवति । आत्मना । परेति । अस्य । भ्रातृव्यः । भवति ॥ ६ ॥

अपश्यन्तोग्नीषोमीयमात्मना परा त्रीणि च ॥ २ ॥

व्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । यद्वा—कर्मणि छान्दसोचू, 'अच्कावशक्तौ' इत्युत्तरपदान्तोदात्तत्वम् । ततो देवा अभवन् भूतिमन्तस्सम्पन्नाः । असुराश्च पराभवन् । य एवमित्यादि । गतम् ॥

इति तृतीये द्वितीये द्वितीयोनुवाकः.

परिभूरग्निं परिभूरिन्द्रं परिभूर्वि-
श्वान्देवान्परि भूर्मां सह ब्रह्म-
वर्चसेन स नः पवस्व शं गवे शं
जनाय शमर्वते शꣳ राजन्नोषधी-

[1]परिभूरिति परि—भूः । अग्निम् । परिभूरिति परि—भूः । इन्द्रम् । परिभूरिति परि—भूः । विश्वान् । देवान् । परिभूरिति परि—भूः । माम् । सह । ब्रह्मवर्चसेनेति ब्रह्म—वर्चसेन । सः । नः । पवस्व । शम् । गवे । शम् । जनाय । शम् । अर्वते । श-

[1]समस्तं राजानमुपतिष्ठते—परिभूरिति संकृत्यैकादशपदया ॥ परितस्सर्वतो भविता परिभूः । नेमिवदराणां सर्वतोग्नेः रक्षिता त्वमसि हे सोम । यद्वा—परितोग्नेर्भावयिता प्रवर्तयिता परिभूः । भवतेर्ण्यन्तात्क्विप 'बहुलमन्यत्रापि' इति णिलुक्, 'पर्यभिभ्यां च' इति तसिः, तस्य गतार्थत्वादप्रयोगः, 'अभितःपरितस्समया' इत्यादिना द्वितीया । एवमिन्द्रादीनां ब्रह्मवर्चसेन सह मां परितो भावयति । ब्रह्मणो वर्चो बलं ब्रह्मवर्चसम् । 'ब्रह्महस्तिभ्याम्' इत्यच् । तादृशः त्वं नः अस्मदर्थं पवस्व शुन्धस्व । पूङ् पवने, भौवादिकः । किमर्थम्? शं गवे । जातावेकवचनम् । यथा गोभ्यः शं सुखं भवति । जनाय जनेभ्यः । अर्वते अर्वद्भ्यः । ओषधीभ्यश्च । हे राजन् दीप्तिमन् । किंच—हे रयिपते धनानां पालयितः ते त्वयि तस्य अच्छिन्नस्यानुपरतरूपस्य सुवीर्यस्य शोभनवीर्यस्य निमित्तस्य रायस्पोषस्य धनपुष्टेः पुष्टस्य धनस्य

म्योच्छिन्नस्य ते रयिपते सुवीर्यस्य
रायस्पोषस्य ददितारस्स्याम । त-
स्य मे रास्व तस्यं ते भक्षीय त-
स्यं त इदमुन्मृजे । प्राणायं मे व-

म् । राजन्न् । ओषधीभ्य इत्योषधि–भ्यः । अ-
च्छिन्नस्य । ते । रयिपत इति रयि–पते । सुवीर्य-
स्येति सु–वीर्यस्य । रायः । पोषस्य । ददितारः ।
स्याम । तस्यं । मे । रास्व । तस्यं । ते । भक्षीय ।
तस्यं । ते । इदम् । उदिति । मृजे । [2]प्राणायेति

ददितारः दातारस्स्याम । दद दाने । तदर्थं तस्य तादृशस्य धनस्य मे मह्यं रास्व देहि । व्यत्ययेनात्मनेपदम् । पूर्ववत्कर्मणस्सम्प्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । तस्य ते तादृशं त्वां भक्षीय भजे । यद्वा—तादृशं त्वदीयं धनं भक्षीय । तस्य तादृशस्य तव प्रसादात् तादृशस्य धनस्य लाभाद्वा । इदं ब्राह्मणोक्तानां कामानां अन्यतममिष्टं उन्मृजे उन्मार्ज्मि साधयामीत्यर्थः । के पुनस्ते कामाः? 'स एनं तृप्तो भूत्याऽभिपवते' इत्यादिप्रसिद्धा भूत्यादयः, ते चास्मिन्नेवानुवाके वक्ष्यन्ते । इदमिति तेषां सामान्य निर्देशः । तं काममादित्यस्योन्मार्ष्टि—भूतिमुन्मृजे, ब्रह्मवर्चसमुन्मृजे इति ॥

[2]अथावकाशैश्चरन्ति । तत्रोपांशुपात्रमवेक्षते—प्राणायेति ॥ ऊर्ध्वप्रवृत्तिः प्राणः । प्राणाय प्राणार्थं मे मम वर्चोदाः वर्चसो

वर्चोदा वर्चसे पवस्वापानायं व्या-
नायं वाचे ॥७॥ दक्षक्रतुभ्यां च-
क्षुर्भ्यां मे वर्चोदौ वर्चसे पवेथाꣳ

प्र-अनायं । मे । वर्चोदा इति वर्चः-दाः । वर्चसे । पवस्व । [3]अपानायेत्यप-अनायं । [4]व्यानायेति वि--अनायं । [5]वाचे ॥ ७ ॥ [6]दक्षक्रतुभ्यामिति दक्ष-क्रतु-भ्याम् । [7]चक्षुर्भ्यामिति चक्षुः-भ्याम् । मे ।

दीप्तेर्दाता त्वं वर्चसे दीप्तये तव मम वा पवस्व शुन्धस्व शोधय वा पीतो मदीयं शरीरम् । 'तस्य मे रास्व' इत्यादि पूर्वप्रकृतं सर्वत्रानुषज्यते । 'प्राणापानाभ्यामेवोपांश्वन्तर्यामौ निरमिमीत'* इत्यादि ब्राह्मणम् ॥

[3]अन्तर्यामपात्रमवेक्षते—अपानायेति ॥ अपानोधोवृत्तिः । 'मे वर्चोदाः' इत्यादि मध्ये द्वितीयोनुषङ्गः सर्वत्र ॥

[4]उपांशुसवनमवेक्षते—व्यानायेति ॥ विष्वग्वृत्तिः व्यानः । छान्दसमुत्तरपदादेर्दीर्घत्वम् ॥

[5]ऐन्द्रवायवमवेक्षते—वाचे इति ॥ 'सावेकाचः' इति विभक्तेरुदात्तत्वम् ॥

[6]मैत्रावरुणमवेक्षते—दक्षक्रतुभ्यामिति ॥

[7]शुक्रामन्थिनावेक्षते—चक्षुर्भ्यामिति ॥ मे वर्चोदाविति । द्वितीयानुषङ्गापवादः ॥

---

*तै. ब्रा. १-५-४.

श्रोत्रा॑यात्मने॒ऽङ्गे॑भ्य॒ आयु॑षे॒ वी-
र्या॑य॒ विष्णो॒रिन्द्र॑स्य॒ विश्वे॑षां दे-
व॒र्चोदा॑वि॒ति वर्चः—दौ । वर्च॑से । प॒वे॒था॒म् । [8]श्रो-
त्रा॑य । [9]आ॒त्मने॑ । [10]अङ्गे॑भ्यः । [11]आयु॑षे । [12]वी॒र्या॑-
य । [13]विष्णोः॑ । [14]इन्द्र॑स्य । [15]विश्वे॑षाम् । दे॒वाना॑म् ।

---

[8]आश्विनमवेक्षते—श्रोत्रायेति ॥ पूर्वकावेवानुषङ्गौ । अत्र 'श्रोत्रादाश्विनम् । चक्षुषश्शुक्रामन्थिनौ* इति शुक्रामन्थिभ्यां पूर्वमेवाश्विनोत्पत्तिश्रुतेः आश्विनावेक्षणं पूर्वमेव कार्यमित्याहुः ॥

[9]आग्रयणमवेक्षते—आत्मन इति ॥

[10]उक्थ्यमवेक्षते—अङ्गेभ्य इति ॥

[11]ध्रुवमवेक्षते—आयुष इति ॥ अत्र 'प्रतिष्ठाया ऋतु पात्रे'* इति दर्शनात् 'प्रतिष्ठायै मे वर्चोदाः' इत्यादिना ऋतुपात्रयोरवेक्षणं कुर्वन्ति माध्यन्दिनसवने प्रातस्सवने च ॥

[12]अथातिग्राह्यं षोडशिनं वाऽवेक्षते—वीर्याय इति ॥

[13]द्रोणकलशमवेक्षते—विष्णोर्जठरमसीति ॥ वक्ष्यमाणं त्रिभिरनुषज्यते । एष तृतीयोनुषङ्गः ॥

[14]आधवनीयमवेक्षते—इन्द्रस्य जठरमसीति ॥

[15]पूतभृतमवेक्षते—विश्वेषां देवानां जठरमसीति ॥ वर्चोदा

---

*ब्रा. १-५-४.

वानां जठरमसि वर्चोदा मे वर्चसे
पवस्व कोसि को नाम कस्मै त्वा
काय त्वा यं त्वा सोमेनातीतृपं यं
त्वा सोमेनामीमदꣳ सुप्रजाः प्रज-

जठरम् । असि । वर्चोदा इति वर्चः—दाः । मे । वर्चसे । पवस्व । [16]कः । असि । कः । नाम । कस्मै । त्वा । काय । त्वा । यम् । त्वा । सोमेन । अतीतृपम् । यम् । त्वा । सोमेन । अमीमदम् । सुप्रजा इति सु—प्रजाः । प्रजयेति प्र—जया । भू-

---

इत्यादि । व्याख्यातम्* । पुनराम्नानमनुषङ्गसमाप्तिं सूचयितुम् ॥

[16]अथ समस्तमेव राजानमुपतिष्ठते—कोसि कोनामेति पुरउ-ष्णिहा यजुरन्तया ॥ सर्वात्मत्वादनिर्धारितविशेषः प्रजापतिरेव सर्व-नाम्नोच्यते—अनिर्धारितविशेषः प्रजापतिरेव स्वयं त्वमसि हे सोमेति । प्रजापत्यात्मना सोमस्तूयते—को नामेति । नामधे-यवान् 'को ह वै नाम प्रजापतिः'† इति । असर्वनामैवेदं संज्ञापदम् । इदानीं तादृशप्राजापत्यात्मतया यज्ञमाह । ब्राह्मणं च भवति 'एष वै पात्रियः प्रजापतिर्यज्ञः प्रजापतिः'‡ इति । कस्मै त्वा काय त्वा । अनिर्धारितविशेषाय कनाम्ने प्रजापत्यात्मने यज्ञाय त्वामुपतिष्ठे इति शेषः । हे सोमलतात्मन् प्रजापते यं त्वा सोमेन रसस्वरूपेण अतीतृपं स्वयमेव तृप्यन्तं यागेन तर्पयामि ।

---

*सं. ३-२-३[2]. †ब्रा. २-२-१०. ‡सं. ३-२-३[17].

यां भूयास२ सुवीरो वीरैस्सुवर्चा वर्चसा सुपोषः पोषैर्विश्वेभ्यो मे रूपेभ्यो वर्चोदाः ॥ ८ ॥ वर्चसे पवस्व तस्यं मे रास्व तस्यं ते भक्षीय

यासम् । सुवीर इति सु–वीरः । वीरैः । सुवर्चा इति सु–वर्चाः । वर्चसा । सुपोष इति सु–पोषः । पोषैः । विश्वेभ्यः । मे । रूपेभ्यः । वर्चोदा इति वर्चः–दाः ॥ ८ ॥ वर्चसे । पवस्व । तस्यं । मे । रास्व । तस्यं । ते । भक्षीय । तस्यं । ते । इदम् ।

'उरृत्' इति ऋकारः । यं त्वा सोमेन अमीमदं स्वयमेव माद्यन्तं यागेन मादयामि । उभयत्र छान्दसो लुङ् । एवं प्रजापत्यभेदेन सोमो निर्दिष्टः । तादृशं त्वामुपतिष्ठ इति । एवं महानुभावस्य तव प्रसादात् अहं प्रजया सुप्रजा भूयासं शोभनापत्यः । 'नित्यमसिच्प्रजामेधयोः' इत्यसिच्, 'सोर्मनसी' इत्येतद्बाधित्वा समासान्तस्वरः प्रवर्तते । वीरैः विक्रान्तैः पुरुषैः सुवीरः शोभनविक्रान्तपुरुषो भूयासम् । 'वीरवीर्यौ च' इत्युत्तरपदान्तोदात्तत्वम् । वर्चसा दीप्त्या बलेन वा सुवर्चा भूयासम् । 'सोर्मनसी' इत्युत्तरपदान्तोदात्तत्वम् । पोषैरन्नादिपोषैः सुपोषो भूयासम् । 'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । विश्वेभ्यो रूपेभ्यः विश्वरूपार्थम् । वर्चोदा इत्यादि व्याख्यातम्*, तस्य मे रास्वेत्यादि च* । पुनराम्नानमनुषङ्गस्याविच्छेदं दर्शयितुं समाप्तिं च द्योतयितुम् ॥

---

*सं. ३-२-३[1–2].

तस्यं त इदमुन्मृजे । बुभूषन्नवेक्षे-
तैष वै पात्रियः प्रजापतिर्यज्ञः प्र-
जापतिस्तमेव तर्पयति स एनं तृप्तो
भूत्याऽभि पवते ब्रह्मवर्चसकामोऽ-
वेक्षेतैष वै पात्रियः प्रजापतिर्यज्ञः प्र-
जापतिस्तमेव तर्पयति स एनं तृ-

उदितं । मृजे । [17]बुभूषन् । अवेतं । ईक्षेत । एषः । वै । पात्रियः । प्रजापतिरितं प्रजा–पतिः । यज्ञः । प्रजापतिरितं प्रजा–पतिः । तम् । एव । तर्पयति । सः । एनम् । तृप्तः । भूत्या । अभीतं । पवते । ब्रह्मवर्चसकामम इतं ब्रह्मवर्चस–कामः । अवेतं । ईक्षेत । एषः । वै । पात्रियः । प्रजापतिरितं प्रजा–पतिः । यज्ञः । प्रजापतिरितं प्रजा–पतिः । तम् । एव । तर्पयति । सः । एनम् । तृ-

[17]बुभूषन्नित्यादयः काम्याः अवेक्षणविधयः—बुभूषन् भूतिमिच्छन् । 'इदमुन्मृजे' इति सामान्येन यदुक्तं तस्यैते विशेषा भूत्यादयः ब्राह्मणेन प्रदर्श्यन्ते । पात्रियः पात्रार्हः सोमात्मा प्रजापतिः । 'पात्राद्घः' इति घः । यज्ञश्चायं प्रजापतिः । तस्मादनेन अवेक्षणेन तमेव यज्ञात्मानं प्रजापतिं तर्पयति । स च तृप्त एनं भूत्या अभिपवते यथाऽयं भूतिमान् भवति तथा

ष्टो ब्रह्मवर्चसेनाभि पवत आमया-
वी ॥ ९ ॥ अवेक्षेतैष वै पात्रियः प्र-
जापतिर्यज्ञः प्रजापतिस्तमेव तर्प-
यति स एनं तृप्त आयुषाऽभि पव-
तेऽभिचरन्नवेक्षेतैष वै पात्रियः प्र-
जापतिर्यज्ञः प्रजापतिस्तमेव तर्प-
यति स एनं तृप्तः प्राणापानाभ्यां

ष्टः । ब्रह्मवर्चसेनेति ब्रह्म–वर्चसेन । अभीति । पवते । [18]आमयावी ॥९॥ अवेति । ईक्षेत । एषः । वै । पात्रियः । प्रजापतिरिति प्रजा–पतिः । यज्ञः । प्रजापतिरिति प्रजा–पतिः । तम् । एव । तर्पयति । सः । एनम् । तृप्तः । आयुषा । अभीति । पवते । [19]अभिचरन्नित्यभि–चरन् । अवेति । ईक्षेत । एषः । वै । पात्रियः । प्रजापतिरिति प्रजा–पतिः । यज्ञः । प्रजापतिरिति प्रजा–पतिः । तम् । एव । तर्पयति ।

एतदाभिमुख्येन पवते । एवं ब्रह्मवर्चसादिष्वपि द्रष्टव्यम् ।

[18]आमयावी रोगवान् । आयुरर्थं सोवेक्षेत । 'बहुलं छन्दसि' इति विनिः, 'अन्येषामपि दृश्यते' इति दीर्घत्वम् ।

[19]अभिचरन् अनिष्टं जनं मारयन् । यत्सिद्ध्यर्थमुपांशुपात्रादीनां अवेक्षणं क्रियते, तेभ्यः प्राणादिभ्यः एनमभिचर्यमाणमन्तरेति अन्तरितं

वाचो दक्षक्रतुभ्यां चक्षुर्भ्यां श्रोत्राभ्यामात्मनोऽङ्गेभ्य आयुषोन्तरेति ताजक्प्र धन्वति ॥ १० ॥

स्फ्यस्स्वस्तिर्विघनस्स्वस्तिः परसः । एनम् । तृप्तः । प्राणापानाभ्यामिति प्राण—अपानाभ्याम् । वाचः । दक्षक्रतुभ्यामिति दक्षक्रतु—भ्याम् । चक्षुर्भ्यामिति चक्षुः—भ्याम् । श्रोत्राभ्याम् । आत्मनः । अङ्गेभ्यः । आयुषः । अन्तः । एति । ताजक् । प्रेति । धन्वति ॥ १० ॥

वाचे रूपेभ्यो वर्चोदा आमयावी पञ्चत्वारिꣳशच्च ॥ ३ ॥

[1]स्फ्यः । स्वस्तिः । विघन इति वि—घनः । स्वस्तिः । परशुः । वेदिः । परशुः । नः । स्वस्तिः ।

करोति तत्सम्बन्धमस्य निवर्तयति । ततश्च ताजक् तदानीमेव अयं प्रधन्वति प्रगच्छति म्रियते इत्यर्थः । धवि गतौ, इदित्वान्नुम् ॥

इति तृतीये द्वितीये तृतीयः.

---

[1]स्फ्यविघनादि यजमानमुपस्थापयति—स्फ्यस्स्वस्तिरिति ॥ बृहतीविशेषोयम्, 'बृहती द्वादशाक्षरा त्रयश्चाष्टाक्षरा' इति ॥ स्फ्यः

शुर्वेदिः परशुर्नस्स्वस्तिः । यज्ञिया यज्ञकृतस्स्थ ते मा ऽस्मिन् यज्ञ उप ह्वयध्वमुप मा द्यावापृथिवी ह्वये-

यज्ञियाः । यज्ञकृत इति यज्ञ–कृतः । स्थ । ते । मा । अस्मिन् । यज्ञे । उपेति । ह्वयध्वम् । [2]उपे-ति । मा । द्यावापृथिवी इति द्यावा–पृथिवी ।

स्वस्तिः अविनाशहेतुरस्माकमयम् । अयं स्वस्तिशब्दो निपातो गुणमात्रे अविनाशे वर्तते । सोयमिदानीं मतुब्लोपादभेदोपचाराद्वा शुल्कादिवद्गुणिन्यपि अविनाशहेतौ वर्तते । विघनश्चास्माकं स्वस्तिः अविनाशहेतुः । विहन्यते भूमिरनेनेति विघनः । व्यत्ययेन अपि घत्वं च, थाथादिनोत्तरपदान्तोदात्तत्वम् । एवं पर्श्वादयः अविनाश-हेतवः । परशुः पार्श्वक्रः तृणादिच्छेदनः । परशुः वृक्षवृश्चनः । ते यूयं यज्ञिया यज्ञसंपादनार्हाः यज्ञकृतश्च स्थ यूयमेव यज्ञं संपादितवन्तस्स्थ । ते यूयं मां विशेषकरणार्थं अस्मिन् यज्ञे उपह्वयध्वं अनुजानीत यन्मया कर्तव्यं तदहमेव करोमि तदनुज्ञा-तुमर्हथेति । 'निसमुपविभ्यो ह्वः' इत्यात्मनेपदम् ॥

[2]द्यावापृथिवी उपतिष्ठते—उप मेति ॥ द्यावापृथिवी उप मा ह्वये-ताम् । 'द्यावापृथिव्योर्हि यज्ञः'* इति तदनुज्ञानं प्रार्थयते । द्यावापृथिव्योः स्वर उक्तः ॥

---

*सं. २-६-९.

तामुपास्तावः कलशस्सोमो अग्निरुप देवा उप यज्ञ उप मा ह्वयेताम् । [3]उपेति । आस्ताव इत्या-स्तावः । [4]कलशः । [5]सोमः । [6]अग्निः । [7]उपेति । देवाः । [8]उपेति । यज्ञः । [9]उपेति । मा । होत्राः । उपहव

[3]बहिष्पवमानास्तावमुपतिष्ठते—उपास्ताव इति ॥ ह्वयतामित्यनुषज्यते । उपास्तावो ह्वयतामिति । यत्र वचनभेदस्तत्रोपसर्गावृत्तिः ॥

[4]द्रोणकलशमुपतिष्ठते—कलश इति ॥ शिष्टमनुषज्यते—उप मा कलशो ह्वयतामिति ॥

[5]सर्वं सोममुपतिष्ठते—उप मा सोमो ह्वयतामिति ॥

[6]अग्निमुपतिष्ठते—अग्निरिति ॥ उप माऽग्निर्ह्वयतामिति ॥

[7]देवानुपतिष्ठते—उप देवा इति ॥ उप मा देवा ह्वयन्तामिति । पूर्ववद्वचनभेदादुपसर्गावृत्तिः ॥

[8]यज्ञमुपतिष्ठते—उप यज्ञ इति ॥ उप मा यज्ञो ह्वयतामिति । पूर्ववदुपसर्गावृत्तिः ॥

[9]होत्रकानुपतिष्ठते—उप मा होत्रा इति ॥ होत्रा धिष्ण्यवन्तः । 'सप्त होत्राः प्राचीर्वषट्कुर्वन्ति'* इति । तेषामुपह्वे ह्वयन्तामिति । उपहूयन्ते अस्मिन्नित्युपह्वो यज्ञः । यद्वा—उपह्वेऽनुज्ञाने कर्तव्ये यत्रयत्र उपह्वमिच्छामि, तत्रतत्र मामुपह्वयन्तामिति ॥

*ब्रा. २-३-६.

होत्रा॑ उपह्व॒वे ह्व॑यन्तां नमो॒ग्नये॑
मख॒घ्ने म॒खस्य॑ मा॒ यशो॑ऽर्या॒दित्या॑ह-
व॒नीय॒मुप॑ तिष्ठते य॒ज्ञो वै म॒खः ॥ ११
य॒ज्ञं वाव स तद॑ह॒न्तस्मा॑ एव नम॑-
स्कृत्य॒ सद॒ः प्र स॑र्पत्या॒त्मनोना॑र्त्यै

इत्युप—ह॒वे । ह्व॒य॒न्ता॒म् । [10]नमः॑ । अ॒ग्नये॑ । म॒ख-
घ्न इति॑ मख—घ्ने । म॒खस्य॑ । मा॒ । यशः॑ । अ॒र्या॒त् ।
इति॑ । आ॒ह॒व॒नीय॒मित्या॑—ह॒व॒नीय॑म् । उपेति॑ ।
ति॒ष्ठ॒ते॒ । य॒ज्ञः । वै । म॒खः ॥ ११ ॥ य॒ज्ञम् । वा-
व । सः । तत् । अ॒ह॒न्न् । तस्मै॑ । एव । न॒म॒स्कृ-
त्येति॑ नमः—कृत्य॑ । सद॒ः । प्रेति॑ । स॒र्प॒ति॒ । आ-

---

[10]अथाहवनीयस्य समन्त्रमुपस्थानं ब्राह्मणमेव विदधाति—नम इति ॥ अनया द्विपदया गायत्र्या आहवनीयमुपतिष्ठते । अथोपस्थाने कारणमाह—यज्ञो वा इत्यादि । सोऽग्निः तत् तदानीं सदःप्रसर्पणकाले अहन् आर्तिमार्पयति अनमस्कृतः । तस्मात् तस्मै नमस्कृत्य सदः प्रसर्पत्यात्मनोनार्त्यै यज्ञविनाशेन आत्मन आर्तिर्मा भूदिति । मन्त्रार्थस्तु—अग्नये मखघ्ने मखस्य यज्ञस्य अनमस्कारकारिणो नाशयित्रे तुभ्यं नमः । उदात्तनिवृत्तिस्वरेण चतुर्थ्या उदात्तत्वम् । मखस्य यशः फलं मा अर्यात्प्राप्नोतु तद्विघातश्च त्वया न कर्तव्य इति ॥

नमो रुद्राय मखघ्ने नमस्कृत्या
मा पाहीत्याग्नीध्रं तस्मा एव नम-
स्कृत्य सदः प्र सर्पत्यात्मनोनार्त्यै
नम इन्द्राय मखघ्न इन्द्रियं मे वी-
र्यं मा निर्वधीरिति होत्रीयमाशिष-

त्मनः । अनार्त्यै । [11]नमः । रुद्राय । मखघ्न इति मख–घ्ने । नमस्कृत्येति नमः–कृत्या । मा । पाहि । इति । आग्नीध्रमित्याग्नि–इध्रम् । तस्मै । एव । नमस्कृत्येति नमः–कृत्य । सदः । प्रेति । सर्पति । आत्मनः । अनार्त्यै । [12]नमः । इन्द्राय । मखघ्न इति मख–घ्ने । इन्द्रियम् । मे । वीर्यम् । मा । निरिति । वधीः । इति । होत्रीयम् । आशिषमित्या–

[11]अथाग्नीध्रस्योपस्थानं विदधाति—नमो रुद्रायेति ॥ आग्नीध्रमुपतिष्ठते इत्येव । तस्मा इत्यादि । गतम् * । मन्त्रार्थोपि गतः । नमस्कृत्या प्रणिपातेनानेन मां पाहि । ऊर्यादित्वेन नमसो गतित्वात् 'तादौ च निति' इति प्रकृतिस्वरत्वम् । अग्नीधश्शरणमाग्नीध्रम्, 'अग्नीधश्शरणे रण् भं च' ॥

[12]अथ होत्रीयस्योपस्थनं विदधाति—नम इन्द्रायेति ॥ होत्रियमुपतिष्ठते इत्येव । होतुर्धिष्ण्यिं होत्रीयम्, गहादित्वाच्छः । इन्द्रियं चक्षुरादिकं वीर्यं बलं मा निर्वधीः निष्कृष्य मा वधीः ।

* सं. ३–२–४ 10.

मेवैतामा शास्त इन्द्रियस्य वीर्य-
स्यानिर्घाताय या वै ॥ १२ ॥ दे-
वतास्सदस्यार्तिमार्पर्यन्ति यस्ता वि-
द्वान्प्रसर्पति न सदस्यार्तिमार्च्छति
नमोग्नये मखघ्न इत्याहैता वै दे्व-
तास्सदस्यार्तिमाऽर्पयन्ति ता य ए-

शिषम् । एव । एताम् । एति । शास्ते । इन्द्रिय-
स्य । वीर्यस्य । अनिर्घातायेत्यनिः—घाताय । याः ।
वै ॥ १२ ॥ देवताः । सदसि । आर्तिम् । आर्पय-
न्तीत्या—अर्पयन्ति । यः । ताः । विद्वान् । प्रसर्प-
तीति प्र—सर्पति । न । सदसि । आर्तिम् । एति ।
ऋच्छति । नमः । अग्नये । मखघ्न इति मख—घ्ने ।
इति । आह । एताः । वै । देवताः । सदसि । आ-
र्तिम् । एति । अर्पयन्ति । ताः । यः । एवम् ।

एतामाशिषं मा निर्वधीः इत्याशास्ते इन्द्रियस्य वीर्यस्य चानि-
र्घाताय भवति । या वै देवता इत्यादि । आङ्पूर्वोयमृच्छतिर्विनाशे
वर्तते । तत्र 'गोपोषं पुष्णाति' इतिवत् धात्वर्थसामान्यवचनो द्वितीय ऋच्छतिर्वेदितव्यः । आङ्पूर्वात् क्तिनः 'उपसर्गादिति धातौ' इति वृद्धिः, 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् । एता वै देवता इत्यादि । एतन्मन्त्रनिर्दिष्टा अग्निरुद्रेन्द्रा इत्यर्थः । एता देवता

वं विद्वान्प्रसर्पति न सदस्यार्तिमा-
च्छति दृढे स्थश्शिथिरे समीची
माऽꣳहसस्पातꣳ सूर्यो मा देवो
दिव्यादꣳहसस्पातु वायुरन्तरिक्षा-
त् ॥१३॥ अग्निः पृथिव्या यमः

विद्वान् । प्रसर्पतीति प्र–सर्पति । न । सदांसि । आर्तिम् । एति । ऋच्छति । [13]दृढे इति । स्थः । शिथिरे इति । समीची इति । मा । अꣳहसः । पातम् । [14]सूर्यः । मा । देवः । दिव्यात् । अꣳहसः । पातु । [15]वायुः । अन्तरिक्षात् ॥ १३ ॥ [16]अग्निः ।

विदित्वा यस्सदः प्रसर्पति स विद्वानार्तिं न प्राप्नोति, अविद्वांसं आर्तिं प्रापयन्तीति ॥

[13]द्यावापृथिवी उपतिष्ठते—दृढे स्थ इति ॥ दृढे स्थिरे युवां स्थः भवतं शिथिरे मे सर्पणेन शिथिलिते अपि दृढे भवतम् । यद्वा—ममांहसः शिथिलयित्र्यौ । कपिलकादिः । समीची सम्यगञ्चनहेतू । 'चौ' इति पूर्वपदस्य दीर्घत्वं, अन्तोदात्तत्वं च । तादृश्यौ युवामागच्छतम् । अंहसः पापात्पातं रक्षतम् ॥

[14]सूर्यमुपतिष्ठते—सूर्य इति ॥ दिव्यात् दिवि भवात् प्रमादकृतात्पापात् सूर्यो देवो मां पातु ॥

[15]वायुमुपतिष्ठते—वायुरिति ॥ पात्वित्यनुषज्यते । अन्तरिक्षात् अन्तरिक्षनिमित्तात्पापात् पातु ॥

[16]अग्निमुपतिष्ठते—अग्निरिति ॥

पितृभ्यस्सरस्वती मनुष्येभ्यो देवी
द्वारौ मा मा सं तांप्तं नमस्सदसे
नमस्सदस्पतये नमस्सखीनां पु-
रोगाणां चक्षुषे नमो दिवे नमः पृ-
थिव्या अहे दैधिषव्योदतास्तिष्ठा-

पृथिव्याः । [17]यमः । पितृभ्य इति पितृ—भ्यः । [18]सरस्वती । मनुष्येभ्यः । [19]देवी इति । द्वारौ । मा । मा । सामिति । तांप्तम् । [20]नमः । सदसे । नमः । सदसः । पतये । नमः । सखीनाम् । पु-
रोगाणामिति पुरः—गानाम् । चक्षुषे । नमः । दिवे । न-
मः । पृथिव्यै । [21]अहे । दैधिषव्य । उदिति । अतः । तिष्ठ ।

[17]यममुपतिष्ठते—यम इति ॥ पितृभ्यः पित्रपचारनिमित्तात्पापात्पातु ॥

[18]सरस्वतीमुपतिष्ठते—सरस्वतीति ॥ मनुष्यद्रोहनिमित्तात्पापात्पातु ॥

[19]पूर्वे द्वारौ सदसस्संमृशति—देवी इति ॥ हे देव्यौ द्वारौ मा मा सन्तापं मा कार्ष्टम् ॥

[20]सदः प्रपद्यते—नम इति ॥ 'ऐन्द्रं हि देवतया सदः'* इति इन्द्रः सदसस्पतिः पालयिता तस्मै नमः । 'षष्ठयाः पतिपुत्र' इति सत्वम् । सखीनां समानख्यानानामृत्विजां पुरोगाणामग्रतो गन्तृणां प्रधानानां सर्वेषामपि चक्षुषे चक्षुस्स्थानीयाय दर्शनहेतवे सवित्रे च नमः । गतमन्यत् ॥

[21]आसनाद्बर्हिस्सदसस्तृणं निरस्यति—अहे इति ॥ आगत्य

* सं, ६-२-१०

न्यस्य सदने सीद योस्मत्पाकतर उन्निवत उदुद्वतश्च गेषं पातं मा द्यावापृथिवी अद्याह्नस्सदो वै प्रस-

अन्यस्य । सदने । सीद । यः । अस्मत् । पाकत-र इति पाक–तरः । [22]उदिति । निवत इति नि–वतः । उदिति । उद्वत इत्युत्–वतः । च । गेषम् । [23]पातम् । मा । द्यावापृथिवी इति द्यावा–पृथिवी ।

हन्तीत्यहिः, अनिष्टकृत् । हे अहे तृण दैधिषव्य दिधिषु आसनधारणसमर्थम् । दधातेः कुप्रत्यये द्विर्वचनं, इषुगागमश्च निपात्यते, तस्यापत्यं दैधिषव्यम्; तत्प्रभवत्वात् । 'द्युप्रागवाक्' इति यत्प्रत्ययः । तादृशस्त्वं अतोस्मादासनादुत्तिष्ठ अन्यस्य सदने सीद मा अत्र स्थाः । कस्यान्यस्य? योस्मत् अस्मत्तः पाकतरः बालतरः अज्ञः तस्य सदने सीद माऽत्र सीद ॥

[22]उपविशति—उदिति ॥ निवतः न्यग्गतान् येऽस्मत्तो न्यग्भूताः तानुद्वेषम् । किंच—उद्वतश्च येऽस्मत्तः उद्गता उद्भूताः, तानपि उद्वेषं उत्क्रम्योच्छङ्च उपरि गम्यासम् । 'उपसर्गाच्छन्दसि धात्वर्थे' इति वतिः । इणः आशिषि लिङ्, आदेशश्छान्दसः, लिङ्याशिष्यङ्, अतो येयः, आर्धधातुकत्वात्सलोपाभावः ॥

[23]द्यावापृथिव्यौ समीक्षते—पातमिति ॥ हे द्यावापृथिव्यौ मां पातं रक्षतं अद्याह्नः अस्मादह्नः । यद्वा—अस्मिन् कर्मणि अह्नः अहर्निमित्तात्पापात्पातं रक्षतम् । 'सद्यःपरुत्' इत्यादिना इदमोद्येति निपात्यते ॥

पैन्तम् ॥ १४ ॥ पितरोनु प्र सर्प-
न्ति त एनमीश्वरा हिꣳसितोस्सदः
प्रसृप्य दक्षिणार्धं परेक्षेताऽगन्त पि-
तरः पितृमानहं युष्माभिर्भूयासꣳ
सुप्रजसो मया यूयं भूयास्तेति ते-

अध । अह्नः। [42]सदः । वै । प्रसर्पन्तमिति प्र–सर्प-
न्तम् ॥ १४ ॥ पितरः । अनु । प्रेति । सर्पन्ति । ते । एनम् । ईश्वराः । हिꣳसितोः । सदः । प्रसृ-
प्येति प्र–सृप्य । दक्षिणार्धमिति दक्षिण–अर्धम् । परेति । ईक्षेत । एति । अगन्त । पितरः । पितृ-
मानिति पितृ–मान् । अहम् । युष्माभिः । भूया-
सम् । सुप्रजस इति सु–प्रजसः । मया । यूयम् । भूयास्त । इति । तेभ्यः । एव । नमस्कृत्येति न-

[24]सद इत्यादि ॥ एनं हिंसितोः हिंसितुं पितरः ईश्वराः अनमस्कृताः । तस्मात्सदः प्रसृप्य दक्षिणार्धं परेक्षेत 'आगन्त' इत्यादिना यजुषा । ततस्तेभ्यो नमस्कृत्य प्रसर्पणं कृतं भवति आत्मन आर्त्यभावाय । मन्त्रार्थस्तु—हे पितरः आगन्त आगच्छत । शपो लुक्, 'तप्तनप्तनघनाश्च' इति तादेशः । युष्माभिरागतैः पितृमानहं भूयासं, यूयमपि मया युष्मदागमनोपलब्धसाधुत्वेन

भ्यं एव नमस्कृत्य सदः प्र सर्प-
त्यात्मनोनार्त्यै ॥ १५ ॥
भक्षेहि माऽऽ विंश दीर्घायुत्वाय
शन्तनुत्वाय रायस्पोषाय वर्चसे

मः—कृत्यं । सदः । प्रेति । सर्पति । आत्मनः । अनार्त्यै ॥ १५ ॥

मुखो वा अन्तरिक्षात्प्रसर्पन्तं त्रय-
स्त्रिꣳशाञ्च ॥ ४ ॥

[1]भक्षं । एति । इहि । मा । एति । विश । दीर्घायुत्वायेति दीर्घायु—त्वायं । शन्तनुत्वायेति शन्तनु—त्वायं । रायः । पोषाय । वर्चसे । सुप्रजा-

---

सुप्रजसो भूयास्तेति । 'नित्यमसिच्प्रजामेधयोः' इति समासान्तोसिच् ॥

इति तृतीये द्वितीये चतुर्थोनुवाकः.

---

[1]अथ भक्षानुवाकः । तत्र ग्रहणावेक्षणभक्षणादिषु यथालिङ्गं विनियोगः । तत्र भक्षणायाहियमाणं सोमं प्रतिगृह्णाति—भक्षेहीति ॥ भक्ष्यत इति भक्षः । हे भक्ष । षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । एहि आगच्छ । गुणे कृते, 'अन्तादिवच्च' इति तस्य आङ्ग्रहणेन ग्रहणात् 'ओमाङोश्च' इति पररूपत्वम् ।

सुप्रजास्त्वायेहि वसो पुरोवसो प्रि-
यो मे हृदोस्यश्विनोस्त्वा बाहुभ्याꣳ
सध्यासं नृचक्षसं त्वा देव सोम

स्त्वायेति सुप्रजाः—त्वाय । एति । इहि । वसो इति ।
पुरोवसो इति पुरः—वसो । प्रियः । मे । हृदः । अ-
सि । अश्विनोः । त्वा । बाहुभ्यामिति बाहु—भ्याम् ।
सध्यासम् । [2]नृचक्षसमिति नृ—चक्षसम् । त्वा ।
देव । सोम । सुचक्षा इति सु—चक्षाः । अवेति ।

स त्वं मामाविश भक्षितोन्तः प्रविश दीर्घायुत्वाय । तादर्थ्ये चतुर्थी । मम दीर्घमायुर्यथा स्यादिति । बहुव्रीहौ छान्दसो-न्त्यलोपः । शन्तनुत्वाय आरोग्याय रायो धनस्य पोषाय पुष्ट्यर्थम् । पूर्ववत्सत्वम् । वर्चसे दीप्तये बलाय वा । सुप्र-जास्त्वाय शोभनापत्यत्वार्थं मामाविशेति । एहि वसो वासहेतो सर्वेषां, आगच्छ हे पुरोवसो पुरस्ताद्वसो वासयितॄणां पूर्वधनानां वा, प्रथमं मे मम हृदयस्य प्रियोसि प्रीणयिताऽसि उपकारक-त्वात् । अश्विनोर्बाहुभ्यां त्वां सध्यासं गृह्णामि । आत्मनस्स्वातन्त्र्य-निवृत्त्यर्थमेवमुक्तम् । सधिः ग्रहणकर्मा छान्दसः ॥

[2]अवेक्षते—नृचक्षसमिति ॥ नॄन् चष्टे पश्यतीति नृचक्षाः । 'गतिकारकयोरपि' इत्यसुन्, कृदुत्तरपदप्रकृतिस्वरत्वम् । ईदृशं त्वां हे देव सोम त्वत्प्रसादात् सुचक्षाः सुष्ठु द्रष्टा अहम् । पूर्ववदसुन् । अवख्येषम् । अवचष्टेराशिषि लिङ्, ख्यादेशः, लिङ्याशिष्यङ्, अतो येयः ॥

सुचक्षा अवं ख्येषं मन्द्राऽभिभूतिः
केतुर्यज्ञानां वाग्जुषाणा सोमस्य तृ-
प्यतु मन्द्रा स्ववर्च्यादितिरनाहत-
शीर्ष्णी वाग्जुषाणा सोमस्य तृप्य-

ख्येषम् । [3]मन्द्रा । अभिभूतिरित्यभि—भूतिः । केतुः । यज्ञानाम् । वाक् । जुषाणा । सोमस्य । तृप्यतु । मन्द्रा । स्ववर्चीतिं सु—अर्वाची । अदितिः । अनाहतशीर्ष्णीत्यनाहत—शीर्ष्णी । वाक् । जुषाणा । सोमस्य । तृप्यतु । एतं । इहि । विश्वचर्षण

---

[3]मन्द्राऽभिभूतिरिति प्रातस्सवने सर्वानैन्द्रान् भक्षयति । नराशंसपीतस्येति नराशंसान्—मन्द्रा मदकरी, अभिभूतिः अभिभवित्री सर्वशरीरस्य, केतुः प्रधानभूता यज्ञानां ; तदधीनत्वात्सर्वप्रवृत्तीनाम् । ईदृशी वाक् जुषाणा प्रीयमाणा सोमस्य तृप्यतु सोमेन पीतेन तृप्ता भवतु । यद्वा—सोमस्य जुषाणा सेवमाना सोममाप्रियमाणा वाक् तृप्यतु । मन्द्रा स एवार्थः । स्ववर्ची सुष्ठु अस्मदाभिमुख्येन प्रवर्तमाना । अव्ययपूर्वपदप्रकृतिस्वरत्वम्, 'उदात्तस्वरितयोर्यणः' इति संहितायामकारस्स्वर्यते । अदितिः अखण्डनीया । कर्मणि क्तिन् । अनाहतशीर्ष्णी अप्रतिबद्धप्रारम्भा । 'शीर्षन् छन्दसि' इति शिरसश्शीर्षन्भावः, 'अन उपधालोपिनः' इति ङीप् । वाग्जुषाणेत्यादि । गतम् । हे विश्वचर्षणे विश्वचर्षणयो मनुष्याः स्वभूता यस्य स तादृशः । एहि आगच्छ । यद्वा—विश्वज्ञानहेतो अस्मानागच्छ । शम्भूः शान्तोर्नि-

त्वेहि विश्वचर्षणे ॥ १६ ॥ शंभू-
र्मयोभूस्स्वस्ति मा हरिवर्ण प्र चर
क्रत्वे दक्षाय रायस्पोषाय सुवीरता-
यै मा मा राजन्वि बीभिषो मा मे

इति विश्व–चर्षणे ॥ १६ ॥ शंभूरिति शं–भूः । मयोभूरिति मयः–भूः । स्वस्ति । मा । हरिवर्णेति हरि–वर्ण । प्रेति । चर । क्रत्वे । दक्षाय । रायः । पोषाय । सुवीरतायेति सु–वीरतायै । [4]मा । मा । राजन्न् । वीति । बीभिषः । मा । मे ।

वृत्तिलक्षणस्य वाक्सुखस्य भावयिता मयोभूः सुखस्य भावयिता प्रवृत्तिलक्षणस्य । उभयत्रापि पूर्ववण्णिलुक् । ईदृशस्सन् स्वस्ति अविनाशेन ऊर्ध्वाधोगमनरहितः मां प्रचर प्रविश हे हरिवर्ण हरितवर्ण मनोहरवर्ण वा । क्रत्वे क्रत्वर्थम् । 'जसादिषु वा वचनम्' इति 'घेर्ङिति' इति गुणाभावः । दक्षाय उत्साहार्थं, रायस्पोषाय धनस्य पुष्ट्यर्थं, सुवीरतायै शोभनवीर्यतायै च ॥

[4]अथ परोष्णिक्, गायत्री वा—मा मा राजन्निति ॥ हे राजन् सोम मां मा विबीभिषः मा विभीषथाः ऊर्ध्वमधो वा निर्गच्छन् भीतिं मा जीजनः । व्यत्ययेनात्मनेपदाभावः । यद्वा—ऊर्ध्वाधोगमनेन मां मा विभीषथाः । हेतुभयाभावात् आत्मनेपदाभावः, षुगागमश्छान्दसः । मा मे हार्दि त्विषा दीप्त्या वदीयया मा वधीः । हृदये भवा अभिप्राया हार्दाः, तद्युक्तं

हार्दि त्विषा वधीः। वृषणे शुष्मायायुषे वर्चसे । वसुमद्गणस्य सोम देव ते मतिविदः प्रातस्सवनस्य गा-

हार्दि । त्विषा । वधीः । वृषणे । शुष्माय । आयुषे । वर्चसे । [5]वसुमद्गणस्येति वसुमत्–गणस्य सोम । देव । ते । मतिविद इति मति–विदः । प्रातस्सवनस्येति प्रातः–सवनस्य । गायत्रछन्दस इति गायत्र–छन्दसः । इन्द्रपीतस्येतीन्द्र–पीतस्य

मनो हार्दि । 'हृदयस्य हृल्लेख' इति हृद्भावः । कानि पुनस्तान्यभिप्रेतानीत्याह—वृषणे सेकसामर्थ्याय सेक्रे वा । उपधालोपाभावश्छान्दसः। शुष्माय बलाय आयुषे संपूर्णाय वर्चसे दीप्तये।

[5]वसुमद्गणस्य वसुमान् गणो यस्य स तथोक्तः । अष्टौ वसवः तत्रावयवेन समुदायो गणस्तद्वानिति मत्वर्थोपपत्तिः । कश्चिदाह—वसुमान् धनवान् गण ऋत्विक्सङ्घो यस्येति । तस्य रुद्रवद्गणस्येत्यादि अघटमानं स्यात् । हे सोम देव दीप्तिमन् ते तव मति विदः सर्वेषां मतानि जानतः अभिमतानां लम्भयितुर्वा प्रातस्सवनस्य प्रातस्सूयत इति प्रातस्सवनं, कर्मणि ल्युट्, 'अनो भावकर्मवचने' इत्युत्तरपदान्तोदात्तत्वम् । गायत्रछन्दसः । गायत्रचेः गायत्रं, तदेव छन्दो यस्य स्तोत्रादिषु तादृशस्य विश्वजनादित्वात्तु गभावः । इन्द्रपीतस्य इन्द्रेण प्रथमं पीतस्य । 'तृतीया कर्मणि इति पूर्वपदप्रकृतिस्वरत्वम् । इन्द्रस्य सर्वदेवतामयत्वात् सर्वत्रैवमप्यन्यदेवते । नराशंसपीतस्य नरैश्शंसन्ति पानं ये भक्षणे ते नराशंसा

यत्रछंन्दस इन्द्रंपीतस्य नराशꣳसं-
पीतस्य पितृपीतस्य मधुमत उपं-
हूतस्योपंहूतो भक्षयामि रुद्रवंद्गण-
स्य सोम देव ते मतिविदो माध्यं-
न्दिनस्य सवंनस्य त्रिष्टुप्छंन्दस

नराशꣳसंपीतस्येति नराशꣳसं-पीतस्य । पितृ-
पीतस्येति पितृ-पीतस्य । मधुमत इति मधु-मतः ।
उपंहूतस्येत्युपं-हूतस्य । उपंहूत इत्युपं-हूतः ।
भक्षयामि । रुद्रवंद्गणस्येति रुद्रवत्-गणस्य । सो-
म । देव । ते । मतिविद इति मति-विदः । मा-
ध्यंन्दिनस्य । सवंनस्य । त्रिष्टुप्छंन्दस इति त्रिष्टुप्-

देवताविशेषाः । यद्वा—नरैश्शंसनीया नराशंसाः तैः पीतो नराशंसपीतः तस्य । यत्तेन पदेन नराशंसानामेव भक्षणं भक्षिताध्यायिता नराशंसाश्चमसाः । पूर्ववत्स्वरः, पूर्ववदेव 'परादिश्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । पितृपीतस्य पितृभिरस्मत्पूर्वैः पीतस्य । स एव स्वरः । मधुमतः मधुररसवतः उपहूतस्य इन्द्रादिभिरनुज्ञातस्य ईदृशस्य तव अहं उपहूतः देवैस्सहभक्षिभिरनुज्ञातः भक्षयामि । सर्वत्र कर्मणि षष्ठी ॥

[6]अथ माध्यन्दिने सवने—रुद्रवद्गणस्येत्यादि ॥ माध्यन्दिनस्येति। दिनस्य मध्यं मध्यन्दिनम् ' मध्यो मध्यन्दिनं चास्मात् ' इति । तत्र भवं माध्यन्दिनम् । तस्य सवनस्य सूयमानस्य सोमस्य तव

इन्द्रपीतस्य नराशꣳसपीतस्य॥१७
पितृपीतस्य मधुमत उपहूतस्योप-
हूतो भक्षयाम्यादित्यवद्गणस्य सो-
म देव ते मतिविदस्तृतीयस्य सव-
नस्य जगतीछन्दस इन्द्रपीतस्य न-
राशꣳसपीतस्य पितृपीतस्य मधु-

छन्दसः । इन्द्रपीतस्येतीन्द्र—पीतस्य । नराशꣳस-
पीतस्येति नराशꣳस—पीतस्य ॥१७॥ पितृपीत-
स्येति पितृ—पीतस्य । मधुमत इति मधु—मतः ।
उपहूतस्येत्युप—हूतस्य । उपहूत इत्युप—हूतः । भ-
क्षयामि । [7]आदित्यवद्गणस्येत्यादित्यवत्—गणस्य ।
सोम । देव । ते । मतिविद इति मति—विदः ।
तृतीयस्य । सवनस्य । जगतीछन्दस इति जगती—
छन्दसः । इन्द्रपीतस्येतीन्द्र—पीतस्य । नराशꣳस-
पीतस्येति नराशꣳस—पीतस्य । पितृपीतस्येति

भक्षयामीति । एवमेतादृशसोमसंबन्धात् प्रातस्सवनादयश्शब्दाः कर्मणि वर्तन्ते । गतमन्यत् ॥

[7]अथ तृतीयसवने—आदित्यवद्गणस्येति ॥ तृतीयस्य सवनस्य सूयमानस्य तव भक्षयामीति । एवं सोमविशेषणतया नी-

मत॒ उप॑हूत॒स्योप॑हूतो भक्षयामि ।
आ प्या॑यस्व॒ समे॑तु ते वि॒श्वत॑स्सो-
म॒ वृष्ण्॑यम् । भवा॒ वाज॑स्य संग॒-
थे । हिन्व॑ मे॒ गात्रा॑ हरिवो ग॒णा-
न्मे॒ मा वि ती॑तृषः । शि॒वो मे॑ सन्-

प्पि॒तृ॒–पी॒त॒स्य॒ । मधु॑मत॒ इति॒ मधु॑–म॒तः॒ । उप॑हू
त॒स्येत्युप॑–हू॒त॒स्य॒ । उप॑हूत॒ इत्युप॑–हू॒तः॒ । भ॒क्ष॒-
या॒मि॒ । [8]ए॑ति॑ । प्या॒य॒स्व॒ । समि॑ति॑ । ए॒तु॒ । ते॒
वि॒श्वत॑ः । सो॒म॒ । वृ॒ष्ण्॑यम् । भव॑ । वाज॑स्य
संग॒थ इति॑ सं–ग॒थे॒ । [9]हिन्व॑ । मे॒ । गात्रा॑ । ह॒रि॒
इति॑ हरि–वः॒ । ग॒णान् । मे॒ । मा । वीति॑ । तीतृ॒

तानि दश पदानि षष्ठ्यन्तानि । इतरथा इन्द्रपीतस्येत्याद्यघटमा स्यात् । वैयधिकरण्यं तु क्लिष्टमिति ॥

[8]चमसानाप्याययति—आ प्यायस्वेति गायत्र्चा ॥ हे सो आप्यायस्व वर्धस्व मा भक्षित इति क्षेष्ठाः, समेतु संगच्छ ते त्वाम् । कर्मणि षष्ठी । विश्वतः सर्वतः । वृष्णियं वीर्यम् वृष्णिसंभवं वृष्णियम्, दिगादित्वाद्यत्, 'यतोऽनावः' इत्याद्युदात्त त्वम् । वाजस्यान्नस्य संगथे संगमने अस्माकं भव तन्निमित्तं भव 'द्व्यचोतस्तिङः' इति संहितायां दीर्घत्वम् । गमेरौणादिकः स्थन् ॥

[9]भक्षयित्वा आत्मानमभिमृशति—हिन्वेति पथ्याबृहत्या ॥ तृर्त यस्य द्वादशाक्षरत्वात् । हे हरिवः हरितवर्ण । 'मतुवसोः

ऋषीनुप तिष्ठस्व मा मेऽवाङ्नाभिम-
ति ॥ १८ ॥ गाः । अपाम सोम-
ममृता अभूमादर्शम ज्योतिरविदा-

ष्टः । शिवः । मे । सप्तऋषीनिति सप्त—ऋषीन् ।
उपेति । तिष्ठस्व । मा । मे । अवाङ् । नाभिम् ।
अतीति ॥ १८ ॥ गाः । [10]अपाम । सोमम् । अ-
मृताः । अभूम । अदर्शम । ज्योतिः । अविदाम ।

इति रूत्वम् । मे मम गात्रा गात्राणि हिन्व प्रीणय । हिवि प्रीणने, इदित्वान्नुम् । मे मदीयान् गणान् पुत्रादीन् मा वितीतृषः वितृष्णान् मा कार्षीः पुनःपुनः पातून् कुरु । किंच—शिवो भूत्वा मे मदीयान् सप्त ऋषीन् अरिषितून् प्राणान् शीर्षण्यान् द्वेद्वे चक्षुषी श्रोत्रे नासिके एकमास्यमिति, तानुपतिष्ठस्व । ऋषि गतौ, औणादिक इनिप्रत्ययः । उपस्थानमुपेत्य तर्पणं तदर्थं मे मम नाभिमतीत्य अवाक् अधस्तात् मा गाः मा गमः । अवपूर्वादञ्चतेः क्विनि 'अनिगन्तोञ्चतौ' इति गतेः प्रकृतिस्वरत्वम् ॥

[10]आदित्यमुपतिष्ठते—अपामेति त्रिष्टुभा ॥ अपाम सोमम् । पिबतेर्लुङि 'गातिस्थ' इति सिचो लुक् । अमृता अमरणाः अभूम भविष्यामः । प्रत्यक्षविरोधात् व्यत्ययेन भविष्यति लुङ् । यद्वा—'आशंसायां भूतवच्च' इति भविष्यदर्थे लुङ् । अमृता भूयास्मेत्याशास्यते, तेनैव सिचो लुक् । 'नञो जरमरमित्र' इत्युत्तरपदान्तोदात्तत्वम् । अदर्शम द्रक्ष्यामः ज्योतिः द्योतमानं वस्तु स्व-

म देवान् । किमस्मान्कृणवदरातिः
किमु धूर्तिरमृत मर्त्यस्य । यन्म
आत्मनो मिन्दाऽभूदग्निस्तत्पुनराऽ-

देवान् । किम् । अस्मान् । कृणवत् । अरातिः ।
किम् । उ । धूर्तिः । अमृत । मर्त्यस्य । [11]यत् ।
मे । आत्मनः । मिन्दा । अभूत् । अग्निः । तत् ।
पुनः । एति । अहाः । जातवेदा इति जात-वे-

र्गं आदित्यं वा । छान्दसः सिचो लोपः । अविदाम ज्ञास्यामः देवान् । व्यत्ययेन च्लेरङ् । यद्वा—अविदाम लप्स्यामहे । लृदित्वाद्दङ् । अत्र प्रथमस्याख्यातस्यापादादित्वान्निघाताभावः । द्वितीयं निहन्यत एव । तृतीयं पादादित्वान्निहन्यते । चतुर्थं तु समानवाक्ये पदात्परत्वाभावान्न निहन्यते । एवममृतभूतानस्मान् अरातिः शत्रुः मृत्युर्वा किं कृणवत् किं कुर्यात् । कृवि हिंसाकरणयोः, इदित्वान्नुम्, 'धिन्विकृण्व्योरच' इत्युप्रत्ययः, लेटोडाटौ, इत्यडागमः । मर्त्यस्य मरणधर्मिणो मनुष्यस्य धूर्तिः हिंसा इदानीमस्मान् किमु किमेव कुर्यात् अमृतानस्मान् । विभक्तेर्लुक् छान्दसः, निघातश्च । यद्वा—अमृतेति सोम आमन्त्र्यते । तेन आमन्त्रितानामनुदात्तत्वं प्रवर्तते । धुर्वैः 'क्तिच्क्तौच' इति क्तिच् ॥

[11]आग्नीध्रे स्रुवाहुतिं जुहोति—यन्म आत्मन इति द्वाभ्याम्, प्रथमा त्रिष्टुप् जगती वा । 'तत्' इति प्रथमपादान्तः । त्रिपदा गायत्री । 'अग्निस्तत्पुनराहाः' इति द्वितीयः पादः । द्वि-

**हाजातवेदा विचर्षणिः । पुनर-
ग्निश्चक्षुरदात्पुनरिन्द्रो बृहस्पतिः।पु-
नर्मे अश्विना युवं चक्षुरा धत्तम-
दाः । विचर्षणिरिति वि–चर्षणिः । [12]पुनः ।
अग्निः । चक्षुः । अदात् । पुनः । इन्द्रः । बृहस्प-
तिः । पुनः । मे । अश्विना । युवम् । चक्षुः । ए-**

तीयाऽनुष्टुप् ॥ मे मम आत्मनः यत्किंचित् केन चिन्निमित्तेन प्रमादादिना मिन्दा मिन्दितं गळितं क्रान्तमभूत् । 'यद्वै यज्ञस्य न्यूनं क्रियते तच्छिद्रं तेन यज्ञः पराभवति यज्ञमनु यजमानो यजमानमनु प्रजाः पशवश्च' इति दर्शनात् । मिदि स्नेहने । 'गुरोश्च हलः' इत्यकारप्रत्ययः । यदिति सामान्यविवक्षया नपुंसकत्वम्, यथा—'एष वै यजमानः । यद्यूपः'* इति । अग्निः जातवेदाः जातानां वेदिता विचर्षणिः विशिष्टदर्शनः तत्पुनः आहाः आहरतु । छान्दसे लिङि सिचि वृद्धौ 'बहुलं छन्दसि' इतीडभावे हल्ङ्यादिसंयोगान्तलोपौ ॥

[12]अथ द्वितीया—पुनरिति ॥ पुनः मह्यं अग्निश्चक्षुरदात् ददातु । स एव लुङ्' 'गातिस्था' इति सिचो लुक् । इन्द्रश्च बृहस्पतिश्च पुनश्चक्षुरदादित्येव । बृहस्पतेस्सुडुदात्तत्वे उक्ते । हे अश्विना अश्विनौ युवं युवामपि पुनर्मे चक्षुर्दर्शनसामर्थ्यं अक्ष्योः अक्ष्णोः आधत्तं स्थापयतम् । 'ई द्विवचने' इतीकारः, स चोदात्तः, तेन 'उदात्तयणः' इति विभक्तेरुदात्तत्वम् ॥

---

*ब्रा. १-३-७.

क्ष्योः । इष्टयंजुषस्ते देव सोम स्तु-
तस्तोमस्य ॥ १९ ॥ शस्तोक्थस्य
हरिवत इन्द्रपीतस्य मधुमत उपहू-
तस्योपहूतो भक्षयामि । आपूर्या-
स्था मा पूरयत प्रजया च धनेन
ति । धत्तम् । अक्ष्योः । [13]इष्टयंजुष इतीष्ट–यजुषः । ते । देव । सोम । स्तुतस्तोमस्येति स्तुत–स्तोम-स्य ॥ १९ ॥ शस्तोक्थस्येति शस्त–उक्थस्य । हरिवत इति हरि–वतः । इन्द्रपीतस्येतीन्द्र–पीतस्य । मधुमत इति मधु–मतः । उपहूतस्येत्युप–हूतस्य । उपहूत इत्युप–हूतः । भक्षयामि । [14]आपूर्या इत्या–पूर्याः । स्थ । एति । मा । पूरयत । प्रजये-

[13]अथ हारियोजने धानानां भक्षणमन्त्रः—इष्टयजुष इत्यादि यजुः ॥ हे देव सोम ते तव त्वां भक्षयामि । पूर्ववत्कर्मणि षष्ठी कीदृशस्य? इष्टयजुषः । इष्टमेभिरिति छान्दसः करणे क्तः । इष्टानि यजूंषि यस्य । स्तुतस्तोमस्य स्तुताः स्तोमाः यस्य । शस्तोक्थस्य शस्तानि शस्त्राणि यस्य तादृशस्य, हरिवत इत्यादि । गतम्* ॥

[14]धाना निर्णिज्योत्त†रवेद्यां सन्निवपति—आपूर्या इति द्विपदया गायत्र्या ॥ आपूर्याः आपूर्णा एव यूयं स्थ । भक्षणेन न क्षयः कश्चिदस्माभिः कृतः । कर्तरि कृत्यः । यद्वा—करणे । आपूर्याः स्थ । तस्मान्मामापूरयत प्रजया च धनेन च ॥

*सं. ३-२-५.[5] †ग–धानादीनि हवींष्युत्त.

च । एतत्ते तत् ये च त्वामन्वेतत्ते
पितामह प्रपितामह ये च त्वामन्वत्र
पितरो यथाभागं मन्दध्वं नमो वः
पितरो रसाय नमो वः पितरः शुष्मा-
य प्र-जया । च । धनेन । च । [15]एतत् । ते ।
तत् । ये । च । त्वाम् । अन्विति । [16–17]एतत् ।
ते । पितामह । प्रपितामहेति प्र-पितामह । ये ।
च । त्वाम् । अन्विति । अत्र । पितरः । यथा-
भागमिति यथा-भागम् । मन्दध्वम् । [18]नमः । वः ।
पितरः । रसाय । नमः । वः । पितरः । शुष्माय ।

[15–17]तिस्रो धाना ददाति—एतत्ते ततेति ॥ 'सोमाय पितृमते'* इत्यत्रैतद्व्याख्यातम् । हे तत तात एतदशनं तव ये चान्ये त्वामनुगताः । एतत्ते पितामह, ये च त्वामनुगताः । एतत्ते प्रपितामह, ये च त्वामनुगताः । इदानीं सामान्येनोच्यते—हे पितरः पितामहाः प्रपितामहाः अत्र यथाभागं मन्दध्वं तृप्यतेति ॥

[18]षड्भिर्नमस्कारैरुपतिष्ठते—नमो व इति ॥ हे पितरः युष्मभ्यं नमः नमस्करोमि रसाय रसार्थं रसवान् भूयासमिति । 'पितरो नमो वः' इत्यादिकं षट्वृप्यनुषज्यते । शुष्मो बलम् । जीवः प्राणः । स्वधा अन्नम् । मन्युर्दीप्तिः, क्रोधो वा । घोरः क्रूरम् । एतयोः स्थाने प्राधान्यं प्रार्थ्यते । हे पितरः युष्मभ्यं

*सं. १-८-५.[2]

ष्मा॑य॒ नमो॑ वः पितरो जी॒वाय॒ नमो॑
वः पितरः ॥ २० ॥ स्व॒धायै॒ नमो॑
वः पितरो म॒न्यवे॒ नमो॑ वः पितरो
घो॒राय॒ पित॑रो॒ नमो॑ वो॒ य एतस्मि॑न्-
लो॒के स्थ यु॒ष्मा॒स्ते॒ऽनु॒ ये॑ऽस्मि॑न्-
लो॒के मां ते॒ऽनु॒ य एत॒स्मि॑न्लो॒के स्थ

नम॑ः । व॒ः । पि॒त॒रः॒ । जी॒वाय॑ । नम॑ः । व॒ः । पि॒-
त॒रः॒ ॥ २० ॥ स्व॒धाया॒ इति॑ स्व॒–धायै॑ । नम॑ः ।
व॒ः । पि॒त॒रः॒ । म॒न्यवे॑ । नम॑ः । व॒ः । पि॒त॒रः॒ ।
घो॒राय॑ । पित॑रः । नम॑ः । व॒ः । ये । एत॒स्मि॒न्न् ।
लो॒के । स्थ । यु॒ष्मान् । ते । अ॒नु॒ । इति॑ । ये । अ॒-
स्मि॒न्न् । लो॒के । माम् । ते । अ॒नु॒ । इति॑ । ये । एत-
स्मि॒न्न् । लो॒के । स्थ । यू॒यम् । तेषा॑म् । वसि॑ष्ठाः ।

नमः । फलमनपेक्ष्य सप्तमोयं नमस्कारः क्रियते । पुनर्वचनं फलनिरपेक्षया नमस्कारार्थम् । अन्य आहुः—पितृसंबन्धिभ्यो रसादिभ्यः प्रथमं षण्णमस्काराः, ततः पितृभ्य एव सप्तम इति । ये एतस्मिन् लोके पितरः स्थ । एतस्मिन्निति पितृलोकं व्यपदिशति । स्थेति सर्वपित्रभिप्रायेणोक्तम् । ते सर्वे युष्माननुसन्तु युष्मत्प्रधाना भवन्तु । 'हीने' इत्यनोः कर्मप्रवचनीयत्वम् । युष्मानिति पित्रादित्रयं व्यपदिशति । अस्मिन् मनुष्यलोके मनुष्याः स्थ, ते सर्वे मामनु सन्तु मत्प्रधाना भवन्तु । ये यूयमेतस्मिन्

यूयं तेषां वसिष्ठा भूयास्त येऽस्मिन्लोकेऽहं तेषां वसिष्ठो भूयासं प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ॥२१॥ यत्कामास्ते जुहुमस्तन्नोऽस्तु वयꣳस्याम पतयो

भूयास्त । ये । अस्मिन् । लोके । अहम् । तेषाम् । वसिष्ठः । भूयासम् । [19]प्रजापत इति प्रजा-पते । न । त्वत् । एतानि । अन्यः । विश्वा । जातानि । परीति । ता । बभूव ॥ २१ ॥ यत्कामा इति यत्-कामाः । ते । जुहुमः । तत् । नः । अस्तु । वयम् ।

लोके स्थ तेषां पितृणां यूयं वसिष्ठाः वसुमत्तमा भूयास्त । येऽस्मिन् लोके सन्ति मनुष्यास्तेषां मनुष्याणामहं वसिष्ठो वसुमत्तमो भूयासम् । वसुशब्दादिष्ठनि 'विन्मतोर्लुक्' इति लुक्, 'टेः' इति टिलोपः ॥

[19]प्राजापत्यया त्रैष्टुभा गार्हपत्यमुपतिष्ठते—प्रजापत इति ॥ व्याख्याता चेयं 'सोमस्य त्विषिरसि'* इत्यत्र । हे प्रजापते तान्येतानि विश्वानि जातानि भूतानि त्वत्तोन्यः कश्चिदपि परिभवति निजेन महिम्ना व्याप्नोति । यत्कामास्ते जुहुमो वयं तदस्माकमस्तु । किं च—वयं रयीणां पतयः स्याम भूयास्मेति ॥

---

*सं. १-८-१४[10].

र्यीणाम् । देवकृतस्यैनसोवय-
जनमसि मनुष्यकृतस्यैनसोवयज-
नमसि पितृकृतस्यैनसोवयजनम-
स्यप्सु धौतस्य सोम देव ते नृभिस्सु-
तस्येष्टयजुषस्स्तुतस्तोमस्य शस्तो-

स्याम । पतयः । रयीणाम् । [20]देवकृतस्येति देव-
कृतस्य । एनसः । अवयजनमित्यव-यजनम् ।
असि । [21]मनुष्यकृतस्येति मनुष्य-कृतस्य । एन-
सः । अवयजनमित्यव-यजनम् । असि । [22]पितृ-
कृतस्येति पितृ-कृतस्य । एनसः । अवयजनमि-
त्यव-यजनम् । असि । [23]अप्स्वित्यप्-सु । धौत-
स्य । सोम । देव । ते । नृभिरिति नृ-भिः । सु-
तस्य । इष्टयजुष इतीष्ट-यजुषः । स्तुतस्तोमस्ये-

[20–22]शकलैश्चरन्ति—देवकृतस्येति ॥ देवादिविषये यदस्माभिः कृतमेनः अधर्मः तस्यावयजनं नाशनं असि । 'क्षेपे' इति सप्तम्यास्समासः, सप्तमीपूर्वपदप्रकृतिस्वरत्वम् । यद्वा—देवादिभिरस्मद्विषये यत्कृतमेनःफलं दुःखं तस्यावयजनमसि । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् । एतेनोभे व्याख्याते ॥

[23]अथावभृथभक्षमन्त्रः—अप्सु धौतस्येत्यादि ॥ अप्सु धौतस्य प्रक्षालितस्य नृभिः मनुष्यैः चेतनैः अभिषुतस्य । इष्टयजुष

क्थस्य यो भक्षो अश्वसनिर्यो गो-
सनिस्तस्य ते पितृभिर्भक्षंकृतस्यो-
पहूतस्योपहूतो भक्षयामि ॥ २२ ॥

ति स्तुत-स्तोमस्य । शस्तोक्थस्येति शस्त-उक्थ-
स्य । यः । भक्षः । अश्वसनिरित्यश्व-सनिः । यः ।
गोसनिरिति गो-सनिः । तस्य । ते । पितृभिरिति
पितृ-भिः । भक्षंकृतस्येति भक्षं-कृतस्य । उपहू-
तस्येत्युप-हूतस्य । उपहूत इत्युप-हूतः । भक्ष-
यामि ॥ २२ ॥

विश्वचर्षणे त्रिष्टुप्छन्दस इन्द्रपीतस्य नराश-
संपीतस्यादि स्तुतस्तोमस्य जीवाय नमो वः पि-
तरो बभूव चतुश्चत्वारिंशच्च ॥ ५ ॥

इत्यादि । व्याख्यातम्* । हे सोम देव तवेदृशस्य यो भक्षः भक्षणं अश्वसनिः अश्वानां संभक्ता । यो गोसनिः गवां संभक्ता । 'छन्दसि वनसन' इतीन्प्रत्ययः । तस्य ते तव पितृभिः भक्षंकृतस्य । 'च्वौ' इतीत्वापवादः पूर्वपदस्य छान्दसो मुमागमः-'ऊर्यादिच्विडाचश्च' इति गतित्वात् 'गतिरन्तरः' इति तस्य प्र, कृतिस्वरत्वम् । उपहूतस्येत्यादि । गतम्† ॥

इति तृतीये द्वितीये पञ्चमोनुवाकः.

---

*सं. ३-२-५[13].

†सं. ३-२-५[5].

महीनां पयोऽसि विश्वेषां देवानां तनू-
रृ ऋध्यासमद्य पृषतीनां ग्रहं पृषती-
नां ग्रहोऽसि विष्णोर् हृदयमस्येकमि-

[1]महीनाम् । पयः । असि । विश्वेषाम् । देवा-
नाम् । तनूः । ऋध्यासम् । अद्य । पृषतीनाम् ।
ग्रहम् । पृषतीनाम् । ग्रहः । असि । [2]विष्णोः ।
हृदयम् । असि । एकम् । इष । विष्णुः । त्वा ।

---

[1]घृषदाज्यं गृह्णाति—महीनामिति ॥ महीनां महनीयानां गवां पयोसि विश्वेषां देवानां तनूः शरीरं; तत्स्थितिहेतुत्वात् । अ-द्येदानीं ऋध्यासं वर्धयामि त्वाम् । ऋध्नोतेः ण्यन्ताद्याशिषि लि-ङ् । 'बहुलमन्यत्रापि' इति णिलुक् । पृषतीनां ग्रहं मरुताम-श्वाः पृषत्यः । शतृवद्भावात् ङीप् । तासां गृहस्थानीयं त्वाम् । पृषतीनां ग्रहोसि; ग्राहकोसि प्रियतरत्वात् । यद्वा—पृषतीशब्देन मरुत-स्त्वोपात् [रुतां स्वा ये] तद्वन्तो मरुत उच्यन्ते । मरुतां स्वभतो ग्रहस्त्वमसीति ॥

[2]विष्णोरिति विराडायत्री जागतगायत्री वा 'इष' इति प्रथम-पादान्तः ॥ विष्णोः यज्ञात्मनः हृदयमिव प्रियोसि । कुत इत्या-ह—हे इष अन्नवत् । इषुशब्दात् अर्शआदिलक्षणोच्प्रत्ययः । एकं प्रधानं त्वामनु त्वया हेतुना विष्णुर्भगवान् त्रैलोक्यं विच-क्रमे । 'अनुर्लक्षणे' इति कर्मप्रवचनीयत्वम् ॥

ष्ठ विष्णुस्त्वाऽनु विचक्रमे भूतिर्दध्ना घृतेन वर्धतां तस्य मेष्टस्य वीतस्य द्रविणमा गम्याज्ज्योतिरसि वैश्वानरं पृश्नियै दुग्धं यावती द्यावापृ-

अनु । वीतिं । चक्रमे । [3]भूतिः । दध्ना । घृतेन । वर्धताम् । तस्य । मा । इष्टस्य । वीतस्य । द्रविणम् । एति । गम्यात् । [4]ज्योतिः । असि । वैश्वानरम् । पृश्नियै । दुग्धम् । [5]यावती इति । द्यावा-

---

[3]तस्य स्कन्नस्य स्वधासंभरणमन्त्रः—भूतिरिति । इयमपि विराड्गायत्री द्विपदान्ता ॥ भूतिः तवैश्वर्यं दध्ना घृतेन वर्धताम् । तस्य तादृशस्य उद्भूतैश्वर्यस्य इष्टस्य देवानां प्रियस्य देवेभ्यो हुतस्य वीतस्य भक्षितस्य च यद्द्रविणं फलं तन्मां आगम्यात् आगच्छतु वृथा स्कन्नं मा भूदिति ॥

[4]दधिघर्ममवेक्षते—ज्योतिरिति ॥ अग्निस्त्वमसि; प्रवर्ग्यभक्तित्वात् वैश्वानरं विश्वेषां नराणां हितत्वेन स्वामित्वेन वा सम्बन्धी वैश्वानरः आदित्यः तस्य स्वभूतमसि । अभेदेनोच्यते । पृश्नियै पृश्नेः गोर्दुग्धं पयः । षष्ठ्यर्थे चतुर्थी ॥

[5]अथ तस्य ग्रहणमन्त्रः—यावती इति चतुष्पदा बृहती ॥ यावती यावत्यौ यत्प्रमाणे यत्प्रमाणकाले वा द्यावापृथिवी द्यावापृथिव्यौ । उभयत्रापि 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम्,

द्यावा पृथिवी महित्वा यावच्च सप्त सिन्धवो वि तस्थुः । तावन्तमिन्द्र ते ॥ २३ ॥
अहꣳ सहोर्जा गृह्णाम्यस्तृतम् । यत्कृष्णशकुनः पृषदाज्यमवमृशेच्छूद्रा अस्य प्रमायुकास्स्युर्यच्छ्वाऽवमृ-

पृथिवी इति द्यावा—पृथिवी । महित्वेति महि—त्वा । यावत् । च । सप्त । सिन्धवः । वितस्थुरिति वि—तस्थुः । तावन्तम् । इन्द्र । ते ॥ २३ ॥ अहम् । सह । ऊर्जा । गृह्णामि । अस्तृतम् । [6]यत् । कृष्णशकुन इति कृष्ण—शकुनः । पृषदाज्यमिति पृषत्—आज्यम् । अवमृशेदित्यव—मृशेत् । शूद्राः । अस्य । प्रमायुका इति प्र—मायुकाः । स्युः । यत् । श्वा । अवमृशेदित्यव—मृशेत् । चतुष्पाद इति च-

---

'देवताद्वन्द्वे च' इति द्यावापृथिवीशब्द आद्युदात्तः । महित्वा महत्त्वेन । तृतीयाया आजादेशः । यावच्च यावत्कालं सप्त सिन्धवः समुद्राः वितस्थुः विभक्ताः स्थास्यन्ति । छान्दसो वा लिट्, आत्मनेपदाभावश्च । तावन्तं तावत्प्रमाणं तावत्कालस्थायिनं तावत्कालस्थितिहेतुं वा लोकानाम्, हे इन्द्र तव अहं एतं अस्तृतं अहिंसितं ऊर्जा अन्नेन सह गृह्णामि । स्तृ इति ह्रस्वान्तं धात्वन्तरं, स्तृणातेर्वा ह्रस्वत्वम् ॥

[6]अथ विकृतपृषदाज्यब्राह्मणं—यत्कृष्णशकुन इत्यादि ॥ कृष्ण-

शेच्चतुष्पादोस्य पशवः प्रमायुका-
स्स्युर्यत्स्कन्देद्यजमानः प्रमायुक-
स्स्यात्पशवो वै पृषदाज्यं पशवो
वा एतस्यं स्कन्दन्ति यस्यं पृषदा-
ज्यꣳ स्कन्दति यत्पृषदाज्यं पुनर्गृ-
ह्णाति पशूनेवास्मै पुनर्गृह्णाति प्राणो
वै पृषदाज्यं प्राणो वै ॥ २४ ॥ ए-

तुः—पादः । अस्य । पशवः । प्रमायुका इति प्र—मायुकाः । स्युः । यत् । स्कन्देत् । यजमानः । प्रमायुक इति प्र—मायुकः । स्यात् । पशवः । वै । पृषदाज्यमिति पृषत्—आज्यम् । पशवः । वै । एतस्य । स्कन्दन्ति । यस्य । पृषदाज्यमिति पृषत्—आज्यम् । स्कन्दति । यत् । पृषदाज्यमिति पृषत्—आज्यम् । पुनः । गृह्णाति । पशून् । एव । अस्मै । पुनः । गृह्णाति । प्राण इति प्र—अनः । वै । पृषदाज्यमिति पृषत्—आज्यम् । प्राण इति प्र—अनः । वै ॥ २४ ॥ एतस्य । स्कन्दति । यस्य । पृषदा-

---

वर्णशकुनः पक्षी कृष्णशकुनः । पृषद्वर्णमाज्यं पृषदाज्यं पृषद्बिन्दुवन्नानावर्णम् । अवमर्शनं पद्भ्यां स्पर्शनम् । अस्य यजमानस्य शूद्राः

तस्यं स्कन्दति यस्यं पृषदाज्यꣳ
स्कन्दति यत्पृषदाज्यं पुनर्गृह्णाति
प्राणमेवास्मै पुनर्गृह्णाति हिरण्यम-
वधायं गृह्णात्यमृतं वै हिरण्यं प्राणः
पृषदाज्यममृतमेवास्यं प्राणे दधाति
शतमानं भवति शतायुः पुरुषश्श-

ज्यमिति पृषत्-आज्यम् । स्कन्दति । यत् । पृ-
षदाज्यमिति पृषत्-आज्यम् । पुनः । गृह्णाति ।
प्राणमिति प्र-अनम् । एव । अस्मै । पुनः । गृह्णा-
ति । हिरण्यम् । अवधायेत्यव-धायं । गृह्णाति ।
अमृतम् । वै । हिरण्यम् । प्राण इति प्र-अनः ।
पृषदाज्यमिति पृषत्-आज्यम् । अमृतम् । एव ।
अस्य । प्राण इति प्र-अने । दधाति । शतमान-
मिति शत-मानम् । भवति । शतायुरिति शत-

प्रमाणशीलाः मरणशीलाः म्रियतेश्छान्दस उकञ् । पशवो वै पृषदाज्यमिति । तद्धेतुत्वात्तच्छब्दचम् । यथोक्तेन पुनर्ग्रहणेन स्क-न्नस्योपलक्षणत्वात्सर्वमेध्यत्वनिवृत्तिः । प्राणो वै पृषदाज्यमिति । पूर्ववत्तच्छब्दचम् ॥

हिरण्यमिति ॥ एतां स्रुचमप्सु प्रवेश्य अन्यस्यां स्रुचि हि-रण्यमवधाय तत्पृषदाज्यं गृह्णाति । नित्यग्रहणमिति कैश्चित् ।

तेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठ-
त्यश्वमव घापयति प्राजापत्यो वा
अश्वः प्राजापत्यः प्राणस्वादेवास्मै
योनेः प्राणं निर्मिमीते वि वा ए-

आयुः । पुरुषः । शतेन्द्रिय इति शत–इन्द्रियः । आयुषि । एव । इन्द्रिये । प्रतीति । तिष्ठति । [8]अश्वम् । अवेति । घापयति । प्राजापत्य इति प्राजा–पत्यः । वै । अश्वः । प्राजापत्य इति प्राजा–पत्यः । प्राण इति प्र–अनः । स्वात् । एव । अस्मै । योनेः । प्राणमिति प्र–अनम् । निरिति । मिमीते । [9]वीति । वै । एतस्य । यज्ञः । छियते ।

शतमानमिति शतं मानमस्येति ॥ शतायुः शतसंवत्सरमायुः । शतेन्द्रियः शतवीर्यः । शतत्वसंख्यायोगादायुरिन्द्रियलाभः ॥

[8]अश्वमिति ॥ अपोद्धृत्य हिरण्यमश्वमवघापयति । अश्वप्राणयोः प्राजापत्यत्वादन्यतरस्यान्वये इदमभिसन्धापयतीति प्राणसिद्धिः ॥

[9]वैष्णव्यर्चेति ॥ 'विष्णो त्वं नो अन्तमः'* इत्येतामृचमनुवर्तयन् गृह्णाति घृषदाज्यं विच्छिन्नं यज्ञं यज्ञात्मना विष्णुना सन्तनोति संहितं करोति । वैष्णव्येत्युदात्तनिवृत्तिस्वरेण ङीप् उदा-

*सं. ३-१-१०.

तस्यं यज्ञश्छिद्यते यस्यं पृषदाज्यꣳ
स्कन्दति वैष्णव्यर्चा पुनर्गृह्णाति य-
ज्ञो वै विष्णुर्यज्ञेनैव यज्ञꣳ सं त-
नोति ॥ २५ ॥

देवं सवितरेतत्ते प्राह तत्प्र च सुव
यस्यं । पृषदाज्यमिति पृषत्—आज्यम् । स्कन्दति। वैष्णव्या । ऋचा । पुनः । गृह्णाति । यज्ञः । वै । विष्णुः । यज्ञेन । एव । यज्ञम् । समिति । तनोति ॥ २५ ॥

ते पृषदाज्यं प्राणो वै योनेः प्राणं
द्वाविꣳशतिश्च ॥ ६ ॥

[1]देवं । सवितः । एतत् । ते । प्रेति । आह । तत् । प्रेति । च । सुव । प्रेति । च । यज । बृहस्प-

---

त्तत्वं, 'उदात्तयणः' इति तृतीयाया उदात्तत्वम्, 'स्वरितो वाऽनुदात्ते पदादौ' इति संहितायामेकादेशस्स्वर्यते । 'सावेकाचः' इति ऋचस्तृतीयाया उदात्तत्वम् ॥

इति तृतीये द्वितीये षष्ठोनुवाकः.

---

[1]यत्र हि 'ब्रह्मन् स्तोष्यामः प्रशास्तः' इति, तद्ब्रह्मा प्रसौति—देव सवितरिति ॥ हे देव सवितः एतत्तवायं प्राह

प्र च॑ यज बृहस्पतिर्ब्रह्माऽऽयुष्मत्या
ऋचो मा गा॑त तनूपात्साम्नस्स॒त्या
व॑ आशिषस्सन्तु स॒त्या आकू॑तय

तिः । ब्रह्मा । आयुष्मत्याः । ऋचः । मा । गात । तनूपादितिं तनू–पात् । साम्नः । सत्याः । वः । आशिष इत्या–शिषः । सन्तु । सत्याः । आकूतय इत्या–कूतयः । ऋतम् । च । सत्यम् । च । वद-

ब्रवीति स्तोष्याम इति । तत्प्रसुव च अनुजानीहि । प्रयज च प्रकर्षेण यागं निर्वर्तय च । 'च वा योगे प्रथमा' इति तिङ्विभक्तिर्न निहन्यते । हे उद्गातारः बृहस्पतिरेवाहं ब्रह्मा, न मनुष्यमात्रः, सोहं वो ब्रवीमि । आयुष्मत्या अविनष्टया ऋचा* योनिभूतया मा गात मा अपगमत । कीदृश्या? तनूपात्साम्नः साम्नो गीतेश्शरीरं रक्षन्त्या ऋचा हि साम्नः शरीरं रक्ष्यते । छान्दसो लिङ्व्यत्ययः । यद्वा—ऋचस्तनुं पालयतस्साम्नश्च मा गात तस्या ऋचश्शरीरमवलम्बमानादित्यर्थः । सत्या अवितथाः युष्माकमाशिषः प्रार्थनास्सन्तु । आकूतयस्संकल्पाश्च सत्या यथासंकल्पसमाप्तयः सन्त्वित्येव । ऋतं च वदत । मानसं तथ्यमृतम् । यथा मनसाऽभिसंहितं तथा वदत । सत्यं च वदत । वाचिकं सत्यं तथ्यम् । यथा वाचा प्रतिज्ञातं तथा वदत । स्तुत गीत्या स्तुतिं निर्वर्तयतः देवस्य सवितुः प्रसवे अनुज्ञां लब्ध्वा स्तुतिं कुरुत । अत्र प्रातस्सवने—'भूरिन्द्रवन्तः स्तुत' इति विशेषमाहुः । 'भुव इन्द्र-

*अ–अविनष्टाया ऋचो.

ऋतं च सत्यं च वदत स्तुत देवस्य
सवितुः प्रसवे स्तुतस्य स्तुतमस्यूर्जं
मह्यꣳ स्तुतं दुहामा मा स्तुतस्य
स्तुतं गम्याच्छस्त्रस्य शस्त्रम् ॥२६॥
अस्यूर्जं मह्यꣳ शस्त्रं दुहामा मा

त् । स्तुत । देवस्य । सवितुः । प्रसव इति प्र—सवे । [2]स्तुतस्य । स्तुतम् । असि । ऊर्जम् । मह्यम् । स्तुतम् । दुहाम् । एति । मा । स्तुतस्य । स्तुतम् । गम्यात् । [3]शस्त्रस्य । शस्त्रम् ॥ २६ ॥ असि । ऊर्जम् । मह्यम् । शस्त्रम् । दुहाम् । एति । मा ।

वन्तस्स्तुत' इति माध्यन्दिने । 'सुवरिन्द्रवन्तस्स्तुत' इति तृतीयसवने ॥

[2]अथ स्तुते स्तुतस्य दोहं वाचयति—स्तुतस्य स्तुतमसीति ॥ स्तुतस्य यज्ञस्य स्तुतं फलं त्वमसीति हे स्तोत्र त्वदधीनत्वात्तस्य । यद्वा—स्तुतस्यापि स्तुतं त्वमसि स्तोत्रस्यापि स्तोत्रमसि त्वत्तुल्यं स्तोत्रं नास्तीति । यथा—ब्राह्मणानामपि त्वं ब्राह्मण इति । स्तुतस्येति जातावेकवचनम् । तादृशं त्वां स्तुतं यथोक्तस्तुतरूपं मह्यं मदर्थं ऊर्जमन्नं दुहां दुहे । लेट्यामागमः, विकरणव्यत्ययेन शः । ततश्च स्तुतस्य स्तुतं यथोक्तं स्तुतिफलरूपं वा विशिष्टस्तोत्ररूपं मामागम्यात् आगच्छतु ॥

[3]अथ शस्त्रे शस्त्रस्य दोहं वाचयति—शस्त्रस्येति ॥ शस्त्रस्य

शस्त्रस्य शस्त्रं गम्यादिन्द्रियावन्तो
वनामहे धुक्षीमहि प्रजामिषम्। सा
मे सत्याऽऽशीर्देवेषु भूयाद्ब्रह्मवर्चसं

शस्त्रस्य। शस्त्रम्। गम्यात्। [1]इन्द्रियावन्त इतीन्द्रिय-वन्तः। वनामहे। धुक्षीमहि। प्रजामितिं प्र-जाम्। इषम्। सा। मे। सत्या। आशीरित्या-शीः। देवेषु। भूयात्। ब्रह्मवर्चसमितिं ब्रह्म-

---

शंसनफलं त्वमसि, शस्त्राणामपि वा शस्त्रमसि। तादृशशस्त्ररूपं त्वां ऊर्जं दुहे। ततो मां यथोक्तं शस्त्रमागच्छतु। अत्र ष्टुञ् स्तुतौ, शंस स्तुतौ, इत्यर्थाविशेषेऽपि गीतिविशिष्टं स्तोत्रं, ऋक्समुदायमात्रं शस्त्रमित्यवगन्तव्यम्॥

[4]एतयोरुभयोरभ्यासं वाचयति—इन्द्रियावन्त इति। इयं पथ्याबृहती 'तृतीयश्चेद्बृहदशाक्षरः पथ्या' इति। द्व्यक्षरोनत्वाद्विराट्॥ इन्द्रियावन्त इन्द्रियैरविकलैस्तद्वन्तः। 'मन्त्रे सोमाश्व' इति दीर्घत्वम्। त्वामेव वनामहे भजामहे सर्वकालम्। ते धुक्षीमहि दोहामहे त्वाम्। किम्? प्रजां पुत्रादिकां इषमन्नं तस्याश्च जीवनम्। किं च—देवेषु मे या आशीः प्रार्थना यजामी*ति सा सत्या अवितथा भूयात् पुनःपुनः यज्ञ उत्पद्यतां [illegible] प्रवर्ततामिति। अवितथं च ब्रह्मवर्चसमागम्यात् आ[illegible]गच्छतु। यियक्षा वर्तिष्यते इति॥

---

*अ [illegible]यजाता इ.

माऽऽ गंम्यात् । यज्ञो बंभूव स आ
बंभूव स प्र जंज्ञे स वांवृधे । स दे-
वानामधिपतिर्बभूव सो अस्माꣳ
अधिपतीन्करोतु वयꣳ स्यांम पतं-
यो रयीणाम् । यज्ञो वावै ॥ २७ ॥
यज्ञपतिं दुहे यज्ञपतिर्वा यज्ञं दुंहे स

वर्चसम् । मा । एतं । गम्यात् । [5]यज्ञः । बभूव । सः । एतं । बभूव । सः । प्रेतं । जज्ञे । सः । वावृधे । सः । देवानाम् । अधिपतिरित्यधि–पतिः । बभूव । सः । अस्मान् । अधिपतीनित्यधि–पतीन् । करोतु । वयम् । स्याम । पतयः । रयीणाम् । [6]यज्ञः । वा । वै ॥ २७ ॥ यज्ञपतिमिति यज्ञ–प-तिम् । दुहे । यज्ञपतिरिति यज्ञ–पतिः । वा । य-

[5]यज्ञस्य पुनरालम्भं जपति—यज्ञो बभूवेति ॥ इयं जगती पञ्चविधा । व्याख्याता चेयम् 'अगन्म सुवः'* इत्यत्र । यज्ञस्सम्पद्यतां, स विश्वमभिभवतु, स प्रजनयतु स प्रजास्संवर्धताम्, स देवानामधिकं पालयिता भूयात् । वयं च रयीणां धनानां स्वामिनः स्यामेति ॥

[6]अथ स्तुतशस्त्रयोर्दोहस्य ब्राह्मणं—यज्ञो वा वा इत्यादि ॥ यद्वयमत्र भवति यज्ञो वा यज्ञपतिं दुहे, यज्ञपतिर्वा यज्ञं दुहे

*सं. १-६-६[14].

यस्स्तुतशस्त्रयोर्दोहमविद्वान् यजते
तं यज्ञो दुहे स इष्ट्वा पापीयान्भवति य
एनयोर्दोहं विद्वान् यजते स यज्ञं दु-
हे स इष्ट्वा वसीयान्भवति स्तुतस्य
स्तुतमस्यूर्ज मह्यꣳ स्तुतं दुहामा मा

ज्ञम् । दुहे । सः । यः । स्तुतशस्त्रयोरिति स्तुत-
शस्त्रयोः । दोहम् । अविद्वात् । यजते । तम् । य-
ज्ञः । दुहे । सः । इष्ट्वा । पापीयान् । भवति ।
[7]यः । एनयोः । दोहम् । विद्वान् । यजते । सः ।
यज्ञम् । दुहे । सः । इष्ट्वा । वसीयान् । भवति ।
स्तुतस्य । स्तुतम् । असि । ऊर्जम् । मह्यम् ।
स्तुतम् । दुहाम् । एति । मा । स्तुतस्य । स्तुतम् ।

इति । 'लोपस्त आत्मनेपदेषु' इति तलोपः । 'वै वा वेति च छन्दसि' इति प्रथमा तिङ्भिक्तिर्न निहन्यते । कस्तयोः प्रथम इत्याह—स इत्यादि । गतम् । यज्ञो दुह इति । तं रेचयति । यथा गौर्दुह्यमाना क्षीरशून्या भवति, एवमयं यज्ञेन दुह्यमानो रिक्तात्मा भवेत्, ततस्स इष्ट्वा पापीयान् भवति । अत्र दुह प्रपूरणे इति प्रशब्दः पूरणप्रतिपक्षमाह यथा प्रस्मरणं प्रस्थानमिति, एवं प्रपूरणं रेचनमिति जानीयात् ॥

[7]य एनयोरित्यादि ॥ यज्ञोनेन दुह्यमानः पुनःपुनरुपचीय-

स्तुतस्य स्तुतं गम्याच्छस्त्रस्य शस्त्रम-
स्यूर्जं मह्य शस्त्रं दुहामा मा शस्त्रस्य
शस्त्रं गम्यादित्याहैष वै स्तुतशस्त्र-
योर्दोहस्तं य एवं विद्वान् यजते दुह
एव यज्ञमिष्ट्वा वसीयान्भवति ॥२८॥

गम्यात् । शस्त्रस्य । शस्त्रम् । असि । ऊर्जम् । मह्यम् । शस्त्रम् । दुहाम् । एति । मा । शस्त्रस्य । शस्त्रम् । गम्यात् । इति । आह । एषः । वै । स्तुतशस्त्रयोरिति स्तुत-शस्त्रयोः । दोहः । तम् । यः । एवम् । विद्वान् । यजते । दुहे । एव । यज्ञम् । इष्ट्वा । वसीयान् । भवति ॥ २८ ॥

शस्त्रं वै शस्त्रं दुहां द्वाविꣳशतिश्च ॥७॥

मानः सदा गौरिव दोग्धुरस्योपकरोति । ततश्च स इष्ट्वा यज्ञवान् भूत्वा वसीयान् वसुमत्तरो भवति 'विन्मतोर्लुक्' इति लुक्, 'टेः' इति टिलोपः । कः पुनरेतयोः दोह इत्याह—स्तुतस्येत्यादि । गतम्* । दोहमजानन्तं गोकल्पं यज्ञो दुग्धे । दोहवितु यज्ञमेव गोस्थानीयं सर्वाण्यभिमतानि दुग्धे । इत्थं यज्ञवांश्च भूत्वा वसीयान् भवति गोमानिव समृद्धो भवतीत्यर्थः ॥

इति तृतीये द्वितीये सप्तमोनुवाकः.

---

*सं. ३-२-७१—१,

श्येनाय॒ पत्वने॒ स्वाहा॒ वट्स्व॒यम॑-
भिगू॒र्ताय॒ नमो॑ विष्ट॒म्भाय॒ धर्म॑णे॒
स्वाहा॒ वट्स्व॒यम॑भिगू॒र्ताय॒ नम॑ः
परि॒धये॑ जन॒प्रथ॑नाय॒ स्वाहा॒ वट्-

[1]श्येनाय॑ । पत्वने॑ । स्वाहा॑ । वट् । स्व॒यम॑भिगू॒र्तायेति॑ स्व॒यं–अ॒भि॒गू॒र्ताय॒ । नम॑ः । [2]वि॒ष्ट॒म्भायेति॑ वि–स्त॒म्भाय॑ । धर्म॑णे । स्वाहा॑ । वट् । स्व॒यम॑भिगू॒र्तायेति॑ स्व॒यं–अ॒भि॒गू॒र्ताय॒ । नम॑ः । [3]प॒रि॒धय॒ इति॑ परि–धये॑ । ज॒न॒प्रथ॑नायेति॑ जन–प्रथ॑नाय ।

[1]अथ—होतॄणां संतर्पणमन्त्राः—क्रमेण श्येनायेत्यादयः ॥ तत्र सप्तधिष्ण्याः गायत्र्यादिसप्तच्छन्दोरूपेणोच्यन्ते । नमस्कारान्ते वषट्कृते जुहोति । 'तृप्यन्तां होत्राः' इत्यनुवषट्कृते । श्येनाय श्येनवपुषे पत्वने पतनकुशलाय गायत्र्यात्मने स्वाहा स्वाहुतमिदमस्तु हविः । 'अन्येभ्योपि दृश्यते' इति क्वनिप् । वडिति सत्यनाम । स्वयमभिगूर्ताय स्वयमेव सोमपार्श्वं गन्तुमुद्युक्ताय नमः नमस्कारोयम् । नम इति पूजानाम । गुरी उद्यमने, 'श्वि॒दितो निष्ठायाम्' इतीट्प्रतिषेधः, 'स्वयं क्तेन' इति समासः, अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

[2]विष्टम्भाय विष्टम्भयित्रे शत्रूणाम् । धर्मणे धारयित्रे आत्मीयानाम् । तेनैव मनिन्प्रत्ययः । शेषं समानम् ॥

[3]परिधये परितो धात्रे सर्वतो रक्षित्रे जनानाम् । जनप्रथनाय जनैः प्रथनीयाय जनानां वा प्रथयित्रे ॥

*सं. ३-२-८[8].

त्स्वयमभिगूर्ताय नमः ऊर्जे होत्रा-
णाꣳ स्वाहा वट्त्स्वयमभिगूर्ताय न-
मः पयसे होत्राणाꣳ स्वाहा वट्त्स्व-
यमभिगूर्ताय नमः प्रजापतये मन-
वे स्वाहा वट्त्स्वयमभिगूर्ताय नमः
ऋतमृतपास्सुवर्वाट्त्स्वाहा वट्त्स्व-

स्वाहा । वट् । स्वयमभिगूर्तायेति स्वयं–अभिगू-
र्ताय । नमः । [4]ऊर्जे । होत्राणाम् । स्वाहा । वट् ।
स्वयमभिगूर्तायेति स्वयं–अभिगूर्ताय । नमः ।
[5]पयसे । होत्राणाम् । स्वाहा । वट् । स्वयमभिगू-
र्तायेति स्वयं–अभिगूर्ताय । नमः । [6]प्रजापतय
इति प्रजा–पतये । मनवे । स्वाहा । वट् । स्वय-
मभिगूर्तायेति स्वयं–अभिगूर्ताय । नमः । [7]ऋतम् ।
ऋतपा इत्यृत–पाः । सुवर्वाडिति सुवः–वाट् ।
स्वाहा । वट् । स्वयमभिगूर्तायेति स्वयं–अभिगू-

[4]ऊर्जे अन्नभूताय होत्राणामन्नहेतवे वा ॥

[5]पयसे पयस्थानीयाय पयसो हेतवे वा ॥

[6]प्रजापतये स्रष्ट्रात्मने प्रजानाम् । मनवे यस्येमा मानव्यः प्रजाः तदात्मने ॥

[7]ऋतं यज्ञात्मा । हे ऋतपाः यज्ञस्य पालयितः । हे सुव-

यमभिगूर्तायु नमस्तुम्पन्ताꣳ होत्रा
मधोर्घृतस्य यज्ञपतिमृषय एनसा
॥२९॥ आहुः । प्रजा निर्भक्ता अनु-
र्तायु । नमः । तृम्पन्ताम् । होत्राः । मधोः । घृत-
स्य । [8]यज्ञपतिमिति यज्ञ-पतिम् । ऋषयः । ए-
नसा ॥ २९ ॥ आहुः । प्रजा इति प्र-जाः । नि-
र्भक्ता इति निः-भक्ताः । अनुतप्यमाना इत्यनु-

वाट् अग्नेरादित्यस्य स्वर्गिणां वा वोढः यस्त्वमृतात्मा तस्मै स्वाहा स्वाहुतमस्तु । 'वहेश्च' इति ण्विः । तृम्पन्तां तृप्यन्तु । होत्रास्सप्ताप्येता अनुक्रान्ताः । मधोः मधुरसस्य घृतस्य च । 'चतुर्थी चाशिषि' इत्यादिना षष्ठी, सुहितयोगलक्षणा वा । तृम्प तृप्तौ, तौदादिकः, व्यत्ययेनात्मनेपदम् ॥

[8]पञ्च वैश्वकर्मणानि जुहोति—यज्ञपतिमित्यादि ॥ सर्वाश्चैता-स्त्रिष्टुभः पूर्वयापूर्वया परा अनुषक्ता भवन्ति, नान्त्याः । प्रथ-मतृतीयौ पादौ द्वितीयचतुर्थाभ्यां न युज्यते, द्वितीयस्तु तृती-येन युज्यते, चतुर्थ उत्तरस्याद्येन युज्यते, अन्त्या त्वविकृतैव । 'घोरा ऋषयः' इति द्वितीया । 'अनन्यान् सोमपान्' इति तृतीया । 'ये भक्षयन्तः' इति चतुर्थी । 'नमः पितृभ्यः' इति पञ्चमी । तत्र प्रथमा—यज्ञपतिं यजमानमृषय आहुः एनसा । इत्थंभूतलक्षणे तृतीया । एनस्विनमित्यर्थः । किं सर्व-दा ? नेत्याह—यदा प्रजा निर्भक्ता निर्भागा दुर्गता अनुतप्य-माना हीनैश्वर्या भवन्ति प्रजा इति ऋषय आहुः । तप

तप्यमाना मधव्यौ स्तोकावप तौ
रराध । सं नस्ताभ्याᳬ सृजतु वि-
श्वकर्मा घोरा ऋषयो नमो अस्त्वे-

तप्यमानाः । मधव्यौ । स्तोकौ । अपेति । तौ । रराध । समिति । नः । ताभ्याम् । सृजतु । वि-
श्वकर्मेति विश्व–कर्मा । [१]घोराः । ऋषयः । नमः । अस्तु । एभ्यः । चक्षुषः । एषाम् । मनसः । च ।

ऐश्वर्ये, दैवादिकः, अनुशब्दो धात्वर्थहानिं द्योतयति, व्यत्ययेन श्यन उदात्तत्वम् । यद्वा—तप सन्तापे, इत्यस्य भौवादिकस्य कर्मणि यक् । यदा प्रजा निर्भक्ता दुःख्यमाना पापेन भवन्तीति । अधुना तमेवास्यापराधं स्वयमेव दर्शयति—यस्मादयं मधव्यौ तौ मासौ स्तोकौ स्तोतव्यौ ज्योतिष्टोमकालत्वात्प्रशस्तौ अपरराध अपराद्धवान् । तत्र यागस्याकरणमेव तयोरपराधः । मधुः वसन्त ऋतुः; मधुभूयिष्ठत्वात् । तस्यावयवौ मासौ मधव्यौ चैत्रवैशाखौ । 'मये च', 'मधोः' इति मधुशब्दात् मयडर्थे अवयवे यत्प्रत्ययः । यस्मादेवं तस्मात्ताभ्यां मधव्याभ्यां मासाभ्यां नः अस्मान् संसृजतु संपृक्तान् करोतु विश्वकर्मा विश्वं करणीयं यस्य स प्रजानां पतिः वसन्तेवसन्ते ज्योतिष्टोमेन यष्टॄन् अस्मान् करोत्वित्यर्थः । तत्रत्येन यागेन संसर्गः ताभ्यां संसर्ग इत्युच्यते ॥

[१]अथ द्वितीया—ये घोरा ऋषयः एभ्यो नमोस्तु । प्राणा वा ऋषयः । किं च—एषामृषीणां चक्षुषो मनसश्च सन्धौ

म्यः। चक्षुष एषां मनसश्च संधौ बृ-
हस्पतये महिषद्युमन्नमः। नमो
विश्वकर्मणे स उ पात्वस्मानन-
न्यान्त्सोमपान्मन्यमानः। प्राणस्य

संधाविति सं–धौ। बृहस्पतये। महि। सत्। द्युमदि-
ति द्यु–मत्। नमः। नमः। विश्वकर्मण इति विश्व-
कर्मणे। सः। उ। पातु। अस्मान्। [10]अनन्यान्।
सोमपानिति सोम–पान्। मन्यमानः। प्राणस्येति
प्र–अनस्य। विद्वान्। समर इति सं–अरे। न।

सन्धाने महि महति महनीये वा यत् सत् सीदन् भवति द्युमत् दीप्तिमत् यथा तथा सीदति यस्तत्र तस्मै बृहस्पतये नमः। द्युमते वा। बृहतां पतिः बृहस्पतिः परमात्मा। सुब्व्यत्ययौ। चक्षुर्ग्रहणमुपलक्षणमिन्द्रियार्थम्। मनसा संयोजने यस्सीदतीति नमस्कारविशेषणं वा। महि, सत्, द्युमत्, इति पदत्रयं, महत् शोभनं दीप्तिमच्च नमस्कुर्म इति। किं च——नमस्तस्मै विश्वकर्मणे स एव पात्वस्मान्॥

[10]अथ तृतीया——अनन्यान् आत्मनोऽथग्भूतानस्मान्सोमपान् पीतसोमान् मन्यमानः प्राणस्यात्मनो विद्वान्। कर्मणस्सम्प्रदानत्वात्पूर्ववत् षष्ठी। यद्वा——प्राणस्यानन्यान्मन्यमानः। एवं तत्पुरुषपक्षे अव्ययपूर्वपदप्रकृतिस्वरत्वं प्राप्नोति, तस्माद्बहुव्रीहिर्व्याख्येयः। अनन्यानन्यरहितान् मद्व्यतिरेकेणान्य एषां नास्तीति मन्यमानः प्राण-

विद्वान्त्समरे न धीर एनश्चकृवान्म-
हि बुद्ध एषाम् । तं विश्वकर्मन्न् ॥
३० ॥ प्र मुञ्चा स्वस्तये ये भक्ष-
यन्तो न वसून्यानृहुः । यानग्नयो-

धीरः । एनः । चकृवान् । महि । बुद्धः । एषाम् । तम् । विश्वकर्मन्निति विश्व–कर्मन्न् ॥३०॥ प्रेति । मुञ्च । स्वस्तये । [11]ये । भक्षयन्तः । न । वसूनि । आनृहुः । यान् । अग्नयः । अन्वतप्यन्तेत्यनु–अ-

स्यात्मनो बलस्य ज्ञाता समरे न सङ्ग्राम इव धीरः शूरः पुरुषः स यथा पाति तथाऽस्मान् पातु । यद्वा—समरेण धीरो यथा बद्धो भवति तथा एनः पापं चकृवान् कृतवान् पुरुषः एषां भूतेन्द्रियाणां संघट्टने समरस्थानीये महि महत् बद्धो भवति ततो निर्गन्तुं न शक्नोति । तं हे विश्वकर्मन् प्रमुञ्च तेनैनसा मुक्तं कुरु स्वस्तये अविनाशाय । 'द्व्यचोतस्तिङः, इति दीर्घत्वम् ॥

[11]अथ चतुर्थी—'घिष्णियाः' इति द्वितीयपादान्तः । ये वयं भक्षयन्तो न भक्षयन्त इव अदन्त इव वसूनि धनानि आनृहुः पूजितवन्तः न तैरिष्टवन्तः, अपि तु कुक्षिस्थानीयायां पृथिव्यां संचित्य निहितवन्तः । यद्वा—वसूनि भक्षयन्तः यागार्थेन व्ययेन नाशं युञ्जन्तः नानृहुः यागार्थं न संगृहीतवन्तः अर्हा न बभूवुः वसूनाम् । 'अपस्पृधेथाम्' इत्यादौ अर्हेः निपात्यते । यांश्चास्मान् घिष्णिया अग्नयः अन्वतप्यन्त अस्मद्विषये अनुतापं कृतवन्तः अहो शोच्या एते मिथ्याकारिण इति । एवं ये अयष्टारः दुर्यष्टारश्च

न्वर्तप्यन्त धिष्णिया इयं तेषामव-
या दुरिष्ट्यै स्विष्टिं नस्तां कृणोतु
विश्वकर्मा । नमः पितृभ्यो अभि

तर्प्यन्त । धिष्णियाः । इयम् । तेषाम् । अवया ।
दुरिष्ट्या इति दुः—इष्ट्यै । स्विष्टिमिति सु—इष्टिम् ।
नः । ताम् । कृणोतु । विश्वकर्मेति विश्व—कर्मा । [12]न-
मः । पितृभ्य इति पितृ—भ्यः । अभीति । ये ।

तेषामस्माकं संभाव्यमानप्रमादानां संबन्धिनी इयमिष्टिर्यागः अव-
या विनाशयित्री । कस्य ? दुरिष्ट्यै दुरिष्ट्याः । षष्ठचर्थे चतुर्थी ।
उपलक्षणत्वादयागस्य च । अयागनिमित्तस्य दुरिष्टिनिमित्तस्य च
एनसो विनाशायायं यागः क्रियते इति । 'अवे यजः' इति
ण्विन्प्रत्ययः । 'सुपां सुलुक्' इति सोर्डादेशः, उत्तरपदस्यान-
च्त्वान्नोपहन्यते । यथा प्राची प्रतीची । स्विष्टिमिति वक्ष्यमाणत्वा-
दियमितीष्टिरुच्यते इति गम्यते । तामिमामस्माकमिष्टिं अनिष्टि-
दुरिष्टिपरिहाराय कृतां स्विष्टिं शोभनामिष्टिं कृणोतु करोतु
विश्वकर्मा विश्वकृद्देवः । अनिष्टिदुरिष्टिनिवारणसामर्थ्यं शो-
भनत्वमिष्टेः । प्रत्ययान्तविशेषणत्वे सोर्गतित्वाभावादव्ययपूर्वपदप्रकृ-
तिस्वरत्वम्, धात्वर्थविशेषणत्वेऽपि गतित्वात् 'गतिरनन्तरः' इति
गतेः प्रकृतिस्वरत्वम्, 'उदात्तस्वरितयोर्यणः' इति संहितायां
ततः पर इकारस्स्वर्यते ॥

[12]अथ पञ्चमी—नमः पितृभ्यः तेभ्यः ये नोस्मान् अभ्य-
रुयन् आभिमुख्येन पश्यन्ति । छान्दसो लुङ्, 'अस्यति' इत्या-

ये नो अख्यन् यज्ञकृतो यज्ञकामा-
स्सुदेवा अकामा वो दक्षिणां न नी-
निम मा नस्तस्मादेनसः पापयिष्ट।
यावन्तो वै सदस्यास्ते सर्वे दक्षि-

नः । अख्यन्न् । यज्ञकृत इति यज्ञ–कृतः । यज्ञ-
कामा इति यज्ञ–कामाः । सुदेवा इति सु–देवाः।
अकामाः । वः । दक्षिणाम् । न । नीनिम । मा ।
नः । तस्मात् । एनसः । पापयिष्ट । [13]यावन्तः । वै ।
सदस्याः । ते । सर्वे । दक्षिण्याः । तेभ्यः । यः ।

दिनाऽङ् । यज्ञकृतः यज्ञं कृतवन्तः यज्ञकामाः भूयोपि यज्ञं कर्तुमिच्छन्तः । 'शीलिकामि' इत्यादिना णः, पूर्वपदप्रकृतिस्वरत्वं च । सुदेवाः शोभनदानाः अकामाः इच्छाद्वेषरहिताः । तेभ्यो नमः । उभयोरपि 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । संप्रति प्रत्यक्षवदुच्यते—वः युष्मदर्थं दक्षिणां लक्षणया यज्ञ एवोच्यते । यन्न नीनिम न नीतवन्तः । यद्वा—अकामा वयं प्रमादात् यज्ञं कृतवन्तः । तस्मादयागनिमित्तादेनसः पापात् नोस्मान्पापयिष्ट मा पापान् कर्तुमिच्छत । 'छन्दसि परेच्छायामपि' इति क्यच्, 'न छन्दस्यपुत्रस्य' इतीत्वाभावः, तदन्तात् लृङ् । नयतेर्लिटि द्विर्वचने धात्वभ्यासयोर्विपर्ययः ॥

[13]अथ वैश्वकर्मब्राह्मणम्—यावन्त इत्यादि ॥ गतम् । दक्षिण्याः दक्षिणार्हाः । 'कडंकरदक्षिणाच्छ च' इति यत् ॥

ण्यास्तेभ्यो यो दक्षिणां न ॥ ३१ ॥
नयेदैभ्यो वृश्च्येत यद्वैश्वकर्मणानि
जुहोति सदस्यानेव तत्प्रीणात्यस्मे
देवासो वपुषे चिकित्सत यमाशिरा
दम्पती वाममश्नुतः । पुमान्पुत्रो

दक्षिणाम् । न ॥ ३१ ॥ नयेत् । एति । एभ्यः । वृश्चेयत । यत् । वैश्वकर्मणानीति वैश्व—कर्मणानि । जुहोति । सदस्यान् । एव । तत् । प्रीणाति । [14]अस्मे इति । देवासः । वपुषे । चिकित्सत । यम् । आशिरा । दम्पती इति । वामम् । अश्नुतः । पुमान् । पुत्रः । जायते । विन्दते । वसु । अर्थ ।

[14]आशीरवनयति—अस्मे इति चतसृभिः ॥ अत्र द्वे जगत्यौ द्वे त्रिष्टुभौ । तत्र प्रथमा—'वसु' इति तृतीयपादान्तः ॥ हे देवासः देवाः । 'आज्जसेरसुक्' । वपुषे शोभनाय रूपाय अस्मे अस्मान् चिकित्सत निर्दोषान् कुरुत । 'गुप्तिज्किद्भ्यश्चस्सन्' व्यत्ययेव परस्मैपदम् । कीदृशायेत्याह—यमिति । लिङ्व्यत्ययः । वामं कमनीयं कल्याणं आशिरा अवनीयमानया दम्पती जायापती पत्नीयजमानौ । दासीभारादिः । अश्नुतः । व्यत्ययेन परस्मैपदम् । तादृशाय वपुषे अस्मान् चिकित्सत अस्माकं वपुषे चिकित्सया गुणोत्कर्षं कुरुत । कीदृशं यत् वामं वननीयं आशिरा दम्पती अश्नुत इति । घोळा नाम* दधिविशेषः आशीः

*अ—मादो नाम.

जायते विन्दते वस्वथ विश्वे अरपा
एधते गृहः । आशीर्दाया दम्पती
वाममश्नुतामरिष्टो रायस्सचताꣳस-

विश्वे । अरपाः । एधते । गृहः । [15]आशीर्दायेत्याशीः
—दाया । दम्पती इति । वामम् । अश्नुताम् । अ-
रिष्टः । रायः । सचताम् । समोकसेति सं—ओक-

दोहनपात्रस्थमेव घनीभवति । न शीर्यत इत्याशीः 'अपस्पृधेथाम्' इत्यादौ निपात्यते । किं च—युष्मच्चिकित्सया अस्माकं पुमान् पुत्रो जायते जायताम् । द्वयोरुपादानं प्रशंसार्थम् । वसु चास्मान्विन्दते विन्दतां प्राप्नोतु । अथ अनन्तरं विश्वे । व्यत्ययेन बहुवचनम् । विश्वोपि गृहः गृहवासी जनः अरपाः अपापः एधते वर्धताम् । यद्वा—अथशब्दो यथेत्यस्यार्थे । यथा चिकित्सिते दम्पती वाममश्नुतः, पुमान्पुत्रो जायते, वसु च विन्दते, गृहजनश्चापाप एधते तथा चिकित्सतेति ॥

[15]अथ द्वितीया—आशीर्दायेति ॥ 'सह' इति तृतीयपादान्तः । आशीर्दाया आशिरं दत्त इत्याशीर्दाया दम्पती पत्नीयजमानौ वामं कल्याणं अश्नुताम् । दय दानगतिरक्षणेषु; 'कर्मण्यण्', 'सुपां सुलुक्' इत्याकारः । दधातेरेव वा विजन्तात्तेनैव सूत्रेण याजादेशः । दानं चावनयनमेव । यज्ञो वा आशिरा लक्ष्यते । किं च—अरिष्टः अहिंसितः रायो धनम् । रातेर्वञ्, रायः । बहुवचनं, व्यत्ययो वा । सचतां दम्पती समोकसा एकगृहौ अवियुक्तौ । किं च—योयं यजमान आ-

मोकसा । य आऽसिचत्संदुग्धं कु-
म्भ्या सहेष्टेन यामन्नमतिं जहातु
सः । सर्पिर्ग्रीवी ॥ ३२ ॥ पीवर्य-
स्य जाया पीवानः पुत्रा अकृशासो
अस्य । सहजानिर्यस्सुमखस्यमान्

सा । यः । एतं । असिचत् । संदुग्धमिति सं–दु-
ग्धम् । कुम्भ्या । सह । इष्टेन । यामन् । अमतिम् ।
जहातु । सः । [16]सर्पिर्ग्रीवीति सर्पिः–ग्रीवी ॥३२॥
पीवरी । अस्य । जाया । पीवानः । पुत्राः । अकृ-
शासः । अस्य । सहजानिरिति सह–जानिः । यः ।
सुमखस्यमान् इति सु–मखस्यमानः । इन्द्राय ।

सिचत् आसिक्तवान् संदुग्धं एकत्र सहितं दुग्धं आशीराख्यम् । पूर्ववद्गतिस्वरः । कुम्भ्या आसिचत् प्रभूतमित्यर्थः । सहेष्टेन संपद्यमानेन यागेन सहासिचत् । क्व यामन् यामनि सारभूते सोमे य आसिचत् । 'लिपि सिचि ह्वश्च' इत्यङ् । सः अमतिं शरीरमरोगम् । अमेरतिप्रत्ययः, मतिविपर्यासो वा अमतिः, तां जहातु त्यजतु अरोगशरीरो यागकृतबुद्धिर्वा भवत्वित्यर्थः॥

[16]अथ तृतीया—सर्पिर्ग्रीवीति ॥ अस्य यजमानस्य सर्पिर्ग्रीवी स्निग्धकण्ठी मृष्टभोजना वा जाया भवति । 'स्वाङ्गाच्चोपसर्जनात्' इति ङीप् । पीवरी प्यायनशीला अकृपणाङ्गी । प्या-

इन्द्रायाशिरꣳ सह कुम्भ्याऽदात् । आशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविणꣳ सर्वर्चसम् । संजयन्क्षेत्राणि सहसाऽहमिन्द्र कृण्वानो

आशिरम् । सह । कुम्भ्या । अदात् । [17]आशीरित्या—शीः । मे । ऊर्जम् । उत । सुप्रजास्त्वमिति सुप्रजाः—त्वम् । इषम् । दधातु । द्रविणम् । सर्वर्चसमिति स—वर्चसम् । संजयन्निति सं—जयन् । क्षेत्राणि । सहसा । अहं । इन्द्र । कृण्वानः । अ-

---

यतेः 'अन्येभ्योपि दृश्यते' इति क्वनिप्, 'प्यायः पी' इति पीभावः, 'वनो र च' इति ङीब्रेफौ । पुत्राश्च पीवानः प्यायनशीलाः पुष्टाङ्गाः अकृशासः विद्याधनादिभिरकृशाः अस्य भवन्ति । 'आज्ञसेरसुक्' । कस्येत्याह—यो यजमानः सहजानिः सभार्यः । जायाया निङादेशः । सुमखस्यमानः शोभनं यज्ञं आत्मन इच्छन् । असुगागमश्छान्दसः, व्यत्ययेनात्मनेपदम्, भृशादिर्वा द्रष्टव्यः । सुमखो भवतीति क्यङ् । इन्द्रायाशिरं कुम्भ्या सहादात् प्रभूतं ददाति दास्यति । छान्दसो लुङ्, 'गातिस्था' इति सिचो लुक् ॥

[17]अथ चतुर्थी—आशीरिति ॥ आशीरियमवनीयमाना मे ममोर्ज क्षीरादि उत अपि च सुप्रजास्त्वं शोभनापत्यत्वम् । 'नित्यमसिच्प्रजामेधयोः' इत्यसिच्, छान्दसं दीर्घत्वम् । इषमन्नं ददा-

अन्याꣳ अधरान्त्सपत्नान् । भूतम-
सि भूते मा धा मुखंमसि मुखं भू-
यासं द्यावापृथिवीभ्यां त्वा परि
गृह्णामि विश्वे त्वा देवा वैश्वानराः

न्यान् । अधरान् । सपत्नान् । [18]भूतम् । असि । भूते । मा । धाः । मुखम् । असि । मुखम् । भूयासम् । [16]द्यावापृथिवीभ्यामिति द्यावा—पृथिवीभ्याम् । त्वा । परीति । गृह्णामि । [20]विश्वे । त्वा ।

तु द्रविणं धनं च ददातु सुवर्चसं बलसहितं दीप्तिसहितं वा । लिङ्व्यत्ययश्छान्दसः । इषो वा विशेषणम्—यथाऽहं संजयन् सहसा बलेन क्षेत्राणि शत्रुसंबन्धीन्यन्यान् सपत्नान् शत्रूनधरान् अधरीभूतान् आज्ञाविधेयान् कृण्वानः कुर्वाणः स्यां तथा मे ऊर्जादि ददात्विति । पदकारमते आशीरिति प्रार्थनापदम् । इयं.....प्रार्थना दद्याशिर [मह्यमाशिर] उर्जादि ददात्विति ॥

[18]पश्यति—भूतमिति ॥ भूतं सर्वदा न जातं जन्यं त्वमसि । भूते सर्वदा यद्भूतं न जायते न च जनिष्यते तत्र परस्मिन् नित्ये वस्तुनि मा धाः स्थापय । किंच मुखं प्रधानं त्वमसि । तादृशेन त्वया अहं मुखं प्रधानभूतः सर्वेषां भूयासम् ॥

[19]परिगृह्णाति—द्यावापृथिवीभ्यां त्वा परिगृह्णामि, नाहमेव । 'देवताद्वन्द्वे च' इति द्यावापृथिवीशब्द आद्युदात्तः ॥

[20]प्रच्यावयति—विश्वे इति ॥ विश्वे देवाः इन्द्रादयः वैश्वानराः

॥ ३३ ॥ प्र च्यावयन्तु दिवि देवान्दृꣳहान्तरिक्षे वयाꣳसि पृथिव्यां पार्थिवान्ध्रुवं ध्रुवेण हविषाऽव सोमं नयामसि । यथा नस्सर्वमिज्जगदयक्ष्मꣳसुमना देवाः । वैश्वानराः ॥ ३३ ॥ प्रेति । च्यावयन्तु । दिवि । देवान् । दृꣳह । अन्तरिक्षे । वयाꣳसि । पृथिव्याम् । पार्थिवान् । [21]ध्रुवम् । ध्रुवेण । हविषा । अवेति । सोमम् । नयामसि । यथा । नः । सर्वम् । इत् । जगत् । अयक्ष्मम् । सुमना इति सु–मनाः ।

विश्वेषां नराणां हितत्वेन संबन्धिनोऽग्निरूपाश्च प्रच्यावयन्त्वस्मात् स्थानात् न वयं शक्ताः । प्रच्याव्यमानश्च त्वं दिवि देवान् दृंह दृढान् कुरु, अन्तरिक्षे वयांसि पक्षिणो दृंह; पृथिव्यां च पार्थिवान् पृथिव्यां भवान् पर्वतपादपादीन् दृंह । 'पृथिव्या आजौ' इति अः ॥

[21]होतृचमसेऽवनयति—ध्रुवमिति । इयमत्यष्टिरष्टपदा । अष्टाक्षरास्सर्वे पादाः, षष्ठस्तु द्वादशाक्षरः ॥ ध्रुवं नित्यं अविचलितं असि सोमं होतृचमसस्थं त्वया ध्रुवेण नित्येन हविषा अवनयामसि अवनयामः अधस्तान्नयामः । तस्योपरि त्वां सिञ्चामः । 'इदन्तो मसि' । किमर्थं? यथा नः अस्माकं सर्वमित् सर्वमेव जगत् जङ्गमं गवादि अयक्ष्मं अरोगं सुमनस्कं च असत् । छान्दसो लिङ्व्यत्ययः, अस्तेर्लेट्यडागमः । यथा चास्माकं सर्वा विशः प्रजाः

क्षमꣳ सुमना असत्। यथा न इन्द्र इद्विशः केवलीस्सर्वास्समनसः करत्। यथा नस्सर्वा इद्विशोस्माकं केवलीरसन्॥ ३४॥

असत्। यथा। नः। इन्द्रः। इत्। विशः। केवलीः। सर्वाः। समनस इति स—मनसः। करत्। यथा। नः। सर्वाः। इत्। दिशः। अस्माकम्। केवलीः। असन्॥ ३४॥

एनसा विश्वकर्मन् यो दक्षिणां न सर्पिर्ग्रीवी वैश्वानराश्वत्वारिꣳशच्च॥ ८॥

सर्वा अपि केवलीः रोगादिरहिताः समनसः अनाकुलमनसश्च इन्द्र इत् इन्द्र एव करत् कुर्यात्। करोतेर्लेटि शपो लुक्, पूर्ववदडागमः। 'कः करत्करति' इति सत्वम्। 'केवलमामक' इति केवलशब्दात् ङीप्। यथा चास्माकं सर्वा एव दिशः दिक्षु स्थिताः नोस्माकं प्रजाः केवलीः केवल्यः। पूर्ववत्पूर्वसवर्णदीर्घत्वम्। अस्माकमेव स्वभूताः नान्यगामिन्यः भवन्ति तथा अवनयामीति। अस्तेर्लेटि व्यत्ययेन शप्; लुकि हि आद्युदात्तत्वं न स्यात्॥

इति तृतीये द्वितीये अष्टमोनुवाकः.

यद्वै होताऽध्वर्युमभ्याह्वयते वज्रमे-
नमभि प्र वर्तयत्युक्थशा इत्याह
प्रातस्सवनं प्रतिगीर्य त्रीण्येतान्यक्ष-
राणि त्रिपदा गायत्री गायत्रं प्रात-
स्सवनं गायत्रियैव प्रातस्सवने व-

[1]यत् । वै । होता । अध्वर्युम् । अभ्याह्वयत इत्यभि–आह्वयते । वज्रम् । एनम् । अभि । प्रेति । वर्तयति । उक्थशा इत्युक्थ–शाः । इति । आह । प्रातस्सवनमिति प्रातः–सवनम् । प्रतिगीर्येति प्रति–गीर्य । त्रीणि । एतानि । अक्षराणि । त्रिपदेति त्रि–पदा । गायत्री । गायत्रम् । प्रातस्सवनमिति प्रातः–सवनम् । गायत्रिया । एव । प्रातस्सवन इति प्रातः–सवने । वज्रम् । अन्तः । ध-

---

[1]यद्वै होतेत्यादि ॥ अध्वर्युमाभिमुख्येन यदाह्वयते आह्वानं प्रयुङ्क्ते 'शोंसावोम्' इति होता, तेनायमध्वर्युमभि वज्रं प्रवर्तयति । तत्परिहारं सवनत्रयेऽपि क्रमेणाह—उक्थशा इत्यादि । प्रातस्सवनं प्रातस्सवनविषयं उक्थं प्रातस्सवनं च प्रतिगीर्य उक्थशा इत्याहाध्वर्युः । उक्थानि शंसति उक्थैर्वा शंसतीत्युक्थशाः अयमभूदिति । 'मन्त्रे श्वेतवहोक्थशास्' इत्यादिना ण्विन् । शंसितुः प्रोत्साहनं प्रतिगरः । कथं पुनरेतेन उक्तदोषः परिह्रियते इत्याह—

ज्रम॒न्तर्धत्त उ॒क्थं वा॒चीत्या॑ह मा-
ध्यं॑न्दिन॒ꣳ सव॑नं प्रति॒गीर्य॑ च॒त्वार्ये-
ता॒न्य॒क्षरा॑णि॒ चतु॑ष्पदा त्रि॒ष्टुप्त्रैष्टु॑भं
माध्यं॑न्दिन॒ꣳ सव॑नं त्रि॒ष्टु॒भै॒व माध्य॑-
न्दिने॒ सव॑ने॒ वज्रम॒न्तर्ध॑त्ते ॥ ३५ ॥
उ॒क्थं वा॒चीन्द्रा॑येत्या॑ह तृतीयसव॒नं

त्ते । [2]उ॒क्थम् । वा॒चि । इति॑ । आ॒ह॒ । माध्यं॑न्दिनम् । सव॑नम् । प्र॒ति॒गीर्येति॑ प्रति–गीर्य॑ । च॒त्वारि॑ । ए-
ता॑नि । अ॒क्षरा॑णि । चतु॑ष्पदेति॒ चतुः–प॒दा । त्रि-
ष्टुप् । त्रैष्टु॑भम् । माध्यं॑न्दिनम् । सव॑नम् । त्रि॒ष्टु॒भा । ए॒व । माध्यं॑न्दिने । सव॑ने । वज्र॑म् । अ॒न्तः । ध॒-
त्ते ॥ ३५ ॥ [3]उ॒क्थम् । वा॒चि । इन्द्रा॑य । इति॑ ।

त्रीण्येतानीत्यादि । अनेन गायत्रात्मना त्रयक्षरेणोच्चारितेन गायत्रे प्रातस्सवने आत्मानमभि प्रवर्तितं वज्रमन्तर्धत्ते अन्तर्हितं करोति निवारयतीत्यर्थः ॥

[2]उक्थं वाचीति ॥ अनेन चतुरक्षरेण त्रिष्टुभात्मना माध्यन्दिने सवने आत्मानमभि प्रवर्तितं वज्रमन्तर्धत्ते । उक्थं शस्त्रं सम्यक्प्रवृत्तं अस्य वाचीति । त्रिष्टुप्छन्दादुत्सादित्वादञ् । 'सावेकाचः' इति वाचो विभक्तिरुदात्ता ॥

[3]उक्थं वाचीन्द्रायेत्यादि ॥ अनेन सप्ताक्षरेण शाक्वर्यात्मना

प्रतिगीर्यं सप्तैतान्यक्षराणि सप्तपदा शक्करी शाक्करो वज्रो वज्रेणैव तृतीयसवने वज्रमन्तर्धत्ते ब्रह्मवादिनो वदन्ति स त्वा अध्वर्युस्स्याद्यो यथासवनं प्रतिगरे छन्दाꣳसि संपा-

आह । तृतीयसवनमिति तृतीय–सवनम् । प्रतिगीर्येति प्रति–गीर्यं । सप्त । एतानि । अक्षराणि । सप्तपदेति सप्त–पदा । शक्करी । शाक्करः । वज्रः । वज्रेण । एव । तृतीयसवन इति तृतीय–सवने । वज्रम् । अन्तः । धत्ते । [4]ब्रह्मवादिन इति ब्रह्म–वादिनः । वदन्ति । सः । तु । वै । अध्वर्युः । स्यात् । यः । यथासवनमिति यथा–सवनम् । प्रतिगर इति प्रति–गरे । छन्दाꣳसि । संपादयेदि-

---

वज्रभूतेन तृतीयसवने यथोक्तं वज्रमन्तर्धत्ते उक्थं सम्यक्प्रवृत्तमिन्द्रार्थमस्य वाचीति । अत्र सवर्णदीर्घत्वं न कर्तव्यं सप्ताक्षरत्वायेत्याहुः ॥

[4]ब्रह्मवादिन इत्यादि ॥ यथासवनं सवनानुरूपं प्रातस्सवने गायत्रीं माध्यन्दिनसवने त्रिष्टुभं तृतीयसवने जगतीमिति प्रतिगरे विविक्तरूपाणि छन्दांसि योध्वर्युः संपादयेत्, यो वा तेजः प्रातस्सवने आत्मन् दधीत आत्मनि तेजो दधीत माध्यन्दिने इन्द्रिय-

दयेत्तेजः प्रातस्सवन आत्मन्दधीते-
न्द्रियं माध्यन्दिने सवने पशूꣳस्तृ-
तीयसवन इत्युक्थशा इत्याह प्रात-
स्सवनं प्रतिगीर्य त्रीण्येतान्यक्षरा-
णि ॥ ३६ ॥ त्रिपदा गायत्री गाय-

ति सं–पादयेत् । तेजः । प्रातस्सवन इति प्रातः–सवने । आत्मन् । दधीत । इन्द्रियम् । माध्यन्दिने । सवने । पशून् । तृतीयसवन इति तृतीय–सवने । इति । [5]उक्थशा इत्युक्थ–शाः । इति । आह । प्रातस्सवनमिति प्रातः–सवनम् । प्रतिगीर्येति प्रति–गीर्य । त्रीणि । एतानि । अक्षराणि ॥ ३६ ॥ त्रिपदेति त्रि–पदा । गायत्री । गायत्रम् ।

मात्मनि दधीत तृतीयसवने पशूनात्मनि दधीत धारयितुं शक्नुयात् सोध्वर्युस्स्यात् भवितुमर्हतीति ब्रह्मवादिन आहुः ॥

[5]उक्थशा इत्यादि ॥ प्रातस्सवनस्य गायत्रत्वात् गायत्र्यास्सवनानुकूलत्वमिति । छन्दांसीति सवनत्रयापेक्षं बहुवचनम् । प्रातस्सवने गायत्रीसंपादनेन यथासवनं छन्दांसि संपादयति एतत्संपादयतीति । वचनव्यत्ययोपि । प्रातस्सवने गायत्री छन्दस्संपादयतीति । अथो अपि च तेजोरूपे प्रातस्सवने आत्मनि तेजो धत्ते उक्थशा इति तेजोरूपगायत्र्यात्मकत्र्यक्षरोच्चारणात् ॥

त्रं प्रातस्सवनं प्रातस्सवन एव प्र-
तिगरे छन्दाꣳसि सं पादयत्यथो
तेजो वै गायत्री तेजः प्रातस्सवनं
तेज एव प्रातस्सवन आत्मन्धत्त
उक्थं वाचीत्याह माध्यन्दिनꣳ स-
वनं प्रतिगीर्यं चत्वार्येतान्यक्षराणि
चतुष्पदा त्रिष्टुप्त्रैष्टुभं माध्यन्दिनꣳ

प्रातस्सवनमिति प्रातः-सवनम् । प्रातस्सवन इति प्रातः-सवने । एव । प्रतिगर इति प्रति-गरे । छन्दाꣳसि । समिति । पादयति । अथो इति । तेजः । वै । गायत्री । तेजः । प्रातस्सवनमिति प्रातः-सवनम् । तेजः । एव । प्रातस्सवन इति प्रातः-सवने । आत्मन् । धत्ते । [6]उक्थम् । वाचि । इति । आह । माध्यन्दिनम् । सवनम् । प्रतिगीर्यति प्रति-गीर्य । चत्वारि । एतानि । अक्षराणि । चतुष्पदेति चतुः-पदा । त्रिष्टुप् । त्रैष्टुभम् । मा-

[6]एवं माध्यन्दिने सवने त्रिष्टुभस्सवनानुरूप्यं, इन्द्रियरूपत्रिष्टुभात्मकचतुरक्षरोच्चारणादिन्द्रियमात्मनि धत्ते ॥

सवनं माध्यन्दिन एव सवने प्रतिगरे छन्दाꣳसि सं पादयत्यथो इन्द्रियं वै त्रिष्टुगिन्द्रियं माध्यन्दिनꣳ सवनम् ॥ ३७ ॥ इन्द्रियमेव माध्यन्दिने सवन आत्मन्धत्त उक्थं वाचीन्द्रायेत्याह तृतीयसवनं प्रतिगीर्यं सप्तैतान्यक्षराणि सप्तपदा शाक्करी

ध्यन्दिनम् । सवनम् । माध्यन्दिने । एव । सवने । प्रतिगर इति प्रति–गरे । छन्दाꣳसि । समिति । पादयति । अथो इति । इन्द्रियम् । वै । त्रिष्टुक् । इन्द्रियम् । माध्यन्दिनम् । सवनम् ॥ ३७ ॥ इन्द्रियम् । एव । माध्यन्दिने । सवने । आत्मन् । धत्ते । उक्थम् । वाचि । इन्द्राय । इति । आह । तृतीयसवनमिति तृतीय–सवनम् । प्रतिगीर्यमिति प्रति–गीर्यं । सप्त । एतानि । अक्षराणि । सप्तपदेति सप्त–पदा । शाक्करी । शाक्कराः । पशवः । जागतम् ।

[1]तृतीयसवने जागतशाक्कर्योस्सवनानुरूप्यं, जगतीशाक्कर्योः पशुसाधनत्वात्पश्वात्मके तृतीयसवने पशुरूपशाक्कर्यात्मकसप्ताक्षरोच्चारणात् पशूनात्मनि धत्ते ॥

शाक्करः पशवो जागतं तृतीयसवनं
तृतीयसवन एव प्रतिगरे छन्दाꣳसि
सं पादयत्यथो पशवो वै जगती
पशवस्तृतीयसवनं पशूनेव तृतीय-
सवन आत्मन्धत्ते यद्वै होताऽध्वर्यु-
मभ्याह्वयत आव्यमस्मिन्दधाति त-

तृतीयसवनमिति तृतीय–सवनम् । तृतीयसवन इति तृतीय–सवने । एव । प्रतिगर इति प्रति–गरे । छन्दाꣳसि । सामिति । पादयति । अथो इति । पशवः । वै । जगती । पशवः । तृतीयसवनमिति तृतीय–सवनम् । पशून् । एव । तृतीयसवन इति तृतीय–सवने । आत्मन् । धत्ते । [8]यत् । वै । होता । अध्वर्युम् । अभ्याह्वयत इत्यभि–आह्वयते । आव्यम् । अस्मिन् । दधाति ।

---

[8]दोषान्तरमप्याह—यद्वा इत्यादि ॥ आव्यं रोगविशेषः, समन्तात्पीड्यते येन तदाव्यम् । आङ्पूर्वाद्धेतेः 'अचो यत्' इति यति 'यीवर्णयोः' इति लोपः, द्वितीयस्वरलोपश्छान्दसः । तदस्मिन्नध्वर्योरभ्याह्वानेन होता दधाति उत्पादयति । तदध्वर्युः यदि नापहनीत नापहन्यात् । व्यत्ययेनात्मनेपदम् । संवत्सरसमाप्तेः पुरा अस्याध्वर्योर्गृहे प्रजा आवेवीरन् सर्वतो रोगादिभिः पीड्येरन् ।

यन्न ॥ ३८ ॥ अपहनीत पुराऽस्य संवत्सराद्गृह आ वेवीरञ्छोश्सा मोदं इवेति प्रत्याह्वयते तेनैव तदपहते यथा वा आर्यतां प्रतीक्षत एवमध्वर्युः प्रतिगरं प्रतीक्षते यदभिप्रति-

तत् । यत् । न ॥ ३८ ॥ अपहनीतेत्यप—हनीत । पुरा । अस्य । संवत्सरादिति सं—वत्सरात् । गृहे । एति । वेवीरन् । शोश्सा । मोदः । इव । इति । प्रत्याह्वयत इति प्रति—आह्वयते । तेन । एव । तत् । अपेति । हते । यथा । वै । आर्यतामित्या—यताम् । प्रतीक्षत इति प्रति—ईक्षते । एवम् । अध्वर्युः । प्रतिगरमिति प्रति—गरम् । प्रतीति । ईक्षते । यत् ।

वेवीङ् वेतिना तुल्ये । तत्परिहारार्थं अभ्याहूतोध्वर्युः शोंसा मोद इव शंस बाढं मो होतः मोद इव अस्माकं, मोदामह एव वयमिति प्रत्याह्वयते अभ्याह्वयमानं होतारं प्रत्याहवस्थानीयं प्रतिगरमिममुच्चारयेत्, तेन तदाव्यमपहत्यैव । शोंसावोमिति द्वावोकाराकारौ । 'प्रतिगरोध्वर्यूणाम्' इति उद्गीथत्वं प्रतिगरस्य । यथेत्यादि । यथा लोके आयतां आभिमुख्येन नियतां वाचं स्थाने वक्तुं प्रतीक्षते, एवमध्वर्युरपि प्रतिगरं प्रतीक्षेत न सहसा प्रतिगरितव्यम्, अपि तु होत्राभ्याहूतः अध्वर्यो इति प्रतिगृणीयात्, न पूर्वमित्यर्थः । न चाभिप्रति-

गृणीयाद्यथाऽऽयतया समृच्छते ता-
दृगेव तद्यदर्धर्चाल्लुप्येत यथा धाव-
द्व्रयो हीयते तादृगेव तत्प्रबाहुगा
ऋत्विजामुद्गीथा उद्गीथ एवोद्गातृ-
णाम् ॥ ३९ ॥ ऋचः प्रणव उक्थ-

अभिप्रतिगृणीयादित्यभि–प्रतिगृणीयात् । यथा । आयतयेत्या–यतया । समृच्छत इति सं–ऋच्छते । तादृक् । एव । तत् । यत् । अर्धर्चादित्यर्ध–ऋचात् । लुप्येत । यथा । धावद्व्रय इति धावत्–भ्यः । हीयते । तादृक् । एव । तत् । प्रबाहुगिति प्र–बाहुक् । वै । ऋत्विजाम् । उद्गीथा इत्युत्–गीथाः । उद्गीथ इत्युत्–गीथः । एव । उद्गातृणामित्युत्–गातृणाम् ॥ ३९ ॥ ऋचः । प्रणव इति प्र–नवः ।

गृणीयादर्धर्चान्तमतिक्रम्य उपरिगत्वा न प्रतिगृणीयात् । यद्यभिप्रतिगृणीयात् यथा लोके आयतया अस्थाने समृच्छते संगच्छते । पीड्यते इति केचित् । तादृगेव तदभिप्रतिगरणम् । तस्मान्नाभिप्रतिगृणीयात् । न चार्धर्चाल्लुप्येतेत्याह—यदर्धर्चाल्लुप्येतेति । यद्यर्धर्चाल्लुप्येताभिप्रतिगरः यथा धावद्व्रचः एकः धिया हीयते सामर्थ्याद्व्रष्टो भवति तथाऽर्धर्चात्प्रतिगरं लुम्पन्तं शंसन् सामर्थ्याद्धीयते तस्मादर्धर्चयोः प्रतिगृणीयादिति । ऋचोर्धमर्धर्चं, 'अर्धं नपुंसकम्'

शꣳसिनां प्रतिगरोऽध्वर्यूणां य एवं विद्वान्प्रतिगृणात्यन्नाद एव भवत्यास्यं प्रजायां वाजी जायत इयं वै होताऽसावध्वर्युर्यदासीनꣳशꣳसत्य-

उक्थशꣳसिनामित्युक्थ–शꣳसिनाम् । प्रतिगर इति प्रति–गरः । अध्वर्यूणाम् । यः । एवम् । विद्वान् । प्रतिगृणातीति प्रति–गृणाति । अन्नाद इत्यन्न–अदः । एव । भवति । एति । अस्य । प्रजायामिति प्र–जायाम् । वाजी । जायते । [9]इयम् । वै । होता । असौ । अध्वर्युः । यत् । आसीनः । शꣳ-

---

इति समासः, 'ऋक्पूरब्धूः' इति समासान्तः । तत्र 'शोंसावोम्' इति यत्राह अतोर्धर्चो भवति तत्र 'शोंसा मोद इव' इति प्रत्याहवः प्रतिगरः क्रियते, अन्यत्रार्धर्चे 'ओथा मोद इव' इति शाखान्तरे प्रसिद्धं प्रतिगृणीयादिति । प्रबाहुग्वा इत्यादि । प्रबाहुक्सममित्यर्थः । सर्वेषामृत्विजामप्युद्गीथाः उद्गानानि समानीत्यर्थः । तत्रोद्गातॄणां उद्गीथः प्रसिद्धः एव । उक्थशंसिनां होतॄणामृचोन्ते यः प्रणवस्स उद्गीथः । अध्वर्यूणां तु प्रतिगरः उद्गीथः । य एवमित्यादि । गतम् । वाजी अन्नवान् जायते ॥

[9]इयं वा इत्यादि ॥ आसित्वा शंसनादधोभावादियं पृथिवी होता, स्थित्वा प्रतिगरणादुपरिभावादसौ द्यौरध्वर्युः । एतदेव प्रतिपादयति—यदित्यादि । गतम् । अस्या नैति न पृथग्भवति

स्या एव तद्धोता नैत्यास्तं इव ही-
यमथो इमामेव तेन यजमानो दुहे
यत्तिष्ठन्प्रतिगृणात्यमुष्या एव तद-
ध्वर्युर्नैति ॥ ४० ॥ तिष्ठतीव ह्यसा-
वथो अमूमेव तेन यजमानो दुहे
यदासीनश्शꣳसति तस्मादितःप्र-

संति । अस्याः । एव । तत् । होता । न । एति । आस्ते । इव । हि । इयम् । अथो इति । इमाम् । एव । तेन । यजमानः । दुहे । यत् । तिष्ठन् । प्रतिगृणातीति प्रति–गृणाति । अमुष्याः । एव । तत् । अध्वर्युः । न । एति ॥ ४० ॥ तिष्ठति । इव । हि । असौ । अथो इति । अमूम् । एव । तेन । यजमानः । दुहे । [10]यत् । आसीनः । शꣳसति । तस्मात् । इतःप्रदानमितीतः–प्रदानम् । देवाः ।

ध्यिव्येव भवति । तदपि कुत इत्याह—आस्त इव हीयं ध्यिवी अथो अपि च तेनानेन होत्रा आसीनां ध्यिवीं दुहे दुग्धे यजमानः । यत्तिष्ठन्नित्यादि समानं पूर्वेण । 'लोपस्त आत्मनेपदेषु' इति तलोपः । एवमाभ्यां द्यावाध्यिव्यौ दुग्धे यजमानः ॥

[10]यदासीन इत्यादि ॥ इतःप्रदानं अनया ध्यिव्या प्रदत्तं हविरादि देवा उपजीवन्ति । अमुतःप्रदानं अमुना द्युलोकेन

दानं देवा उप जीवन्ति यत्तिष्ठन्प्रति-
गृणाति तस्मादमुतःप्रदानं मनुष्या
उप जीवन्ति यत्प्राङासीनश्शꣳ-
सति प्रत्यङ्तिष्ठन्प्रतिगृणाति तस्मा-
त्प्राचीनꣳ रेतो धीयते प्रतीचीः प्र-
जा जायन्ते यद्वै होताऽध्वर्युमभ्या-

उपेति । जीवन्ति । यत् । तिष्ठन् । प्रतिगृणातीति प्रति–गृणाति । तस्मात् । अमुतःप्रदानमित्यमुतः–प्रदानम् । मनुष्याः । उपेति । जीवन्ति । यत् । प्राङ् । आसीनः । शꣳसति । प्रत्यङ् । तिष्ठन् । प्रतिगृणातीति प्रति–गृणाति । तस्मात् । प्राचीनम् । रेतः । धीयते । प्रतीचीः । प्रजा इति प्र–जाः । जायन्ते । [11]यत् । वै । होता । अध्वर्युम् ।

प्रदत्तं वृष्ट्यादिकं मनुष्या उपजीवन्ति । सार्वविभक्तिकस्तसिः, अव्ययपूर्वपदप्रकृतिस्वरत्वम् । इतः प्रदानं यस्येति वा बहुव्रीहिः । यत्प्राङित्यादि । प्राचीनं प्रकृष्टगमनं क्षेत्राधीनं* रेतो धीयते निपातितं तत्रास्ते । 'विभाषाञ्चेरदिक्स्त्रियाम्' इति खः । प्रतीचीः प्रतिकूलगतिकाः प्रजाः ज्ञात्वा उत्तिष्ठन्ति । 'चौ' इति पूर्वपदस्यान्तोदात्तत्वम्, दीर्घत्वं च ॥

[11]दोषान्तरं दर्शयितुं तृतीयं पठति—यद्वा इति ॥ पराङ्

---

* अ–क्षेत्रादिकं.

ह्वयंते वज्रमेनमभि प्र वर्तयति पराङा वर्तते वज्रमेव तन्नि करोति ॥ ४१ ॥

उपयामगृहीतोसि वाक्षसदसि वा-

अभ्याह्वयंत इत्यभि—आह्वयंते । वज्रम् । एनम् । अभि । प्रेति । वर्तयति । पराङ् । एति । वर्तते । वज्रम् । एव । तत् । नीति । करोति ॥ ४१ ॥

सवनं वज्रमन्तर्धत्ते त्रीण्येतान्यक्षराणीन्द्रियं माध्यन्दिनꣳ सवनं नोद्धातृणामध्वर्युर्नेति वर्तयत्यष्टौ च ॥ ९ ॥

[1]उपयामगृहीत इत्युपयाम—गृहीतः । असि । वाक्षसदिति वाक्ष—सत् । असि । वाक्पाभ्यामिति

पराचीनगतिः आवर्तते यत आगतस्ततो गच्छति, तेन वज्रं निकरोति न्यक्करोति । 'अनिगन्तोञ्चतौ' इति गतेः प्रकृतिस्वरत्वम् ॥

इति तृतीये द्वितीये नवमोनुवाकः.

---

[1]द्विदेवत्यानां प्रतिनिर्ग्राह्यग्रहणमन्त्राः क्रमेण । ऐन्द्रवायवस्य —उपयामगृहीत इति ॥ 'इयं वा उपयामः'* इत्युक्तं, तयैव

*सं. ६-५-८.

क्षाभ्यां त्वा क्रतुपाभ्यांमस्य य-
ज्ञस्यं ध्रुवस्याध्यक्षाभ्यां गृह्णाम्युप-
यामगृहीतोस्यृतसदंसि चक्षुष्पाभ्यां
त्वा क्रतुपाभ्यांमस्य यज्ञस्यं ध्रुव-

वाक्-पाभ्यांम् । त्वा । क्रतुपाभ्यामिति क्रतु-पा-भ्यांम् । अस्य । यज्ञस्यं । ध्रुवस्यं । अध्यंक्षाभ्या-मित्यधि-अक्षाभ्याम् । गृह्णामि । [2]उपयामगृहीत इत्युंपयाम-गृहीतः । असि । ऋतसदित्यृत-सत् । असि । चक्षुष्पाभ्यामिति चक्षुः-पाभ्यांम् । त्वा । क्रतुपाभ्यामिति क्रतु-पाभ्यांम् । अस्य । यज्ञस्यं। ध्रुवस्यं । अध्यंक्षाभ्यामित्यधि-अक्षाभ्याम् । गृ-

---

गृहीतोसि । वाक्षसदसि वाक् क्षियति निवस्यत्यनयोरिति वाक्षौ इन्द्रवायू, तयोर्ग्रहो वाक्षः । यथोक्तं—'वाग्वा ऐन्द्रवायवः'* इति । छान्दसो डः । तद्गृहं सीदतीति वाक्षसत् । यद्वा—'वचिपचिभ्यो डश्च' इति वचेरसुन्, णाविति तत्रानुवर्तते वाक्षो वागिन्द्रियं, तत्र सीदतीति वाक्षसत्, बर्हिषदादिवत्स-लोपः । ईदृशस्त्वमसि, तं त्वां वाक्पाभ्यां वाचः पालयितृभ्यां क्रतुपाभ्यां क्रतोर्यज्ञस्य पालयितृभ्यां अस्य यज्ञस्य ध्रुवस्य अविनाशिफलस्य अध्यक्षाभ्यां स्वामिभ्यां इन्द्रवायुभ्यां गृह्णामि ॥

[2]मैत्रावरुणस्य—ऋतं सत्यं, 'चक्षुर्वै सत्यम्'† 'चक्षुर्मैत्रावरुणः'* इति चोक्तम् । मित्रावरुणाभ्यां गृह्णामि । गतमन्यत् ॥

---

*सं. ६-४-९. † ब्रा. ३-३-५.

स्याध्यक्षाभ्यां गृह्णाम्युपयामगृहीतोसि श्रुतसदसि श्रोत्रपाभ्यां त्वा क्रतुपाभ्यामस्य यज्ञस्य ध्रुवस्याध्यक्षाभ्यां गृह्णामि देवेभ्यस्त्वा विश्वदेवेभ्यस्त्वा विश्वेभ्यस्त्वा देवेभ्यो विष्णवुरुक्रमैष ते सोमस्तꣳ ह्णामि । [3]उपयामगृहीत इत्युपयाम–गृहीतः । असि । श्रुतसदिति श्रुत–सत् । असि । श्रोत्रपाभ्यामिति श्रोत्र–पाभ्याम् । त्वा । क्रतुपाभ्यामिति क्रतु–पाभ्याम् । अस्य । यज्ञस्य । ध्रुवस्य । अध्यक्षाभ्यामित्यधि–अक्षाभ्याम् । गृह्णामि । [4]देवेभ्यः । त्वा । [5]विश्वदेवेभ्य इति विश्व–देवेभ्यः । त्वा । [6]विश्वेभ्यः । त्वा । देवेभ्यः । [7]विष्णो । उरुक्रमेत्युरु–क्रम । एषः । ते । सोमः । तम् । रक्षस्व ॥४२॥

[3]आश्विनस्य—श्रुतं श्रवणम् । 'श्रोत्रमाश्विनः'* इत्युक्तम् । ताभ्यामश्विभ्यां गृह्णामीति ॥

[4–6]अथ द्विदेवत्यशेषाणामादित्यस्थाल्यामवनयनमन्त्राः क्रमेण — देवेभ्य इत्यादयः ॥ देवाः एकत्र, इतरत्र विश्वेदेवाख्यो गणः, अपरत्र सर्वे देवाः ॥

[7]आदित्यस्थाल्यामपिधानमन्त्रः—विष्णविति ॥ हे विष्णो उरुक्रम महाविक्रम एष ते तव सोमः । त्वमस्य गोपयिता,

*सं- ६-४-९.

रक्षस्व ॥ ४२ ॥ तं ते दुश्चक्षा माऽ-
व ख्यन्मयि वसुः पुरोवसुर्वाक्पा
वाचं मे पाहि मयि वसुर्विदद्वसुश्च-
क्षुष्पाश्चक्षुर्मे पाहि मयि वसुस्संय-

तम् । ते । दुश्चक्षा इति दुः–चक्षाः । मा । अवेति । ख्यत् । [8]मयि । वसुः । पुरोवसुरिति पुरः–वसुः । वाक्पा इति वाक्–पाः । वाचम् । मे । पाहि । [9]मयि । वसुः । विदद्वसुरिति विदत्–वसुः । चक्षुष्पा इति चक्षुः–पाः । चक्षुः । मे । पाहि । [10]मयि । वसुः । संयद्वसुरिति संयत्–वसुः । श्रोत्रपा

तस्मात्तं रक्षस्व तं ते त्वदीयं सोमं दुश्चक्षाः पापदृष्टिः माऽवख्यत् मा द्राक्षीत् । 'अस्यतिवक्तिख्यातिभ्योङ्' । दुष्टं चष्ट इति 'गतिकारकयोरपि' इत्यसुन्, पूर्वपदप्रकृतिस्वरस्य पाक्षिकत्वात्कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

[8]त्रयाणां भक्षणमन्त्राः—मयीत्यादि ॥ मयि वर्तते वसुः धनं सोमाख्यं पुरोवसुः पुरस्कृतेतरसमस्तधनः । यद्वा पुरस्ताद्वासयिता प्राणादीनां पुरस्सरः । स त्वं वाक्पाः वाचः पालयिता मे मम वाचं पाहि रक्षय । एवमुत्तरयोरपि ॥

[9]विदद्वसुः भजमानवसुः । विन्दतेः छान्दसो नुमभावः । कर्मणि वा लिटि यगात्मनेपदाभावश्छान्दसः ॥

[10]संयद्वसुः संगच्छद्वसुः ॥

हंसुश्श्रोत्रपाश्श्रोत्रं मे पाहि भूरंसि श्रेष्ठो रश्मीनां प्राणपाः प्राणं मे पाहि धूरंसि श्रेष्ठो रश्मीनामपानपा अपानं मे पाहि यो नं इन्द्रवायू मित्रावरुणावश्विनावभिदासंति भ्रा-

इति श्रोत्र–पाः । श्रोत्रम् । मे । पाहि । [11]भूः । असि । श्रेष्ठः । रश्मीनाम् । प्राणपा इति प्राण–पाः । प्राणमिति प्र–अनम् । मे । पाहि । [12]धूः । असि । श्रेष्ठः । रश्मीनाम् । अपानपा इत्यपान–पाः । अपानमित्यप–अनम् । मे । पाहि । [13–15]यः । नः । इन्द्रवायू इतीन्द्र–वायू । मित्रावरुणाविति मित्रा–वरुणौ । अश्विनौ । अभिदासतीत्यभि–दास-

---

[11–12]उपांश्वन्तर्यामयोरनुमन्त्रणमन्त्रः—भूरिति ग्रहात्मा सोम उच्यते । भावयिता सुखानामसि । धूः हिंसिता दुःखानामसि ॥

[13–15]द्विदेवत्यानां होममन्त्राः क्रमेण—यो न इति तिस्रो जगत्यः । त्रिष्टुब्वा तृतीया । तत्र त्रयाणां देवतापदानां भेदेन शेष इतरः । तेन 'यो न इन्द्रवायू अभिदासति' इति प्रथमा । 'यो नो मित्रावरुणावभिदासति' इति द्वितीया । 'यो न अश्विनावभिदासति' इति तृतीया । तत्र प्रथमा ॥ हे न्द्रवायू यो नः अभिदासति हिनस्ति । दासृ दाने, अभिपूर्वो साकर्मा । यद्वा—दसु अपक्षये, व्यत्ययेन शप्, स्वरविकार-

तृंव्य उत्पिपींते शुभस्पती इदमहं
तमधरं पादयामि यथेन्द्राहमुत्तमश्चे-
तयानि ॥ ४३ ॥

ति । भ्रातृंव्यः । उत्पिपींत इत्युत्–पिपींते । शुभः । पती इति । इदम् । अहम् । तम् । अधरम् । पादयामि । यथा । इन्द्र । अहम् । उत्तम इत्युत्–तमः । चेतयानि ॥ ४३ ॥

रक्षस्व भ्रातृंव्यस्त्रयोदश च ॥१०॥

श्छान्दसः । भ्रातृव्यश्शत्रुः । 'व्यन्सपत्ने' । उत्पिपीते उत्क्रम्यामार्गेण सोमं पिबति । पीङ् पाने, दैवादिकः, 'बहुलं छन्दसि' इति शपश्लुः । पिबतेरेव वा पूर्ववत् श्लुः, व्यत्ययेनात्मनेपदम्, 'ईहल्यघोः, इतीत्वम्, 'बहुलं छन्दसि' इत्यभ्यासस्येत्वम्, 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वं अनजादावपि व्यत्ययेन । शुभस्पती शुभस्य कर्मणः पालयिता । क्विबन्तात् षष्ठी, 'षष्ठ्याः पतिपुत्र' इति सत्वम्, छान्दसष्षष्ठ्या अलुक् । इदमिति क्रियाविशेषणम् । तं भ्रातृव्यं अधरं पादयामि अपकृष्टतां नयामि यथाकृते अहमुत्तम उद्गततमश्चेतयानि जानाम्यात्मानं हे इन्द्र । यद्वा—यथा अधरं पादयामि तथा हे इन्द्र त्वमपि कुरु, अहमुत्तमश्चेतयानि चेतयिता भूयासमिति प्रार्थयते । एवमुत्तरयोरपि द्रष्टव्यम् । उत्तमशब्द उत्सादित्वादन्तोदात्तः ॥

इति तृतीये द्वितीये दशमोनुवाकः.

प्र सो अग्ने तवोतिभिस्सुवीराभिस्तरति वाजकर्मभिः । यस्य त्वꣳ सख्यमाविथ । प्र होत्रे पूर्व्यं वचोग्नये

[1]प्रेति । सः । अग्ने । तवं । ऊतिभिरित्यूति—भिः । सुवीराभिरिति सु—वीराभिः । तरति । वाजकर्मभिरिति वाजकर्म—भिः । यस्य । त्वम् । सख्यम् । आविथ । प्रेति । होत्रे । पूर्व्यम् । वचः ।

---

[1]अस्ति त्रैधातवीयेष्टिः । 'सर्वाणि छन्दांस्येतस्यामिष्ट्यामनूच्यानीत्याहुः'* इति । तस्यां धाय्ये द्वे—प्र सो अग्ने इति प्रथमा ककुबुष्णिक्; द्वितीयस्य पादस्य द्वादशाक्षरत्वात् ॥ हे अग्ने तवोतिभिः रक्षाभिः । 'ऊतियूति' इति क्तिन उदात्तत्वं निपात्यते । सुवीराभिः शोभनपुत्राद्यपत्यहेतुभिः । 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम् । वाजकर्मभिः वाजस्यान्नस्य साधनानि कर्माणि भवन्ति यासु सतीषु तादृशीभिः त्वत्कर्तृकाभिरूतिभिः प्रतरति प्रकर्षेण तरति सामर्थ्याद्दुःखं संसारदुःखं वा स पुरुषः । कः? यस्य सख्यं समानख्यानतां समानभोजनतां तेन यष्टव्यतां त्वं आविथ आरक्षितवानसि गतवानित्यर्थः । 'थलि च सेटीडन्तो वा' इत्याद्युदात्तत्वम् ॥

[2]अथ द्वितीया—प्र होत्र इति परोष्णिक्; तृतीयस्य द्वादशाक्षरत्वात् ॥ होत्रे दैव्यायाग्नये पूर्व्यं 'पूर्वैः कृतमिनयौ च'

---

*सं. २-४-११[1].

भरता बृहत् । विपां ज्योतीꣳषि
बिभ्रते न वेधसे । अग्ने त्री ते वा-
जिना त्रीषधस्था तिस्रस्ते जिह्वा
ऋतजात पूर्वीः । तिस्र उ ते तनू-

अग्नये । भरत । बृहत् । विपामिति वि–पाम् । ज्योतीꣳषि । बिभ्रते । न । वेधसे । [3]अग्ने । त्री । ते । वाजिना । त्री । सधस्थेति सध–स्था । तिस्रः । ते । जिह्वाः । ऋतजातेत्यृत–जात । पूर्वीः । तिस्रः । उ । ते । तनुवः । देववातेति देव–वाताः ।

इति यत् । यादृशं पूर्वैः कृतं तादृशं बृहत् महत् वचस्तुतिलक्षणं प्रभरत प्रकर्षेण कुरुत । 'अन्येषामपि दृश्यते' इति संहितायां दीर्घत्वम् । अग्निर्विशेष्यते—विपां विविधं रक्षितुं शीलवतां आदित्यचन्द्रग्रहादीनां ज्योतींषि बिभ्रते न बिभ्रत इव महतेजसे वेधसे विधात्रे विश्वस्य । बिभ्रतेश्शतरि 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्, विपूर्वात्पातेः 'अन्येषामपि दृश्यते' इति विचि कृदुत्तरपदप्रकृतिस्वरत्वे आतो लोपे च कृते उदात्तनिवृत्तिस्वरेणाम उदात्तत्वम् । विदधेरसुनि नञ्विषयत्वाभावादुदात्तत्वाभावः ॥

[3]अथ तस्या एव परिधानीया—अग्ने त्रीति त्रिष्टुप् ॥ 'त्रिवत्या परि दधाति'* इति च ब्राह्मणम् । हे अग्ने ते तव त्री त्रीणि वाजिना अन्नानि, अस्यामेवेष्टौ 'त्रयः पुरोडाशा भवन्ति'† इत्युक्तत्वात् । यद्वा—सोमौषधिसान्नाय्यात्मना त्रित्वम् ।

*सं. २-४-११[4]. †सं. २-४-११[9].

वो॑ देववा॒तास्ताभि॑र्नः पाहि॒ गिरो॒ अप्र॑युच्छन्। सं वां॑ कर्म॑णा॒ समि॒षा ॥ ४४ ॥ हि॒नो॒मीन्द्रा॑विष्णू अ-

ताभि॑ः। नः॒। पा॒हि॒। गिरः॑। अप्र॑युच्छ॒न्नित्यप्र॑—यु-च्छ॒न्। [4]समि॑ति॑। वा॒म्। कर्म॑णा। समि॑ति॑। इ॒षा ॥ ४४ ॥ हि॒नो॒मि॒। इन्द्रा॑विष्णू॒ इतीन्द्रा॑—वि॒ष्णू॒।

'शेश्छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । त्री त्रीणि सधस्था सधस्थानि पृथिव्यन्तरिक्षद्युलोकाः । 'सधमादस्थयोः' इति सधादेशः, सांहितिकं षत्वं छान्दसं, सुषामादित्वाद्वा । तिस्रस्ते तव जिह्वाः त्रिष्वपि स्थानेषु और्ववैद्युतादित्यात्मिकाः । हे ऋतजात यज्ञार्थं जात पूर्वीः चिरन्तन्यः चौरादिर्द्रष्टव्यः, 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । तिस्र इति तिस्र एव तव तनुवः शरीराणि अग्निविद्युदादित्यात्मिकाः तिस्रस्तनवः अन्तस्थितस्य देवतात्मनः देववाताः देवैस्सर्वैरपि गताः अनुप्रविष्टाः सर्वदेवतामय इत्यर्थः । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् । संभक्ता वा देवैः । परमप्यनुनासिकलोपं बाधित्वा 'अनुनासिकस्य क्विझलोः' इति दीर्घत्वं व्यत्ययेन प्रवर्तते, ततोनुनासिकलोपः । ताभिरनन्ताभिः नोस्माकं गिरः स्तुतिलक्षणाः पाहि रक्ष फलवतीः कुरु अप्रयुच्छन् अप्रमादयन् अविच्छेदेन अस्मान् यज्ञेषु प्रवर्तयन् । यद्वा—ताभिरस्मान्पाहि गिरो वा अस्मदीया अप्रयुच्छन्निति । युच्छ प्रमादे । यद्वा—ताभिस्सर्वैः वाजिनादिभिः । नपुंसकस्य शेषे प्राप्ते व्यत्ययेन स्त्रियाश्शेषः ॥

[4]अथ तस्यामेव पुरोनुवाक्या—सं वामिति त्रिष्टुप् ॥ हे इन्द्रा-

पंसस्पारे अस्य । जुषेथां यज्ञं द्रविं-
णं च धत्तमरिष्टैर्नः पथिभिः पारयं-
न्ता । उभा जिग्यथुर्न परा ज-

अपंसः । पारे । अस्य । जुषेथाम् । यज्ञम् । द्रविं-
णम् । च । धत्तम् । अरिष्टैः । नः । पथिभिरिति
पथि-भिः । पारयन्ता । उभा । जिग्यथुः । न ।
परेति । जयेथे इति । न । परेति । जिग्ये । कत-

विष्णू कर्मणा शारीरेण प्रणिपातादिना मानसेन भक्त्यादिना वाचिकेन स्तुतिलक्षणेन वां युवां संहिनोमि संगच्छामि । हि गतौ, यद्वा—संप्रीणयामि । हिवि प्रीणने, व्यत्ययेन प्रत्ययः, अकारश्चान्तादेशः । इषा अन्नेन हविर्लक्षणेन संहिनोमीत्येव । किमर्थम् ? अस्यापसः कर्मणः पारे पारनिमित्तं, पारस्समाप्तिः, अविघ्नसमाप्तयर्थम् । 'षष्ठचाः पतिपुत्र' इत्यादिना सत्वम् । युवामपि यज्ञमिमं जुषेथां सेवेथाम् । सेवित्वा च द्रविणं धनमस्माकं धत्तम् । अरिष्टैः अनुपहिंसितैः पथिभिर्मार्गैः नः अस्मान् पारयन्ता पारयन्तौ कर्मणः पारं प्रापयन्तौ । 'सुपां सुलुक्' इत्याकारः, पार तीर कर्मसमाप्तौ, ॥

तत्रैव याज्या—उभेति त्रिष्टुप् ॥ हे विष्णो त्वं चेन्द्रश्च युवामुभा उभौ जिग्यथुः सर्वदा जयथ । छान्दसो लिट्, 'सनलिटोर्जेः' इति कुत्वम् । न कदाचिदपि पराजयेथे अन्येन न जीयेथे । 'विपराभ्यां जेः' इत्यात्मनेपदम् । तथाहीत्याह—

येथे न परा जिग्ये कतरश्चनैनोः। इन्द्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथाम्। त्रीण्यायूंषि

रः। चन। एनोः। इन्द्रः। च। विष्णो इति। यत्। अपस्पृधेथाम्। त्रेधा। सहस्रम्। वीति। तत्। ऐरयेथाम्। [6]त्रीणि। आयूंषि। तव।

एनोरिति। एनयोरिन्द्राविष्णवोः। एनादेशे कृते व्यत्ययेन 'ओसि च' इत्येत्वाभावे अतो गुणे पररूपत्वम्। एनयोर्मध्ये कतरश्चन अन्यतरोपि न पराजिग्ये न पराजयते पराजयं न प्राप्तवान्। पूर्ववदात्मनेपदम्, कुत्वं च। कदेत्याह—यत् यदा अपस्पृधेथां तदा उभा जिग्यथुः। 'अपस्पृधेथामानृचुः' इति लिङि द्विर्वचनं संप्रसारणं च निपात्यते। यद्वा—यत् यदा अपस्पृधेथां तत् तदा सहस्रं दक्षिणाः त्रेधा व्यैरयेथां त्रेधा सहस्रं व्यभजेथाम्। 'त्रेधा विभक्तं वै त्रिरात्रे सहस्रम्'* इति। यद्वा—यदर्थं युवां स्पर्धेथे तत्सहस्रं बहुमतं हविः त्रेधा विभजेथाम् 'त्रयः पुरोडाशा भवन्ति'† इति॥

[6]तस्यामेव याज्यास्तिस्रो विकल्प्यन्ते। तत्र प्रथमा त्रिष्टुप्। उत्तरे गायत्र्यौ। हे जातवेदः जातधन जातानां वा वेदितः तव त्रीण्यायूंषि अन्नानि त्रिषु स्थानेषु द्युवियदवनिषु आहुतितोयकाष्ठानि। किंच—हे अग्ने तव तिस्र आजानी आजानयः

---

*सं.-७-१-६. †सं. २-४-११[१].

तवं जातवेदस्तिस्र आजानीरुषसस्ते अग्ने । ताभिर्देवानामवो यक्षि विद्वानथ ॥ ४५ ॥ भव यजमानाय शं योः । अग्निस्त्रीणि त्रिधातून्या

जातवेद इति जात–वेदः । तिस्रः । आजानीरित्या–जानीः । उषसः । ते । अग्ने । ताभिः । देवानाम् । अवः । यक्षि । विद्वान् । अथ ॥ ४५ ॥ भव । यजमानाय । शम् । योः । [7]अग्निः । त्रीणि ।

प्रादुर्भावाः सूर्यविद्युदग्निरूपेण । आङ्पूर्वाज्जनेरिङ् *'अजादिभ्यः' इति निप्रत्ययो वा । आत्वं छान्दसं, पूर्वसवर्णदीर्घत्वम् । किंच—उषसश्च तव तिस्र इत्येव त्रिप्रकारा इत्यर्थः । ताभिरनन्ताभिः उषोभिः सर्वैरनुक्रान्तैः आयुरादिभिः । पूर्ववद्वचत्ययेन स्त्रियाश्शेषः । देवानां अवः तृप्तिं अन्नं वा हविर्लक्षणं यक्षि यज संगमय । यजेर्लेटि शपो लुक् । कर्मणस्संप्रदानत्वाद्देवानामिति चतुर्थ्यर्थे षष्ठी । विद्वान् तत्प्रकारज्ञः । अथ अनन्तरं च भव यजमानाय शं शमयिता रोगाणामागतानां योः यावयिता पृथक्कर्ता च भयानाम् । शाम्यतेः यौतेश्च विच् । 'निपातस्य च' इत्यथशब्दस्य दीर्घत्वम् ॥

[7]अथ द्वितीया—अग्निस्त्रीणीति ॥ त्रीणि तानि द्युवियदवनिरूपाणि । कीदृशानि? त्रिधातूनि देवानां हविर्धारणपरंपरया

---

* जानतेरिति चाजातिभ्य इतीङ् .

क्षेति विदथा कविः । स त्रीꣳरेका-
दशाꣳ इह । यक्षच्च पिप्रयच्च नो वि-
प्रो दूतः परिष्कृतः । नभन्तामन्यके

त्रिधातूनीति त्रि-धातूनि । एति । क्षेति । विदथा ।
कविः । सः । त्रीन् । एकादशान् । इह । [8]यक्षत् ।
च । पिप्रयत् । च । नः । विप्रः । दूतः । परिष्कृ-

सर्वस्य लोकस्य त्रिधात्वात्मकानि । आक्षेति आगच्छति आवसति वा अग्निः । 'त्रयः पुरोडाशा भवन्ति त्रय इमे लोका एषां लोकानामाप्त्या उत्तरउत्तरो ज्यायान्भवत्येवमिव हीमे लोका यवमयो मध्ये'* इति त्रि प्रकारत्वं तेषाम् । त्रिचक्रादित्वादुत्तरपदाद्युदात्तत्वम्, क्षि निवासगत्योः, शपो लुक् । विदथा विदथेषु यज्ञेषु । विदेरथच्प्रत्ययः, 'सुपां सुलुक्' इत्याकारः । स त्रीनप्येकादशान् गणान् इह पृथिवीस्थाने एव तत्तत्स्थानस्थितानाक्षेति च । 'ये देवा दिव्येकादश स्थ'† इत्युक्तत्वात् 'त्रिंशत्त्रयश्च गणिनः'† इति । उभयत्रापि 'दीर्घादटि समानपादे' इति रुत्वम्, अनुनासिकश्च । एकादशपूरणा एकादशाः । कविः क्रान्तदर्शनः नोस्माकं अभिप्रेतं साधयत्विति ॥

[8]अथ तृतीया—यक्षदिति ॥ यक्षत् यजतु देवान् । यजेर्लेटि 'सिब्बहुलं लेटि' इति सिप् । पिप्रयच्च तर्पयतु च नः अस्मान्, सम्यग्यागनिर्वृत्त्या देवांश्च । प्रीञ् तर्पणे, लेटि शप-

---

*सं. २-४-११.[9] † सं १-४-१०, ११[1]

**सꣳमे। इन्द्रा॑विष्णू दृꣳहि॒ताꣳश॒म्ब॑-
र॒स्य॒ नव॒ पुरो॑ नव॒तिं च॑ श्नथिष्टम्।
श॒तं व॒र्चिन॑स्स॒हस्रं॑ च सा॒कꣳ ह॒थो**

**तः। नभ॑न्ताम्। अ॒न्य॒के। स॒मे। [१]इन्द्रा॑विष्णू
इतीन्द्रा॑–वि॒ष्णू॒। दृ॒ꣳ॒हि॒ताः। श॒म्ब॑रस्य। नव॑।
पुरः॑। न॒व॒तिम्। च॒। श्न॒थि॒ष्ट॒म्। श॒तम्। व॒र्चिनः॑।
स॒हस्र॑म्। च॒। सा॒कम्। ह॒थः। अप्र॑ति। असु॑र-**

श्लुः, 'लेटोडाटौ' इत्यडागमः, समानवाक्ये निघातविधानेन पदात्परत्वाभावान्निघाताभावः। विप्रः मेधावी अग्निः दूतः देवानां परिष्कृतः अङ्गीकृतः समवेतो वा। 'संपर्युपेभ्यः' इति, 'समवाये च' इति सुट्, 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। अन्यके अरयः। कुत्सायां कः। समे सर्वेऽप्यस्मदीयाः नभन्तां नश्यन्तु। नभ हिंसायां, व्यत्ययेन शबात्मनेपदत्वम्। 'समसिमेत्यनुज्ञानि'॥

[१]पुनरपि हविषः पुरोनुवाक्या, याज्या च विकल्पार्थे—इन्द्राविष्णू इति त्रिष्टुभौ॥ तत्र पुरोनुवाक्या—हे इन्द्राविष्णू युवां शम्बरस्य असुरस्य नव नवतिं च पुरः नगरीः दंहिताः दृढाः श्नथिष्टं नाशितवन्तौ। श्नथ हिंसायां, लुङि 'बहुलं छन्दसि' इत्यडभावः। किञ्च—तासु वर्चिनः दीप्तिशीलान् शतं सहस्रं च असुरस्य शम्बरस्य वीरान् प्रधानभूतान् साकं एकेन प्रहारेण हथः नाशितवन्तौ युवाम्, अप्रति अप्रतिपक्षौ यथा भवति तथा। 'नञ्सु-

अंप्रत्यसुंरस्य वीरान् । उत माता
महिषमन्ववेनदमी त्वां जहति पुत्र
देवाः । अथाब्रवीद्वृत्रमिन्द्रो हनिष्य-

स्य । वीरान् । [10]उत । माता । महिषम् । अन्वि-
ति । अवेनत् । अमी इति । त्वा । जहति । पुत्र ।
देवाः । अथ । अब्रवीत् । वृत्रम् । इन्द्रः । हनि-

भ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । एवं महाप्रभावौ युवां अस्मदभिप्रेतं साधयतमिति ॥

[10]अथ याज्या—उतेति ॥ उत अपि च माता देवमाता महिषं महनीयं महान्तं वा पुत्रं अन्ववेनत् अनुक्रमेण उद्दीपितवती ज्ञापितवतीत्यर्थः । माता विज्ञापितवती स्वयं च ज्ञातवानित्यर्थः । वेनतिः कान्तिकर्मा । अथ माता पुत्रमब्रवीत्—हे पुत्र अमी देवाः त्वां जहति त्यजन्ति त्वया तूष्णीमास्यते इति । अथानन्तरं विदितार्थोभिमुखो भूत्वा पुत्रं हनिष्यन् इन्द्रो विष्णुमब्रवीत् । एवं विदितार्थं वा विष्णुं इन्द्रोब्रवीत् । किमब्रवीत्? हे सखे विष्णो वितरं विक्रान्ततरं विक्रमस्व जहि शीघ्रं शत्रुमिति । 'अमु च छन्दसि' इत्यमुप्रत्ययः । तौ वाऽस्मदभिमतं साधयतमिति । एवं शत्रुमारणख्यापनप्रधानमिदं

न्त्सखे विष्णो वितरं वि क्रमस्व ॥
॥ ४६ ॥

ष्यन्न्। सखे। विष्णो इति। वितरमिति वि—तरम्।
वीति। क्रमस्व ॥ ४६ ॥

इषाऽर्थं त्वा त्रयोदश च ॥ ११ ॥

यो वै पवमानानां त्रीणि परिभूस्स्फ्यस्स्व-
स्तिर्भक्षेहि महीनां पयोसि देव सवितरेतत्ते
श्येनाय यद्वै हेतोपयामगृहीतोसि वाक्षस-
त्प्रसो अग्न एकादश ॥११॥

यो वै स्फ्यस्स्वस्तिस्स्वधाये नमः प्र मुञ्च
तिष्ठतीव षट्त्वारिꣳशत् ॥ ४६ ॥

यो वै पवमानानां वि क्रमस्व ॥

हरिः ओं तत्सत् ॥

युगळं अभिचरतोभिचर्यमाणस्य वा युक्तमिति लक्ष्यते यथा—
'त्रैधातवीयेन यजेताभिचरन्'* इत्यादि ॥

इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये
तृतीयकाण्डे द्वितीयप्रश्ने एकादशोनुवाकः.

समाप्तश्च प्रपाठकः.

सं. २-४-११[5].

अग्ने तेजस्विन्तेजस्वी त्वं देवेषु भूयास्तेजस्वन्तं मामायुष्मन्तं वर्चस्वन्तं मनुष्येषु कुरु दीक्षायै च

[1]अग्ने । तेजस्विन् । तेजस्वी । त्वम् । देवेषु । भूयाः । तेजस्वन्तम् । माम् । आयुष्मन्तम् । वर्चस्वन्तम् । मनुष्येषु । कुरु । [2]दीक्षायै । च । त्वा । तपसः । च । तेजसे । जुहोमि । [3]तेजोविदिति ते-

---

अथ तृतीये तृतीयप्रपाठकः.

[1]अथातिग्राह्यमाणमाग्नेयगृहीतं होष्यन्नवेक्षते*—अग्ने तेजस्विन्निति ॥ हे अग्ने तेजस्विन् अतिशयेन दीप्तिमन् त्वं देवेषु मध्ये एवं सर्वदा तेजस्वी भूयाः भक्तचतिशयेन विच्छेदभीरुरेवाशास्ते । मामपि मनुष्येषु मध्ये तेजस्वन्तं अन्येभ्योधिकदीप्तिमन्तं आयुष्मन्तं दीर्घायुषं, अन्येभ्योपि वाऽधिकमन्नवन्तं वर्चस्वन्तं महाबलं महान्तं वा कुरु ॥

[2]जुहोति—दीक्षायै दीक्षायास्तपस उपवासादेश्च सकाशात् यत्तेज उत्पद्यते तन्मे भूयादिति त्वां जुहोमि ॥

[3]हुत्वा वाचयति—तेजोविदसीति ॥ तेजसो वेत्ता लब्धा लम्भयिता वा त्वमसि, त्वत्संबन्धात् मां तेजो मा हासीत् मा त्याक्षीत् ।

---

* ग—अथातिग्राह्याणामाग्नेयादीनां मन्त्राः.

त्वा तपसश्च तेजसे जुहोमि तेजो-
विदसि तेजो मा मा हासीन्माऽहं
तेजो हासिषं मा मां तेजो हासी-
दिन्द्रौजस्विन्नोजस्वी त्वं देवेषु भू-
या ओजस्वन्तं मामायुष्मन्तं वर्च-
स्वन्तं मनुष्येषु कुरु ब्रह्मणश्च त्वा
क्षत्रस्य च ॥ १ ॥ ओजसे जुहो-

जः—वित् । असि । तेजः । मा । मा । हासीत् । मा । अहम् । तेजः । हासिषम् । मा । माम् । तेजः । हासीत् । [4]इन्द्र । ओजस्विन् । ओजस्वी । त्वम् । देवेषु । भूयाः । ओजस्वन्तम् । माम् । आयुष्मन्तम् । वर्चस्वन्तम् । मनुष्येषु । कुरु । [5]ब्रह्मणः । च । त्वा । क्षत्रस्य । च ॥ १ ॥ ओजः-

---

जहातेः लुङि 'यमरमनमातां सक्च' इति सगिटौ । इदानीं तदहानं द्वेधा प्रार्थयते—माऽहमिति । तेजः तेजोविषया जिहासा मम मा भूत्, तेजसोपि मद्विषया जिहासा मा भूदिति ॥

[4]ऐन्द्रमवेक्षते—इन्द्रेति ॥ ओजो बलम् । गतमन्यत् ॥

[5]जुहोति—ब्रह्मण इति ॥ ब्रह्मभिः क्षत्रैश्च यदोज उत्पद्यते तन्मे भूयादिति त्वां जुहोमि ॥

म्योजोविद॒स्योजो॑ मा॒ मा हा॑सी॒-
न्माऽहमोजो॑ हासिषं॒ मा मामोजो॑
हासीत्सूर्य॑ भ्राजस्विन्भ्राज॒स्वी त्वं
दे॒वेषु॑ भूया॒ भ्राज॑स्वन्तं मामायु॒ष्म-
न्तं॒ वर्च॑स्वन्तं मनु॒ष्ये॑षु कुरु वा॒यो-
श्च॑ त्वाऽपां च॒ भ्राज॑से जुहोमि सुव॒-
र्विद॑सि॒ सुव॑र्मा॒ मा हा॑सी॒न्माऽह॒॰

से । जुहोमि । [6]ओजोविदित्योजः-वित् । असि । ओजः । मा । मा । हासीत् । मा । अहम् । ओजः । हासिषम् । मा । माम् । ओजः । हासीत् । [7]सूर्य । भ्राजस्विन् । भ्राजस्वी । त्वम् । देवेषु । भूयाः । भ्राजस्वन्तम् । माम् । आयुष्मन्तम् । वर्चस्वन्तम् । मनुष्येषु । कुरु । [8]वायोः । च । त्वा । अपाम् । च । भ्राजसे । जुहोमि । [9]सुवर्विदिति सुवः-वित् । असि । सुवः । मा । मा । हासीत् ।

---

[6]हुत्वा वाचयति—ओजोविदिति ॥ गतम् ॥

[7]अथ सौर्यमवेक्षते—सूर्य इति ॥ भ्राजो दीप्तिः समानमन्यत् ॥

[8]जुहोति—वायोरिति ॥ वायुना अद्भिश्च यद्भ्राजस्संपद्यते तन्मे भूयादिति त्वां जुहोमि ॥

[9]हुत्वा वाचयति—सुवर्विदिति ॥ गतम् । सुवः स्वर्गम् ॥

सुवर् हासिषं मा माꣳ सुवर् हासी-
न्मयि मेधां मयि प्रजां मय्यग्नि-
स्तेजो दधातु मयि मेधां मयि
प्रजां मयीन्द्र इन्द्रियं दधातु मयि
मेधां मयि प्रजां मयि सूर्यो भ्राजो
दधातु ॥ २ ॥

मा । अहम् । सुवः । हासिषम् । मा । माम् । सुवः । हासीत् । [10]मयि । मेधाम् । मयि । प्रजामिति प्र–जाम् । मयि । अग्निः । तेजः । दधातु । [11]मयि । मेधाम् । मयि । प्रजामिति प्र–जाम् । मयि । इन्द्रः । इन्द्रियम् । दधातु । [12]मयि । मेधाम् । मयि । प्रजामिति प्र–जाम् । मयि । सूर्यः । भ्राजः । दधातु ॥ २ ॥

क्षत्रस्य च मयि त्रयोविꣳशतिश्च ॥१॥

[10–12]त्रयाणां क्रमेण भक्षमन्त्राः—मयि मेधामित्याद्याः ॥ मेधा ग्रन्थार्थधारणसामर्थ्यम् । प्रजा पुत्रादिः । इन्द्रियं चक्षुरादि-शक्तिः । दधातु स्थापयतु । गतमन्यत् ॥

इति तृतीये तृतीये प्रथमोनुवाकः.

वायुर् हिंकर्ताऽग्निः प्रस्तोता प्रजा-
पतिस्साम बृहस्पतिरुद्गाता विश्वे
देवा उपगातारो मरुतः प्रतिहर्तार
इन्द्रो निधनं ते देवाः प्राणभृतः
प्राणं मयि दधत्वेतद्वै सर्वमध्व-

[1]वायुः । हिंकर्तेति हिं—कर्ता । अग्निः । प्रस्तोतेति प्र—स्तोता । प्रजापतिरिति प्रजा—पतिः । साम । बृहस्पतिः । उद्गातेत्युत्—गाता । विश्वे । देवाः । उपगातार इत्युप—गातारः । मरुतः । प्रतिहर्तार इति प्रति—हर्तारः । इन्द्रः । निधनमिति नि—धनम् । ते । देवाः । प्राणभृत इति प्राण—भृतः । प्राणमिति प्र—अनम् । मयि । दधतु । [2]एतत् । वै ।

---

[1]अथ स्तोत्रोपाकरणं जपति—वायुरिति ॥ हिंकर्ता हिंकारस्य कर्ता वायुर्भवति, प्रस्तोता प्रस्तुवन्नग्निर्भवति । प्रस्तावो गानस्य प्रारम्भः । साम गानं तत्स्वयं प्रजापतिर्भवति, उद्गाता बृहस्पतिर्भवति, उपगातारो विश्वेदेवा भवन्ति, प्रतिहर्तारो मरुतो भवन्ति, निधनं साम्न इन्द्रो भवति । ते वाय्वादयो हिंकर्त्राद्यादिनो देवाः प्राणभृतः साम्नः प्राणं बलं आत्मानं वा बिभ्रतीति प्राणभृतः मयि प्राणं दधतु स्थापयतु । जातावेकवचनम् । प्राणापानादीन् चक्षुश्श्रोत्रादींश्चेति ॥

[2]अथात्र ब्राह्मणम्—एतद्वा इत्यादि ॥ एतत्सर्वमेतानि सर्वा-

र्युरुपाकुर्वन्नुद्गातृभ्य उपाकरोति ते देवाः प्राणभृतः प्राणं मयि दधत्वित्याहैतदेव सर्वमात्मन्धत्त इडां

सर्वम् । अध्वर्युः । उपाकुर्वन्नित्युप–आकुर्वन् । उद्गातृभ्य इत्युद्गातृ–भ्यः । उपाकरोतीत्युप–आकरोति । ते । देवाः । प्राणभृत इति प्राण–भृतः । प्राणमिति प्र–अनम् । मयि । दधतु । इति । आह । एतत् । एव । सर्वम् । आत्मन् । धत्ते । [3]इडां ।

णि वाग्व्याद्यात्मकानि हिंकर्त्रादीनि उपाकरोति साग्नि प्रवर्तयत्यध्वर्युः । किं कुर्वन्? उद्गातृभ्य उपाकुर्वन् उपाकरणमिदं जपन् । 'नपुंसकमनपुंसकेन' इति नपुंसकैकशेषः, एकवद्भावश्च । किं चायमध्वर्युः ते देवाः प्राणभृतः प्राणं मयि दधत्वित्याह । यस्मादेवमाह, तस्मादेतत्सर्वं हिंकर्त्रादीनि सर्वाण्यपि आत्मन् धत्ते आत्मनि स्थापयति स्वयमेव हिंकर्त्रादिना प्रतिपद्यते । 'सुपां सुलुक्' इति सप्तम्याः लुकि 'न ङिसम्बुद्ध्योः' इति नलोपाभावः ॥

[3]आर्त्विज्यं वा करिष्यन् शस्त्रं वा प्रतिगरिष्यन् जपति—इडेति ॥ इडा दैवी गौर्वा प्रष्टिर्वा, यामुपह्वयते सा देवहूः देवानामाह्वाता होता । यद्वा—सा देवानां मनुर्यज्ञनीः यज्ञस्य नेता मनुः प्रजापतिः वा बृहस्पतिरुक्थामदानि शस्त्रप्रतिगरादीनि शंसिषत् शंसति शस्त्राणि शंसति मदान् प्रतिगरान् शंसति । शंसे-

देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदा-
नि शꣳसिषद्विश्वे देवाः ॥ ३ ॥
सूक्तवाचः पृथिवि मातर्मा मा हिꣳ-
सीर्मधु मनिष्ये मधु जनिष्ये मधु
वक्ष्यामि मधु वदिष्यामि मधुमतीं

देवहूरिति देव–हूः । मनुः । यज्ञनीरिति यज्ञ–नीः । बृहस्पतिः । उक्थामदानीत्युक्थ–मदानि । शꣳसिषत् । विश्वे । देवाः ॥ ३ ॥ सूक्तवाच इति सूक्त–वाचः । पृथिवि । मातः । मा । मा । हिꣳसीः । मधु । मनिष्ये । मधु । जनिष्ये । मधु । वक्ष्यामि । मधु । वदिष्यामि । मधुमतीमिति म-

---

र्लेटि 'सिब्बहुलं लेटि' इति सिप् । उक्थशब्दस्य संहितायां छान्दसं दीर्घत्वम् । विश्वेदेवाः सूक्तवाचः सूक्तवाकस्य वक्तारः सूक्तं सूक्तवाकः, तद्वन्तीति सूक्तवाचः । 'क्विब्वचि' इत्यादिना क्विप्दीर्घत्वे । यस्मादेवं सर्वमेतदिडादयः कुर्वन्ति तस्मात्सत्यपि प्रमादे न मे कश्चिदपराधः । तस्मात् हे पृथिवि मातः सर्वस्य रक्षिके मा मा हिंसीः । अहं तु मधु मनिष्ये मधुवदेव मनसा चिन्तयिष्यामि । मधुवदेव जनयिष्यामि मधुवदेव वक्ष्यामि युष्मान् प्रापयिष्यामि । वह प्रापणे । मधुवदेव वाचा वदिष्यामि । सर्वत्र प्रमादाभाव एव मधुमत्त्वं वेदितव्यम् । देवेभ्यो मधुमतीं मधुवदनहेतुं न केवलमप्रमादां वाचं उद्यासं

देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां
मनुष्येभ्यस्तं मा देवा अवन्तु शो-
भायै पितरोऽनु मदन्तु ॥ ४ ॥
वसवस्त्वा प्र वृहन्तु गायत्रेण छ-

धुं–मतीम् । देवेभ्यः । वाचम् । उद्यासम् । शुश्रू-
षेण्याम् । मनुष्येभ्यः । तम् । मा । देवाः । अव-
न्तु । शोभायै । पितरः । अन्विति । मदन्तु ॥४॥

शꣳसिषद्विश्वे देवा अष्टाविꣳशतिश्च ॥ २ ॥

[1]वसवः । त्वा । प्रेति । वृहन्तु । गायत्रेण ।

वदितुं समर्थो भूयासम् । 'किदाशिषि' इति किन्वात् 'वचि-स्वपि' इति संप्रसारणम् । मनुष्येभ्यः शुश्रूषेण्यां श्रवणीयां श्रुति-सुखहेतुं वाचं उद्यासमित्येव । उभयत्रापि षष्ठ्यर्थे चतुर्थी । सन-न्तादौणादिक एण्यप्रत्ययः । तं मामेवंगुणं देवा अवन्तु रक्षन्तु शोभायै यथा मया कृतं शोभते तथा अनुमदन्तु अनुमोदन्ताम्, उत्कृष्टत्वेन समीचीनं करोतीति शोभार्थं पितरश्च अनुमोदन्तु । माद्यतेर्व्यत्ययेन शप् ॥

इति तृतीये तृतीये द्वितीयोनुवाकः.

[1–3]उपनद्धस्य राज्ञस्त्रीनंशून्प्रवृहति—वसव इति ॥ वसवस्त्वा प्रवृहन्तु पृथक्कुर्वन्तु । वृहू उद्यमने । गायत्रेण छन्दसा कर-

न्दसाऽग्नेः प्रियं पाथ उपेहि रुद्रा-
स्त्वा प्र वृहन्तु त्रैष्टुभेन छन्दसेन्द्रस्य
प्रियं पाथ उपेह्यादित्यास्त्वा प्र वृ-
हन्तु जागतेन छन्दसा विश्वेषां दे-
वानां प्रियं पाथ उपेहि मान्दासु ते

छन्दसा । अग्नेः । प्रियम् । पाथः । उपेति । इहि । [2]रुद्राः । त्वा । प्रेति । वृहन्तु । त्रैष्टुभेन । छन्दसा । इन्द्रस्य । प्रियम् । पाथः । उपेति । इहि । [3]आदित्याः । त्वा । प्रेति । वृहन्तु । जागतेन । छन्दसा । विश्वेषाम् । देवानाम् । प्रियम् । पाथः । उपेति । इहि । [4]मान्दासु । ते । शुक्र । शुक्रम् । एति । धू-

णेन । गायत्र्येव गायत्रम् । 'छन्दसि नपुंसके स्वार्थे उपसंख्यानम्' इत्यण् । स त्वं अग्नेः प्रियं पाथः अन्नं तद्वावं अपीहि उपगच्छ । एवं रुद्रास्त्वा, आदित्यास्त्वा । उभे अपि गते । त्रिष्टुब्जगतीशब्दात् उत्सादित्वादञ् ॥

[4]होतृचमसेन वसतीवरीभ्यो निषिच्य द्वादशभिराधावैराधूनोति—मान्दासु ते इत्यादिभिः ॥ आधूयते एभिरित्याधावाः । मान्दादीन्यपां नामानि द्वादश । 'एतद्वा अपां नामधेयं गुह्यं यदाधावाः'* इत्यादि च ब्राह्मणम् । मन्दं वहन्तीति मान्दाः । छान्दसस्स्वरः । मदकर्यो वा । मन्दतेर्वा

*सं. ३-३-४.[1]

शुक्र शुक्रमा धूनोमि भन्दनासु कोतनासु नूतनासु रेशीषु मेषीषु वाशीषु विश्वभृत्सु माध्वीषु नोमि । [5]भन्दनासु । [6]कोतनासु । [7]नूतनासु । [8]रेशीषु । [9]मेषीषु । [10]वाशीषु । [11]विश्वभृत्स्विति विश्वभृत्–सु । [12]माध्वीषु । [13]ककुहासु । [14]शक्करीषु ॥५॥

मान्दाः, पचाद्यचि स एव विकारः । तास्वप्सु हे शुक्र सोम ते तव शुक्रं रस*माधूनोमि चालयामि 'ते शुक्र' इत्यादि सर्वत्र भन्दनास्वादिष्वनुषज्यते ॥

[5]भन्दनासु कल्याणकरीषु । भदि कल्याणे, 'अनुदात्तेतश्च हलादेः' इति युच्प्रत्यये कृते उदात्तत्वम् ॥

[6]कोतनासु । छान्दसस्स्वरविकारः । कित ज्ञाने, नन्द्यादित्वाल्ल्युः । ज्ञानकरीषु ॥

[7]नूतनासु प्रत्यग्रासु । नवस्य नू आदेशः, तनच्प्रत्ययः ॥

[8]रेशीषु शीघ्रगमनेन भुवो हिंसिकासु । रुश रिश हिंसायां, पचाद्यच्, शार्ङ्गरवादिषु द्रष्टव्यः ॥

[9]मेषीषु स्पर्धिकासु । ततीषु† वा । मिष स्पर्धायाम् ॥

[10]वाशीषु शब्दवतीषु । वाशृ शब्दे, उभयत्रापि तावेव प्रत्ययौ ॥

[11]विश्वभृत्सु विश्वस्य धारिकासु ॥

[12]माध्वीषु मधुरसवतीषु । 'मधोर्ञ च' इति मत्वर्थे ञः, 'ऋत्व्यवास्तु' इत्यत्र गुणाभावो यणादेशो निपात्यते, पूर्ववत् ङीप्प्रत्ययः ॥

*अ—रूप. †अ—स्पर्धिकादिषु.

ककुहासु शक्वरीषु ॥ ५ ॥ शु-
क्रासु ते शुक्र शुक्रमा धूनोमि शु-
क्रं ते शुक्रेण गृह्णाम्यह्नो रूपेण
सूर्यस्य रश्मिभिः । आऽस्मिन्नुग्रा

[15]शुक्रासु । ते । शुक्र । शुक्रम् । एतं । धूनोमि । [16]शुक्रम् । ते । शुक्रेण । गृह्णामि । अह्नः । रूपेण । सूर्यस्य । रश्मिभिरितं रश्मि-भिः । एतं । अ-स्मिन् । उग्राः । अचुच्यवुः । दिवः । धाराः ।

---

[13]ककुहासु ककुभासु । वर्णव्यत्ययः, शब्दान्तरं वा ॥

[14]शक्वरीषु शक्तिमतीषु । शक्नोतेः क्वनिपि 'वनोर च' इति ङीब्रेफौ ॥

[15]शुक्रासु निर्मलासु वीर्यवतीषु वा । 'ते शुक्र' इत्यादि पुनराम्नायते अनुषङ्गसमाप्तिसूचनार्थम् ॥

[16]अथादाभ्यपात्रे अंशूनुपसंगृह्णाति—शुक्रं ते इति । 'आस्मिन्नुग्राः' इत्यादि द्विपदा गायत्री ॥ हे सोम तव शुक्रं वीर्यं शुक्रेण वीर्यवता सोमेन शुक्रात्मना सह गृह्णामि अंशुभिरन्तर्हितमित्यर्थः । अह्नो रूपेण रूपहेतुभिस्सूर्यस्य रश्मिभिः अंशुत्वसामान्याद्रूप्यते । अस्मिन्नुग्राः उद्गूर्णधाराः दिवः द्युलोकात् आचुच्यवुः आच्यवन्ताम् । छान्दसो लुङ्, शपः श्लुः, 'जुसि च' इति गुणः । किंच—असश्चत सश्चतां च पृथिवी । सश्चतिर्गतिकर्मा

अंचुच्यवुर्दिवो धारा असश्चत । क-
ककुहꣳ रूपं वृषभस्य रोचते बृहत्सो-
मस्सोमस्य पुरोगाश्शुक्रश्शुक्रस्य
पुरो गाः । यत्ते सोमादाभ्यं नाम जा-
गृवि तस्मै ते सोम सोमाय स्वाहो-

असश्चत । [17]ककुहम् । रूपम् । वृषभस्य । रोचते । बृहत् । सोमः । सोमस्य । पुरोगा इति पुरः—गाः । शुक्रः । शुक्रस्य । पुरोगा इति पुरः—गाः । [18]यत् । ते । सोम । अदाभ्यम् । नाम । जागृवि । तस्मै ।

स एव लुङ्, शपो लुक्, 'आत्मनेपदेष्वनतः' इत्यदादेशः ॥

[17]अथैनमादायोत्तिष्ठति—ककुहमिति परोष्णिहा स्वराजा ; प्रथमस्य द्वादशाक्षरत्वात्, द्व्यक्षराधिक्याच्च ॥ ककुहं रूपं प्रधानं रूपं वृषभस्य वर्षितुरिन्द्रस्य रोचते शोभते बृहत् महत् । 'एतद्वा अस्य ककुहं रूपं यद्वृष्टिः' इति ब्राह्मणम्* । उत्तराभ्यां पादाभ्यामेति—अयं सोमः सोमस्य राज्ञः पुरोगाः पुरस्ताद्गच्छतीति पुरोगाः शुक्रः रसात्मा शुक्रस्य सोमस्य इन्द्रस्य वा पुरोगाः प्रथमगामी । 'जनसनखन' इति विट् 'विड्वनोः' इत्यात्वम् ॥

[18]आहवनीये जुहोत्यन्वारब्धे यजमाने—यत्ते सोमेति द्विपदा जगती विराड्वा ॥ ग्रहेषु व्याख्याता† । हे सोम यत्ते अदा-

---

*सं. ३-३-४. †सं. १-४-१.[12]

शिक्तं देव सोम गायत्रेण छन्दसाऽग्नेः ॥ ६ ॥ प्रियं पाथो अपीहि वशी त्वं देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथो अपीह्यस्मत्सखेत्यस्मत्-

ते । सोम । सोमाय । स्वाहा । [19]उशिक् । त्वम् । देव । सोम । गायत्रेण । छन्दसा । अग्नेः ॥ ६ ॥ प्रियम् । पाथः । अपीति । इहि । [20]वशी । त्वम् । देव । सोम । त्रैष्टुभेन । छन्दसा । इन्द्रस्य । प्रियम् । पाथः । अपीति । इहि । [21]अस्मत्सखेत्यस्मत्-

---

भ्यमनुपहिंसितं जागृवि जागरणशीलं नाम, तस्मै सोमनाम्ने स्वाहेति ॥

[19]अथ प्रदक्षिणमावृत्य राजन्येवांशूनपिसृजति—उशिगिति ॥ हे देव द्योतनवन् सोम उशिक् कान्तस्त्वं सर्वेषां स्थिति*हेतुत्वात्सर्वैः कमनीयः । वशेरिङ्क्त्ययः । स त्वं गायत्रेण छन्दसा अग्नेः प्रियं पाथः अन्नं अपीहि यतस्त्वां प्रवृहन्तमेव सोममपीहि अनुप्रविश । एवमुत्तरयोरपि ॥

[20—21]वशी विधेयीकृतविश्वः अस्मत्सखा वयं सखायो यस्य, उपकारप्रत्युपकारभावेन समानाख्यानः तादृशस्त्वम् । त्रिष्टुब्जगतीशब्दयोरुत्सादित्वमुक्तम् । गतमन्यत् ॥

---

*ग—स्मृति.

स्मत्सखा त्वं देव सोम जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथो अपीह्या नः प्राण एतु परावत आऽन्तरिक्षाद्दिवस्परि। आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वा । इन्द्राग्नी

सखा । त्वम् । देव । सोम । जागतेन । छन्दसा । विश्वेषाम् । देवानाम् । प्रियम् । पाथः । अपीति । इहि । [22]एति । नः । प्राण इति प्र–अनः । एतु । परावत इति परा–वतः । एति । अन्तरिक्षात् । दिवः । परि । आयुः । पृथिव्याः । अधीति । अमृतम् । असि । प्राणायेति प्र–अनाय । त्वा । [23]इन्द्राग्नी

---

[22]अंशुं हुत्वा हिरण्यमभिव्यनक्ति—आ न इत्यनुष्टुभा ॥ नोस्मान् प्राण एतु आगच्छतु परावतः दूरादपि । 'उपसर्गाच्छन्दसि' इति वतिः । अन्तरिक्षात् अन्तरिक्षादप्युपरिस्थितः प्राण आगच्छतु । दिवः द्युलोकादप्युपरिष्टात् स्थितः प्राण एत्वित्येव । 'पञ्चम्याः परावध्यर्थे' इति सत्वम् । हे हिरण्य पृथिव्या अधि उपरि आयुः आयुर्हेतुः अमृतं अमृतत्वहेतुश्च त्वमसि । 'नञो जरमर' इत्युत्तरपदान्तोदात्तत्वत् । 'उदात्तयणः' इति पृथिव्या विभक्तेरुदात्तत्वम्, तादृशं त्वां प्राणाय प्राणस्थितये अवजिघ्रामीति ॥

[23]वेद्यन्तरद्विर्मार्जयते—इन्द्राग्नी इत्यनुष्टुब्भ्याम् । तत्र प्रथमा ॥ इन्द्राग्नी मे वर्चः बलं दीप्तिं वा कृणुताम् । 'धिन्विकृण्व्योर च'

मे वर्चः कृणुतां वर्चस्सोमो बृहस्पतिः । वर्चो मे विश्वे देवा वर्चो मे धत्तमश्विना । दधन्वे वा यदीमनु

इतीन्द्र—अग्नी । मे । वर्चः । कृणुताम् । वर्चः । सोमः । बृहस्पतिः । वर्चः । मे । विश्वे । देवाः । वर्चः । मे । धत्तम् । अश्विना । [24]दधन्वे । वा । यत् । ईम् । अन्विति । वोचत् । ब्रह्माणि । वेः ।

इत्युप्रत्ययः, अकारश्चान्तादेशः, अतो लोपः । तथा सोमो बृहस्पतिश्च वर्चः कृणुतामित्येव । विश्वे च देवाः वर्चः कृण्वन्तु । हे अश्विना अश्विनौ युवामपि मे वर्चो धत्तं दत्तम् । 'सुपां सुलुक्' इत्याकारः ॥

[24]अथ द्वितीया—दधन्व इति ॥ 'अनु' इति प्रथमपादान्तः । वाशब्दस्समुच्चये । इन्द्राग्न्यादयो मे वर्चः कृण्वन्तु, अहमपि तदर्थमेवं करोमीति पूर्वापेक्षया समुच्चयः । 'ईम्' इति पादपूरणे । दधन्वे अवगच्छामि धारयामि । धवि गतौ, इदित्त्वान्नुम्, छान्दसो लिट् । यत् यानि वचनानि । व्यत्ययेनैकवचनम् । अनुवोचत् अनुब्रवीति अनुशास्ति सामर्थ्यात् ऋषिः । छान्दसो लुङ्, 'बहुलं छन्दस्यमाङ्योगेऽपि, इत्यडभावः । ब्रह्माणि परिबृढानि कर्माणि ज्योतिष्टोमादीनि । कस्याधिकारिणः ? वेः गृहस्थस्योक्तानि । वेतेः प्रजननकर्मणः औणादिको डिप्रत्ययः । यद्वा—गतिकर्मणः—वेतव्यस्य गन्तव्यस्य यज्ञस्य यानि

वोचद्ब्रह्माणि वेरु तत् । परि विश्वा-
नि काव्या नेमिश्चक्रमिवाभवत् ॥
एतद्वा अपां नामधेयं गुह्यं यदार्धा-

उ । तत् । परीति । विश्वानि । काव्या । नेमिः ।
चक्रम् । इव । अभवत् ॥ ७ ॥

शाक्करीष्वग्नेर्बृहस्पतिः पञ्चविꣳशतिश्च ॥ ३ ॥

[1]एतत् । वै । अपाम् । नामधेयमिति नाम-

कर्माणि दीक्षादीनि कर्तव्यानि तत् तानि । पूर्ववद्वचनव्यत्ययः । तानि सर्वाण्यनुक्रमेण दधन्वे तेषामेवेन्द्राग्नचादीनां प्रसादेन इति । [उ इति] पादपूरणे अवधारणे वा । तान्येवेति । यद्वा—'वेतेः' इति वेतेर्विचि गुणे वेरिति पुरुषार्थानां वेदयिता वेद उच्यते । वेदो यानि कर्माण्यनुशास्तीति स एवार्थः । अधुना वेदो विशेष्यते—विश्वानि काव्या कवनीयानि कार्याणि विधेयानि कर्माणि कर्मसाध्यानि वा फलानि पर्यभवत् परिभवति कात्स्न्र्येन प्राप्नोति श्रेयोर्थिभ्यः प्रकाशयति । नेमिश्चक्रमिव यथा नेमिश्चक्रं सर्वतः प्राप्य धारयति तथेति । पूर्ववच्छान्दसो लङ् । कु शब्दे, 'ओरावश्यके' इति ण्यप्रत्ययः ॥

इति तृतीये तृतीये तृतीयोनुवाकः.

---

[1]अथैतेषां मन्त्राणां ब्राह्मणम्—एतद्वा इत्यादि ॥ सामान्य

वा मान्दांसु ते शुक्र शुक्रमा धूनो-
मीत्याहापामेव नामधेयेन गुह्येन
दिवो वृष्टिमव रुन्धे शुक्रं ते शुक्रेण
गृह्णामीत्याहैतद्वा अह्नो रूपं यद्रात्रि-
स्सूर्यस्य रश्मयो वृष्ट्या ईशतेऽह्ने

धेयम् । गुह्यम् । यत् । आधावा इत्याधावाः । मान्दांसु । ते । शुक्र । शुक्रम् । एति । धूनोमि । इति । आह । अपाम् । एव । नामधेयेनेति नाम-धेयेन । गुह्येन । दिवः । वृष्टिम् । अवेति । रुन्धे । [2]शुक्रम् । ते । शुक्रेण । गृह्णामि । इति । आह । एतत् । वै । अह्नः । रूपम् । यत् । रात्रिः । सूर्यस्य । रश्मयः । वृष्ट्याः । ईशते । अह्नः । एव ।

विवक्षया एकवचनम् । अपामेतानि गुह्यानि गोपनीयानि यदाधावानां मान्दादीनि द्वादशानामाधावानाम् । यथोक्तमाचार्येण—'द्वादशभिराधावैराधावनामकैराधूनोति' इति । तस्मादेतैर्नामभिराधावने क्रियमाणे आपस्तृप्ता दिवो वृष्टिमुत्पादयन्ति; सर्वस्थितिहेतुत्वादस्य ॥

[2]शुक्रं ते इत्यदाभ्यग्रहणमन्त्रः ॥ 'अह्नो रूपेण सूर्यस्य रश्मिभिः'* इति यद्व्यमुपात्तं, तदभिप्रायमाह—एतद्वा इति । विशेषणोपादानसामर्थ्याद्विशिष्टमह्नो रूपं गृह्यते यद्वृष्टेरुत्पादकं भवति । सूर्यरश्मीनां च वृष्टिकारणतया पृथगुपादानात् तद्विरहितं यद्रात्रि-

---

*सं. ३-३-३.[16]

एव रूपेण सूर्यस्य रश्मिभिर्दिवो
वृष्टिं च्यावयत्याऽस्मिन्नुग्राः ॥ ८ ॥
अचुच्यवुरित्याह यथायजुरेवैतत्क-
कुहꣳ रूपं वृषभस्य रोचते बृहदि-
त्याहैतद्वा अस्य ककुहꣳ रूपं यद्वृष्टी
रूपेणैव वृष्टिमव रुन्धे यत्ते सोमा-

रूपेणं । सूर्यस्य । रश्मिभिरितिं रश्मि–भिः । दि-
वः । वृष्टिम् । च्यावयति । एतिं । अस्मिन् । उ-
ग्राः ॥ ८ ॥ अचुच्यवुः । इतिं । आह । यथायजु-
रितिं यथा–यजुः । एव । एतत् । [3]ककुहम् । रू-
पम् । वृषभस्य । रोचते । बृहत् । इतिं । आह ।
एतत् । वै । अस्य । ककुहम् । रूपम् । यत् । वृ-

प्रायमह्नो रूपं तेन सूर्यरश्मिभिश्च शुक्रं रसं गृह्णामीति वदन् दिवो वृष्टिं च्यावयति पातयतीति । तत्रैव मन्त्रे 'आस्मिन्नुग्राः'* इति यदाह एतद्यथा यजुषाऽभिहितं तथा भवत्येव । यजुरिति मन्त्रनाम, यजुर्वेदाम्नातो वा मन्त्रो यजुरित्युच्यते ॥

[3]ककुहमिति आदायोत्थानमन्त्रः ॥ एतद्वा इति । सर्वलोकस्थितिहेतुत्वात् इन्द्रस्य प्रधानं रूपं वृष्टिरिति । ततश्च संकीर्तनाद्यद्वृष्टेः स्वरूपं वृष्टिं लभते ॥

*सं. ३-३-३.[16]

दाभ्यं नाम जागृवीत्याहैष ह वै ह-
विषा हविर्यजति योऽदाभ्यं गृहीत्वा
सोमाय जुहोति परा वा एतस्यायुः
प्राण एति ॥ १ ॥ योऽꣳशुं गृह्णा-
त्या नः प्राण एतु परावत इत्याहा-
युरेव प्राणमात्मन्धत्तेऽमृतमसि प्रा-

ष्टिः । रूपेण । एव । वृष्टिम् । अवेति । रुन्धे । [4]यत् ।
ते । सोम । अदाभ्यम् । नाम । जागृवि । इति ।
आह । एषः । ह । वै । हविषा । हविः । यजति । यः ।
अदाभ्यम् । गृहीत्वा । सोमाय । जुहोति । परेति ।
वै । एतस्य । आयुः । प्राण इति प्र–अनः । एति
॥ १ ॥ यः । अꣳशुम् । गृह्णाति । एति । नः ।
प्राण इति प्र–अनः । एतु । परावत इति परा–वतः ।
इति । आह । आयुः । एव । प्राणमिति प्र–अनम् ।
आत्मन् । धत्ते । अमृतम् । असि । प्राणायेति प्र–

[4]यत्ते सोममिति होममन्त्रः ॥ एष खलु हविषा हविर्यजति योदाभ्यं गृहीत्वा सोमाय जुहोतीति मन्त्रो वदतीति भावः ।

णाय॒ त्वेति॒ हिर॑ण्यम॒भि व्य॑नित्य॒मृ-
तं॑ वै हिर॑ण्य॒मायु॑ः प्रा॒णोऽमृते॑नै॒वा-
यु॑रा॒त्मन्ध॑त्ते श॒तमा॑नं भवति श॒ता-
यु॑ः पुरु॑षश्श॒तेन्द्रि॑य॒ आयु॑ष्ये॒वेन्द्रि॒ये
प्रति॑ तिष्ठत्य॒प उप॑ स्पृशति भेष॒जं

अना॑य । त्वा । इति॑ । हिर॑ण्यम् । अ॒भि । वी॒ति॑ । अनि॑ति॒ । अ॒मृत॑म् । वै । हिर॑ण्यम् । आयु॑ः । प्रा-ण इति॑ प्र—अन॑ः । अ॒मृते॑न । एव । आयु॑ः । आ॒त्मन् । ध॒त्ते॒ । श॒तमा॑न॒मिति॑ श॒त—मा॒न॒म् । भ॒व॒ति॒ । श॒ता-यु॑रिति॑ श॒त—आयु॑ः । पुरु॑षः । श॒तेन्द्रि॑य इति॑ श॒त—इ॒न्द्रि॒य॒ः । आयु॑षि । एव । इ॒न्द्रि॒ये । प्रती॑ति॑ । ति॒-ष्ठ॒ति॒ । [5]अ॒पः । उपे॑ति॑ । स्पृ॒श॒ति॒ । भे॒ष॒जम् । वै ।

परा वा इत्यादि । परैति विनश्यत्यायुश्च प्राणश्च । तस्मादंशुं हुत्वा 'आ नः प्राणः'* इति हिरण्यमभिव्यनन्नाह । आयुः प्राणं चात्मनि स्थापयति । अमृतमसीति । तत्रैव मन्त्रे 'अमृतमसि'* इति यदाह, यच्च हिरण्यमभिव्यनिति तेनामृतात्मना हिरण्येन आत्मन्यायुर्धत्ते । शतमानमित्यादि । व्याख्यातम्† । आयुषीन्द्रिये वीर्यं च प्रतिष्ठितो भवति ॥

[5]अप उपस्पृशतीत्यादि ॥ गतम् । 'इन्द्राग्नी मे'* इत्यादिभिः

---

*सं. ३-३-३.[22—23] †सं. २-३-११.[7]

वा आपो भेषजमेव कुरुते ॥१०॥
वायुरसि प्राणो नाम सवितुराधि-

आपः । भेषजम् । एव । कुरुते ॥ १० ॥
उग्रा एत्यापक्षीणि च ॥४॥

[1]वायुः । असि । प्राण इति प्र–अनः । नाम । सवितुः । आधिपत्य इत्याधि–पत्ये । अपानामि-

---

अन्तर्वेद्यद्भिर्मार्जयन्ते इति ॥

इति तृतीये तृतीये चतुर्थोनुवाकः.

---

[1]अथ पक्षीनां ग्रहणं—संतृतं राजानं दशधा व्यूह्याभिमृशति—वायुरसि प्राणो नामेत्यादिभिः दश भागान्, ते एते संवत्सरसाक्षीये[ध्ये]ऽहस्सु गृह्यन्ते । यत्र क्वचैवैतान् गृह्णीयादित्येतदपरम् । तत्रादितः पञ्च यजूंषि, उत्तराः पञ्च एकपदा गायत्र्यः 'ऋतस्य त्वा व्योमने'* इत्यादयः ॥ हे सोम वायुरसि बहिः प्राणो नामासि पीतस्त्वमेव । यज्ञद्वारेण वृष्ट्यादिक्रमेण च सर्वं त्वया प्रेर्यते । स त्वं सवितुराधिपत्ये स्थित्वा अपानं अपानादिं मे मह्यं दाः देहि । सर्वप्राणवृत्तीनामुपलक्षणतया प्रधानयोरुपादानम् । ब्राह्मणं च भवति 'प्राणापानावेवावरुन्धे'† इति । पीतः स त्वं मम प्राणादीन् सम्यक्प्रेरयसि । ददातेर्लेटि शपो लुक् । अधिपतिशब्दाद्ब्राह्मणादित्वात् ष्यञ् ॥

---

*सं. ३-३-५.[5] †सं. ३-३-५.[11]

पत्येऽपानं मे दाश्चक्षुरसि श्रोत्रं
नाम धातुराधिपत्य आयुर्मे दा रू-
पमसि वर्णो नाम बृहस्पतेराधिपत्ये
प्रजां मे दा ऋतमसि सत्यं नामे-

त्यप–अनम् । मे । दाः । [2]चक्षुः । असि । श्रो-
त्रम् । नाम । धातुः । आधिपत्य इत्याधि–पत्ये ।
आयुः । मे । दाः । [3]रूपम् । असि । वर्णः । ना-
म । बृहस्पतेः । आधिपत्य इत्याधि–पत्ये । प्रजा-
मिति प्र–जाम् । मे । दाः । [4]ऋतम् । असि ।
सत्यम् । नाम । इन्द्रस्य । आधिपत्य इत्याधि–प-

---

[2]चक्षुरसि, श्रोत्रादिकं च त्वमेव नामासि पीतः तत्सामर्थ्यो-
त्पादनात् । स त्वं धातुः सर्वस्य विधातुराधिपत्ये स्थित्वा आ-
युर्मे मह्यं देहि सर्वेन्द्रियसामर्थ्योपेतं दीर्घमायुर्मे देहि ॥

[3]रूपमसि शोभनं वर्णो मृजा च त्वमेवासि पीतः । स त्वं
रूपादिसमृद्धिकारिणः बृहस्पतेराधिपत्ये स्थित्वा प्रजां प्रजननशक्तिं
रूपादिसमृद्धिं पुत्रादिपोषं मे देहि ॥

[4]ऋतमसि सत्यं त्वमेवासि । मानसं तथ्यमृतं, वाचिकं सत्यं,
तदुभयमपि त्वत्पानाद्भवति । स त्वमिन्द्रस्य सत्यात्मनः आधिपत्ये
स्थित्वा क्षत्रं बलं सत्यहेतुकं मे देहि ॥

न्द्रस्याधिपत्ये क्षत्रं मे दा भूतमसि भव्यं नाम पितृणामाधिपत्येऽपामोषधीनां गर्भं धा ऋतस्य त्वा व्योमन ऋतस्य ॥ ११ ॥ त्वा वि-

त्ये । क्षत्रम् । मे । दाः । [5]भूतम् । असि । भव्यम् । नाम । पितृणाम् । आधिपत्य इत्याधि—पत्ये । अपाम् । ओषधीनाम् । गर्भम् । धाः । [6]ऋतस्य । त्वा । व्योमन इति वि—ओमने । [7]ऋतस्य ।

[5]भूतमसि, भव्यं वर्तमानं, उपलक्षणत्वाच्च भविष्यच्च त्वमेवासि त्रैकाल्यवर्ती त्वमेव सः यज्ञद्वारेण जनयसि, स त्वं पितृणां जनयितृणाम् ॥

[6]ऋतस्य व्योम पृथिवी । ब्राह्मणं च भवति 'द्यावापृथिव्योर्हि यज्ञः'* इति, 'इयं वा ऋतस्य व्योम'† इति च । पृथिवीजयार्थं त्वां गृह्णामीति । तादर्थ्ये चतुर्थी । अवतेर्मनिन्प्रत्यये 'ज्वरत्वर' इत्यादिना ऊठि गुणः, उपधालोपाभावश्छान्दसः, विविधं ओम व्योम इति प्रादिसमासे अव्ययपूर्वपदप्रकृतिस्वरत्वम्; 'उदात्तस्वरितयोर्यणः' इत्योकारस्स्वर्यते ॥

[7]ऋतस्य विभूम विविधं भावयितृ अवकाशप्रदानादिना अन्तरिक्षम्, ब्राह्मणं च—'अन्तरिक्षं वा ऋतस्य विभूम'† इति, 'अन्तरिक्षे हि यज्ञः'* इति च । अन्तरिक्षस्य जयार्थं त्वां गृह्णामीति । सर्वत्र पूर्ववत्प्रत्ययस्वरश्च, गुणाभावश्छान्दसः ॥

*सं. ६-१-२. †सं. ३-३-५[16-17]

भूमन ऋतस्य त्वा विधर्मण ऋत-
स्य त्वा सत्यायर्तस्य त्वा ज्योतिषे
प्रजापतिर्विराजमपश्यत्तया भूतं च
भव्यं चासृजत तामृषिभ्यस्ति-

११॥ त्वा । विभूमन इति वि–भूमने । [8]ऋतस्य । त्वा । विधर्मण इति वि–धर्मणे । [9]ऋतस्य । त्वा । सत्यायं । [10]ऋतस्य । त्वा । ज्योतिषे । [11]प्रजापतिरिति प्रजा–पतिः । विराजमिति वि–राजम् । अपश्यत् । तया । भूतम् । च । भव्यम् । च । असृजत । ताम् । ऋषिभ्य इत्यृषि–भ्यः । तिरः ।

[8]ऋतस्य विधर्म विविधं धारयितृ वृष्ट्यादिना द्यौः देवलोकः । 'द्यौर्वा ऋतस्य विधर्म'* इत्यादि ब्राह्मणम् । प्रत्ययादि पूर्ववत् ॥

[9]ऋतस्य सत्यं अविनाशित्वं, तत्कारिण्यो दिशः । दिक्षु हि विस्तीर्णे नश्यतीति । यद्वा—ऋतस्य सत्यं सद्भावः तच्च प्रागादिदिशाम् । ब्राह्मणं च—'दिशो वा ऋतस्य सत्यम्'† इति ॥

[10]ऋतस्य ज्योतिः सुवर्गः सुखैकरूपः, तत्र हि यज्ञो द्योतते फलसंपत्त्या विराजते । ब्राह्मणं च 'सुवर्गो वै लोक ऋतस्य ज्योतिः'‡ इति ॥

[11]अथैतेषां एक्षीनामेव ब्राह्मणं—प्रजापतिरित्यादि ॥ विराड्दशाक्षरा, गौर्वा । ऋषिभ्यस्तिरोदधात् तिरोहितामकरोत् । जम-

*सं. ३-३-५.[18] †सं. ३-३-५.[19] ‡सं.-३-३-५.[20]

रोऽदधात्तां जमदग्निस्तपसाऽपश्यत्त-
या वै स पृश्नीन्कामानसृजत तत्पृ-
श्नीनां पृश्नित्वं यत्पृश्नयो गृह्यन्ते
पृश्नीनेव तैः कामान् यजमानोऽव
रुन्धे वायुरसि प्राणः ॥ १२ ॥ ना-
मेत्याह प्राणापानावेवाव रुन्धे च-

अदधात् । ताम् । जमदग्निः । तपसा । अपश्यत् । तया । वै । सः । पृश्नीन् । कामान् । असृजत । तत् । पृश्नीनाम् । पृश्नित्वमिति पृश्नि-त्वम् । यत् । पृश्नयः । गृह्यन्ते । पृश्नीन् । एव । तैः । कामान् । यजमानः । अवेति । रुन्धे । वायुः । असि । प्राण इति प्र-अनः ॥ १२ ॥ नाम । इति । आह । प्राणापानाविति प्राण-अपानौ । एव । अवेति ।

दग्निस्तां दृष्ट्वा विराजं पृश्नीन् कामहेतुभूतान् अत एव कामान् सर्वैः काम्यमानान् प्राणादिकामधुक्त्वात् 'वायुरसि प्राणो नाम'* इत्यादिकान् ग्रहान् असृजत, तत्पृश्निग्रहाणां पृश्नित्वम्, पृश्नि-स्थान्कामान् प्राणादीन् दश यजमानोवरुन्धे । अधुना ग्रहान् तांश्च क्रमेण दर्शयति—वायुरसीत्यादि । सर्वप्राणतृप्त्युपलक्षणं प्राणापानग्रहणम् ॥

---

*सं. ३-३-५.[1]

क्षुरसि श्रोत्रं नामेत्याहायुरेवावरुन्धे रूपमसि वर्णो नामेत्याह प्रजामेवावरुन्ध ऋतमसि सत्यं नामेत्याह क्षत्रमेवावरुन्धे भूतमसि भव्यं नामेत्याह पशवो वा अपामोषधीनां गर्भः पशूनेव ॥ १३ ॥

रुन्धे । [12]चक्षुः । असि । श्रोत्रम् । नाम । इति । आह । आयुः । एव । अवेति । रुन्धे । [13]रूपम् । असि । वर्णः । नाम । इति । आह । प्रजामिति प्र—जाम् । एव । अवेति । रुन्धे । [14]ऋतम् । असि । सत्यम् । नाम । इति । आह । क्षत्रम् । एव । अवेति । रुन्धे । [15]भूतम् । असि । भव्यम् । नाम । इति । आह । पशवः । वै । अपाम् । ओषधीनाम् । गर्भः । पशून् । एव ॥ १३ ॥ अवेति ।

[12]आयुरेवेति चक्षुराद्युपेतम् ॥

[13]रूपं प्रजां रूपवर्णोपेतम् ॥

[14]क्षत्रमिति ॥ बलं सत्यहेतुकम् ॥

[15]पशवो वा इति ॥ परम्परया अबादिप्रभवत्वात् । एतावदिति । पुरुषस्य परिकरवत् प्रत्यासज्य स्थितं एतावत्प्राणादि पश्वन्तमेतत्सर्वमवरुन्धे एभिः पञ्चभिः दशभिः । 'अभितःपरितः' इति द्वितीया ॥

अवं रुन्ध एतावद्वै पुरुषं परितस्तदे-
वावं रुन्ध ऋतस्यं त्वा व्योमन्
इत्याहेयं वा ऋतस्य व्योमेमामेवा-
भि जयत्यृतस्यं त्वा विभूमन इत्या-
हान्तरिक्षं वा ऋतस्य विभूमान्तरि-
क्षमेवाभि जयत्यृतस्यं त्वा विधर्मण

रुन्धे । एतावत् । वै । पुरुषम् । परितः । तत् । एव । अवेति । रुन्धे । [16]ऋतस्य । त्वा । व्योमन इति वि-ओमने । इति । आह । इयम् । वै । ऋतस्य । व्योमेति वि-ओम । इमाम् । एव । अभीति । जयति । [17]ऋतस्य । त्वा । विभूमन इति वि-भूमने । इति । आह । अन्तरिक्षम् । वै । ऋतस्य । विभूमेति वि-भूम । अन्तरिक्षम् । एव । अभीति । जयति । [18]ऋतस्य । त्वा । विधर्मण इति वि-धर्मणे । इति । आह । द्यौः । वै । ऋ-

[16–18]इयं वा इति ॥ पृथिवी यज्ञश्च विविधं रक्षितौ 'द्यावापृथिव्योर्हि यज्ञः'* इति । तस्मात् षष्ठेन पृश्निना पृथिवीमेवाभिजयति । एवमुत्तरेषु द्रष्टव्यम् ॥

*सं. २-६-६.[1]

इत्याह द्यौर्वा ऋतस्य विधर्म दिव-
मेवाभि जयत्यृतस्य ॥ १४ ॥ त्वा
सत्यायेत्याह दिशो वा ऋतस्य स-
त्यं दिश एवाभि जयत्यृतस्य त्वा
ज्योतिष इत्याह सुवर्गो वै लोक
ऋतस्य ज्योतिस्सुवर्गमेव लोक-

तस्य । विधर्मेति वि–धर्म । दिवम् । एव । अभी-
ति । जयति । [19]ऋतस्य ॥ १४ ॥ त्वा । सत्याय ।
इति । आह । दिशः । वै । ऋतस्य । सत्यम् ।
दिशः । एव । अभीति । जयति । [20]ऋतस्य । त्वा ।
ज्योतिषे । इति । आह । सुवर्ग इति सुवः–गः ।
वै । लोकः । ऋतस्य । ज्योतिः । सुवर्गमिति सु-
वः–गम् । एव । लोकम् । अभीति । जयति ।
एतावन्तः । वै । देवलोका इति देव–लोकाः । तान् ।

---

[19]दिशो वा इति ॥ यज्ञस्य सत्यत्वस्य दिगधीनत्वाद्दिक्षु हि विस्तीर्णं अनपायं भवतीति ॥

[20]सुवर्ग इति ॥ यज्ञस्य द्योतनस्थानं स्वर्गः, तत्र हि यज्ञो द्योतते फलाविर्भावेन । एतावन्त इत्यादि । पृथिव्यादिस्वर्गान्ता देवलोकाः यज्ञाधिकरणत्वेन देवस्थानानि, तान् सर्वानभिजयत्येतेन

मभि जयत्येतावन्तो वै देवलोका-
स्तानेवाभि जयति दश सं पद्यन्ते
दशाक्षरा विराडन्नं विराड्विराज्येवा-
न्नाद्ये प्रति तिष्ठति ॥ १५ ॥
देवा वै यद्यज्ञेन नावारुन्धत तत्प-

एव । अभीति । जयति । दश । सामिति । पद्य-
न्ते । दशाक्षरेति दश-अक्षरा । विराडिति वि-
राट् । अन्नम् । विराडिति वि-राट् । विराजीति
वि-राजि । एव । अन्नाद्य इत्यन्न-अद्ये । प्रतीति ।
तिष्ठति ॥ १५ ॥

व्योमन ऋतस्य प्राणः पशूनेव विधर्म दिवमे-
वाभि जयत्यृतस्य षट्त्वारिꣳशच्च ॥५॥

[1]देवाः । वै । यत् । यज्ञेन । न । अवारुन्धते-

पञ्चभिः पञ्चभिः । दश सम्पद्यन्ते इत्यादि । गतम्* । विर्-
जमानेऽन्नाद्ये प्रतितिष्ठति । अन्नस्यादनमन्नाद्यं, छान्दसो यत् ॥

इति तृतीये तृतीये पञ्चमोनुवाकः.

[1]अथ परस्साम्नां ग्रहणं विधास्यन् तत्स्तुतिं तावदाह—देवा वा इत्यादि ॥ यज्ञेन केवलेन परस्सामरहितेन यदभिमतं तन्ना-

*सं. २-६-१.[5]

रैरवारुन्धत तत्पराणां परत्वं यत्परै
गृह्यन्ते यदेव यज्ञेन नावरुन्धे त-
स्यावरुध्यै यं प्रथमं गृह्णातीममेव
तेन लोकमभि जयति यं द्वितीयम-
न्तरिक्षं तेन यं तृतीयममुमेव तेन

त्यव–अरुन्धत। तत्। परैः। अवेति। अरुन्धत। तत्। पराणाम्। परत्वमिति पर–त्वम्। यत्। परै। गृह्यन्ते। यत्। एव। यज्ञेन। न। अवरुन्ध-इत्यव–रुन्धे। तस्य। अवरुध्या इत्यव–रुध्यै। यम्। प्रथमम्। गृह्णाति। इमम्। एव। तेन। लोकम्। अभीति। जयति। यम्। द्वितीयम्। अन्तरिक्षम्। तेन। यम्। तृतीयम्। अमुम्। एव। तेन। लो-

---

वारुन्धत नालभन्त। तत्परैः परस्सामभिः अवारुन्धत। तत्पराणां परत्वम्। पारयन्ति पूरयन्त्यभीष्टमिति पराः, 'ऋदोरप्' इति अप्। यत्परै। असर्वनामत्वाद्वचत्ययेन शीभावः। यदेव तेन यज्ञेन नावारुन्धत तस्यावरुद्ध्यै भवति एतेषां ग्रहणम्। यं प्रथममित्यादि। इमं मनुष्यलोकमभिजयति। यं द्वितीयमिति। गृह्णातीत्येव। अन्तरिक्षं तेनाभिजयतीत्येव। यं तृतीयमिति। गृह्णातीत्येव। यदेते इति। एते सर्वेऽपि यद्गृह्यन्ते एतेषां सर्वेषां लोकानामभिजयाय भवति। 'तादौ च' इति गतेः प्रकृतिस्वरत्वम्, 'ऊडिदम्' इति षष्ठ्या उदात्तत्वम्॥

लोकमभि जयति यदेते गृह्यन्त एषां लोकानामभिजित्यै ॥ १६ ॥ उत्तरेष्वहस्स्वमुतोर्वाञ्चो गृह्यन्तेऽभिजित्यैवेमान्लोकान्पुनरिमं लोकं प्रत्यवरोहन्ति यत्पूर्वेष्वहस्स्वतः पकम् । अभीति । जयति । यत् । एते । गृह्यन्ते । एषाम् । लोकानाम् । अभिजित्या इत्यभि–जित्यै ॥ १६ ॥ [2]उत्तरेष्वित्युत्–तरेषु । अहस्स्वित्यहः–सु । अमुतः । अर्वाञ्चः । गृह्यन्ते । अभिजित्येत्यभि–जित्यै । एव । इमान् । लोकान् । पुनः । इमम् । लोकम् । प्रत्यवरोहन्तीति प्रति–अवरोहन्ति ।

---

[2]उत्तरेष्वित्यादि ॥ वैषुवतादह्न उत्तरेषु त्रिष्वहस्सु अन्वहं अमुतः तृतीयदिनप्रभृति अर्वाञ्चः आवृत्ताः प्रतिलोमगतयो गृह्यन्ते । यथा—प्रथमेऽह्नि तृतीयः, द्वितीये द्वितीयः, तृतीये प्रथम इति । एवमिति । इमान् लोकान् अभिजित्य, इममेव लोकं पुनः प्रत्यवरोहन्ति । यत्पूर्वेष्विति । वैषुवतात्पूर्वेषु त्रिष्वहस्सु इतः प्रथमदिनप्रभृति पराञ्चः अनुलोमगतयः प्रथमादितृतीयान्ता गृह्यन्ते । तस्मादितो मनुष्यलोकादारभ्य पराञ्च इमे लोकाः, भूरिति प्रथमलोकः, अन्तरिक्षं द्वितीयलोकः, द्यौस्तृतीय इति । यदुत्तरेष्वित्यादि । ततो द्युलोकादर्वाञ्चो लोका भवन्तिं तत्रस्थानां हि द्यौः प्रथमो लोकः, अन्तरिक्षं द्वितीयः, भूस्तृतीय इति । तस्मा-

रांश्चो गृह्यन्ते तस्मादितः परांश्च इमे
लोका यदुत्तरेष्वहस्स्वमुतोर्वाञ्चो गृ-
ह्यन्ते तस्मादमुतोर्वाञ्च इमे लोका-
स्तस्मादयातयाम्नो लोकान्मनुष्या
उप जीवन्ति ब्रह्मवादिनो वदन्ति
कस्मात्सत्याद्वद्रय ओषधयस्सं भव-

यत् । पूर्वेषु । अहस्स्वित्यहः—सु । इतः । परांश्चः । गृह्यन्ते । तस्मात् । इतः । परांश्चः । इमे । लोकाः । यत् । उत्तरेष्वित्युत्—तरेषु । अहस्स्वित्यहः—सु । अमुतः । अर्वाञ्चः । गृह्यन्ते । तस्मात् । अमुतः । अर्वाञ्चः । इमे । लोकाः । तस्मात् । अयातयाम्न इत्ययात—याम्नः । लोकान् । मनुष्याः । उपेति । जीवन्ति । [3]ब्रह्मवादिन इति ब्रह्म—वादिनः । वदन्ति । कस्मात् । सत्यात् । अद्भ्य इत्यत्—भ्यः । ओ-

---

दिति । अयातयाम्नोऽगतरसान् अपुनर्मुक्तसारान् लोकान् मनुष्यादय उपजीवन्ति । 'वैषुवतेषु हि पराञ्चश्च अर्वाञ्चश्च गृह्यन्ते' इत्याचार्योक्तम् ॥

[3]ब्रह्मवादिन इत्यादि ॥ कस्मात्सत्यात् कारणात् अद्भ्य ओषधयस्सम्भवन्ति उत्पद्यन्ते? कस्माच्च कारणात्ता ओषधयः मनुष्याणामन्नं भवति? कस्माच्च पुनः कारणात् अन्नस्य दात्र्यः प्रजाः प्रजा-

न्त्योषधयः ॥ १७ ॥ मनुष्याणाम-
न्नं प्रजापतिं प्रजा अनु प्र जायन्त
इति परानन्वितिं ब्रूयाद्यद्गृह्णात्यद्भ्य-
स्त्वौषधीभ्यो गृह्णामीति तस्मादद्भ्य
ओषधयस्सं भवन्ति यद्गृह्णात्योषधी-

षधयः । समिति । भवन्ति । ओषधयः ॥ १७ ॥
मनुष्याणाम् । अन्नम् । प्रजापतिमिति प्रजा-पति-
म् । प्रजा इति प्र-जाः । अनु । प्रेति । जायन्ते ।
इति । परान् । अन्विति । इति । ब्रूयात् । [4]यत् ।
गृह्णाति । अद्भ्य इत्यत्-भ्यः । त्वा । ओषधीभ्य
इत्योषधि-भ्यः । गृह्णामि । इति । तस्मात् । अ-
द्भ्य इत्यत्-भ्यः । ओषधयः । समिति । भवन्ति ।

पतिमनुप्रजायन्ते? । लक्षणेऽनोः कर्मप्रवचनीयत्वम् । प्रजापति-हेतुका उत्पद्यन्ते । इति ब्रह्मवादिनः प्रश्नं वदन्ति । परा-निति । परान् परस्साम्नो ग्रहान् अनु एतत्त्रितयं ब्रूयात् उत्त-रम् । पूर्ववत्कर्मप्रवर्चनीयत्वम् ॥

[4]एवं सामान्येनोक्त्वा एकैकत्वेनाचष्टे—यदित्यादि ॥ अद्भ्यस्त्वौ-षधीभ्यो गृह्णामीति प्रथमो गृह्यते । अद्भ्यस्त्वा गृह्णामीति कि-मर्थम्? (प्रजाभ्यः प्रजार्थं) ओषधीभ्यः ओषध्यर्थम् । अद्भ्य ओषधयस्संभवन्तीति । यद्वा—अद्भ्यस्त्वौषधीभ्यश्च त्वामिति कि-मर्थम्? उत्पाद्योत्पादकभावोस्त्वासामिति । तस्मादिति । गतम् ॥

भ्यस्त्वा प्रजाभ्यो गृह्णामीति तस्मा-
दोषधयो मनुष्याणामन्नं यद्गृह्णाति प्र-
जाभ्यस्त्वा प्रजापतये गृह्णामीति त-
स्मात्प्रजापतिं प्रजा अनु प्र जायन्ते॥

[5]यत् । गृह्णाति । ओषधीभ्य इत्योषधि–भ्यः । त्वा । प्रजाभ्य इति प्र–जाभ्यः । गृह्णामि । इति । तस्मात् । ओषधयः । मनुष्याणाम् । अन्नम् । [6]यत् । गृह्णाति । प्रजाभ्य इति प्र–जाभ्यः । त्वा । प्रजापतय इति प्रजा–पतये । गृह्णामि । इति । तस्मात् । प्रजापतिमिति प्रजा–पतिम् । प्रजा इति प्र–जाः । अनु । प्रेति । जायन्ते ॥ १८ ॥

अभिजित्या ओषधयोष्टाचत्वारिꣳशच्च ॥ ६ ॥

---

[5]ओषधीभ्यस्त्वा प्रजाभ्यो गृह्णामीति द्वितीयो गृह्यते । ओषधीभ्यस्त्वा गृह्णामीति किमर्थम्? प्रजाभ्यः प्रजार्थं प्रजानामन्नं ओषधयो भवन्त्विति । तस्मादिति । गतम् । उभयीभ्यो वा ग्रहणं, पूर्ववदुत्पाद्योत्पादकभावो भवत्वासामिति ॥

[6]प्रजाभ्यस्त्वा प्रजापतये गृह्णामीति तृतीयो गृह्यते । प्रजाभ्यस्त्वा गृह्णामीति किमर्थम्? प्रजापतये प्रजापत्यर्थं प्रजानां हेतुभावमापद्यतामिति, प्रजापतिमनुप्रजायन्तामित्यर्थः । तस्मादिति । गतम् । सहग्रहणं वा वाच्यं उभयोर्हेतुहेतुमद्भावो भवत्विति ॥

इति तृतीये तृतीये षष्ठोनुवाकः.

प्रजापतिर्देवासुरानसृजत तदनु य-
ज्ञोऽसृज्यत यज्ञं छन्दाꣳसि ते वि-
ष्वञ्चो व्यक्रामन्त्सोसुराननु यज्ञोपा-
क्रामद्यज्ञं छन्दाꣳसि ते देवा अम-
न्यन्तामी वा इदमभूवन् यद्वयꣳ
स्म इति ते प्रजापतिमुपाधावन्त्सो-

[1]प्रजापतिरिति प्रजा—पतिः । देवासुरानिति-
देव—असुरान् । असृजत । तत् । अन्विति । यज्ञः ।
असृज्यत । यज्ञम् । छन्दाꣳसि । ते । विष्वञ्चः ।
वीति । अक्रामन्न् । सः । असुरान् । अन्विति । यज्ञः ।
अपेति । अक्रामत् । यज्ञम् । छन्दाꣳसि । ते । देवाः ।
अमन्यन्त । अमी इति । वै । इदम् । अभूवन्न् ।
यत् । वयम् । स्मः । इति । ते । प्रजापतिमिति प्रजा—

[1]प्रजापतिर्देवासुरानित्यादि ॥ देवासुरसृष्ट्यनन्तरं यज्ञोसृज्यत । यज्ञमनु छन्दांस्यसृजत । ततस्ते देवासुराः प्रथमसृष्टाः विष्वञ्चो नान्य[ना]गतयो व्यक्रामन् विशिष्टा आगच्छन् । यज्ञोसुरपक्षसमाश्रयेण प्रजापतिसकाशादपाक्रामत्, यज्ञमनु छन्दांस्यपाक्रामन् । ते तादृशाः यज्ञेन छन्दोनिश्रयविरहिता देवाः अमन्यन्त अमी असुरा यज्ञवन्तः, छन्दस्वन्तश्च । एते इदं विश्वमभूवन् यद्विश्वं वयं स्मः, विश्वस्य वयमीशितारस्स्मः । इदानीं त्वसुराः विश्वस्येशितारोभूवन् । ते देवाः तथाविधं परिभवमसहमानाः प्रजा-

ब्रवीत्प्रजापतिश्छन्दसां वीर्यमादाय
तद्वः प्र दास्यामीति स छन्दसां वी-
र्यम् ॥ १९ ॥ आदाय तदेभ्यः प्राय-
च्छत्तदनु छन्दाꣳस्यपाक्रामच्छन्दाꣳ-
सि यज्ञस्ततो देवा अभवन्पराऽसुरा य

पतिम् । उपेति । अधावन् । सः । अब्रवीत् । प्र-
जापतिरिति प्रजा–पतिः । छन्दसाम् । वीर्यम् ।
आदायेत्या–दाय । तत् । वः । प्रेति । दास्यामि ।
इति । सः । छन्दसाम् । वीर्यम् ॥ १९ ॥ आदाये-
त्या–दाय । तत् । एभ्यः । प्रेति । अयच्छत् । तत् ।
अन्विति । छन्दाꣳसि । अपेति । अक्रामन् । छ-
न्दाꣳसि । यज्ञः । ततः । देवाः । अभवन् । परेति ।

पतिमुपाधावन् ईदृशाः स्म इति वदन्तः । अथ देवैरुपाश्रितस्स प्रजापतिरब्रवीत्—छन्दसां वीर्यं बलमादाय वो युष्मभ्यं तत्प्रदास्यामीति । स तथोक्तवान् तथैवाकरोत् । तच्च वीर्यमाश्रावणादिरूपं इदानीमेव वक्ष्यते । अथ यदेव छन्दोभ्यो वीर्यमादाय देवेभ्यो दत्तं तदनन्तरमेव छन्दांस्यसुरेभ्योऽपाक्रामन्, छन्दांस्यनु यज्ञोपाक्रामत्, ततोपक्रमाद्देवानुपागच्छत् छन्दांसि यज्ञश्च, यत्र छन्दसां वीर्यमवस्थितमिति सामर्थ्यादभ्यते, ततो देवा अभवन् भूतिमन्तस्संपन्नाः, असुराश्च पराभूताः ॥

एवं छन्दसां वीर्यं वेदा श्रावयास्तु श्रौषडयज ये यजामहे वषट्कारो भवत्यात्मना परास्य भ्रातृव्यो भवति ब्रह्मवादिनो वदन्ति कस्मै क-

असुराः । [2]यः । एवम् । छन्दसाम् । वीर्यम् । वेद । इति । श्रावय । अस्तु । श्रौषट् । यज । ये । यजामहे । वषट्कार इति वषट्-कारः । भवति । आत्मना । परेति । अस्य । भ्रातृव्यः । भवति । [3]ब्रह्मवादिन् इति ब्रह्म-वादिनः । वदन्ति । कस्मै । कम् ।

---

[2]अथ य एवं छन्दसां वीर्यं वेदेत्युक्ते किं पुनस्तच्छन्दसां वीर्यमित्याह—आश्रावयेत्यादि ॥ 'आश्रावय' इत्याश्रवणार्थं चतुरक्षरमध्वर्योः, इदं तुभ्यं दास्यामीति हविर्याज....[र्यागदेवतायै आभिमुख्येन श्रावयेति] । 'अस्तु श्रौषट्' इति प्रत्याश्रवणं चतुरक्षरं अग्नीधः । अस्तु प्रत्याश्रुतं हविर्देवतायै दातुमिति । 'यज' इति याज्यां ब्रूहीति द्व्यक्षरम् । 'ये यजामहे इति आरोहणार्थं पञ्चाक्षरं यष्टुमर्हन्तीति । वषट्कारो वौषट्छब्दः । एवमेतानि छन्दसामक्षरसंख्याविशेषाणां वीर्याणि समुद्धृत्य प्रजापतिना देवेभ्यो दत्तानीति यो वेद स भवत्यात्मना भूतिमान् स्वयं संपद्यते; अस्य तु भ्रातृव्यः शत्रुः पराभवति नश्यति ॥

[3]ब्रह्मवादिन इति ॥ कस्मै खलु कामायाध्वर्युराश्रावयतीति । किमिति वितर्के । सुखवाचीति केचित् । 'कस्मै कमग्निश्रीयते'*

---

*सं. ५-५-२.

मध्वर्युरा श्रावयतीति छन्दसां वी-
र्यायेति ब्रूयादेतद्वै ॥ २० ॥ छन्दसां
वीर्यमा श्रावयास्तु श्रौषडयज ये
यजामहे वषट्कारो य एवं वेद स-
वीर्यैरेव छन्दोभिरर्चति यत्किं चार्चे-

अध्वर्युः । एति । श्रावयति । इति । छन्दसाम् ।
वीर्याय । इति । ब्रूयात् । एतत् । वै ॥ २० ॥
छन्दसाम् । वीर्यम् । एति । श्रावय । अस्तु ।
श्रौषट् । यज । ये । यजामहे । वषट्कार इति-
वषट्—कारः । [4]यः । एवम् । वेद । सवीर्यैरिति स—
वीर्यैः । एव । छन्दोभिरिति छन्दः—भिः । अर्चति ।

इत्यादि च द्रष्टव्यम् । उपलक्षणं चेदं 'अध्वर्युराश्रावयति' इति—अध्व-
र्व्वादयः प्रचरन्तः कस्मै प्रयोजनायाश्रावणादीनि कुर्वन्ति छन्द-
सामिति । छन्दसां वीर्याय वीर्यवत्त्वाय पूर्वं प्रजापतिनोद्धृतवी-
र्याणि छन्दांसि, तानीदानीं यागार्थं वीर्यवन्ति कर्तुं आश्रावणा-
दीनि कुर्वन्तीति ब्रूयात् उत्तरम् । एतद्वा इत्यादि । गतम् ॥

[4]य एवं वेदेति ॥ विदित्वा कुर्वन्नेव सवीर्यैश्छन्दोभिरर्चति
देवतादिकमाराधयति यत्किंचिदस्यार्चनीयं अयज्ञसंयुक्तमपि ॥

ति॒ यदिन्द्रो॑ वृ॒त्रमह॑न्नमे॒ध्यं तद्यद्-
तीॅन॒पाव॑पदमे॒ध्यं तद॑थ॒ कस्मा॑दै॒न्द्रो
य॒ज्ञ आ स॑ꣳस्था॒तो॒रित्या॑हु॒रिन्द्र॑स्य॒
वा एषा य॒ज्ञिया॑ त॒नूर्य॒ज्ञस्ता॑मे॒व

यत्। किम्। च। अर्चति। [5]यत्। इन्द्रः। वृत्रम्। अहन्। अमेध्यम्। तत्। यत्। यतीन्। अपावपदित्यप-अवपत्। अमेध्यम्। तत्। अथ। कस्मात्। ऐन्द्रः। यज्ञः। एति। सꣳस्थातोरिति सं-स्थातोः। इति। आहुः। [6]इन्द्रस्य। वै। एषा। यज्ञिया। तनूः। यत्। यज्ञः। ताम्। एव। तत्। यजन्ति।

---

[5]यदिन्द्र इत्यादि ॥ वृत्रस्य हननं यदिन्द्रेण कृतं तदमेध्यं अयज्ञार्हं चरितं, यच्च यतीनसुरविशेषानपावपत् अनाशयत् 'इन्द्रो यतीन् सालावृकेभ्यः प्रायच्छत्'* इत्याह तदप्ययज्ञार्हमस्य चरितम्। एवमयज्ञार्हं खल्वाचरितवानिन्द्रः। अथेदानीं कस्मात्कारणात् ऐन्द्रो यज्ञ आ संस्थातोरा समाप्तेः, कथं वा इन्द्रोर्चनीयो भवतीत्याहुः ब्रह्मवादिनः। 'भावलक्षणे' इति तोसुन्, 'यतोश्चातदर्थे' इत्युत्तरपदान्तोदात्तत्वम् ॥

[6]उत्तरमाह—इन्द्रस्य वा इत्यादि ॥ इन्द्रस्य द्वे तनू। काचित् वृत्रवधादि करोति, काचित् यज्ञात्मिका यष्टृभिरर्च्यते। तत्र

*सं. ६-२-७.

तद्यजन्ति य एवं वेदोपैनं यज्ञो नमति ॥ २१ ॥
आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि । घृतं पीत्वा

यः । एवम् । वेद । उपेति । एनम् । यज्ञः । नमति ॥ २१ ॥

छन्दसां वीर्यं वा एव तदृष्टौ च ॥ ७ ॥

[1]आयुर्दा इत्यायुः–दाः । अग्ने । हविषः । जुषाणः । घृतप्रतीक इति घृत–प्रतीकः । घृतयोनिरिति घृत–योनिः । एधि । घृतम् । पीत्वा । मधु । चारु । ग-

---

येयं यज्ञात्मिका एषा यज्ञिया यजनार्हा । यजनं यज्ञः । यजमानायैवेयं इन्द्रस्य तनूः तामेव यां तनुमेतैस्सवीर्यैः छन्दोभिः यजन्ति अर्चयन्तीति । य एवमिति । गतम् ॥

इति तृतीये तृतीये सप्तमोनुवाकः.

---

[1]अवभृथमवैष्यन् आयुर्दा इति जुहोति त्रिष्टुभा ॥ व्याख्याता चेयं 'त्वमग्ने रुद्रः'* इत्यत्र । हे अग्ने त्वमायुर्दाः, त्वमस्य

*सं. १-३-१४.[12]

मधु॒ चारु॒ गव्यं॑ पि॒तेव॑ पु॒त्रम॒भि र॑-
क्षतादि॒मम् । आ वृ॑श्चते॒ वा ए॒तद्य-
ज॑मानो॒ऽग्निभ्या॑ यदे॑नयोऽशृ॒तं॑कृत्या-
था॒न्यत्रा॑वभृ॒थम॒वैत्या॑युर्दा अग्ने ह॒वि-
षो॑ जुषा॒ण इत्य॑वभृ॒थम॑वै॒ष्यञ्जु॑हुया-
दाहु॑त्यै॒वैनौ॑ शमयति॒ नार्ति॒मार्छ॑ति॒

व्यम् । पि॒ता । इ॒व॒ । पु॒त्रम् । अ॒भीति॑ । र॒क्ष॒ता॒त् । इ॒मम् । [2]एति॑ । वृ॒श्च॒ते॒ । वै । ए॒तत् । यज॑मानः । अ॒ग्नि॒भ्यामित्य॒ग्नि॒—भ्या॒म् । यत् । ए॒न॒योः । शृ॒तं॑—कृ॒त्येति॑ शृ॒तं—कृ॒त्य॑ । अथ॑ । अ॒न्यत्र॑ । अ॒व॒भृ॒थमि॑-त्य॑व—भृ॒थम् । अ॒वैतीत्य॑व—एति॑ । आ॒युर्दा इत्या॑युः—दाः । अ॒ग्ने॒ । ह॒विषः॑ । जु॒षा॒णः । इति॑ । अ॒व॒भृ॒-थमित्य॑व—भृ॒थम् । अ॒वै॒ष्यन्नित्य॑व—ए॒ष्यन् । जु॒हु-या॒त् । आहु॑त्येत्या—हु॒त्या॒ । ए॒व । ए॒नौ॒ । शम॒य॒ति॒ ।

हविषः जुषाणः सेवमानः घृतप्रतीकः घृतारम्भः घृतस्योदकस्य योनिः कारणं भव । किं च—मधुरं गव्यं चारु घृतमिदं पीत्वा पितेव पुत्रमिमं यजमानं अभिरक्षतादिति ॥

[2]अथैतस्य मन्त्रस्य ब्राह्मणं—आवृश्चते इत्यादि ॥ यदेन-योः अग्नयोः शृतंकृत्य हविः अथान्यत्र गत्वा अवभृथमवैति

यजमानो यत्कुसीदम् ॥ २२ ॥
अप्रतीत्तं मयि येन यमस्य बलिना
चरामि । इहैव सन्निरवदये तदेतत्त-
न । आर्तिम् । एति । ऋच्छति । यजमानः । [3]यत् ।
कुसीदम् ॥ २२ ॥ अप्रतीत्तमित्यप्रति–इत्तम् ।
मयि । येन । यमस्य । बलिना । चरामि । इह ।
एव । सन् । निरवदय इति निः–अवदये । तत् ।

अवभृथेन प्रचरति । एतद्यजमानोऽग्निभ्यामावृश्चते विच्छिद्यते । तस्मादवभृथमवेष्यन् आयुर्दा जुहुयात् । आहुत्याऽनया एनौ अग्नी शमयत्येव । 'एत्येधत्यूठ्सु' इति वृद्धिः । ततश्च यजमानो नार्तिं गच्छति । 'उपसर्गादतिधातौ' इति वृद्धिः ॥

[3]औपयाजिरे अग्नौ बर्हिरुपोपयति—यत्कुसीदमिति त्रिष्टुभा ॥ 'मयि' इति प्रथमपादान्तः । 'तत्' इति तृतीयपादान्तः । यत् कुसीदं ऋणं अप्रतीत्तं अप्रत्यर्पितं वेदिस्तरणार्थं दर्भग्रहणेनोपलक्षितोऽहं चरामि बलित्वेनावश्यदेयत्वं लक्ष्यते यमः अग्निः, 'अग्निर्वाव यमः'* इति । तस्याग्नेः स्वभूतेन ऋणेन । यद्वा—अग्नचर्थेन ऋणेन चरामि । तदेतत् ऋणमिहैव जन्मनि सन् वर्तमानः निरवदये अपाकरोमि । दो॒ दॅ॒ रक्षणे । यन्मया गृहीतं तस्यास्य बर्हिषो दहनेनेति भावः । हे अग्ने तत् तेनाहमनृणो भवामि भूयासम् । प्रतिपूर्वाद्दातेः निष्ठायां 'अच उपसर्गात्तः' इति तादेशे 'दस्ति' इत्युपसर्गस्य दीर्घत्वम् । इत्तमिति इका-

---

*सं. ३-३-८.[8]

दग्ने अनृणो भवामि । विश्वलोप वि-
श्वदावस्य त्वाऽऽसञ्जुहोम्यग्घादेकोऽ-
हुतादेकस्समसनादेकः । ते नः कृ-

एतत् । तत् । अग्ने । अनृणः । भवामि । विश्व-
लोपेति विश्व—लोप । विश्वदावस्येति विश्व—दाव-
स्य । त्वा । आसन्न् । जुहोमि । अग्घादित्यग्घ—
अत् । एकः । अहुतादित्यहुत—अत् । एकः । सम-
सनादिति समसन—अत् । एकः । ते । नः । कृण्व-

रोपजनं पदकारा मन्यन्ते । इदन्तेर्वा [इन्दतेर्वा] छान्दसमित्तेति रूपम् ॥

[1]यदि मिश्रमिव पापेन संसृष्टमिव चरेत् स्नातकः सः उपौ-षमाणे अरण्ये दाव्यं दहन्तमग्निमुपगम्याञ्जलिनोपस्तीर्णेनाभिधारितेन सक्तून् प्रदाव्ये तस्मिन् दाव्याग्नौ जुहोति—विश्वलोपेति यजुरा-दिकयाऽनुष्टुभा । 'अग्घादेकोहुतादेकः' इति प्रथमपादन्तः ॥ हे अग्ने विश्वलोप विश्वं लुम्पति दहति । कर्मण्यण् । विश्वदावस्य विश्वस्य पापस्य दावस्य वनदहनस्य त्वा तव । वचन[विभक्ति] व्यत्ययः । आसन् आस्ये जुहोमि सक्तून् । यद्वा—विश्वस्य पापस्य लोप्तः हे सक्तुञ्जले त्वां विश्वदावस्याग्नेरास्ये जुहोमि । 'पदन्' इत्यादिना आसन्भावः, 'सुपां सुलुक्' इति सप्तम्या लुक् । ध्वंसयते—अग्घात् । अत्तेः गतिकर्मणः निष्ठायां धत्वे अग्धम्, अहोमेनागतं हविः, तदत्तीति अग्घात् एकोग्निः । 'अदो-नन्ने' इति विट् । अहुतस्यात्ता एकः । समसनस्य संक्षिप्तस्य

ण्वन्तु भेषजꣳ सदस्सहो वरेण्यम्।
अयं नो नभसा पुरस्सꣳस्फानो
अभि रक्षतु। गृहाणामसमत्यै बहवो
नो गृहा असन्। स त्वं नः ॥२३॥

न्तु। भेषजम्। सदः। सहः। वरेण्यम्। [5]अयम्। नः। नभसा। पुरः। सꣳस्फान इति सं–स्फानः। अभीति। रक्षतु। गृहाणाम्। असमत्या इत्यसं–ऋत्यै। बहवः। नः। गृहाः। असन्न्। [6]सः। त्वं। नः ॥ २३ ॥ नभसः। पते। ऊर्जम्। नः। धेहि।

वा अत्ता एकः। एवं त एते त्रयोप्यग्नयः नोस्माकं भेषजं अनुपद्रवत्वं सदः स्थानं प्रशस्तं सहः बलं वरेण्यं वरणीयं अन्यदपि यच्छ्रेष्ठं तच्च कृण्वन्तु कुर्वन्तु। प्रचयात्समुच्चयो गम्यते ॥

[5]अयं न इत्यादयः अग्निवाय्वादित्यानामुपस्थानमन्त्राः। आद्ये अनुष्टुभौ, तृतीया पुरस्ताद्बृहती; प्रथमस्य द्वादशाक्षरत्वात् ॥ अयं नभसा नित्यबद्धेन तेजसा पुरः अग्रतः सर्वस्य वर्तते श्रेष्ठ इत्यर्थः। संस्फानः सम्यक् स्फावयिता सर्वेषाम्। स्फावयतेर्ल्युटि छान्दसो यलोपः। नोस्मानभिरक्षतु गृहाणामसमर्त्यै अविनाशार्थम्। ऋ गतौ, संपूर्वो विनाशे वर्तते, उपसर्गस्याकारोपजनः छान्दसस्सांहितिकः। ततश्च नोस्माकं बहवः गृहाः असन् सन्तु ॥

[6]अथ वायोः—हे नभसस्पते आकाशस्य पते हे वात 'षष्ठ्याः पतिपुत्र' इत्यादिना सत्वम्, 'सुबामन्त्रिते' इति परा-

नभस्पत ऊर्जा नो धेहि भद्रया ।
पुनर्नो नष्टमा कृधि पुनर्नो रयिमा
कृधि । देव सꣳस्फान सहस्रपोष-
स्येशिषे स नो रास्वाज्यानिꣳ रा-
यस्पोषꣳ सुवीर्यꣳसंवत्सरीणाꣳ स्व-

भद्रया । पुनः । नः । नष्टम् । एति । कृधि । पुनः । नः । रयिम् । एति । कृधि । [7]देव । सꣳस्फानेति सं–स्फान । सहस्रपोषस्येति सहस्र–पोषस्य । ईशिषे । सः । नः । रास्व । अज्यानिम् । रायः । पोषम् । सुवीर्यमिति सु–वीर्यम् । संवत्सरीणामि-

---

ङ्गवङ्गावः । स त्वमूर्जमन्नादिरसं अस्मभ्यमेव धेहि भद्रया वाचा । किंच—नोस्माकं नष्टं पुनराकृधि आनीय देहि, रयिं धनं च प्रेप्सितं पुनःपुनः अजस्रमानीय देहि । करोतेर्लोटि शपो लुक्, 'श्रुशृणुपृकृ' इति षिभावः ॥

[7]अथादित्यस्य—हे देव आदित्य संस्फान । गतम्* । सहस्रपोषस्य पश्वादिबहुपुष्टेः त्वमेवेशिषे । 'ईशास्से' इतीडागमः । स त्वं नोस्मभ्यं रास्व देहि । व्यत्ययेनात्मनेपदम् । अज्यानिं अक्षीणत्वं अदारिद्र्यम् । 'ग्लाम्लाज्याहाभ्यो निः' । रायो धनस्य पोषं पुष्टिम् । पूर्ववत्सत्वम् । सुवीर्यं शोभनवीर्यं संवत्सरीणां संवत्सरभाविनीं स्वस्तिं अविनाशं च देहि । 'संपरिपूर्वात्ख च' इति खः ॥

*सं. ३-३-८.[5]

स्तिम्। अग्निर्वाव यम इयं यमी कु-
सींदं वा एतद्यमस्य यजमान आ
दत्ते यदोषधीभिर्वेदिꣳस्तृणाति यद-
नुपौष्य प्रयायाद्ग्रीवब्रह्मैनम्॥२४॥
अमुष्मिन्लोके नेनीयेरन् यत्कुसी-

ति सं–वत्सरीणाम्। स्वस्तिम्। [8]अग्निः। वाव। यमः। इयम्। यमी। कुसीदम्। वै। एतत्। यमस्य। यजमानः। एति। दत्ते। यत्। ओषधीभिरित्योषधि–भिः। वेदिम्। स्तृणाति। यत्। अनुपौष्येत्यनुप–ओष्य। प्रयायादिति प्र–यायात्। ग्रीवब्रह्मिति ग्रीव–ब्रह्म। एनम्॥२४॥ अमुष्मिन्। लोके। नेनीयेरन्। यत्। कुसीदम्। अप्रतीत्तमि-

[8]अथ 'यत्कुसीदम्'* इत्यादीनां मन्त्राणां ब्राह्मणम्—अग्निर्वा-वेत्यादि॥ अग्निः यमः यदर्थमृणं गृह्णाति। इयं पृथिवी यमी यस्या ऋणं गृह्यते। यमस्य स्त्री यमी। अस्याः मन्त्रे श्रुताया अप्युपादानमुत्तमर्णप्रदर्शनार्थम्। कुसीदमेतत् अस्यास्सकाशात् यज्ञं निर्वर्तयितुं यजमानो गृह्णाति। यदोषधीभिरस्यास्त्वभूताभिः वेदिं स्तृणातीति। अस्याः सकाशादृणमिव गृहीत्वा। तस्मादस्यै धारयति ऋणमिति। अपरा योजना—यमोग्निरुत्तमर्णः। यस्या उपादानं प्रासङ्गिकं, धनसम्बन्धप्रदर्श-

*सं. ३-३-८.[3]

दमग्नेतीत्तं मयीत्युपौषतीहैव सन्
यमं कुसीदं निरवदायानृणस्सुवर्ग
लोकमेति यदि मिश्रमिव चरेदज्ञ-

त्यग्नेति—इत्तम् । मयि । इति । उपेति । ओषति । इह । एव । सन् । यमम् । कुसीदम् । निरवदाये-ति निः—अवदायं । अनृणः । सुवर्गमिति सुवः—गम् । लोकम् । एति । [9]यदि । मिश्रम् । इव ।

नार्थं वा । यज्ञार्थमग्नेस्सकाशात् कुसीदं गृह्णाति यदोषधीभिः यमीद्वारेण अग्नेस्स्वभूताभिः वेदिं स्तृणाति तस्मादग्नये धारयति ऋणमिति । तस्मादेतद्वहिः यदनुपौष्य अदाहयित्वाऽध्वर्युणा यः प्रयायात् इतो लोकाद्यजमानः । उष दाहे, ण्यन्ताल्ल्यप् । एङि पररूपं प्राप्तं, प्रातिशाख्यकृतां मते 'वृद्धिरेचि' इति वृद्धिर्लक्ष्यते । एनमृणिनं ग्रीवबद्धं ग्रीवायामृणपाशेन बद्धं अमुष्मिन् लोके परलोके नेनीयेरन् या*तयेयुः । 'ङ्याप्पोस्सं-ज्ञाछन्दसोः' इति ह्रस्वत्वम् । यस्मादेवं तस्मात् 'यत्कुसीदम्' इति बर्हिरुपौषति दहत्यध्वर्युः । पूर्ववद्वृद्धिः । इहैव सन् यमं यमार्थं ऋणं यमस्वभूतं वा निरवदाय अपाकृत्य अनृणो भूत्वा स्वर्गं लोकं गच्छतीति ॥

[9]अथ 'विश्वलोप'† इत्यादेर्ब्राह्मणं—यदीत्यादि ॥ यदि मिश्रमिव पापसंसृष्टमिव आचरेत् अभोज्यसंसृष्टमिवाश्नीयात् तच्छुद्ध्यर्थं

---

*क—घा. †सं. ३-३-८.[4]

लिना सक्तून्प्रदाव्ये जुहुयादेष वा अग्निर्वैश्वानरो यत्प्रदाव्यस्स एवैनꣳस्वदयत्यह्नां विधान्यामेकाष्टकायामपूपं चतुश्शरावं पक्त्वा प्रातरे-

चरेत् । अञ्जलिना । सक्तून् । प्रदाव्य इति प्र–दाव्ये । जुहुयात् । एषः । वै । अग्निः । वैश्वानरः । यत् । प्रदाव्य इति प्र–दाव्यः । सः । एव । एनम् । स्वदयति । [10]अह्नाम् । विधान्यामिति वि–धान्याम् । एकाष्टकायामित्येक–अष्टकायाम् । अपूपम् । चतुश्शरावमिति चतुः–शरावम् । पक्त्वा । प्रातः ।

अञ्जलिना सक्तून् प्रदाव्ये दवाग्नौ ज्वलति 'विश्वलोप'* इति जुहुयात् । एष वा इत्यादि । वैश्वानरत्वेन प्रदाव्यस्तुतिः । स एवैनं यजमानं स्वर्गं लोकं नयतीति । निवृत्तपापं स्वदयति स्वादून्याशयति ॥

[10]अथात्र प्रयोगान्तरमाह—अह्नामित्यादि ॥ अह्नां विधानी एकाष्टका या संवत्सरस्य पत्नी । यथोक्तं—'एषा वै संवत्सरस्य पत्नी यदेकाष्टका'† इति । विशेषणोपादानं अहस्सु कृतानां तदधीनत्वख्यापनार्थम् । यद्वा—अह्नामेकाहादीनां क्रतूनां विधानी संवत्सरस्य वा क्रतोः गवामयनस्य अवयवानामह्नां विधानी । तत्रारम्भात् 'संवत्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्'† इति

---

* सं ३-३-८[4] † सं. ७-४-८.

तेन॒ कक्ष॒मुपौ॑षे॒द्यदि॑ ॥ २५ ॥ दह॑ति पुण्य॒समं॑ भवति॒ यदि॒ न दह॑ति पा॒पस॒मं मे॒तेन॑ ह स्म॒ वा ऋष॑यः पु॒रा

ए॒तेन॑ । कक्ष॑म् । उपे॑ति । ओषे॑त् । यदि॑ ॥ २५ ॥ दह॑ति । पु॒ण्य॒सम॒मिति॑ पुण्य–सम॑म् । भव॑ति । य॒दि॑ । न । दह॑ति । पा॒प॒सम॒मिति॑ पाप–सम॑म् । ए॒तेन॑ । ह॒ । स्म॒ । वै । ऋष॑यः । पु॒रा । वि॒ज्ञा॒नेने॑ति॑

माघकृष्णाष्टमी एकाष्टका । 'अष्टका पितृदैवत्ये' इतीत्वाभावः । अस्यां अहोरात्रे अपूपं चतुश्शरावं चतुश्शरावपरिमाणम् । द्विप्रस्थः शरावः । 'अध्यर्धपूर्वात्' इति अर्हीयस्य लुक्, 'इगन्तकाल' इति पूर्वपदप्रकृतिस्वरत्वम् । पक्त्वा प्रातः उदिते आदित्ये अरण्ये अग्निमुपसमाधाय तत्र दीप्ते पूतीतृणसहितेन अपूपेन कक्षं वनं गहनमुपोषेत् दहेत् । अथैनमुद्वृह्णाति, विज्ञानमुपैति—यदि दहति सोग्निः कक्षं पुण्यसमं पुण्यानुरूपं भवति । यद्वा—आरभ्यमाणास्समास्संवत्सराः पुण्या अनुपद्रवाः अस्य भवन्ति । पुण्यत्वं समास्वासूचयतीति पुण्यसमम्, 'तिष्ठद्गुप्रभृतीनि च', 'कूलतीर' इत्यादिनोत्तरपदाद्युदात्तत्वम् । अनेन पुण्यतां ज्ञात्वा कर्मारभेतेति । यदि न दहति पापसममेतद्भवति । तदा तूष्णीमासीतेति । पूर्ववत्समासः, उत्तरपदाद्युदात्तत्वं च । 'निपातैर्यद्यदि' इति दहतीत्याख्यातं न निहन्यते । एतेन हि विज्ञानेन पुण्यापुण्यज्ञानोपायेन पुण्यतां सम्यग्ज्ञात्वा दीर्घसत्रं वर्षश-

विज्ञानेन दीर्घसत्रमुपं यन्ति यो वा
उपद्रष्टारमुपश्रोतारमनुख्यातारं वि-
द्वान् यजते सममुष्मिन्लोक इष्टा-
पूर्तेन गच्छतेऽग्निर्वा उपद्रष्टा वायुरु-
पश्रोताऽऽदित्योनुख्याता तान् य
एवं विद्वान् यजते सममुष्मिन्लोक

वि-ज्ञानेन। दीर्घसत्रमिति दीर्घ-सत्रम्। उपेति। यन्ति। [11]यः। वै। उपद्रष्टारमित्युप-द्रष्टारम्। उपश्रोतारमित्युप-श्रोतारम्। अनुख्यातारमित्यनु-ख्यातारम्। विद्वान्। यजते। समिति। अमुष्मिन्। लोके। इष्टापूर्तेनेतीष्ट-पूर्तेन। गच्छते। अग्निः। वै। उपद्रष्टेत्युप-द्रष्टा। वायुः। उपश्रोतेत्युप-श्रोता। आदित्यः। अनुख्यातेत्यनु-ख्याता। तान्। यः। एवम्। विद्वान्। यजते। समिति। अमुष्मिन्। लोके। इष्टापूर्तेनेतीष्ट-पूर्तेन। गच्छते।

तिकं वर्षसाहस्रिकं च ऋषयो वा ह स्म पुरा उपयन्ति उपायन्। 'लट् स्मे' इति लट्॥

[11]अथोपस्थानमन्त्राणां ब्राह्मणं—यो वा इत्यादि॥ उपद्रष्ट्रादीन् विद्वान् यो यजते सोमुष्मिन् लोके इष्टापूर्तेन इष्टापूर्तफलेन संगच्छते अविनष्टेन संयुज्यते। 'समो गम्यृच्छि' इत्यात्मनेपदम्।

इष्टापूर्तेन गच्छतेऽयं नो नभसा पुरः ॥ २६ ॥ इत्याहाग्निर्वै नभसा पुरोऽग्निमेव तदाहैतन्मे गोपायेति स त्वं नो नभसस्पत इत्याह वायुर्वै नभसस्पतिर्वायुमेव तदाहैतन्मे गोपायेति देवꣳ सꣳस्फानेत्याहासौ वा

अयम् । नः । नभसा । पुरः ॥ २६ ॥ इति । आह । अग्निः । वै । नभसा । पुरः । अग्निम् । एव । तत् । आह । एतत् । मे । गोपाय । इति । [12]सः । त्वम् । नः । नभसः । पते । इति । आह । वायुः । वै । नभसः । पतिः । वायुम् । एव । तत् । आह । एतत् । मे । गोपाय । इति । [13]देवं । सꣳ-

---

इष्टं च पूर्तं चेष्टापूर्तं दैव्यं पित्र्यं च कर्म । सांहितिकं पूर्वपदस्य दीर्घत्वम्, गवाश्वप्रभृतित्वादेकवद्भावः । अग्निर्वा इत्यादि । गतम् । इदानीं पदानि व्याचष्टे—अयं न इत्यादि । अग्निर्वै नभसा तेजसा पुरः अग्रेसरः सर्वस्य, तस्मादग्निमाह—एतद्बृहान् मे गोपायेति रक्षेति अनेन मन्त्रेण प्रार्थयते; अग्नेर्ग्रहपतित्वात् ॥

[12]वायुर्वै नभसस्पतिः आकाशस्य पालयिता, तस्माद्वायुमाह—एतदन्नं मे गोपाय नष्टमप्यानयेति प्रार्थयते ॥

[13]असौ वा आदित्यो देवः संस्फानः सम्यग्वर्धयिता प्रजानां

आदित्यो देवस्सꣳस्फानं आदित्य-
मेव तदाहैतन्मे गोपायेति ॥ २७ ॥
एतं युवानं परि वो ददामि तेन

स्फानेति सं–स्फान् । इति । आह । असौ । वै । आदित्यः । देवः । सꣳस्फान् इति सं–स्फानः । आदित्यम् । एव । तत् । आह । एतत् । मे । गोपाय । इति ॥ २७ ॥

कुसीदं त्वं न एनमोषेयादि पुर आदित्यमेव
तदाहैतन्मे गोपायेति ॥ ८ ॥

[1]एतम् । युवानम् । परीति । वः । ददामि ।

धनानां च तस्मादादित्यमाह—एतन्मे प्रजादिकं गोपायेति भूयश्च पोषयेति प्रार्थयते । 'गुपूधूप' इत्यायप्रत्ययः ॥

इति तृतीये तृतीये अष्टमोनुवाकः.

---

[1]अथर्षभे जीर्णे गोष्वन्यं जीर्णाटषभमपिसृजति—एतं युवानमिति त्रिष्टुभा ॥ हे गावः एतं युवानं जीर्णादन्यमृषभं वो युष्मभ्यं परिददामि, तेनानेन क्रीडन्तीः क्रीडन्त्यः चरत वर्तध्वम्, प्रियेण इष्टेन युवत्वात् नः अस्मान् मा शासत, अपि त्वनुगृह्णीत तरुणं

क्रीडन्तीश्चरत प्रियेण । मा नश्शाप्त
जनुषा सुभागा रायस्पोषेण समिषा मदेम । नमो महिम्न उत चक्षुषे ते मरुतां पितस्तदहं गृणामि । अनु मन्यस्व सुयजा यजाम जुष्टं

तेन । क्रीडन्तीः । चरत । प्रियेण । मा । नः । शाप्त । जनुषा । सुभागा इति सु-भागाः । रायः । पोषेण । समिति । इषा । मदेम । [2]नमः । महिम्ने । उत । चक्षुषे । ते । मरुताम् । पितः । तत् । अहम् । गृणामि । अन्विति । मन्यस्व । सुयजेति सु-यजा । यजाम । जुष्टम् । देवानाम् । इदम् ।

ददातीति । हे जनुषा सुभागाः कल्याण्यः । यद्वा—सुभगाः सुष्ठु भाग्यवत्यः । प्रकृत्यादितृतीया, तेनाकारकत्वात्पराङ्गवद्भावाभावः; 'षष्ठ्यामन्त्रितकारकवचनम्' इत्युक्तत्वात् । ततश्च युष्मत्प्रसादात् रायो धनस्य पोषेण पुष्ट्या इषा अन्नेन च वयं संमदेम मोदेमहि । माद्यतेः व्यत्ययेन शप् । रायष्षष्ठ्यास्सत्वोदात्तत्वे उक्ते ॥

[2]इतरं त्वाष्ट्रं वैन्द्रं वा प्राजापत्यं वा पशुमालभते एतानि साङ्गस्य*देवताः । तस्योपाकरणमन्त्रः—नमो महिम्न इति त्रिष्टुप् ॥ आदित्यात्मना स्तूयते—नमो महिम्ने महते उत अपि च चक्षुषे सर्वेषां दर्शनभूताय हे मरुतां रश्मीनां पितः पाल-

---

*क. साण्डस्य.

देवानामिदमस्तु हव्यम् । देवानामेष उपनाह आसीदपां गर्भ ओषधीषु न्यक्तः । सोमस्य द्रप्समवृणीत

अस्तु । हव्यम् । [3]देवानाम् । एषः । उपनाह इत्युप-नाहः । आसीत् । अपाम् । गर्भः । ओषधीषु । न्यक्त इति नि-अक्तः । सोमस्य । द्रप्सम् । अवृणी-

---

यितः । षष्ठ्यामन्वितसमुदायस्य पराङ्गवद्भावात् षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । नमस्कृत्य त्वां तदहं गृणामि तत्तुभ्यं ब्रवीमि, तच्च त्वमनुमन्यस्व अनुजानीहि । किं ब्रवीषीति चेदाह—सुयजा शोभनयागस्य कर्त्राऽनेन प्रवृद्धेन यजाम इदमाशास्महे । सुपूर्वाद्यजतेर्विचि कृदुत्तरपदप्रकृतिस्वरत्वम् । सुयट् शोभनयष्टृकः, 'सुयजोर्ङ्वनिप्' इति बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । कीदृशमस्य सुयट्त्वम्? यच्चया प्रार्थ्यते इति चेत् जुष्टं प्रियं देवानामिदमस्तु हव्यम्, एतत्ते ब्रवीमीति, एतदनुमन्यस्व, एतस्मै प्रयोजनाय नमस्कुर्म इति । 'नित्यं मन्त्रे' इति जुष्टशब्द आद्युदात्तः । हवमर्हतीति, 'छन्दसि च' इति यः ॥

[3]वपां जुहोति—देवानामिति त्रिष्टुभा ॥ देवानां इन्द्रादीनां इन्द्रियाणां वा एषः गौः उपनाहः उपनह्यते अनेनेत्युपनाहः बन्धनः । घञ्, थाथादिनोत्तरपदान्तोदात्तत्वम् । उपकारको देवानामासीत् अस्तु । छान्दसो लङ् । कथमित्याह—अपां गर्भः आदित्यरश्मिषु गर्भीभूतः अपां राशिः ओषधीषु ओ-

पूषा ॥ २८ ॥ बृहन्नद्रिरभवत्तदेषाम्।
पिता वत्सानां पतिरघ्न्यानामथो
पिता महतां गर्गराणाम् । वत्सो
जरायु प्रतिधुक्पीयूष आमिक्षा मस्तु

तु । पूषा ॥ २८ ॥ बृहन् । अद्रिः । अभवत् । तत् ।
एषाम् । पिता । वत्सानाम् । पतिः । अघ्न्या-
नाम् । अथो इति । पिता । महताम् । गर्गराणाम् ।
वत्सः । जरायु । प्रतिधुगिति प्रति–धुक् । पीयूषः ।

षधिनिमित्तं न्यक्तः वृष्ट्या न्यक्पातितः सम्यग्यागनिवृत्तिहेतुत्वादयं वृष्ट्युत्पादनेन ओषधीनामभिप्रवृत्तिनिमित्तत्वात् देवानामुपनाहो भवतीति। कथं पुनरपां गर्भभाव इत्याह—सोमस्यान्नस्य पृथिव्यां द्रप्सं रसं अवृणीत पूषा सविता रश्मिभिरात्तवान् । यद्वा—सोमस्य सलिलात्मनः चन्द्रस्य द्रप्समेकदेशं पार्थिवं बलमात्तवान् पूषा। तत एषां द्रप्सानां रसानां तद्बृन्दं गर्भीभूय रश्मिषु चिरं स्थितं बृहत् महान् अद्रिर्मेघोभवत् भवति । स एव लङ् । स एव वृष्ट्या पृथिवीं प्राप्नोति, तत ओषधयस्संपद्यन्ते ताश्च देवता धारयन्तीति ॥

[4]अथास्य हविर्जुहोति—पिता वत्सानामिति त्रिष्टुभा ॥ पिता जनको वत्सानामर्भकाणामयमृषभः अघ्नियानां गवां पतिः पाता जनयिता रमयिता च। अथो अपि च महतां गर्गराणां महाशब्दानां महोक्षाणाम् । यद्वा—दध्नः पूर्णानां मथ्यमानानां महार-

घृतमस्य रेतः । त्वां गावोऽवृणत
राज्याय त्वाꣳहवन्त मरुतस्स्वर्काः।
वर्ष्मन्क्षत्रस्य ककुभि शिश्रियाण-

आमिक्षा । मस्तु । घृतम् । अस्य । रेतः । [5]त्वाम् । गावः । अवृणत । राज्याय । त्वाम् । हवन्त । मरुतः । स्वर्का इति सु—अर्काः । वर्ष्मन् । क्षत्रस्य ।

वाणां भाजनानां पिता उत्पादयिता । गृणातेर्यङ्लुगन्तात्पचाद्यचि छान्दसमाद्युदात्तत्वम् । किंच—वत्सो गर्भस्थः, जरायु तदाधारं, प्रतिधुक् दोहनस्थं दुग्धं, पीयूष ऊधस्स्थं, आमिक्षा आतञ्चनवत्, मस्तु नवनीतं, घृतं तदेवाग्निपाकवत्, एतानि सर्वाण्यस्य रेतः रेतसः परिणामः उपलक्षणत्वाद्दधितक्रादीन्यपि । एवं महाभागोयं देवांस्तर्पयत्विति ॥

[5]गोषूपसृष्टमपियन्तमनुमन्त्रयते—त्वां गाव इति त्रिष्टुभा । अपिसर्जनादनन्तरमिदं द्रष्टव्यम् ॥ हे वृषभ त्वां गावोऽवृणत वृतवत्यः राज्याय राजभावाय राजा भूयादयं न इति । पुरोहितादित्वाद्यक् । किञ्च—त्वां हवन्त हवन्ते इत आरभ्य त्वामेवाह्वयन्ति मरुतः स्वर्काः शोभनगमनाः शोभनस्तुतयो वा । 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । यद्वा—मरुतः देवाः स्वर्काः सुपूजनाः त्वया वृद्ध्युत्पादनाय षडावृत्त्याऽऽह्वयन्ते । छान्दसे लङि 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः । स त्वं क्षत्रस्य बलस्य वर्ष्मन् वर्ष्मणि उच्छ्राये ककुभि प्रधाने शिश्रियाणः श्रयमाणः स्थितः । शपः श्लुः । यद्वा—क्षत्रस्य राजन्यस्य वर्ष्मन् महति ककुभि

स्ततो न उग्रो वि भजा वसूनि ।
व्यृद्धेन वा एष पशुना यजते यस्यै-
तानि न क्रियन्त एष ह त्वै समृद्धेन
यजते यस्यैतानि क्रियन्ते ॥ २९ ॥

ककुभि । शिश्रियाणः । ततः । नः । उग्रः । वीति । भज । वसूनि । [6]व्यृद्धेनेति वि-ऋद्धेन । वै । एषः । पशुना । यजते । यस्य । एतानि । न । क्रियन्ते । एषः । ह । तु । वै । समृद्धेनेति सं-ऋद्धेन । यजते । यस्य । एतानि । क्रियन्ते ॥ २९ ॥

पूषा क्रियन्त एषोष्टौ च ॥ ९ ॥

प्रधाने । किंपुनस्तत्? बलं रक्षकत्वं वा, तत्र स्थितो ह्यसि त्वम् । यत एवं ततो नोस्माकं उग्रः उद्गूर्णस्त्वं वसूनि धनानि गोरूपाणि विभज विविधं भज रक्षकभावेन गोषु वर्तस्वेत्यर्थः । 'द्व्यचोतस्तिङः' इति दीर्घत्वम् ॥

[6]अथात्रैव ब्राह्मणम्—व्यृद्धेनेति ॥ यस्य यजमानस्यैतानि कर्माणि 'एतं युवानम्'* इति मन्त्रसाध्यानि न क्रियन्ते, एषः व्यृद्धेन ऋद्धिहीनेन पशुना यजते । तत्करणे तु पशुयागस्समृद्धिहेतुरिति । उभयत्रापि 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरत्वम् । पूर्वत्र 'उदात्तस्वरितयोर्यणः' इति संहितायामूकारस्स्वर्यते । संहितायां तुशब्दस्यान्त्यलोपश्छान्दसः । ततःपरस्य वा वैशब्दस्यादिलोपः ॥

इति तृतीये तृतीये नवमोनुवाकः.

---

*सं. ३-३-९.1

सूर्यो देवो दिविषद्भ्यो धाता क्षत्रा-
य वायुः प्रजाभ्यः। बृहस्पतिस्त्वा
प्रजापतये ज्योतिष्मतीं जुहोतु।
यस्यास्ते हरितो गर्भोथो योनिर्

[1]सूर्यः। देवः। दिविषद्भ्य इति दिविषत्—भ्यः। धाता। क्षत्रायं। वायुः। प्रजाभ्य इति प्र—जाभ्यः। बृहस्पतिः। त्वा। प्रजापतय इति प्रजा—पतये। ज्योतिष्मतीम्। जुहोतु। [2]यस्याः। ते। हरितः। गर्भः। अथो इति। योनिः। हिरण्ययी।

---

[1]वशायाश्चेद्गर्भं पश्यति तस्यां जुहोति—सूर्यो देव इति बृहत्या त्रिपदया विवृद्धतृतीयपादया ॥ दिवि सीदन्तीति दिविषदो देवाः। 'तत्पुरुषे कृतिबहुलम्' इत्यलुक्। तेभ्यः तेषामभिवृद्ध्यर्थम्। त्वां सूर्यो देवो जुहोतु। धाता सर्वस्य विधाता क्षत्राय क्षत्राभिवृद्धये, सर्वेषां वा बलाभिवृद्धये त्वां जुहोतु। वायुः प्रजाभ्यः प्रजानामभिवृद्धये त्वां जुहोतु। प्रजापतये तासां प्रजानां पात्रे तदभिवृद्ध्यर्थं यजमानाभिवृद्ध्यर्थं वा त्वां जुहोतु। बृहस्पतिः ज्योतिष्मतीं दीप्तिमतीं दीप्तिसमृद्धिहेतुम्। बृहस्पतिप्रजापतिशब्दावुक्तस्वरौ ॥

[2]वशामष्टापदीमनुमन्त्रयते—यस्यास्ते इत्यनुष्टुभा ॥ 'यस्यै' इति तृतीयपादान्तः। यस्यास्ते हरितः गर्भः ह्रतसारो गर्भः

हिरण्ययीं। अङ्गान्यहुता यस्यै तां दे-
वैस्समजीगमम् । आ वर्तन वर्तय
नि निवर्तन वर्तयेन्द्र नर्दबुद। भूम्या-
श्चतस्रः प्रदिशस्ताभिरा वर्तया पुनः।

अङ्गानि । अहुता । यस्यै । ताम् । देवैः । सम-
तिं । अजीगमम् । [3]एतिं । वर्तन । वर्तय । नीतिं ।
निवर्तनेतिं नि–वर्तन । वर्तय । इन्द्र । नर्दबुद ।
भूम्याः । चतस्रः । प्रदिश इतिं प्र–दिशः । ताभिः।

हरितवर्णो वा; असारत्वात् । अथो अपि च यस्यास्ते योनिः हिरण्ययी हिरण्यवर्णा भरण * शीला वा । 'ऋत्व्य वास्तु' इति निपात्यते । किं च—यस्यै यस्यास्ते अङ्गानि अहुता अहृतानि अपीडितानि । हृ कौटिल्ये, 'हुह्वरश्छन्दसि' इति हुभावः । तां त्वा देवैस्समजीगमं संगमयामि । ण्यन्ताच्छान्दसो लङ् ॥

[3]गर्भं निवर्त्यमानमनुमन्त्रयते—आ वर्तनेति बृहत्या पञ्चपदया ॥ हे वर्तन वर्तयितः आवर्तय भूतसङ्घान् प्रवर्तय । किंच—हे निवर्तन निष्कासक निवर्तय निष्कासय । हे इन्द्र ईश्वर नर्दबुद; शब्दायमान बाणवत्त्वात् । यद्वा—नर्तितबुद्बुद वृष्टिहेतुत्वात्। वर्णलोपश्छान्दसः । नर्द शब्दे, पचाद्यच्, बुदिर् निशामने, इगुपधत्वात्कः । इदं च कुरु भूम्याश्चतस्रस्सन्ति प्रदिशः प्रधानदिशः, ताभिरेनं आवर्तय जनय । चतसृभिः वा दिग्भिरेनमावर्त-

---

*ग—हरण,

वि तें भिनद्मि तकरीं वि योनिं वि
गवीन्यौ । वि ॥ ३० ॥ मातरं च
पुत्रं च वि गर्भं च जरायु च । बहिस्ते

एतिं । वर्तय । पुनः । [4]वीतिं । ते । भिनद्मि ।
तकरीम् । वीतिं । योनिम् । वीतिं । गवीन्यौ । वीतिं ।
॥ ३० ॥ मातरम् । च । पुत्रम् । च । वीतिं ।
गर्भम् । च । जरायु । च । बहिः । ते । अस्तु ।

य विश्वव्यापिनं कुरु । यद्वा—भूमिसंबन्धिभिः चतुर्भिर्भागैः भूतैः अस्य जन्मान्तरे शरीरं साधय । सांहितिकमाख्यातस्य दीर्घत्वम् ॥

[4]उल्वाद्गर्भं प्रस्रंस्यमान*मनुमन्त्रयते—वि ते इत्यनुष्टुभा, बहिस्ते इत्येकपदया गायत्र्चा च ॥ हे वशे ते तव तकरीं विभिनद्मि विश्लेषयामि विश्लथयामि जीवप्रदेशम् । कित ज्ञाने, औणादिके रिप्रत्यये वर्णव्यत्ययविपर्यासः । तकेः वासकर्मणस्स एव प्रत्ययः, 'कृदिकारादक्तिनः' इति ङीष् । योनिं च तव विभिनद्मि । गौः गतिविशेषः, तस्य नेतारौ गविन्यौ वृषणस्थानीयौ योन्यन्तरगता†गतिविशेषनिमित्तभूतौ । प्रवृत्तिविकार ईकारः, अत एव नावग्रहः । 'उदात्तस्वरितयोर्यणः' इति विभक्तेः स्वरितत्वम् । 'उदात्तयणः' इति विभक्त्युदात्तत्वस्य 'नोङ्धात्वोः' इति प्रतिषेधः । मातरं च पुत्रं च विभिनद्मि विश्लेषयामि । गर्भं च जरायु च विश्लेषयामि । किमर्थम्?

---

*क—विमुच्यमान. †अ—यावन्तर्गतौ.

अस्तु बालितिं। उरुद्रप्सो विश्वरूप इन्दुः पवमानो धीर आनञ्ज गर्भम्। एकपदी द्विपदी त्रिपदी चतुष्पदी पञ्चपदी षट्पदी सप्तपद्यष्टापदी भुव-

बाल्। इतिं। [5]उरुद्रप्स इत्युरु–द्रप्सः। विश्वरूप इतिं विश्व–रूपः। इन्दुः। पवमानः। धीरः। आनञ्ज। गर्भम्। एकपदीत्येक–पदी। द्विपदीतिं द्वि–पदी। त्रिपदीतिं त्रि–पदी। चतुष्पदीति चतुः–पदी। पञ्चपदीति पञ्च–पदी। षट्पदीति षट्–पदी। सप्तपदीतिं सप्त–पदी। अष्टापदीत्यष्टा–पदी।

बहिस्ते अस्तु बालिति। बल प्राणने, ण्यन्तात् क्विप्। बल-हेतुः प्राणवृत्तिरूपः आत्मा सर्वव्यापी भवत्विति॥

[5]पुरस्तान्नाभ्यां गर्भस्यावदाय तद्वषट्कृते जुहोति—उरुद्रप्स इति द्विपदया त्रिष्टुभा यजुरन्तरया॥ उरुद्रप्सः उरुश्चासौ द्रप्सश्च उरुद्रप्सः रसः रसवानवयवसंघातः विश्वरूपः नानारूपः इन्दुः शुक्रः पवमानः शुद्धरूपः धीरः स्थिरः ईदृशोयं प्रजापशुरूपावयवसंघातः आनञ्ज गच्छतु गर्भं जननान्तरमित्यर्थः। किञ्च—एकपदी एकः पादो यस्याः, 'संख्या सुपूर्वस्य' इति पादस्य लोपः समासान्तः, 'पादोन्यतरस्याम्' इति ङीप्, 'पादः पत्' इति पद्भावः। सर्वत्र एकपद्यादयश्चा-

नाऽनुं प्रथताꣳ स्वाहा । मही द्यौः
पृथिवी चं न इमं यज्ञं मिमिक्षताम् ।
पिपृतां नो भरीमभिः ॥ ३१ ॥

भुवंना । अन्वितिं । प्रथताम् । स्वाहा । [6]मही । द्यौः । पृथिवी । च । नः । इमम् । यज्ञम् । मिमिक्षताम् । पिपृताम् । नः । भरीमभिरिति भरीम-भिः ॥ ३१ ॥

गवीन्यौ वि चतुश्चत्वारिꣳशच्च ॥ १० ॥

ष्टापद्या अवयुत्य निर्देशाः । द्वितीयतृतीययोः 'द्वित्रिभ्यां पद्दन्' इत्युत्तरपदान्तोदात्तत्वम् । छान्दसमष्टन आत्वम् । एषा भुवना भुवनानि भूतजातानि सर्वाण्यनुप्रथतां अनुक्रमेण प्रथताम् । नवेतु अष्टापदी सावमाता* । स्वाहेति प्रदानार्थः ॥

[6]अथैनं गर्भमुत्तरार्धमाहवनीयस्य प्रत्यञ्चमासाद्य भस्मना अभिवासयति—मही द्यौरिति गायत्र्चा ॥ मही महती द्यौः पृथिवी च महती नोस्माकं इमं यज्ञं मिमिक्षतां सिञ्चतां आगमनेन । मिहेर्ण्यत्ययेन शपः श्लुः, द्विर्विकरणता, सनि वा द्विर्वचनम् । तथा कृत्वा नः अस्मान् भरीमभिः भरणप्रकारैः पिप्टतां पालयतां पूरयतां वा । पृ पालनपूरणयोः, जौहोत्यादिकः, 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्येत्वम् । बिभर्तेरौणादिक इमनिचि छान्दसं दीर्घत्वम् ॥

इति तृतीये तृतीये शदमोनुवाकः.

---

*अ—प्रथताम् ।.....अष्टापदी सोदमानत्वा.....मही.

इदं वामास्ये हविः प्रियमिन्द्राबृहस्पती। उक्थं मदश्च शस्यते। अयं वां परिषिच्यते सोम इन्द्राबृहस्पती।

[1]इदम्। वाम्। आस्ये। हविः। प्रियम्। इन्द्राबृहस्पती इतीन्द्रा—बृहस्पती। उक्थम्। मदः। च। शस्यते। [2]अयम्। वाम्। परीति। सिच्यते। सोमः। इन्द्राबृहस्पती इतीन्द्रा—बृहस्पती। चारुः।

---

[1]अथ याज्याकाण्डं वैश्वदेवं 'यं कामयेत राजन्यमनपोऽधो जायेत वृत्रान् ध्नंश्चरेदिति तस्मा एतमैन्द्राबार्हस्पत्यं चरुं निर्वपेत्'* इत्यस्य पुरोनुवाक्या—इदं वामिति गायत्री ॥ हे इन्द्राबृहस्पती वां युवयोरास्ये इदं प्रियं हविः आस्यस्थमेवेदं मन्तव्यम्, न यत्नसाध्यम् । यद्वा—इदं हविः युवयोरास्ये जुहोमीति शेषः । उक्थं शस्त्रं, तदपि होत्रा शस्यते युवयोः प्रियम् । मदश्च मदहेतुश्च युवयोः । यद्वा—उक्थं शस्त्रं, मदः प्रतिगरः, तदुभयमपि युवयोः प्रियत्वात् शस्यते एव इदं हविरपि युवयोः प्रियत्वात् मया हूयते इति । यद्वा—उक्थं मदश्च शस्यते, यदर्थं स सोम एवेदं हविः । याभ्यां वोक्थं मदश्च शस्यते तयोर्युवयोरिदं हविरिति ॥

[2]अथ तत्रैव पुरोनुवाक्या विकल्प्यते—अयं वामिति गायत्री ॥ हे इन्द्राबृहस्पती अयं सोमः सोमसदृशं हविः चारुः दीप्तिमान् मदनसमर्थो वा । वां युवयोः मदाय मदार्थं पीतये पानाय परिषिच्यते सर्वतः पूर्यते । 'क्विच्क्तौ च' इति क्विच् ॥

---

*सं. २-४-१३.[1]

चारुर्मदाय पीतये । अस्मे इन्द्राबृहस्पती रयिं धत्तꣳ शतग्विनम् । अश्वावन्तꣳ सहस्रिणम् । बृहस्पतिर्नः

मदाय । पीतये । [3]अस्मे इति । इन्द्राबृहस्पती इतीन्द्रा—बृहस्पती । रयिम् । धत्तम् । शतग्विनमिति शत—ग्विनम् । अश्वावन्तमित्यश्व—वन्तम् । सहस्रिणम् । [4]बृहस्पतिः । नः । परीति । पातु । पु-

---

[3]पुनश्च विकल्पः—अस्मे इति गायत्री ॥ हे इन्द्राबृहस्पते अस्मे अस्मभ्यम् । 'सुपां सुलुक्' इति शेआदेशः, 'शे' इति प्रगृह्यत्वम् । रयिं धनं धत्तं दत्तम् । रयिर्विशेष्यते—शतग्विनं शतसंख्याकानां बहूनां गवां समाहारश्शतगवं, 'गोरतद्धितलुकि' इति टच्समासान्तः, तद्वन्तं शतग्विनं, अकारलोपश्छान्दसः । अश्वावन्तं अश्वैस्तद्वन्तम् । 'मन्त्रे सोमाश्व' इति दीर्घत्वम् । कियद्भिरश्वैस्तद्वन्तम्? सहस्रिणं सहस्रसङ्ख्यैः गोभ्योपि बहुतरैरश्वैः अन्यैर्वा गजादिभिस्तद्वन्तम् । ईदृशं रयिं अस्मभ्यं धत्तं अस्मासु स्थापयतम् ॥

[4]अथ याज्या—बृहस्पतिर्न इति त्रिष्टुप् ॥ बृहस्पतिः नः अस्मान् परिपातु सर्वैः प्रकारैः रक्षतु । पश्चादपरस्यां दिशि अवस्थितात् अघायोः अघं पापं योस्मभ्यमिच्छति तस्मात् पुरुषान्नः पातु । 'छन्दसि परेच्छायामपि' इति क्यच्, 'न छन्दसि' इतीत्वाभावः । उत अपि च उत्तरस्मादुत्तरदिगवस्थितात् अघायोर्नः पातु । अधरात् दक्षिणदिगवस्थिताच्चाघायोर्नः

परि॑ पातु प॒श्चादु॒तोत्त॑रस्मा॒दध॑राद॒घायोः। इन्द्रः॑ पु॒रस्ता॑दुत म॑ध्य॒तो न॒स्सखा॒ सखि॑भ्यो वरि॑वः कृणोतु। वि ते॒ विष्व॒ग्वात॑जूतासो अग्ने॒ भा-

श्चात्। उ॒त। उत्त॑रस्मा॒दित्युत्—त॒र॒स्मा॒त्। अध॑रात्। अ॒घा॒योरित्य॑घ—योः। इ॒न्द्रः॑। पु॒रस्ता॑त्। उ॒त। म॒ध्य॒तः। नः॒। सखा॑। सखि॑भ्य॒ इति॒ सखि—भ्यः। वरि॑वः। कृ॒णो॒तु॒। [5]वीति॑। ते॒। विष्व॑क्। वात॑जूतास॒ इति॒ वात॑—जूतासः। अग्ने॑।

पातु, भूगोळे दक्षिणस्याधरत्वात्। इन्द्रश्च नोस्मान्पुरस्तात्पूर्वतः पातु पूर्वस्यां दिश्यवस्थितात् अघायोः नः पातु। उत अपि च मध्यतः मध्यदिग्व्यवस्थिताच्च। किंच—सखा समानख्यानः सखिभ्यः समानख्यानेभ्यः यजमानेभ्यः वरिवः धनं कृणोतु ददातु। कः? आनन्तर्यादिन्द्रः॥

[5]मेध्या च वा एतस्यामेध्या च तनुवौ संसृज्येते। यस्याहिताग्नेरन्यैरग्निभिरग्नयस्संसृज्यन्ते। अग्नये विविचये पुरोडाशमष्टाकपालं निर्वपेत्'* इत्यस्य पुरोनुवाक्या—वि ते इति त्रिष्टुप्॥ हे अग्ने ते तव विष्वक् नानागतिः वातजूतासः वातेन जूताः प्रेरिताः वातजूतासः। जु इति सौत्रो धातुः, जुवः कर्मणि निष्ठायां छान्दसं दीर्घत्वम्, 'आज्जसेरसुक्,' 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम्। यद्वा—वातस्येव जूतं वेगो येषामिति

---

*तै. ब्रा. ३-७-३.

मांसः ॥ ३२ ॥ शुचे शुचयश्चरन्ति।
तुविम्रक्षासो दिव्या नवग्वा वना
वनन्ति धृषता रुजन्तः । त्वामग्ने

भामांसः ॥ ३२ ॥ शुचे । शुचयः । चरन्ति । तु-
विम्रक्षास इति तुवि–म्रक्षासः । दिव्याः । नवग्वाः ।
वना । वनन्ति । धृषता । रुजन्तः । [6]त्वाम् । अ-

वातजूतासः । भामासः भासनशीलाः क्रूररूपा वा हे शुचे दीप्त शुचयः दीप्तयः तव विचरन्ति विष्वग्गमनाः । किंच—तुविम्रक्षासः बहुशुद्धयः बहूनां वा शोधनाः । मृजेरौणादिके सप्रत्यये अमागमः, पूर्ववदसुक् । सेचनार्थात्स एव प्रत्ययः, अमागमश्च, बहुसेचकाः वृष्ट्या बहुविकारत्वादवग्रहश्च* बहुव्रीहित्वे त्रिचक्रादित्वादुत्तरपदान्तोदात्तत्वम् । दिव्याः दिवमर्हतीति दण्डादिभ्यो यत् । नवग्वाः नवगतयः नित्याभिनवाः । अनवग्रह एव । गमेः क्विप्, 'ऊङ्व गमादीनामिति वक्तव्यम्' इत्यूकारः, जसि छान्दसं दीर्घत्वम् । वना वनानि उदकानि वनन्ति संभवन्ति धृषता धर्षणेन प्रसहनेन रुजन्तः वैगुण्यं भजन्तः । तया समृद्ध्या वृष्टिमुत्पादयन्तु तव शुचय इति ॥

[6]अथ याज्या—त्वामग्ने मानुषीरिति त्रिष्टुप् ॥ हे अग्ने त्वां मानुषीः मनुष्याः विशः प्रजाः ईडते स्तुवन्ति । 'मनोर्जातौ' इत्यञ्, 'टिड्ढाणञ्' इत्यादिना ङीप्, 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । होत्राविदं वाग्विशेषज्ञं विविचिं विवेचकं

---

*ग–विकारत्वादनवग्रहश्च,

मानुषीरीडते विशो होत्राविदं वि-
विचिꣳ रत्नधातमम् । गुहा सन्तꣳ
सुभग विश्वदर्शतं तुविष्मणसꣳ
सुयजं घृतश्रियम् । धाता ददातु

प्र । मानुषीः । ईडते । विशः । होत्राविदमिति होत्रा-विदम् । विविचिमिति वि-विचिम् । रत्न-धातममिति रत्न-धातमम् । गुहा । सन्तम् । सु-भगेति सु-भग । विश्वदर्शतमिति विश्व-दर्श-तम् । तुविष्मणसम् । सुयजमिति सु-यजम् । घृतश्रियमिति घृत-श्रियम् । [7]धाता । ददातु ।

मिश्रितानां शोधकम् । विपूर्वाद्विचेः 'इक्कृष्यादिभ्यः' इतीक् । रत्नधातमं रमणीयानां धनानां धातृतमं दातृतमं गुहा गुहायां सन्तं गुह्यम् । सप्तम्या आकारः । हे सुभग सर्वस्य प्रिय । यद्वा—शोभनधन विश्वदर्शतं विश्वस्य दर्शयितारं, विश्वं दर्शनमस्येति बहुव्रीहिः । तुविष्मणसं प्रवृद्धमनसं, महाबलमित्येके, बहूनां मन्तारमित्यन्ये । छान्दसस्सुट्, णत्वं च, बहुव्रीहित्वे त्वन्तोदात्तत्वं त्रिचक्रादित्वाद्दृष्टव्यम्, बहुविकारत्वादनवग्रहः । सुयजं सुष्ठु यष्टारं वैगुण्यापनोदनं घृतश्रियं घृतस्य श्रयितारम् । 'क्विब्वचि' इत्यादिना क्विप्दीर्घौ । ईदृशं त्वामीडते प्रजाः । त्वं च अभिप्रेतैर्योजय सर्वतोस्मदभिप्रेतमपि साधयसि ॥

[7]सन्ति देविकाहवींषि 'धात्रे पुरोडाशं द्वादशकपालं निर्वपति',* 'देविका निर्वपेत्प्रजाकामः'† इति च विहितानि । तत्र

*सं. १-८-८[1]. †सं. ३-४-९[1].

नो रयिमीशानो जगतस्पतिः । स
नः पूर्णेन वावनत् । धाता प्रजाया
उत राय ईशे धातेदं विश्वं भुवनं
जजान । धाता पुत्रं यजमानाय
दाता ॥३३॥ तस्मा उ हव्यं घृतवद्वि-

नः । रयिम् । ईशानः । जगतः । पतिः । सः । नः । पूर्णेन । वावनत् । [8]धाता । प्रजाया इति प्र–जायाः । उत । रायः । ईशे । धाता । इदम् । विश्वम् । भुवनम् । जजान । धाता । पुत्रम् । यजमानाय । दाता ॥ ३३ ॥ तस्मै । उ । हव्यम् ।

धातुः पुरोनुवाक्या—धातेति गायत्री ॥ धाता विश्वस्य धारयिता नोस्मभ्यं धनं ददातु । ईशानः सर्वार्थसाधनशक्तः । अनुदात्तेत्त्वाच्छसार्वधातुकानुदात्तत्वम् । जगतः पतिः पालयिता । 'षष्ठ्याः पतिपुत्र' इति सत्वम् । किञ्च—स देवोस्मान् पूर्णेन पूरणाय वावनत् संभजताम्, अत्यर्थं परिगृह्णात्वस्मानिति । यद्वा—पूर्णेन आप्यायितेन नोस्मान्योजयतु । वनतेर्लेटि शपः श्लुः, लेटोडागमः, तुजादित्वादभ्यासस्य दीर्घत्वम् ॥

[8]याज्या—धाता प्रजाया इति त्रिष्टुप् ॥ धाता प्रजायाः पुत्रादेः उत अपि च रायो धनस्य च ईशे ईष्टे । 'लोपस्त आत्मनेपदेषु' इति तलोपः । इदं विश्वं भुवनं भूतजातं धाता जजान जनयामास । ण्यन्ताच्छिटि 'बहुलमन्यत्रापि' इति

धेम । धाता ददातु नो रयिं प्राचीं
जीवातुमक्षितिम् । वयं देवस्य धी-
महि सुमतिꣳ सत्यराधसः । धाता

घृतवदिति घृत-वत् । विधेम । [9]धाता । ददातु ।
नः । रयिम् । प्राचीम् । जीवातुम् । अक्षितिम् ।
वयम् । देवस्य । धीमहि । सुमतिमिति सु-मतिम् ।
सत्यराधस इति सत्य-राधसः । [10]धाता । ददातु ।

णिलुक् । धातेव पुत्रं यजमानाय दाता ताच्छील्येन ददाति । तस्मा उ तस्मा एव देवाय हव्यमिदं घृतवत् घृतयुक्तं विधेम दद्मः । विध विधाने, तौदादिकः ॥

[9]तत्रैव याज्यानुवाक्ये विकल्प्येते—धातेत्यनुष्टुप् ॥ धाता ददातु नो रयिम् । गतम्* । प्राचीं प्रकृष्टगमनां अनुगुणां जीवातुं जीवनार्थं जीवनाय पर्याप्तम् । जीवेरातुप्रत्ययः । अक्षितां अक्षीणां, ततश्च तेनैव धनेन वयं देवस्य सवितुः सत्यराधसः सत्यधनस्य सुमतिं शोभनमतिं, कम्? यागम् । धीमहि धारयामः तं यजेमहीत्यर्थः । धीङ् आधारे, शपो लुक् । यद्वा—देवस्य धातुः कल्याणीं मतिं तद्विषयां कल्याणीं बुद्धिं तां धीमहि कुर्मः ॥

[10]याज्या—धातेति त्रिष्टुप् ॥ धाता हवींषि दाशुषे हविर्दत्तवते यजमानाय वसूनि धनानि प्रजार्थानि ददातु प्रजाका-

---

*सं. -३-३-११,7

ददातु दाशुषे वसूनि प्रजाकामाय मीढुषे दुरोणे । तस्मै देवा अमृतास्सं व्ययन्तां विश्वे देवासो अदितिस्सजोषाः । अनु नोद्यानुमतिर्यज्ञं देवेषु मन्यताम् । अग्निश्च हव्यदाशुषे । वसूनि । प्रजाकामायेति प्रजा–कामाय । मीढुषे । दुरोण इति दुः–ओने । तस्मै । देवाः । अमृताः । समिति । व्ययन्ताम् । विश्वे । देवासः । अदितिः । सजोषा इति स–जोषाः । [11]अन्विति । नः । अद्य । अनुमतिरित्यनु–मतिः । यज्ञम् । देवेषु । मन्यताम् । अग्निः । च । हव्यवाहन इति

माय प्रजानां कामयमानाय । 'शीलिकामि' इत्यादिना णः, पूर्वपदप्रकृतिस्वरत्वं च । मीढुषे मेहनसमर्थाय दुरोणे दुःखेनापयितव्ये गृहे वर्तमानाय गृहस्थाय । यद्वा—दुरोणे यज्ञगृहे मीढुषे हविस्सिक्तवते तस्मै देवा अमृता अमरणाः संव्ययन्तां संहत्य वसूनि ददातु, विश्वेदेवाश्च गणाः सजोषाः, अदितिश्च सजोषा समानप्रीतिः । 'परादिश्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् ॥

[11]अनुमतेः पुरोनुवाक्या—अनु न इत्यनुष्टुप् ॥ नोस्माकमिमं यज्ञं अनुमतिर्देवी अद्येदानीं देवेषु अनुमन्यतां देवान् प्रापयतु देवनिमित्तं वा अनुजानातु । ऊनचन्द्रा पौर्णमासी अनुमतिः । अग्निश्च हव्यवाहनः हविषां वोढा देवेष्वनुमन्यतामित्येव । 'हव्ये-

वाहनो भवतां दाशुषे मयः । अन्विदनुमते त्वम् ॥ ३४ ॥ मन्यासै शं च नः कृधि । क्रत्वे दक्षाय नो हिनु प्रण आयूꣳषि तारिषः । अनु मन्य-

हव्य—वाहनः । भवताम् । दाशुषे । मयः । [12]अन्विति । इत् । अनुमत इत्यनु—मते । त्वम् ॥ ३४ ॥ मन्यासै । शम् । च । नः । कृधि । क्रत्वै । दक्षाय । नः । हिनु । प्रेति । नः । आयूꣳषि । तारिषः । [13]अन्विति । मन्यताम् । अनुमन्यमानेत्यनु—मन्य-

---

नन्तः पादम्' इति ज्युट्, किंच—तौ अनुमतिहव्यवाहनौ दाशुषे हविर्दत्तवते अस्मै यजमानाय मयः सुखहेतुः भवताम् ॥

[12]याज्या—अन्वित्यनुष्टुप् ॥ अनुमते त्वं मन्यासै अनुमन्यस्व लोटि 'वैतोन्यत्र' इत्यैकारः । किंच—नोस्माकं शं सुखं च कृधि कुरु । करोतेर्लोटि शपो लुक्, 'श्रुशृणुपृकृवृभ्यः' इति धिभावः । किं पुनरनुमन्तव्यमित्याह—क्रत्वे क्रतवे यागाय प्रत्ययाय वा दक्षाय समर्थाय शीघ्रकरणाय क्रत्वर्थं वा यद्दक्षमन्नं तदर्थं नः अस्मान् हिनु प्रेरय । 'जसादिषु वा वचनम् प्राङ्नौ चङ्युपधायाः' इति दीर्घे ङितीति गुणो न प्रवर्तते । तदर्थं चास्माकं आयूंषि प्रतारिषः प्रवर्तय । तरतेर्ण्यन्ताल्लेटि 'सिब्बहुलं लेटि' इति सिप् 'लेटोडाटौ' इत्यडागमः, 'उपसर्गाद्बहुलम्' इति नसो णत्वम् ॥

[13]अथ विकल्पार्थे अनुमन्यतामिति त्रिष्टुप् ॥ अनुमन्यमाना अनुमतिर्देवी संगत्या रयिमनुमन्यताम् । कीदृशम्? प्रजावन्तं प्र-

तामनुमन्यमाना प्रजावन्तꣳ रयि-
मक्षीयमाणम् । तस्यै वयꣳ हेडसि
माऽपि भूम सा नो देवी सुहवा
शर्म यच्छतु । यस्यामिदं प्रदिशि
यद्विरोचतेऽनुमतिं प्रतीं भूषन्त्यायवः।
यस्या उपस्थ उर्वन्तरिक्षꣳ सा नो

माना । प्रजावन्तमिति प्रजा—वन्तम् । रयिम् । अ-
क्षीयमाणम् । तस्यै । वयम् । हेडसि । मा । अपी-
ति । भूम । सा । नः । देवी । सुहवेति सु—हवा ।
शर्म । यच्छतु । [14]यस्याम् । इदम् । प्रदिशीति
प्र—दिशि । यत् । विरोचत इति वि—रोचते । अ-
नुमतिमित्यनु—मतिम् । प्रतीति । भूषन्ति । आ-
यवः । यस्याः । उपस्थ इत्युप—स्थः । उरु । अ-

जायुक्तं अक्षीयमाणं च । किंच—तस्यै तस्या अनुमतिदेव्याः हेडसि क्रोधेऽपि मा भूम, किन्तु अनुग्रह एव भूयास्म । सा च देवी नोस्मभ्यं शर्म सुखं यच्छतु ददातु सुहवा स्वाह्वाना । 'बहुलं छन्दसि' इति प्रागेव प्रत्ययोत्पत्तेस्संप्रसारणे कृते आकारान्तत्वाभावात्तलेव प्रवर्तते ॥

[14][याज्या]यस्यामिति जगती ॥ यस्यां देव्यां [प्रदिशि प्रकर्षेण दिशन्त्यामाज्ञापयन्त्यां] यद्विरोचते विविधं भासते जगदिदं विश्वं आज्ञाविधेयं वर्तते इति । किंच—यामनुमतिं

देवी सुहवा शर्म यच्छतु ॥ ३५ ॥
राकामहꣳ सुहवाꣳ सुष्टुती हुवे
शृणोतु नस्सुभगा बोधतु त्मना ।
सीव्यत्वपस्सूच्याऽच्छिद्यमानया द-

न्तरिक्षम् । सा । नः । देवी । सुहवेति सु–हवा । शर्म । यच्छतु ॥ ३५ ॥ [15]राकाम् । अहम् । सुह-वामिति सु–हवाम् । सुष्टुतीति सु–स्तुती । हुवे । शृणोतु । नः । सुभगेति सु–भगा । बोधतु । त्म-ना । सीव्यतु । अपः । सूच्या । अच्छिद्यमानया ।

अनुमन्यमानां, भावो लक्ष्यते मद्भावे भावात्, अभावे चाभावात् *। किंच—यस्या उपस्थः तत्स्थानीयं उर्वन्तरिक्षं महदिदमाकाशं विश्वं व्याप्य स्थितत्वात् । सा नः इति । गतम् ॥

[15]राकायाः पुरोनुवाक्या—राकामिति जगती ॥ संपूर्णचन्द्रा पौर्ण-मासी राका, राकां देवीं सुहवां स्वाह्वानां आह्वानप्रयोजनका-रिणीं सुष्टुती शोभनया स्तुत्या अहं हुवे आह्वयामि । पूर्ववच्छपो लुक्, संप्रसारणं च । सुष्टुतिशब्दात्तृतीयैकवचनस्य 'सुपां सुलुक्' इति पूर्वसवर्ण ईकारः, 'मन्क्तिन् व्याख्यान' इत्युत्तरपदान्तोदात्त-त्वम् । सा च सुभगा सुज्ञानादिका नोस्माकं शृणोतु, आह्वानं श्रुत्वा च बोधतु बुध्यतामस्मदभिप्रायं त्मना आत्मना स्वयमेव । 'मन्त्रेष्वाङ्यादेः' इति लोपः । बुद्ध्वा च अपः कर्म प्रजननाख्यं

---

* अत्र ग्रन्थो गालित इव भाति. माधवीये—'अनुमातिं प्रति आयवः गन्तारः यजमाना भूषन्ति हविर्भिरलंकुर्वन्ति' इति व्याख्यातम्.

दा॑तु वी॒र꣡ꣳ श॒तदा॑यमुक्थ्य॒म् । यास्ते॑
राके सुम॒तय॑स्सु॒पेश॑सो याभि॒र्ददा॑सि
दा॒शुषे॒ वसू॑नि । ताभि॑र्नो अ॒द्य सु॒म-

ददा॑तु । वी॒रम् । श॒तदा॑य॒मिति॑ श॒त–दा॒य॒म् । उ-
क्थ्य॑म् । [16]याः । ते॒ । रा॒के॒ । सु॒म॒तय॒ इति॑ सु–म॒-
तयः॑ । सु॒पेश॑स॒ इति॑ सु–पेश॑सः । याभिः॑ । ददा॑-
सि । दा॒शुषे॑ । वसू॑नि । ताभिः॑ । नः॒ । अ॒द्य ।

अस्मदभिप्रेतं सूच्या सूचीस्थानीयया अनुग्रहबुद्ध्या अच्छिद्यमानया अविच्छिन्नया सीव्यतु सन्तनोतु यथा वस्त्रादिकं सूच्या स्यूतं चिरं तिष्ठति, एवमिदं करोतु । तथा च कृत्वा वीरं विक्रान्तं पुत्रं शतदायं बहुधनं उक्थ्यं कर्मभिः प्रशस्यं स्तोत्रार्हं ददातु ॥

[16]याज्या—यास्ते इति जगती ॥ हे राके देवि यास्ते तव सुमतयः शोभनबुद्धयः अनुग्रहात्मिकाः सुपेशसः सुरूपाः शोभनविषया वा । 'मन्क्तिन्व्याख्यान' इत्यादिना पूर्वत्रोत्तरपदान्तोदात्तत्वम् । उत्तरत्र 'सोर्मनसी' इत्युत्तरपदाद्युदात्तत्वम् । याभिर्मतिभिः दाशुषे हविर्दत्तवते यजमानाय वसूनि धनानि ददासि ताभिर्मतिभिः उपलक्षिता तथाभूतसंकल्पा नोस्मान् अद्येदानीं सुमना भूत्वा उपागहि उपागच्छ । व्यत्ययेन शपो लुक् । सहस्रपोषं बहुनो धनस्य पुष्टिं रराणा ददती उपागच्छतीति । रातेर्व्यत्ययेन आत्मनेपदम् । शपः श्लुः । हे सुभगे कल्याणधनप्रापिणि ॥

नो उपागंहि सहस्रपोषꣳ सुभगे ररांणा। सिनीवालि या सुपाणिः। कुहूमहꣳ सुभगां विद्मनापसम्-

सुमना इति सु-मनाः। उपागहीत्युप-आगंहि। सहस्रपोषमिति सहस्र-पोषम्। सुभग इति सु-भगे। ररांणा। [17]सिनीवालि। [18]या। सुपाणिरिति सु-पाणिः। [19]कुहूम्। अहम्। सुभगामिति सु-

[17]सिनीवाल्याः पुरोनुवाक्या याज्या च—सिनीवालि, या सुपाणिरित्युभे अनुष्टुभौ प्रतीकग्रहणं चेदम्* ॥ सिनीवालि पृथुष्टुके पृथुजघने या त्वं देवानामसि स्वसा सहोत्पन्नाऽसि। सा त्वमिदमाहुतं हव्यं जुषस्व। हे देवि प्रजां चास्मभ्यं दिदिढ्डि उपचितां कुरु ॥

[18]अथ द्वितीया—या सुपाणिः शोभनहस्ता स्वङ्गुरिः शोभनाङ्गुळिः सुषूमा शोभनप्रसूतिः बहुसूवरी बहूनामपत्यानां सवित्री। तस्यै विश्पत्नियै विशां पालयित्र्यै सिनीवाल्यै हविर्जुहोतनेति ॥

[19]कुह्वाः पुरोनुवाक्या—कुहूमहमिति त्रिष्टुप् ॥ नष्टचन्द्राऽमावास्या कुहूः, तां सुभगां शोभनधनादिकां विद्मनापसं विदितकर्माणं, वेदनं विद्मः, औणादिको मन्प्रत्ययः, तद्विद्मनं पामादिलक्षणो नप्रत्ययः, तादृशं अपः कर्म यस्या इति तादृशीं सुहवां स्वाह्वानां अस्मिन् यज्ञे जोहवीमि भृशमाह्वयामि, सा चाहूता अस्मभ्यं ददातु श्रवणं श्रुतिसुखं धनं यशो वा पितृणां

*सं. ३-१-११.[15—16]

स्मिन् यज्ञे सुहवा जोहवीमि । सा
नो ददातु श्रवणं पितॄणां तस्यास्ते
देवि हविषा विधेम । कुहूर्देवानाम्-
मृतस्य पत्नी हव्या नो अस्य हवि-
षश्चिकेतु । सं दाशुषे किरतु भूरि
भगाम् । विघ्नार्पसमिति विघ्न–अपसम् ।
अस्मिन् । यज्ञे । सुहवामिति सु–हवाम् । जोह-
वीमि । सा । नः । ददातु । श्रवणम् । पितॄणाम् ।
तस्याः । ते । देवि । हविषा । विधेम । [20]कुहूः ।
देवानाम् । अमृतस्य । पत्नी । हव्या । नः । अस्य ।
हविषः । चिकेतु । समिति । दाशुषे । किरतु ।

पूर्वेषां संबन्धि पितृणां वा श्रुतिसुखं यथा भवति तथा ददातु । इदानीं स्तुत्या अभिमुखीं देवतां प्रत्यक्षीकृत्याह—हे देवि कुहु तस्याः हविषा विधेम । 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । तादृगुणां त्वां हविषा परिचरेमेत्यर्थः ॥

[20]याज्या—कुहूरिति त्रिष्टुप् ॥ देवानाम्मध्ये कुहूर्देवी अमृतस्य अमृतत्वस्य उदकस्य वा पत्नी पालयित्री । यद्वा—देवानामिति सर्वविकारोपलक्षणम् । सर्वेषां भूतजातानां अमृतस्य पत्नी हव्या आह्वानार्हा । यत्प्रत्यये पूर्ववत्संप्रसारणत्वम् । तादृशी देवी नोस्माकं अस्य हविषः चरोः दीयमानस्य चिकेतु जानातु ।

वामꣳ रायस्पोषं चिकितुषे दधातु॥

भूरिं। वामम्। रायः। पोषम्। चिकितुषे। दधातु॥३६

भामासो दाता त्वमन्तरिक्षꣳ सा नो देवी सुहवा शर्म यच्छतु श्रवणं चतुर्विꣳशतिश्च ॥ ११ ॥

अग्ने तेजस्विन्वायुर्वसवस्त्वैतद्वा अपां नामधेयं वायुरसि प्राणो नाम देवा वै यद्यज्ञेन न प्रजापतिर्देवासुरानायुर्दा एतं युवानꣳ सूर्यो देव इदं वामेकादश ॥ ११ ॥

अग्ने तेजस्विन्वायुरसि छन्दसां वीर्यं मातरं च षट्त्रिꣳशत् ॥ ३६ ॥

अग्ने तेजस्विञ्चिकितुषे दधातु ॥

हरिः ओं तत्सत् ॥

ज्ञात्वा च दाशुषे हविर्दत्तवते यजमानाय भूरि भूयिष्ठं वामं वननीयं धनं संकिरतु ददातु । 'दाश्वान्' इति निपातः । रायस्पोषं तस्य धनस्य पुष्टिं चिकितुषे ज्ञातवते यजमानाय ददातु । कित ज्ञाने, लिटः क्वसुः । रायः सत्वस्वरावुक्तौ ॥

इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये तृतीयकाण्डे तृतीयप्रपाठके एकादशोनुवाकः.

प्रपाठकश्च समाप्तः.

वि वा एतस्य यज्ञ ऋध्यते यस्य
हविरतिरिच्यते सूर्यो देवो दिविष-
द्भ्य इत्याह बृहस्पतिना चैवास्य
प्रजापतिना च यज्ञस्य व्यृद्धमपि

[1]वीति । वै । एतस्य । यज्ञः । ऋध्यते । यस्य । हविः । अतिरिच्यत इत्यति–रिच्यते । सूर्यः । देवः । दिविषद्भ्य इति दिविषत्–भ्यः । इति । आह । बृहस्पतिना । च । एव । अस्य । प्रजापतिनेति प्रजा–पतिना । च । यज्ञस्य । व्यृद्धमिति वि–ऋद्धम् । अपीति । वपति ।

अथ चतुर्थः प्रपाठकः.

[1]अथ 'सूर्यो देवः'* इत्यादीनां मन्त्राणां ब्राह्मणम्——वि वा एतस्येत्यादि ॥ एतस्य यज्ञो व्यृद्ध्यते ऋद्ध्या विहीनः क्रियते यस्य हविरतिरिच्यते । देवताविशेषमुद्दिश्य उपाकृतस्य पशोः गर्भसंभवेन वपाद्याधिक्यमतिरेकः । अतिरेकाद्धविष्ट्वहानिः, तां देवतामतिव्याप्यावस्थितत्वात् । तस्मात्तत्परिहारार्थं 'सूर्यो देवः'* इति मन्त्रेण तस्या गर्भवपावसां जुहोति । बृहस्पतिनेत्यादि । गतम् । व्यृद्धं विहीनं अपि वपति आपूरयति अतिरेकान्निवर्तयति । हविष इति । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वेन उदात्तत्वे 'उदात्तस्वरितयोः' इति ऋकारस्स्वर्यते ॥

---

*सं. ३-३-११.

वपति रक्षाꣳसि वा एतत्पशुꣳ सं-
चन्ते यदेकदेवत्य आलब्धो भूया-
न्भवति यस्यास्ते हरितो गर्भ इ-
त्याह देवत्रैवैनां गमयति रक्षसाम-
पहत्या आ वर्तन वर्तयेत्याह ॥१॥

[2]रक्षाꣳसि । वै । एतत् । पशुम् । सचन्ते । यत् । एकदेवत्य इत्येक–देवत्यः । आलब्ध इत्या–लब्धः । भूयान् । भवति । यस्याः । ते । हरितः । गर्भः । इति । आह । देवत्रेति देव–त्रा । एव । एनाम् । गमयति । रक्षसाम् । अपहत्या इत्यप–हत्यै ।[3] एति । वर्तन । वर्तय । इति । आह ॥ १ ॥ ब्रह्म-

[2]रक्षांसीत्यादि ॥ पशुं सचन्ते समवयन्ति समनुप्रविशन्ति एतत् एतेन हेतुना । केन? यत् येन एकदेवत्य आलब्धः एकस्यै देवतायै आलब्धः । देवतान्तात्तादर्थ्ये यत् । भूयान् भवति अतिरिच्यते, तस्मात् 'यस्याः' इत्यनुमन्त्रणेन एतां वशां देवत्रैव देवानेव गमयति । 'देवैस्समजीगमम्'* इति दर्शनात् । 'देवमनुष्य' इत्यादिना त्रप्रत्ययः । तत् रक्षसामपहत्यै देवगतत्वात्पशौ निराशानि रक्षांसि भवन्ति ॥

[3]आवर्तनेत्यादि ॥ गर्भे विस्रस्यमाने अनुमन्त्रणमिदम्, यथा यजुर्वेदति निवृत्तमानं तदनुमन्त्रणमन्त्रोयम् । एवं ब्रह्मणा पर-

* सं ३-३-११.[2]

ब्रह्मणैवैनमा वर्तयति वि ते भिन-
द्मि तकरीमित्याह यथायजुरेवैतदु-
रुद्रप्सो विश्वरूप इन्दुरित्याह प्रजा
वै पशव इन्दुः प्रजयैवैनं पशुभि-

णा । एव । एनम् । एति । वर्तयति । [4]वीति । ते । भिनद्मि । तकरीम् । इति । आह । यथायजुरिति यथा–यजुः । एव । एतत् । [5]उरुद्रप्स इत्युरु–द्रप्सः । विश्वरूप इति विश्व–रूपः । इन्दुः । इति । आह । प्रजेति प्र–जा । वै । पशवः । इन्दुः । प्रजयेति प्र–जया । एव । एनम् । पशुभिरिति पशु–भिः ।

मात्मनैवैनमावर्तयति जन्मान्तरे । 'ताभिरावर्तय'* इति दर्शनात् । यद्वा—ब्रह्मणा मन्त्रेणैनं जनयति ॥

[4]वि ते भिनद्मीत्यादि ॥ उल्बाद्गर्भे विस्रस्यमानेऽनुमन्त्रणम् । यथा यजुर्वदति तदनुरूपमेवैतद्भवति । 'बहिस्ते अस्तु बालिति'* परमात्मभावेन पशुप्राणस्य संपत्तिरस्त्विति । यजुर्वेदाम्नातत्वात् यजुः, मन्त्रमात्राभिधानं वा ॥

[5]उरुद्रप्स इत्यादि ॥ उरु शुक्रं यतोयं गर्भस्संजातः । तत्प्रभवत्वात् प्रजाः पशवश्च इन्दुः । तस्मादनेन गर्भावदानहोमेन एनं यजमानं प्रजया पशुभिश्च समृद्धं करोति ॥

---

*सं. ३-३-१०.[3–4]

स्समर्धयति दिवं वै यज्ञस्य व्यृद्धं गच्छति पृथिवीमतिरिक्तं तद्यन्न शमयेदार्तिमार्च्छेद्यजमानो मही द्यौः पृथिवी च न इति ॥ २ ॥ आह द्यावापृथिवीभ्यामेव यज्ञस्य व्यृद्धं चातिरिक्तं च शमयति नार्तिमार्च्छति

समिति । अर्धयति । दिवम् । वै । यज्ञस्य । व्यृद्धमिति वि–ऋद्धम् । गच्छति । पृथिवीम् । अतिरिक्तमित्यति–रिक्तम् । तत् । यत् । न । शमयेत् । आर्तिम् । एति । ऋच्छेत् । यजमानः । मही । द्यौः । पृथिवी । च । नः । इति ॥ २ ॥ आह । द्यावापृथिवीभ्यामिति द्यावा–पृथिवीभ्याम् । एव । यज्ञस्य । व्यृद्धमिति वि–ऋद्धम् । च । अतिरिक्तमित्यति–रिक्तम् । च । शमयति । न । आर्तिम् ।

दिवमित्यादि ॥ यज्ञस्य व्यृद्धं व्यृद्धदोषः दिवं गच्छति दिविस्थान् पीडयति, अतिरिक्तदोषः पृथिवीस्थान् बाधते । पूर्ववद्गतेः स्वरः । तद्यदित्यादि । गतम् । आर्छेत् गच्छेत् । 'उपसर्गादति धातौ' इति वृद्धिः । मही द्यौरित्यादि । आहवनीयस्योत्तरार्धे भस्मना गर्भस्य अभिवासनमन्त्रोयम् । अनेन मन्त्रेण अस्मिन् क्रियमाणे यज्ञस्य दोषद्वयं द्यावापृथिवीभ्यां शमयति ।

यजमानो भस्मनाऽभि समूहति स्वगाकृत्या अथो अनयोर्वा एष गर्भोऽनयोरेवैनं दधाति यदवद्येदति तद्रेचयेद्यन्नावद्येत्पशोरालब्धस्य नाएति । ऋच्छति । यजमानः । भस्मना । अभि । समिति । ऊहति । स्वगाकृत्या इति स्वगा—कृत्यै । अथो इति । अनयोः । वै । एषः । गर्भः । अनयोः । एव । एनम् । दधाति । यत् । अवद्येदित्यव—द्येत् । अतीति । तत् । रेचयेत् । यत् । न ।

'इमं यज्ञं मिमिक्षताम्'* इति सेचनाभिधानसामर्थ्यापादनम् । 'दिवो द्यावा' इति द्यावादेशः, 'देवताद्वन्द्वे च' इत्याद्युदात्तत्वम् । ततो न यजमान आर्तिं गच्छति । पूर्ववद्बृद्धिः ॥

[7]भस्मनेत्यादि ॥ स्वगाकृत्यै कथं नाम द्यावापृथिवीभ्यां गर्भोयमात्मसात्क्रियते इति भस्मना छादयति । स्वगा[ग]शब्दाच्छान्दसो डाच्, 'ऊर्यादिच्विडाचश्च' इति गतित्वात् 'तादौ च' इति गतेः प्रकृतिस्वरत्वत् । किंचेत्याह—अथो अपिच अनयोर्द्यावापृथिव्योरेष गर्भः यो वशायाः एतत्प्रभवत्वात् । तस्मादनयोरेवैनं स्थापयति अनेन अभिवासनेन ॥

[8]यदवद्येदित्यादि ॥ हृदयादि यदवद्येत् तद्धविरतिरेचयेत् । अतिरेकदोषप्रसंगतः ततो यज्ञः व्यृद्धस्स्यात्, तद्दोषपरिजिहीर्षया

---

*सं. ३-३-१०.[6]

वं द्येत्पुरस्तान्नाभ्यां अन्यदवद्येदुप-
रिष्टादन्यत्पुरस्ताद्वै नाभ्यै ॥ ३ ॥
प्राण उपरिष्टादपानो यावानेव पशु-
स्तस्यावं द्यति विष्णवे शिपिवि-

अवद्येदित्यव—द्येत् । पशोः । आलब्धस्येत्या—लब्धस्य । न । अवेति । द्येत् । पुरस्तात् । नाभ्याः । अन्यत् । अवद्येदित्यव—द्येत् । उपरिष्टात् । अन्यत् । पुरस्तात् । वै । नाभ्यै ॥ ३ ॥ प्राण इति प्र—अनः । उपरिष्टात् । अपान इत्यप—अनः । यावान् । एव । पशुः । तस्य । अवेति । द्यति । [१]विष्णवे । शिपिविष्टायेति शिपि—विष्टाय । जुहो-

---

यत् नावद्येत् पशोरालब्धस्य हृदयाद्यवदानं न कृतं स्यात् ततो ह-विरभावात् यज्ञ एव न निर्वर्त्यते । एवमुभयथाऽपि दोषसंभवे कथं कर्तव्यमित्याह—पुरस्तादित्यादि । नाभ्याः पुरस्ताद्भर्मस्यैकस्यावदानमव-द्येत्, उपरिष्टाच्चैकम् । 'एकान्याभ्याम्' इत्युपसंख्यानान्न निह-न्यते । हेतुं चाह—पुरस्ताद्वा इत्यादि । तिरश्चां हि एवं प्राणा पानौ वर्तेते । अन्येषां तु पुरस्तात् प्राणः अवाङ्पानः । तस्मादेवं क्रियमाणे यावान् पशुर्भवति तस्यावद्यति प्राणापानवृत्त्याश्रय-त्वात्पशोः । एवं ह्यवत्तं च भवति, हृदयाद्यवदानाभावादनवत्तं च । तस्माद्यथोक्तदोषाप्रसंग इति ॥

[१]विष्णव इत्यादि ॥ शिपयो रश्मयः, तत्र प्रविष्टः शिपि-

ष्टायं जुहोति यद्वै यज्ञस्यातिरिच्यते यः पशोर्भूमा या पुष्टिस्तद्विष्णुः शिपिविष्टोतिरिक्त एवातिरिक्तं दधात्यतिरिक्तस्य शान्त्या अष्टाप्रूर्हिरण्यं दक्षिणाऽष्टापदी ह्येषाऽऽत्मा

ति । यत् । वै । यज्ञस्य । अतिरिच्यत इत्यति-रिच्यते । यः । पशोः । भूमा । या । पुष्टिः । तत् । विष्णुः । शिपिविष्ट इति शिपि-विष्टः । अति-रिक्त इत्यति-रिक्ते । एव । अतिरिक्तमित्यति-रिक्तम् । दधाति । अतिरिक्तस्येत्यति-रिक्तस्य । शान्त्यै । [10]अष्टाप्रूडित्यष्टा-प्रूट् । हिरण्यम् । दक्षि-णा । अष्टापदीत्यष्टा-पदी । हि । एषा । आत्मा ।

विष्टः विष्णुरादित्यः, तस्मै हविर्जुहोति । गर्भावदाने हेतुमाह— यद्वा इत्यादि । यदेव यज्ञस्य हविरतिरिच्यते गर्भाधिक्यात् यो वा पशोर्भूमा बहुत्वं हविराधिक्यहेतुः, या च पुष्टिः पशो-र्गर्भस्य चाभिवृद्धिः तत्सर्वमादित्याधीनमित्यर्थः; तद्वत्यधीनत्वात्सर्व-प्रवृत्तीनाम् । तस्मादेवं क्रियमाणे अतिरेकहोमे अतिरिक्त एव अतिरिक्तं स्थापितं भवति, अतिरेकदोषस्य शान्त्यै भवतीति ॥

[10]अष्टाप्रूडित्यादि ॥ अष्टाप्रूडष्टफलकमित्याचार्याः । अष्टवि-न्दुकमित्येके । अष्टौ निष्कमित्यपरे । अष्टापदी ह्येषा वशा

नवमः पशोराप्त्या अन्तरकोश उष्णीषेणाविष्टितं भवत्येवमिव हि पशुरुल्बमिव चर्मेव माꣳसमिवास्थीव यावानेव पशुस्तमाप्त्वाऽवं रु-

नवमः । पशोः । आप्त्यै । अन्तरकोश इत्यन्तर—कोशे । उष्णीषेण । आविष्टितमित्या—विष्टितम् । भवति । एवम् । इव । हि । पशुः । उल्बम् । इव । चर्म । इव । माꣳसम् । इव । अस्थि । इव । यावान् । एव । पशुः । तम् । आप्त्वा । अवेति । रु-

---

प्रजा पदैस्सह । तस्मादात्मना नवमेन सहायवान् पशुस्तस्य आप्तयै भवति । अष्टाप्रूङ्किरण्यम् । तच्चान्तरकोशे उष्णीषेणाविष्टितं भवति । छान्दसो वर्णविकारः । अत्रैवं कर्तव्यम्—इदमष्टाप्रूङ्किरण्यं वाससा अपनह्य उष्णीषेण विगृह्येदभ्रे कोशे अवधाय महति कोशे अवदधाति । एतच्च कोशमिश्रमध्वर्यवे देयमिति । एवमिव हि पशुर्भवति । कथमिव? आह—उल्बमिवेत्यादि । कोशे चतुष्टयमुल्बादिचतुष्टयस्थानीयमस्येति । यावानित्यादि । यावानन्यूनानतिरिक्तः पशुः तमाप्त्वा वशायागफलमवरुन्धे । कः? यस्यैषा यज्ञे प्रायश्चित्तिः क्रियते । वशाया गर्भनिरीक्षणे इष्ट्वा च वसीयान् भवति वसुमत्तरो भवति, न केवलं वशायागफलभाग्येव, अपि तु वसीयांश्च भवतीति प्राय इति साकल्यस्य न्यूनत्वमुच्यते, चित्तिस्तद्विषयज्ञानं, तद्दोषाप-

न्धे यस्यैषा यज्ञे प्रायश्चित्तिः क्रियते
इष्ट्वा वसीयान्भवति ॥ ४ ॥
आ वायो भूष शुचिपा उप नस्स-
हस्रं ते नियुतो विश्ववार । उपो ते

न्धे । यस्य । एषा । यज्ञे । प्रायश्चित्तिः । क्रियते ।
इष्ट्वा । वसीयान् । भवति ॥ ४ ॥

वर्तयेत्याह न इति वै नाभ्या उल्बमिवैक-
विꣳशतिश्च ॥ १ ॥

[1]एति । वायो इति । भूष । शुचिपा इति
शुचि—पाः । उपेति । नः । सहस्रम् । ते । नियुत
इति नि—युतः । विश्ववारेति विश्व—वार । उपो इति ।

नोदनं यत्क्रियते तत्प्रायश्चित्तम् । दासीभारादिदं द्रष्टव्यम् । वसु-
मच्छब्दादीयसुनि 'विन्मतोः' इति लुक्, 'टेः' इति टिलोपः ॥

इति तृतीये चतुर्थे प्रथमोनुवाकः.

---

[1]अजावशाया उपाकरणेऽनुवर्तयति—आ वायो इति त्रिष्टुप् ॥
इयं व्याख्याता ग्रहेषु* । हे वायो शुचिपाः अस्मानुपेत्य

*सं. १-४-४.[1]

**अन्धो मद्यमयामि यस्य देव दधि-
षे पूर्वपेयम् । आकूत्यै त्वा कामा-
य त्वा समृधे त्वा किक्किटा ते**

ते । अन्धः । मद्यम् । अयामि । यस्य । देव । दधिषे । पूर्वपेयमिति पूर्व-पेयम् । [2]आकूत्या इत्या-कूत्यै । त्वा । कामाय । त्वा । समृध इति सं-ऋधे । त्वा । [3]किक्किटा । ते । मनः । प्रजापत-

---

आभूषय हे विश्ववार यस्य ते सहस्रं नियुतं अश्वाः । तस्य ते अन्धः अन्नं मद्यं मदहेतुं उपायामि उपगच्छामि । हे देव यस्य च पूर्वपेयं दधिषे दधासि तत्संपादयामीति ॥

[2]नियोजने अनुवर्तयति ॥ आकूत्यै त्वेति यजुः—आकूतिः संकल्पलक्षणा देवी तस्यै हे वशे त्वां नियुनज्मि । कूङ् शब्दे, 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् । कामाय इच्छायै । समृधे समृद्ध्यै । संपदादिलक्षणः क्विप् ॥

[3]पर्यग्नौ क्रियमाणे किक्किटाकारं जुहोति—किक्किटा ते इत्यादिभिर्यजुर्भिः ॥ किक्किटेत्यनुकरणशब्दोयं छान्दसः डाजन्तः, पशूनां रतिजनितो ध्वनिविशेषः अनेनानुक्रियते । हे पशो त्वां किक्किटाकृत्य प्रीणयित्वा ते त्वदीयं मनः प्रजापतये स्वाहुतं करोमि ददामीत्यर्थः । पशूनां किक्किटाकाररतित्वात् तत्प्रीणनार्थं किक्किटाकृत्य ददामि न पुनः प्रतिकूलं तवाचरामीत्येवमर्थमिदमु-

मनः॑ प्र॒जाप॑तये॒ स्वाहा॑ किक्किटा
ते॑ प्रा॒णं वा॒यवे॒ स्वाहा॑ किक्किटा ते॒
चक्षु॒स्सूर्या॑य॒ स्वाहा॑ किक्किटा ते॒
श्रोत्रं॒ द्यावा॑पृथि॒वीभ्या॒ꣳ स्वाहा॑
किक्किटा ते॒ वाच॒ꣳ सर॑स्वत्यै॒ स्वाहा॑
॥५॥ त्वं तु॒रीया॑ व॒शिनी॑ व॒शाऽ-

य॒ इति॑ प्र॒जा–प॒त॒ये॒ । स्वाहा॑ । किक्किटा । ते॒ । प्रा॒णमिति॑ प्र–अ॒नम् । वा॒यवे॒ । स्वाहा॑ । किक्किटा । ते॒ । चक्षुः॑ । सूर्या॑य । स्वाहा॑ । किक्किटा । ते॒ । श्रोत्रं॑म् । द्यावा॑पृथि॒वीभ्या॒मिति॒ द्यावा॑–पृथि॒वीभ्या॑म् । स्वाहा॑ । किक्किटा । ते॒ । वाच॑म् । सर॑स्वत्यै । स्वाहा॑ ॥ ५ ॥ [4]त्वम् । तु॒रीया॑ । व॒शिनी॑ । व॒शा । अ-

च्यते । ब्राह्मणं च भवति—'किक्किटाकारेण वै ग्राम्याः पशवो रमन्ते'* इत्यादि । एवं किक्किटाकृत्य तव प्राणं वायवे ददामि चक्षुस्सूर्याय ददामि । श्रोत्रे द्यावापृथिवीभ्यां ददामि । वाचं सरस्वत्यै ददामि । एवं यदुदानानि [नादीनि] मनआदीनि तत्रैव हूयन्ते ॥

[4]अथैनामन्तरेण चात्वालोत्करौ उदीचीं नीयमानामनुमन्त्रयते—त्वं तुरीयेति त्रिष्टुभा ॥ वशे त्वं तुरीया चतुर्थी लोकत्रये; उत्तरस्मिन् मन्त्रे लोकत्रयस्य वक्ष्यमाणत्वात् तैर्लोकैस्समत्वमापाद्येयं

*सं. ३–४–३.[10]

सि सकृद्यत्त्वा मनसा गर्भ आऽशा-
यत् । वशा त्वं वशिनी गच्छ दे-
वान्त्सत्यास्सन्तु यजमानस्य का-
माः । अजाऽसि रयिष्ठा पृथिव्याꣳ

सि । सकृत् । यत् । त्वा । मनसा । गर्भः । एति।
अशयत् । वशा । त्वम् । वशिनी । गच्छ । देवान्।
सत्याः । सन्तु । यजमानस्य । कामाः । [5]अजा ।
असि । रयिष्ठेति रयि–स्था । पृथिव्याम् । सीद ।

स्तूयते । 'चतुरश्छयतावाद्यक्षरलोपश्च' इति छयतौ । वशिनी वशवती वशा इन्द्रियसंयमः, तद्वती; यस्माच्चिरं वृषस्यन्ती न भवति । वशा कं*मनीया सकृत्प्रसूता वन्ध्या वशा देवा [द] भवत् यस्मात्त्वां मनसा संकल्पेन सकृदेकवारं गर्भ आशयत् आगत्य त्वां त्वदुदरे शयितवान्, तस्माद्वशाऽसि, यस्मात्सकृदेव तस्माद्वशिनी चासि । द्वितीयादिप्रवृत्तौ मनःप्रवृत्तिरेव नास्तीति सा त्वं वशा च वशिनी च सती पुनःप्रसवरहिता देवान् गच्छ स्वर्गं गच्छ सत्यास्सन्तु यजमानस्य कामाः । 'एष वै कामो यजमानस्य यदनार्त उदचं गच्छति' † इति ॥

[5]उपासने वर्तयति—अजाऽसीति यजुः ॥ अजा त्वमसि रयिष्ठा धने स्थिता धनहेतुभूता त्वं पृथिवीं सीद आस्व । ततः ऊर्ध्वा उन्नीता अन्तरिक्षमुपतिष्ठस्व दिवि ते तव बृहद्भाः महती दीप्तिः ।

---

*पु. का. †सं. ३-४-३.[12]

सीदोर्ध्वान्तरिक्षमुप तिष्ठस्व दिवि
ते बृहद्भाः । तन्तुं तन्वन्रजसो भा-
नुमन्विहि ज्योतिष्मतः पथो रक्ष
धिया कृतान् । अनुल्बणं वयत
जोगुवामपो मनुर्भव जनया दैव्यं

ऊर्ध्वा । अन्तरिक्षम् । उपेति । तिष्ठस्व । दिवि । ते । बृहत् । भाः । [6]तन्तुम् । तन्वन् । रजसः । भानुम् । अन्विति । इहि । ज्योतिष्मतः । पथः । रक्ष । धिया । कृतान् । अनुल्बणम् । वयत । जोगुवाम् । अपः । मनुः । भव । जनय । दैव्यम् ।

भासेरसुनि भाः । यद्वा—'भ्राजभास' इति भासतेः क्विप् । बृहदिति लिङ्गव्यत्ययः । एवं त्रिष्वपि लोकेषु तिष्ठेति ॥

[6]अथास्यै वपां जुहोति—तन्तुं तन्वन्निति जगत्या ॥ तन्तुं विस्तारं तन्वन् कुर्वन् तस्य रजसः उदकस्य । हेतौ शता । वृष्ट्यर्थं भानुमादित्यं अन्विहि अनुगच्छ । किं च—ज्योतिष्मतः प्रकाशवतः पथः मार्गान् धिया कृतान् कर्मणा प्रज्ञया वा संपादितान् रक्ष यजमानार्थं पथस्संपादय । तदर्थमस्माकं जोगुवां कर्मसमाप्त्यर्थं त्वरमाणानाम् । पुरीषे गुशब्दः, अत्र तु वेगितायां गतौ वर्तते,* यङ्लुगन्तात् क्विप् । एवं कुर्वतां संभाव्यमानप्र-

---

*गु पुरीषोत्सर्गे, तुदादिः, गुङ् शब्दे, भ्वादिः.

जनम् । मनसो हविरसि प्रजापते-
र्वर्णो गात्राणां ते गात्रभाजो भू-
यास्म ॥ ६ ॥

जनम् । [7]मनसः । हविः । असि । प्रजापतेरिति प्रजा–पतेः । वर्णः । [8]गात्राणाम् । ते । गात्रभाज इति गात्र–भाजः । भूयास्म ॥ ६ ॥

सरस्वत्यै स्वाहा मनुष्वयोदश च ॥ २ ॥

मादानामस्माकं अपः कर्म अनुल्बणं कर्म वयतेति । उत्पूर्वाद्वनतेः पचाद्यच्, छान्दसो वर्णविकारः उल्बणमिति । किंच— हे वशे मनुः मन्त्री भव । कथं मन्तव्यं जनय उत्पादय दैव्यं अमानुषं जनम् । 'अन्येषामपि दृश्यते' इति दीर्घत्वम् । देवाद्यञ् । यजमानो वा उच्यते—मनुरिव स्रष्टा भव प्रजानाम् । अत्र ब्राह्मणं 'यदेव यज्ञ उल्बणं क्रियते तस्यैवैषा शान्तिः'* इति ॥

[7]हविर्जुहोति—मनस इति ॥ 'मनो वै प्रजापतिः' इति मनश्शब्देनाभेदात्प्रजापतिरुच्यते प्रजापतेर्हविस्त्वमसीति । तस्मात्प्रजापतेः वर्णः प्रजापतेस्सर्वदेवतामयत्वात् सर्वदेवतास्त्वमसीति स्तुतिः । वक्ष्यति हि 'सा वा एषा सर्वदेवत्या यदजा'† इति । यद्वा— या वक्ष्यमाणा अस्या देवता अग्न्यादयः तासां प्रजापतिरुपलक्षणः ॥

[8]अथास्या अवदानानि प्राश्नाति—गात्राणामिति ॥ त्वदीयानां गात्राणां संबन्धिनो वयं गात्रभाजो भूयास्म त्वत्संबन्धात् पुनरपि कर्मकृतो भूयास्म । यद्वा—अविकलाङ्गा भूयास्मेत्याशास्ते ॥

इति तृतीये चतुर्थे द्वितीयोनुवाकः.

*सं. ३-४-३.[14]

†सं. ३-४-३.[3]

इमे वै सहास्तां ते वायुर्व्यवात्ते गर्भमदधातां तꣳ सोमः प्राजनयद्-अग्निरग्रसत स एतं प्रजापतिराग्नेयम्-अष्टाकपालमपश्यत्तं निरवपत्तेनैवैनां-मग्नेरधि निरक्रीणात्तस्मादप्यन्यदेव-

[1]इमे इति । वै । सह । आस्ताम् । ते इति । वायुः । वीति । अवात् । ते इति । गर्भम् । अदधाताम् । तम् । सोमः । प्रेति । अजनयत् । अग्निः । अग्रसत । सः । एतम् । प्रजापतिरिति प्रजा-पतिः । आग्नेयम् । अष्टाकपालमित्यष्टा-कपालम् । अपश्यत् । तम् । निरिति । अवपत् । तेन । एव । एनाम् । अग्नेः । अधि । निरिति । अक्रीणात् । [2]तस्मात् । अपीति । अन्यदेवत्यामि-

---

[1]अथाजावशाया ब्राह्मणमेव—इमे वा इत्यादि ॥ इयं चासौ च इमे, 'त्यदादीनां यदुत्परं तच्छिष्यते' इतीदमꣳशेषः । द्यावापृथिव्यौ पूर्वं सहास्तां अपृथगभूताम् । ते वायुः व्यवात् व्यगमयत् पृथक्त्वेनोपर्यधश्च ईरितवान् । ते द्यावापृथिव्यौ वायुना संपरिष्वक्ते गर्भमदधाताम् । तं गर्भं सोमः प्राजनयत् जनयामास । अग्निस्तमग्रसत । प्रजापतिराग्नेयेनाष्टाकपालेन एनां वशां अग्नेर्निष्क्रीतवान् । 'अधिपरी अनर्थकौ' इत्यधिशब्दोनर्थकः ॥

[2]तस्मादित्यादि ॥ या एता ब्राह्मणाभिहिता वाय्वादयो देव-

त्यामालभमान आग्नेयमष्टाकपालं पुरस्तान्निर्वपेदग्नेरेवैनामधि निष्क्री-यालभते यत् ॥ ७ ॥ वायुर्व्यवात्त-स्मादायव्यां यदिमे गर्भमदधातां

त्यन्य-देवत्याम् । आलभमान इत्या-लभमानः । आग्नेयम् । अष्टाकपालमित्यष्टा-कपालम् । पुर-स्तात् । निरिति । वपेत् । अग्नेः । एव । एनाम् । अधीति । निष्क्रीयेति निः-क्रीय । एति । लभते । [3]यत् ॥ ७ ॥ वायुः । व्यवादिति वि-अवात् । त-स्मात् । वायव्याम् । यत् । इमे इति । गर्भम् ।

तास्तासां अन्यतमदेवत्यामप्यालभमानः नाग्निदेवत्यामेव । देवतान्ता-त्तादर्थ्ये यत् ॥

[3]इदानीं ता एवास्या देवता दर्शयति—यद्वायुरित्यादि ॥ वायोरपि त्रिस्थानीयत्वात् वायव्या वशा । 'वाय्वृतुपित्युषसो यत्' । यदिमे इति । द्यावाष्टथिव्यौ मातृस्थानीयत्वात् । द्यावा-ष्टथिव्यादिना यत् । यत्सोम इत्यादि । प्रजननहेतुस्सोमः अग्निः प्रासकः अग्नेश्चेयं निष्क्रीता, तस्मादग्नीषोमीया । तेनैव छः । यदनयोरित्यादि । अनयोर्द्यावाष्टथिव्योः वियत्योः विगच्छन्त्योः वागवदत् शब्दस्समजनि विपाटनजन्मा तस्मादियं सारस्वती । उदात्तनिवृत्तिस्वरेण दीर्घ उदात्तत्वम् । विपूर्वादेतेश्शतरि 'शतु-

तस्माद्द्यावापृथिव्यां यथ्सोमः प्राजनयदग्निरग्रसत तस्मादग्नीषोमीया यदनयोर्वियत्योर्वागवदत्तस्मात्सारस्वती यत्प्रजापतिरग्नेरधि निरक्रीणात्तस्मात्प्राजापत्या सा वा एषा सर्वदेवत्या यदजा वशा वायव्यामा

अदधाताम् । तस्मात् । द्यावापृथिव्येति द्यावा—पृथिव्यां । यत् । सोमः । प्रेति । अजनयत् । अग्निः । अग्रसत । तस्मात् । अग्नीषोमीयेत्यग्नी—सोमीया । यत् । अनयोः । वियत्योरिति वि—यत्योः । वाक् । अवदत् । तस्मात् । सारस्वती । यत् । प्रजापतिरिति प्रजा—पतिः । अग्नेः । अधीति । निरक्रीणादिति निः—अक्रीणात् । तस्मात् । प्राजापत्येति प्राजा—पत्या । सा । वै । एषा । सर्वदेवत्येति सर्व—देवत्या । यत् । अजा । वशा । [4]वायव्याम् । एति ।

रनुमः' इति विभक्तेरुदात्तत्वम् । यत्प्रजापतिरित्यादि । पत्युत्तरपदलक्षणोण्यः । सा वा एषेत्यादि । तस्मात्सैषाऽजा वशा नैकदेवत्या ॥

[4]इदानीं काम्यदेवताविशेषं विदधाति—वायव्यामा लभेतेत्यादि ॥

लभेत भूतिकामो वायुर्वै क्षेपिष्ठा
देवता वायुमेव स्वेन ॥ ८ ॥ भाग-
धेयेनोप धावति स एवैनं भूतिं ग-
मयति द्यावापृथिव्यामा लभेत कु-
षमाणः प्रतिष्ठाकामो दिव एवास्मै
पर्जन्यो वर्षति व्यस्यामोषधयो

लभेत । भूतिकाम इति भूति–कामः । वायुः ।
वै । क्षेपिष्ठा । देवता । वायुम् । एव । स्वेन ॥८॥
भागधेयेनेति भाग–धेयेन । उपेति । धावति । सः ।
एव । एनम् । भूतिम् । गमयति । [5]द्यावापृथिव्या-
मिति द्यावा–पृथिव्याम् । एति । लभेत । कुषमा-
णः । प्रतिष्ठाकाम इति प्रतिष्ठा–कामः । दिवः ।
एव । अस्मै । पर्जन्यः । वर्षति । वीति । अ-

वायुदेवत्यामिमामालभेत भूतिकामः भूष्णुताकामः । 'शीलिकामि' इत्यादिना णः, पूर्वपदप्रकृतिस्वरत्वं च । क्षेपिष्ठा क्षिप्रकारिका । 'स्थूलदूर' इति यणादिलोपो गुणश्च । स्वेनात्मीयेन भागधेयेन उपधावति उपसर्पति । स्वार्थिको धेयप्रत्ययः ॥

[5]द्यावापृथिव्यामित्यादि ॥ प्रतिष्ठा क्षेत्रसस्यसमृद्धिः । अस्मै एतदर्थमेव पर्जन्यो दिवः वृष्टिं पातयति । ओषधयश्चास्यां रोहन्ति

रोहन्ति समर्धुकमस्य सस्यं भवत्य-
ग्नीषोमीयामा लभेत यः कामयेता-
न्नवानन्नादस्स्यामित्यग्निनैवान्नमव रु-
न्धे सोमेनान्नाद्यमन्नवानेवान्नादो भ-
वति सारस्वतीमा लभेत यः ॥९॥
ईश्वरो वाचो वदितोस्सन्वाचं न व-

स्याम् । ओषधयः । रोहन्ति । समर्धुकमिति सं-अर्धुकम् । अस्य । सस्यम् । भवति । [6]अग्नीषोमीयामित्यग्नी-सोमीयाम् । एति । लभेत । यः । कामयेत । अन्नवानित्यन्न-वान् । अन्नाद इत्यन्न-अदः । स्याम् । इति । अग्निना । एव । अन्नम् । अवेति । रुन्धे । सोमेन । अन्नाद्यमित्यन्न-अद्यम् । अन्नवानित्यन्न-वान् । एव । अन्नाद इत्यन्न-अदः । भवति । [7]सारस्वतीम् । एति । लभेत । यः ॥ ९ ॥ ईश्वरः । वाचः । वदितोः । सन् । वा-

---

विविधमुत्पद्यन्ते । समृद्धिशीलं चास्य सस्यं भवति । छान्दस उकञ् ॥

[6]अग्नीषोमीयामित्यादि ॥ अन्नवान् बह्वन्नः । अन्नादः अन्नादनसमर्थः । अन्नस्यादनमन्नाद्यं, छान्दसो भावे यत् ॥

[7]सारस्वतीमित्यादि.... ॥

देद्वाग्वै सरस्वती सरस्वतीमेव स्वेन भागधेयेनोप धावति सैवास्मिन्वाचं दधाति प्राजापत्यामा लभेत यः कामयेतानभिजितमभि जयेयमिति प्रजापतिस्सर्वा देवता देवताभिरेवानभिजितमभि जयति वायव्ययोपा-

चम् । न । वदेत् । वाक् । वै । सरस्वती । सरस्वतीम् । एव । स्वेन । भागधेयेनेति भाग—धेयेन । उपेति । धावति । सा । एव । अस्मिन्न् । वाचम् । दधाति । [8]प्राजापत्यामिति प्राजा—पत्याम् । एति । लभेत । यः । कामयेत । अनभिजितमित्यनभि—जितम् । अभीति । जयेयम् । इति । प्रजापतिरिति प्रजा—पतिः । सर्वाः । देवताः । देवताभिः । एव । अनभिजितमित्यनभि—जितम् । अभीति । जयति । वायव्यया । उपा-

[8]....उपायान्तरेणानभिजितमभिजयेयमिति । प्रजापतेस्सर्वदेवतात्मकत्वात् सर्वाभिर्देवताभिरनभिजितं सर्वमभिजयति । वायव्ययेति । 'आ वायो भूष'* इत्यनया वायुसकाशादेवैनां लब्ध्वा आलभते ॥

*सं. ३-४-२.1

करोति वायोरेवैनामवरुध्यालंभत
आकूत्यै त्वा कामाय त्वा ॥ १० ॥
इत्याह यथायजुरेवैतत्किंकिटाकारं
जुहोति किंकिटाकारेण वै ग्राम्याः
पशवो रमन्ते प्रारण्याः पं-

करोतीत्युप–आकरोति । वायोः । एव । एनाम् । अवरुध्येत्यव–रुध्य । एतं । लभते । [9]आकूत्या इत्या–कूत्यै । त्वा । कामाय । त्वा ॥ १० ॥ इति । आह । यथायजुरिति यथा–यजुः । एव । एतत् । [10]किंकिटाकारमिति किंकिटा–कारम् । जुहोति । किंकिटाकारेणेति किंकिटा–कारेण । वै । ग्राम्याः । पशवः । रमन्ते । प्रेति । आरण्याः ।

---

[9]आकूत्यै त्वेत्यादि नियोजनमन्त्रोयम् ॥ यथा यजुरेष मन्त्रो वदति एवमेतत्फलं भवत्याकूत्यादिकम् ॥

[10]किंकिटाकारमित्यादि ॥ अनुकरणशब्दोयमुक्तः । किंकिटाकारं किंकिटाकृत्य जुहोति किंकिटाकारेण प्रीणयित्वा 'किंकिटा ते मनः'* इत्यादिभिः पंचभिर्जुहोति । छान्दसो णमुल् । किंकिटाकारेण वा सुबोधश्च धमः? । रमन्ते प्रीणयन्ते प्रपतन्ति पलायन्ति । तत्र ग्राम्याः पशवः गोश्वाजाविकं पुरुषाऽश्वग-

*सं. ३-४-२.[3]

तन्ति यत्किंकिटाकारं जुहोति ग्राम्याणां पशूनां धृत्यै पर्यग्नौ क्रियमाणे जुहोति जीवन्तीमेवैनाꣳ सुवर्गं लोकं गमयति त्वं तुरीया वशिनी वशाऽसीत्याह देवत्रैवैनां गपतन्ति । यत् । किंकिटाकारमिति किंकिटा–कारम् । जुहोति । ग्राम्याणाम् । पशूनाम् । धृत्यै । [11]पर्यग्नाविति परि–अग्नौ । क्रियमाणे । जुहोति । जीवन्तीम् । एव । एनाम् । सुवर्गमिति सुवः–गम् । लोकम् । गमयति । [12]त्वम् । तुरीया । वशिनी । वशा । असि । इति । आह । देवत्रेति देव–त्रा ।

र्दभोष्ट्रं चेति सप्त । अश्वतरमेके ब्रुवते । अथाऽऽरण्याः पशवः द्विखुराः, श्वापदानि, पक्षिणश्च, सरीसृपाः, हस्ती च, मर्कटश्च, नादेयाश्चेति सप्त ॥

[11]पर्यग्नावित्यादि ॥ पर्यग्निकरणे क्रियमाणे इत्यर्थः । जीवन्तीमित्यादि । जीवदवस्थायामेवास्यां मनआदीनां प्राजापत्यादिषु हुतत्वात् ॥

[12]त्वं तुरीयेत्यादि ॥ उदीचीं नीयमानामेतेनानुमन्त्रयमाणे देवान् गमयत्येनाम्, 'वशिनी गच्छ देवान्'* इति लिङ्गात् । 'देवमनुष्य'

*सं. ३-४-२,[4]

मयति सत्यास्सन्तु यजमानस्य
कामा इत्याहैष वै कामः ॥ ११ ॥
यजमानस्य यदनार्त उदृचं गच्छ-
ति तस्मादेवमाहाजाऽसि रयिष्ठे-
त्याहैष्वेवैनां लोकेषु प्रतिष्ठापयति
दिवि ते बृहद्भा इत्याह सुवर्ग एवा-

एव । एनाम् । गमयति । सत्याः । सन्तु । यज-
मानस्य । कामाः । इति । आह । एषः । वै ।
कामः ॥ ११ ॥ यजमानस्य । यत् । अनार्तः ।
उदृचमित्युत्–ऋचम् । गच्छति । तस्मात् । एवम् ।
आह । [13]अजा । असि । रयिष्ठेति रयि–स्था ।
इति । आह । एषु । एव । एनाम् । लोकेषु । प्र-
तीति । स्थापयति । दिवि । ते । बृहत् । भाः । इति ।
आह । सुवर्ग इति सुवः–गे । एव । अस्मै । लोके ।

इति त्राप्रत्ययः । सत्या इत्यादि । उदृचं समाप्तिम् । यज्ञस्य यदनार्तो गच्छति एष एव यजमानस्य कामः । तस्मादेवमाहाध्वर्युः 'सत्यास्सन्तु यजमानस्य कामाः'* इति, न काम्यान्तरमस्येति ॥

[13]अजाऽसीत्यादि ॥ उपासनमन्त्रोयम् । दिवीत्यादि । अस्मै यजमानाय स्वर्गे लोके ज्योतिर्दधाति ॥

* सं ३–४–२.[4]

स्मै लोके ज्योतिर्दधाति तन्तुं तन्वन्रजसो भानुमन्विहीत्याहेमानेवास्मै लोकाञ्ज्योतिष्मतः करोत्यनुल्बणं वयत जोगुवामप इति॥१२॥
आह यदेव यज्ञ उल्बणं क्रियते तस्यैवैषा शान्तिर्मनुर्भव जनया दैव्यं जनमित्याह मानव्यो वै प्रजास्ता

ज्योतिः । दधाति । [14]तन्तुम् । तन्वन् । रजसः । भानुम् । अन्विति । इहि । इति । आह । इमान् । एव । अस्मै । लोकान् । ज्योतिष्मतः । करोति । अनुल्बणम् । वयत । जोगुवाम् । अपः । इति ॥ १२ ॥ आह । यत् । एव । यज्ञे । उल्बणम् । क्रियते । तस्य । एव । एषा । शान्तिः । मनुः । भव । जनय । दैव्यम् । जनम् । इति । आह । मानव्यः । वै । प्रजा इति प्र–जाः । ताः । एव । आद्याः ।

[14]तन्तुं तन्वन्नित्यादि ॥ गतम् ।* अयं च वपाहोममन्त्रः । उल्बणं मात्रातिरिक्तत्वं मातव्ये । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वे 'उदात्तस्वरितयोर्यणः' इति विभक्तिस्स्वर्यते । सर्वाः प्रजाः आद्या भोक्तव्याः विधेयाः कुरुते यजमानः ॥

* सं. ३-४-२.[6]

एवाद्याः कुरुते मनसो हविरसी-
त्याह स्वगाकृत्यै गात्राणां ते गा-
त्रभाजो भूयास्मेत्याहाशिषमेवैतामा
शास्ते तस्यैवा एतस्या एकमेवा-
देवयजनं यदालब्धायामभ्रः ॥१३॥

कुरुते । [15]मनसः । हविः । असि । इति । आह । स्वगाकृत्या इति स्वगा–कृत्यै । [16]गात्राणाम् । ते । गात्रभाज इति गात्र–भाजः । भूयास्म । इति । आह । आशिषमित्या–शिषम् । एव । एताम् । एति । शास्ते । [17]तस्यै । वै । एतस्याः । एकम् । एव । अदेवयजनमित्यदेव–यजनम् । यत् । आलब्धायामित्या–लब्धायाम् । अभ्रः ॥ १३ ॥ भव-

---

[15]मनस इति हविर्होममन्त्रः—स्वगाकृत्यै आत्मीयदेवताया यत्स्वीकरणं तदर्थम् । 'ऊर्यादिच्विडाचश्च' इति डाच् । अस्य गतित्वात् 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् ॥

[16]गात्राणामित्यवदानप्राशनमन्त्रः ॥ भूयास्मेत्यादिकामाशिषमनेना शास्ते ॥

[17]तस्यै वा इत्यादि ॥ तस्या अजावशायाः एकमेवादेवयजनं अदेवयोग्यम्, आलम्भनकाले एकं परिहर्तव्यं, किम्? यत् आलब्धायामस्यां गगने अभ्रो भवति दुर्दिनं भवतीत्यर्थः । तत्र यान्य-

भवंति यदालंब्धायामभ्रस्स्याद्प्सु वा प्रवेशयेथ्सर्वां वा प्राश्नीयाद्यद्-प्सु प्रवेशयेद्यज्ञवेशसं कुर्याथ्सर्वांमे-व प्राश्नीयादिन्द्रियमेवात्मन्धत्ते सा वा एषा त्रयाणामेवावरुद्धा संवथ्स-

ति । यत् । आलंब्धायामित्या—लब्धायाम् । अ-भ्रः । स्यात् । अप्स्वित्यप्—सु । वा । प्रवेशयेदिति प्र—वेशयेत् । सर्वाम् । वा । प्रेति । अश्नीयात् । यत् । अप्स्वित्यप्—सु । प्रवेशयेदिति प्र—वेशयेत् । यज्ञवेशसमिति यज्ञ—वेशसम् । कुर्यात् । सर्वाम् । एव । प्रेति । अश्नीयात् । इन्द्रियम् । एव । आत्मन् । धत्ते । [18]सा । वै । एषा । त्रयाणाम् । एव । अव-रुद्धेत्यव—रुद्धा । संवत्सरसद इति संवत्सर—सदः ।

हान्यमेघसंपन्नानि मन्यते तेषु तामालभेत । तत्र प्रमादात् यद्याल-ब्धायामभ्रस्स्यात् अप्सु वैनां प्रवेशयेत्, सर्वां वा यजमान एव अन्वहं प्राश्नीयात् । प्रथमं पक्षं दूषयति—यदप्स्वित्यादि । यज्ञवे-शसं यज्ञमेव व्यापादयेत् । तस्मात् 'एतेनैवास्यामन्त्रणोपादानानां प्रास्याथेतरावग्नावनुप्रहरेत्' इति बोधायनः । 'निधायैनामाद्यात्' इत्याजीगविः ॥

[18]सा वा एषेत्यादि ॥ गतम् ।* तस्मात्तेषामेवैकोनया यजेतेति ।

---

* सं ३-४-३.[3]

रसदंस्सहस्रयाजिनौ गृहमेधिनस्त
एवैतया यजेरन्तेषामेवैषाऽऽशा॥१४
चित्तं च चित्तिश्चाकूतं चाकूतिश्च
विज्ञातं च विज्ञानं च मनश्च शक्व-

सहस्रयाजिन इति सहस्र–याजिनः । गृहमेधिन इति गृह–मेधिनः । ते । एव । एतया । यजेरन् । तेषाम् । एव । एषा । आशा ॥ १४ ॥

यत्स्वेन सारस्वतीमा लभेत यः कामाय त्वा कामोप इत्यभ्रो द्विचत्वारिꣳशच्च ॥३॥

[1]चित्तम् । च । चित्तिः । च । आकूतमित्या–कूतम् । च । आकूतिरित्या–कूतिः । च । विज्ञातमिति वि–ज्ञातम् । च । विज्ञानमिति वि–ज्ञानम् । च । मनः । च । शक्वरीः । च । दꣳशः ।

तेषामेवैषाशा एतत्फलावाप्तिरिति ॥

इति तृतीये चतुर्थे तृतीयोनुवाकः.

[1]अथ जयाः स्पर्धमानस्य 'स्पर्धमानेनैते होतव्याः'* इति, सामान्येन विहिताश्च 'येन कर्मणेर्सेत्'† इति । चित्तं चेत्यादयस्त्रुवा-

*सं. ३-४-४.[3]

†सं. ३-४-६.

रीश्च दर्शश्च पूर्णमासश्च बृहच्च र-
थंतरं च प्रजापतिर्जयानिन्द्राय वृ-
ष्णे प्रायच्छदुग्रः पृतनाज्येषु तस्मै
विशस्समनमन्त सर्वास्स उग्रस्स

च । पूर्णमासः इति पूर्ण–मासः । च । बृहत् । च । रथन्तरमिति रथं–तरम् । च । [2]प्रजापतिरिति प्र-
जा–पतिः । जयान् । इन्द्राय । वृष्णे । प्रेति । अयच्छत् । उग्रः । पृतनाज्येषु । तस्मै । विशः । समिति । अनमन्त । सर्वाः । सः । उग्रः । सः ।

हुतयः । चशब्दस्समुच्चयार्थः; वाक्यस्यापरिसमाप्तत्वात् । माऽस्त्विति शेषः । येन चेतयते तच्चित्तम् । चित्तिश्चेतना । आकूतं संकल्प्यो विषयः । आकूतिस्संकल्पः । विज्ञातं विविधं ज्ञातव्यम् । विज्ञानं विविधं वेदनम् । मनः अन्तःकरणम् । शक्करी शक्तयः चक्षुरादि-बाह्येन्द्रियशक्तयः । 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । आकूत्यादिषु त्रिषु गतेः प्रकृतिस्वरत्वम् । दर्शपूर्णमासौ कालौ, कर्मणी वा । सर्वेषां कर्मकालानां कर्मणां च प्रधानयोरुपादानमुपलक्षणार्थम् । एवं बृहद्रथन्तरयोस्साम्नोर्वेदितव्यम् ॥

[2]अथ प्रजापतिर्जयानिति अत्र त्रयोदशी त्रिष्टुप् ॥ 'वृष्णे' इति प्रथमपादान्तः, 'सर्वाः' इति तृतीयपादान्तः । प्रजापतिर्जयानेतानिन्द्राय वृष्णे वर्षित्रे प्रायच्छत् दत्तवान् । उग्रः उद्गीर्णः पृतनाज्येषु संग्रामाभिगमनेषु उद्गीर्णशक्तिः प्रजापतिः । यद्वा—

हि हव्यो बभूव देवासुरास्संयत्ता
आसन्त्स इन्द्रः प्रजापतिमुपाधावत्त-
स्मा एताञ्जयान्प्रायच्छत्तानजुहोत्त-
तो वै देवा असुरानजयन् यदजय-
न्तज्जयानां जयत्वꣳ स्पर्धमानेनैते

हि । हव्यः । बभूव । [3]देवासुरा इति देव—असु-
राः । संयत्ता इति सं—यत्ताः । आसन्न् । सः ।
इन्द्रः । प्रजापतिमिति प्रजा—पतिम् । उपेति ।
अधावत् । तस्मै । एतान् । जयान् । प्रेति । अ-
यच्छत् । तान् । अजुहोत् । ततः । वै । देवाः ।
असुरान् । अजयन् । यत् । अजयन् । तत् ।
जयानाम् । जयत्वमिति जय—त्वम् । स्पर्धमा-

जयान् लब्ध्वा इन्द्रः संग्रामेषूद्गीर्णो बभूव । अजः अज्ञो वा भवे यति छान्दसं रूपं, अत एवानवग्रहः । ततः प्रभृति तस्मै इन्द्राय सर्वा विशः प्रजास्समनमन्त प्रतिज्ञाविधेया अभवन् । स उग्रः स खलूग्रो भवति, यस्मै विशस्समनमन्त, याः पूर्वं स्पर्धिताः । यद्वा— यो जयान् जुहोति स खलूग्रो भवति स एव हव्यो यागार्हश्च इज्यश्च बभूव भवति । छान्दसो लिट् ॥

[3]अथ जयानां ब्राह्मणं—देवासुरा इत्यादि ॥ तज्जयानां जय-

होतव्या जयत्येव तां पृतनाम्॥१५
अग्निर्भूतानामधिपतिस्स माऽवत्वि-

नेन । एते । होतव्याः । जयति । एव । ताम् । पृतनाम् ॥ १५ ॥

उप पञ्चविꣳशतिश्च ॥ ४ ॥

[1]अग्निः । भूतानाम् । अधिपतिरित्यधि–पतिः । सः । मा । अवतु । [2]इन्द्रः । ज्येष्ठानाम् । [3]यमः ।

त्वमिति । जयति परसेनामेतैरिति जयाः ॥

इति तृतीये चतुर्थे चतुर्थोनुवाकः.

[1]येन कर्मणेर्सेत्तत्राभ्यातानान् सप्तदश स्रुवाहुतीर्जुहोति—अग्निर्भूतानामित्यादीन् ॥ हुत्वाहुत्वा वाचयति—पितरः पितामहा इति । इयं जगती अतिजगती वा । 'आशिषि' इति तृतीयपादान्तः । अग्निः भूतानां प्रजानां अधिपतिः स्वामी स माऽवतु रक्षतु स्वाहुतमिदमस्तु तस्मा इति । 'अधिपतिस्स माऽवतु' इति सर्वत्रानुषज्यते । यत्र तु लिङ्गभेदो वचनभेदो वा भवति तत्राम्नायत एव स विशेषः, यथा—'अन्नं साम्राज्यानामधिपति तन्माऽवतु' 'मरुतो गणानामधिपतयस्ते माऽवन्तु'* इति ॥

[2]इन्द्रो ज्येष्ठानामधिपतिः [वृद्धतमानां लोकपालानाम्] ॥

*सं. ३–४–५.11, 17

न्द्रो ज्येष्ठानाँ यमः पृथिव्या वायु-
रन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा
नक्षत्राणां बृहस्पतिर्ब्रह्मणो मित्र-
स्सत्यानां वरुणोपाꣳ समुद्रस्स्रो-
त्यानामन्नꣳ साम्राज्यानामधिपति

पृथिव्याः । [4]वायुः । अन्तरिक्षस्य । [5]सूर्यः । दिवः । चन्द्रमाः । नक्षत्राणाम् । [7]बृहस्पतिः । ब्रह्मणः । मित्रः । सत्यानाम् । [9]वरुणः । अपाम् । [10]समुद्रः । स्रोत्यानाम् । [11]अन्नम् । साम्राज्यानामिति साम्-राज्यानाम् । अधिपतीत्यधि-पति । तत् । मा ।

---

[3]यमोग्निविशेषः, 'अग्निर्वाव यम इयं यमी'* इति । यम एव वा ॥

[4–6]वायुरन्तरिक्षस्येत्यादि ॥ गतम् ॥

[7]बृहस्पतिर्ब्रह्मणः ऋत्विजोधिपतिः ब्राह्मणजनेर्वा । बृहस्पति-शब्दो वनस्पत्यादित्वादाद्युदात्तः ॥

[8]मित्रस्सत्यानां सत्यवताम् ॥

[9]वरुणोपां स्थावराणाम् । 'ऊडिदम्' इति षष्ठ्या उदात्तत्वम् ॥

[10]समुद्रस्स्रोत्यानां स्रोतसि भवानां नद्यादीनाम् । 'स्रोतसो विभाषा ञ्यङ्चौ' इति ञ्यः ॥

[11]अन्नं साम्राज्यानां सम्यग्राजवतां अधिपति मा अवतु ॥

---

*सं. ३-३-८.[8]

तन्मांऽवतु सोम ओषधीनाꣳ स-
विता प्रसवानाꣳ रुद्रः पशूनां त्व-
ष्टा रूपाणां विष्णुः पर्वतानां म-
रुतो गणानामधिपतयस्ते मांऽवन्तु
पितरः पितामहाः परेऽवरे ततांस्त-

अवतु । [12]सोमः । ओषधीनाम् । [13]सविता । प्रस-
वानामिति प्र–सवानाम् । [14]रुद्रः । पशूनाम् ।
[15]त्वष्टा । रूपाणाम् । [16]विष्णुः । पर्वतानाम् । [17]म-
रुतः । गणानाम् । अधिपतय इत्यधि–पतयः ।
ते । मा । अवन्तु । [18]पितरः । पितामहाः । परे ।
अवरे । ततांः । तताम्हाः । इह । मा । अवत ।

---

[12]सोम ओषधीनां फलपाकान्ताम् ॥

[13]सविता प्रसवानां अनुज्ञानानाम् ॥

[14]रुद्रः पशूनां द्विपदां चतुष्पदां च । 'नामन्यतरस्याम्' इति नाम उदात्तत्वम् ॥

[15]त्वष्टा रूपाणां रूपणीयानाम् ॥

[16]विष्णुः पर्वतानां धारणानां धराधराणां तेषामपि धारकत्वात् ॥

[17]मरुतो गणानां संघातानामधिपतयः ते मा अवन्तु ॥

[18]पितरः इत्यादीनि षडामन्त्रितपदानि । पितृततशब्दयोः पादा-

तामहा इह मांऽवत ।अस्मिन्ब्रह्मन्न-
स्मिन्क्षत्रेऽस्यामाशिष्यस्यां पुरोधा-

अस्मिन् । ब्रह्मन् । अस्मिन् । क्षत्रे । अस्याम् ।
आशिषीत्यां–शिषि । अस्याम् । पुरोधायामिति

दित्वात् षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । अन्येषां तु निघातः । तत्र पितरः उत्पादयितारः । तेषां पितरः पितामहाः । जीव-पितृतार्थं पितामहग्रहणम् ॥

लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः । *
सपिण्डता तु पुरुषे सप्तमे विनिवर्तते ॥ † इति ॥

सप्तमादूर्ध्वं ये विप्रकृष्टास्ते परे । ततोर्वाचीनास्सन्निकृष्टाः अवरे । ततः येभ्यो दीयते पिण्डस्ते ततः पित्रादयस्त्रयः । तेषां पित-रस्तत्तामहाः ये न पृथक्पिण्डभाजः उभयत्रापि पिण्डभाजश्च । ते सर्वे यूयमिह कर्मणि वर्तमानं मां अवत रक्षत । अस्मि-न्नित्यादि । 'निमित्तात्कर्मसंयोगे' इति सर्वा निमित्तसप्तमी । अस्मिन् ब्रह्मन् ब्राह्मणे जातिनिर्देशोयं, इयं ब्राह्मणजातिस्संप-द्यतामिति । ब्राह्मणस्य निमित्तं वा । 'ऊडिदम्' इति सप्तम्या उदात्तत्वम् । क्षत्रे क्षत्रजातौ । आशिषि आशासनीये फले प्रजापश्वादौ । 'आशासः क्तौ' इतीत्वम्, 'शासिवसि घसीनां च' इति षत्वम् । पुरोधायां पुरस्करणे सर्वेषां प्राधान्ये । पुरस उपसर्गभावात् 'आतश्चोपसर्गे' इति भिदादिर्द्रष्टव्यः । कर्मणि

---

* मत्स्यपु. † मनु ५-६२.

यामस्मिन्कर्मन्नस्यां देवहूत्याम्॥१६
देवा वै यज्ञेऽकुर्वत तदसुरा अ-
कुर्वत ते देवा एतानभ्यातानानप-

पुरः–धायाम् । अस्मिन्न् । कर्मन्न् । अस्याम् । देवहूत्यामिति देव–हूत्याम् ॥ १६ ॥

अवरे सप्तदश च ॥ ५ ॥

[1]देवाः । वै । यत् । यज्ञे । अकुर्वत । तत् । असुराः । अकुर्वत । ते । देवाः । एतान् । अभ्या-तानानित्यभि–आतानान् । अपश्यन्न् । तान् ।

क्रियमाणे क्रियाविशेषे देवहूत्यां देवानामाह्वाने पूजायाम् । दासी-भारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् ॥

इति तृतीये चतुर्थे पञ्चमोनुवाकः.

---

[1]अथ जयाभ्यातानानां राष्ट्रभृतां ब्राह्मणम् । तत्रादावनन्तराधिकृ-तानां विशिष्टफलहेतुत्वमाह—देवा वा इत्यादि ॥ अभ्यातन्यते आभिमुख्येनानीयते कर्मसमृद्धिरेभिरिति अभ्यातानाः, करणे घञ्, थाथादिनोत्तरपदान्तोदात्तत्वम् । तानभ्यातन्वत आभिमुख्येन शास्त्र-मर्यादया चाकुर्वन् अजुहवुः ॥

**श्यन्तानभ्यातंन्वत यद्देवानां कर्मा-
सीदाध्यैत तद्यदसुराणां न तदा-
ध्यत येन कर्मणेर्त्सेत्तत्र होतव्या
ऋध्नोत्येव तेन कर्मणा यद्विश्वे देवा-**

अभ्यातंन्वतेत्यभि—आतंन्वत । [2]यत् । देवानाम् । कर्म । आसीत् । आध्यैत । तत् । यत् । असुराणाम् । न । तत् । आध्यत । [3]येन । कर्मणा । ईर्त्सेत् । तत्र । होतव्याः । ऋध्नोति । एव । तेन । कर्मणा । [4]यत् । विश्वे । देवाः । समभरन्निति सं—

---

[2]यद्देवानामित्यादि ॥ अभ्यातानानां देवैरेव विहितत्वात् ॥

[3]येनेत्यादि ॥ यत् कर्म येन कर्मणा ईर्त्सेत् इदं मे समृद्धचेतेति तस्मिन्नभ्याताना होतव्याः न केवलं भ्रातृव्यवतैव । ऋधेस्सनि 'आप् ज्ञप्यृधामीत्' इतीत्वम्, अभ्यासलोपश्च । केचिदाहुः—येन कर्मणेर्त्सेत् तत्र होतव्याः सर्वेऽप्यभ्याताना जया राष्ट्रभृतश्चेति । तत्र होतव्या एव क्रमात् जया अभ्याताना राष्ट्रभृत इति ॥

[4]अधुना अपकृतं भ्रातृव्यवन्तमेवाधिकृत्य क्रमविशेषं चाह—यद्विश्वे देवा इत्यादि ॥ भ्रातृव्यवतोयं क्रमः, अभ्याताना जया राष्ट्रभृत इति । ते देवा इत्यादि । असुरान् भ्रातृव्यानभ्यातन्वत विधेयानकुर्वत । ततश्च जयैरजयन् विनष्टैश्वर्यानकुर्वत ।

स्समभंरन्तस्मादभ्यातानाः वैश्वदेवा यत्प्रजापतिर्जयान्प्रायच्छत्तस्माज्जयाः प्राजापत्याः ॥ १७ ॥ यद्राष्ट्रभृद्भिी राष्ट्रमाऽददत तद्राष्ट्रभृताꣳ राष्ट्रभृत्वं ते देवा अभ्यातानैरसुरान्भ्यातंन्वत जयैरजयन्राष्ट्रभृद्भिी राष्ट्रं

अभंरन् । तस्मात् । अभ्यातानाः इत्यभि–आतानाः । वैश्वदेवाः इति वैश्व–देवाः । यत् । प्रजापतिरिति प्रजा–पतिः । जयान् । प्रेति । अयच्छत् । तस्मात् । जयाः । प्राजापत्याः इति प्राजा–पत्याः ॥ १७ ॥ यत् । राष्ट्रभृद्भिरिति राष्ट्रभृत्–भिः । राष्ट्रम् । एति । अददत । तत् । राष्ट्रभृताम्इति राष्ट्रभृताम् । राष्ट्रभृत्त्वमिति राष्ट्रभृत्–त्वम् । ते । देवाः । अभ्यातानैरित्यभि–आतानैः । असुरान् । अभ्यातंन्वतेत्यभि–आतंन्वत । जयैः । अजयन् । राष्ट्रभृद्भिरिति राष्ट्रभृत्–भिः । राष्ट्रम् । एति ।

राष्ट्रभृद्भिः तेषां राष्ट्रं अधिवासं आददत आत्मसादकुर्वत । अभ्यातन्वते आभिमुख्येनानीयते भ्रातृव्य एभिरिति अभ्यातानाः । जयते भ्रातृव्य एभिरिति जयाः, करणे एरच्, 'जयः कर-

माऽदंदत यद्देवा अंभ्यातानैरसुंरान-
भ्यातंन्वत तदंभ्यातानानांमभ्याता-
नत्वं यज्ञयैरजंयन्तज्जयांनां जयत्वं
यद्रांष्ट्रभृद्भिः राष्ट्रमाऽदंदत तद्रांष्ट्रभृ-
ताꣳ राष्ट्रभृत्वं ततो देवा अभंवन्प-

अदंदत । यत् । देवाः । अभ्यातानैरित्यंभि—आ-
तानैः । असुंरान् । अभ्यातंन्वतेत्यंभि—आतंन्वत ।
तत् । अभ्यातानानांमित्यंभि—आतानानांम् । अ-
भ्यातानत्वमित्यंभ्यातान—त्वम् । यत् । जयैः ।
अजंयन् । तत् । जयांनाम् । जयत्वमितिं जय—
त्वम् । यत् । राष्ट्रभृद्भिरितिं राष्ट्रभृत्—भिः । रा-
ष्ट्रम् । एतिं । अदंदत । तत् । राष्ट्रभृतामितिं रा-
ष्ट्र—भृतांम् । राष्ट्रभृत्त्वमितिं राष्ट्रभृत्—त्वम् ।
[5]ततंः । देवाः । अभंवन् । परेतिं । असुंराः ।

णम्' इत्याद्युदात्तत्वम् । राष्ट्रं भ्रातृव्यस्य भ्रियते आत्मना धार्यते एभिरिति राष्ट्रभृतः । बिभर्तेः करणे क्विप् । हरतेर्वा 'हृग्रहोर्भः' इति भत्वम् । भ्रातृव्यस्य राष्ट्रं ह्रियते एभिरिति राष्ट्रभृतः, कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

[5]ततो देवा इत्यादि ॥ ततस्तादृशात्प्रयोगात् देवा भूतिमन्तस्संपन्नाः, असुराश्च पराभूताः ॥

राऽसुरा यो भ्रातृव्यवांथ्स्यात्स ए-
ताञ्जुहुयादभ्यातानैरेव भ्रातृव्यान-
भ्यातनुते जयैर्जयति राष्ट्रभृद्भी रा-
ष्ट्रमा दत्ते भवत्यात्मना परांऽस्य
भ्रातृव्यो भवति ॥ १८ ॥

[6]यः । भ्रातृव्यवानिति भ्रातृव्य–वान् । स्यात् । सः । एतान् । जुहुयात् । अभ्यातानैरित्यभि–आतानैः । एव । भ्रातृव्यान् । अभ्यातनुत इत्यभि–आतनुते । जयैः । जयति । राष्ट्रभृद्भिरिति राष्ट्रभृत्–भिः । राष्ट्रम् । एति । दत्ते । भवति । आत्मना । परेति । अस्य । भ्रातृव्यः । भवति ॥ १८ ॥

प्राजापत्यास्सौष्टादश च ॥ ६ ॥

---

[6]देवा वै यज्ञे इत्युपक्रममुपसंहृतं [संहर्तुं] यो भ्रातृव्यवान् स्यात् इत्यादि ॥ गतम् । आत्मना प्रकृत्यादित्वात्तृतीया ॥

इति तृतीये चतुर्थे षष्ठोनुवाकः.

ऋताषाडृतधामाऽग्निर्गन्धर्वस्तस्यौषधयोऽप्सरस ऊर्जो नाम स इदं

[1]ऋताषाट् । ऋतधामेत्यृत-धामा । अग्निः । गन्धर्वः । तस्य । ओषधयः । अप्सरसः । ऊर्जः । नाम । सः । इदम् । ब्रह्म । क्षत्रम् । पातु । ताः ।

---

[1]अथ राष्ट्रकामादिभ्यो विहिता राष्ट्रभृतः ऋताषाडृतधामेत्यादयः द्विस्स्वाहाकारं होतव्याः । तस्मा इति गन्धर्वाय । ताभ्य इत्यप्सरोभ्यः । 'स इदं ब्रह्म क्षत्रं पातु' इति गन्धर्वेष्वनुषज्यते । 'ता इदं ब्रह्म क्षत्रं पान्तु' इत्यप्सरस्सु । भुवनस्य पते इति पञ्चपदा पङ्क्तिः । 'भुवनस्य पते'* इति प्रथमपादान्तः । इयं च पर्यायाणां सप्तमी, आहुतीनां त्रयोदशी । अथ 'स नो भुवनस्य'†इति न्यङ्कुसारिणी । द्वितीयः पादो द्वादशाक्षरः । इयं तु पर्यायाणां द्वादशी, आहुतीनां द्वाविंशतिः । ऋताषाट् ऋतं सत्यं यज्ञं वा सहते अभिभवति अतःपरं नास्ति सत्यं यज्ञो वा । ऋतेन वा विश्वमभिभवति । 'छन्दसि सहः' इति ण्विः, 'अन्येषामपि दृश्यते' इति दीर्घत्वम्, 'सहेस्साढस्सः' इति षत्वम् । ऋतधामा ऋतं सत्यं यज्ञो वा धाम स्थानं तेजो वा यस्य स ऋतधामा । ईदृशत्वादग्निर्गन्धर्वः गान्धारबन्धं धारयति उदकं वा यागद्वारेणोत्पादयतीति गन्धर्वः, षुषोदरादिः । तस्य सम्बन्धिन्यः तेनाह्रियमाणा ओषधयः अप्सरस्त्वेन रूप्यन्ते, गन्धर्वाणामप्सरसो भार्याः, अपस्सारयन्ति अन्नं भूत्वा आहुतिद्वारेणादित्यं प्राप्नुवन्ति यथोक्तं 'अग्नौ प्रास्ताहुतिस्सम्यगा-

---

*सं ३-४-७.[7] †सं ३-४-७,[12]

ब्रह्म क्षत्रं पातु ता इदं ब्रह्म क्षत्रं
पान्तु तस्मै स्वाहा ताभ्यस्स्वाहा
सꣳहितो विश्वसामा सूर्यो गन्ध-

इदम् । ब्रह्म । क्षत्रम् । पान्तु । तस्मै । स्वाहा । ताभ्यः । स्वाहा । [2]सꣳहित इति सं-हितः । विश्वसामेति विश्व-सामा । सूर्यः । गन्धर्वः । तस्य ।

दित्यमुपतिष्ठते' इत्यादि । ऊर्जो नामान्नाख्यः, अन्नं भूत्वेत्यर्थः । केचिदाहुः—दोग्धृस्थानीयोग्निः वत्सस्थानीयाभिरोषधीभिः गां पयो दुग्धे इति स तादृशोग्निः इदं ब्रह्म क्षत्रं च पात्विति अस्मानाहुतिद्वारेण, प्राधान्यात्तयोर्ग्रहणं सर्वस्थावरजङ्गमप्रदर्शनार्थम् । ताश्च तादृश्योप्सरसः इदं क्षत्रं च पातु, तस्मा अग्नये स्वाहुतं करोमि ताभ्यश्चाप्सरोभ्यः । एवं सर्वेषु पर्यायेषु द्रष्टव्यम् ॥

[2]संहितः सन्धीयतेऽनेनेति संहितः करणे क्तः, नैशी सूर्यप्रवृत्तिर्लक्ष्यते दर्शनात्मिका । विश्वसामा विश्वं सामावसितमस्मिन्निति विश्वसामा । अनेनापि नैशी वृत्तिर्लक्ष्यते अदर्शनात्मिका । 'बहुव्रीहौ विश्वं संज्ञायाम्' इति विश्वशब्दोन्तोदात्तः । एवं अहोरात्रे प्रवर्तयन् सूर्यः गन्धर्वः व्याख्यातः मरीचयोप्सरसः मारयन्ति शोषयन्ति सलिलं दिवसविशेषेषु वर्षार्थं मेवेति मरीचयः । अपां सारयितारोप्सरसः । आविष्टलिङ्गत्वादप्सरश्शब्दस्स्त्रीलिङ्गेनैवोच्यते । वत्सस्थानीया वा पूर्ववत् । आयुवः गमनशीलाः विश्वव्यापिनः । एतेः 'छन्दसीणः' इत्युण्प्रत्ययः, 'जसादिषु

र्वस्तस्य मरीचयोप्सरस आयुर्व-
स्सुषुम्नस्सूर्यरश्मिश्चन्द्रमा गन्धर्व-

मरीचयः । अप्सरसः । आयुव इत्या—युवः । [3]सुषुम्न इति सु—सुम्नः । सूर्यरश्मिरिति सूर्य—र-

---

वा वचनं प्राङ्णौ चङ्युपधायाः' इति जसि गुणाभावः, 'तन्वादीनां छन्दसि बहुलम्' इत्युवङ् । नामेत्यादिस्सर्वत्रानुषङ्गः ॥

[3]सुषुम्नः सुसूते शोभनं सुखं यो न इति । 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । चन्द्रो ह्यमृताद्देवपितृमनुष्यान् सुखयति । सूर्यरश्मिरेव रश्मिः यस्य अमृतात्मकत्वात् चन्द्रस्य । यथाऽऽहुः—

सूर्योग्निमयो गोळः
चन्द्रोम्बुमयस्स्वभावतस्स्वच्छः ।

तस्मात्स्वतो रश्म्यभावात् सूर्यरश्मिभिरेवायं दीप्यते इति । तदप्याहुः—

भूग्रहभानां गोळार्धानि स्वच्छायया विवर्णानि ।
अर्धानि यथासारं सूर्याभिमुखानि दीप्यन्ते ॥* इति ॥

एतदुक्तं भवति । यदस्यैवान्तस्थस्य चन्द्रबिम्बस्यार्धमेकं सर्वदा भास्वरं भवति, अर्धं तद्व्यतिरिक्तवर्णं दृश्यते । तत्रेदं कारणं—सूर्याभिमुखं यदर्धं तत्सूर्यरश्मिभिरादीप्यते, अन्यत्स्वामेव छायामवलम्बति । किमिति तर्हि चन्द्रमसो बिम्बार्धं सर्वदा न चकास्ति

---

*आर्यभटीये—गोलपादे.

स्तस्य नक्षत्राण्यप्सरसो बेकुरयो रश्मिः । चन्द्रमाः । गन्धर्वः । तस्य । नक्षत्राणि ।

चकास्त्येव । किमिति नोपलभ्यते । उच्यते—अमावास्यायां चन्द्रवमस उपर्यादित्यः तदासौ तस्य चन्द्रमसः उपरि यद्बिम्बार्धं तदशेषमवभासयति । ततश्चन्द्रस्यामावास्ययोपलक्षितोपरिबिम्बे केन्द्रात् यथा यथा पश्चादादित्योवलम्बते तथा तथा चन्द्रमसो बिम्बं केन्द्रस्य परतोवलम्बते तत्केन्द्रवशाच्चन्द्रमसो बिम्बार्धं यावदेवामावास्योपलक्षिते बिम्बस्यार्धादधोवलम्बते तावच्चन्द्रमसो बिम्बं अस्माभिरुपलभ्यते । शेषमुपरिस्थितत्वात् सूर्याभिमुखं दीप्यमानमपि नोपलभ्यते । तस्माद्यावद्यावत्सवितृकराश्लिष्टमवलम्बते तावत्तावच्छुक्लश्चन्द्रमा उपलभ्यते । तेनामी ज्योत्स्नावितानावभासिनश्चन्द्रकराः सूर्य मरीचय एव । केन तर्हि सवितृमरीचयोम्बुमयस्वभावे च श्यामे चन्द्रबिम्बे सम्मूर्छिता नैशं ध्वान्तमुपध्वंसयन्ति? उच्यते—यथा दर्पणे जले वा दिवाकरकरास्सम्मूर्छितास्सन्तो गृहान्तर्गतं तमः क्षपयन्ति एवं तदिति द्रष्टव्यम् । अन्यच्च यो यः चन्द्रबिम्बप्रदेशः सवितृमार्गे ऋजुत्वेन व्यवस्थितः स एव शुक्ल उपलक्ष्यते नेतर इत्यवगन्तव्यम् । एवं च निरुक्ते पठ्यते—'तस्यैको रश्मिः चन्द्रमसं प्रतिदीप्यते तेनोत्प्रेक्षितव्यमादित्योस्य दीप्तिर्भवति'* इति । तादृशः चन्द्रमा गन्धर्वः नक्षत्राण्यप्सरसः वृष्टिहेतुत्वात् । बेकुरयः वर्णव्यावृत्तिश्छान्दसी, भेकुरयः । वाजसनेयिनामेष एव पाठः । भयं यक्ष्माख्यं चन्द्रस्य कृतवत्यः इत्यर्थः । बिभेतेर्व्यत्ययेन भावे विन्, करोतेरौणादिके किप्रत्यये छान्दसमुत्वम् । अन्य आहुः—वृष्ट्यादिकरणशीलाः बेकुरयः । वेरुपसर्गस्य स्वरव्यञ्जनयोर्व्यावृत्तिरिति ॥

* नैघ–२-२-१

भुज्युस्सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरस्स्तवाः प्रजापतिर्विश्वकर्मा मनः ॥ १९ ॥ गन्धर्व-

अप्सरसः । वेकुर्यः । [4]भुज्युः । सुपर्ण इति सु-पर्णः । यज्ञः । गन्धर्वः । तस्य । दक्षिणाः । अप्स-रसः । स्तवाः । [5]प्रजापतिरिति प्रजा-पतिः । वि-श्वकर्मेति विश्व-कर्मा । मनः ॥ १९ ॥ गन्धर्वः ।

---

[4]भुज्युः भुनक्ति पालयति विश्वमिति भुज्युः, भुजेरौणादिकः क्युप्रत्ययः । सुपर्णः शोभनपतनः शोभनगमनः । पूर्वपदान्तो-दात्तत्वम् । ईदृशो यज्ञः गन्धर्वो भवति । दक्षिणा अप्सरसः । दक्षिणा, दक्ष वृद्धौ, दक्षिणेति कल्याण्यः दक्षिणावृद्ध्यै भवन्ति । तामेव कल्याणतामाह—स्तवा इति । स्तूयन्त इति स्तवाः । यद्वा—स्तूयते पुरुषो याभिस्ताः स्तवाः यो भूरि ददाति सः स्तूयते हि लोके न कर्मणैव । ऋदोरप् । उञ्छादिर्द्रष्टव्यः ॥

[5]प्रजापतिः प्रजानां पालयिता । 'पत्यावैश्वर्ये' इति पूर्वपद-प्रकृतिस्वरत्वम् । विश्वकर्मा विश्वं करणीयं यस्य स विश्वकर्मा; मनोनिबन्धनत्वात्सर्वप्रवृत्तीनाम् । पूर्ववद्विश्वशब्दस्य अन्तोदात्तत्वम् । उभयत्रापि लिङ्गव्यत्ययः । यद्वा—प्रजापतिर्विश्वकर्मभावेन स्तू-यते तत्कार्यभावेन श्रवणार्थं, लुप्तोपमा वा । मनो गन्धर्वः सम्य-ग्यागनिवृत्तेः । ऋक्सामान्यप्सरसः, यजुषामप्युपलक्षणम् । वह्न-यः ऋगादयः यज्ञं वहन्ति मनसा गृहीतत्वात्ताः ॥

स्तस्यर्क्सामान्यप्सरसो वह्नय इ-
षिरो विश्वव्यचा वातो गन्धर्वस्त-
स्यापोप्सरसो मुदा भुवनस्य पते
यस्य त उपरि गृहा इह च । स
नो रास्वाज्यानिꣳ रायस्पोषꣳ सु-

तस्य । ऋक्सामानीत्यृक्-सामानि । अप्सरसः । वह्नयः । [6]इषिरः । विश्वव्यचा इति विश्व-व्यचाः । वातः । गन्धर्वः । तस्य । आपः । अप्सरसः । मुदाः । [7]भुवनस्य । पते । यस्य । ते । उपरि । गृहाः । इह । च । सः । नः । रास्व । अज्यानिम् । रायः । पोषम् । सुवीर्यमिति सु-वीर्यम् । संवत्स-

---

[6]इषिरः सरणशीलस्सदागतिः । इष गतौ, औणादिकः किरच्प्रत्ययः । विश्वव्यचा विष्वग्भागं व्यचति पुरोवातादिरूपेण व्याप्नोति, विपूर्वादञ्चतेः 'गतिकारकयोरपि' इत्यसुन्, पूर्वपदप्रकृतिस्वरत्वस्य च बहुव्रीहिस्वरस्योपलक्षणत्वात् 'बहुव्रीहौ विश्वम्' इत्येतद्भवति । वातो गन्धर्वः, आपोप्सरसः व्याप्तिमत्यः वर्ष्या आपः मुदा नाम मोदयित्र्यः प्रजानां, ताभिर्हि सर्वे मोदन्ते, इगुपधात्कः ॥

[7]भुवनस्येत्यादि ॥ भुवनस्य भूतजातस्य पते पालयितः उपरि द्युलोकान्तरिक्षयोः इह च पृथिव्यां ग्रहाः ग्रहवासिनः । ते

वीर्यꣳ॑ संवत्स॒रीणाꣳ॑ स्व॒स्तिम् । प॒र॒मेष्ठ्यधिपतिर्मृ॒त्युर्ग॑न्ध॒र्वस्तस्य॒ वि॒श्वमप्स॒रसो॒ भुव॑स्सुक्षि॒तिस्सुभू॑ति॒रीणामिति॑ सं॒—व॒त्स॒रीणा॑म् । स्व॒स्तिम् । [8]प॒र॒मे॒ष्ठी । अधि॑पति॒रित्यधि॑—प॒तिः । मृ॒त्युः । ग॒न्ध॒र्वः । तस्य॑ । वि॒श्वम् । अ॒प्स॒रसः॑ । भुव॑ः । [9]सु॒क्षि॒तिरिति॑ सु—क्षि॒तिः । सुभू॑ति॒रिति॒ सु—भू॒तिः । भ॒द्र॒कृदिति॑ भद्र—कृत् । सु॒व॒र्वा॒निति॒ सु॒व॑ः—वा॒न् । प॒र्ज॒न्यः ।

स्वभूताः स त्वं नोस्मभ्यं रास्व देहि । व्यत्ययेनात्मनेपदम् ॥ अज्यानिं अहानिं अहानिनिमित्तम् । क्तिनो निष्ठावद्भावात् 'ल्वादिभ्यश्च' इति नत्वम् । रायो धनस्य पोषं सुवीर्यं शोभनवीर्यकम् । 'वीरवीर्यौ च' इत्युत्तरपदान्तोदात्तत्वम् । संवत्सरीणां च स्वस्ति अविनाशं संवत्सरभावीति । 'संपरिपूर्वात्ख च' इति खः ॥

[8]परमेष्ठी परमे स्वभावे तिष्ठतीति प्रत्यये 'तत्पुरुषे कृति बहुलम्' इति सप्तम्या अलुक् । अधिपतिः स्वामी मृत्युः गन्धर्वः विश्वं भूतजातं अप्सरसः सम्यङ्नीयमानं विश्वस्थितिहेतुरिति । भुवो नाम भवन्तीति भुवः । मध्यस्थतामादाय भूतानि धारयन्तीति ॥

[9]सुक्षितिः शोभनक्षितिकः । पूर्ववत्स्वरः । सुभूतिः शोभनभूतिः सम्पत् प्रजानाम् । प्रादिसमासे अव्ययपूर्वपदप्रकृतिस्वर-

भद्रकृत्सुवर्वान्पर्जन्यो गन्धर्वस्तस्य विद्युतोप्सरसो रुचो दूरेहेतिरमृड-यः ॥ २० ॥ मृत्युर्गन्धर्वस्तस्य प्र-जा अप्सरसो भीरुवश्चारुः कृप-

गन्धर्वः । तस्य । विद्युत इति वि—द्युतः । अप्सर-सः । रुचः । [10]दूरेहेतिरिति दूरे—हेतिः । अमृडयः॥ २० ॥ मृत्युः । गन्धर्वः । तस्य । प्रजा इति प्र—जाः । अप्सरसः । भीरुवः । [11]चारुः । कृपणका-

---

त्वम् । भद्रकृत् कल्याणकारी सर्वेषां सुवर्वान् द्युलोकवान् सस्यनिष्पत्त्यादिना तद्धारणात् । आदित्यवान्वा; तदधीनप्रवृत्तित्वात् । 'छन्दसीरः' इति मतुपो वत्वम् । शोभनारणवान्वा। तन्वादित्वादुवङ् । पर्जन्यो गन्धर्वः । विद्युतोप्सरसः । रुचः रुचमानाः नभसि दीप्यमानाः ॥

[10]दूरेहेतिः दूरेऽपि हेतिर्हननं यस्य, दूरेऽप्येतच्छ्रवणेन म्रियते इति कृत्वा । 'ऊतियूति' इत्यादौ हेतिशब्दो निपात्यते, 'तत्पुरुषे कृति बहुलम्' इत्यलुक् । अमृडयः दुःखयिता श्रवणमात्रेणैव भीतिजनकत्वात् । मृडेर्ण्यन्ताच्छान्दसः शः । मृत्युः श्रोतॄणां मारयिता त्रासनयत्नः गन्धर्वः प्रजा अप्सरसः; तदर्थत्वात्तत्प्रवृत्तेः । भीरुवः भयशीलाः पुष्याभाया ? ॥

[11]चारुः चरणशीलः विषयमवगाहत इति कृपणकाशी कृप-

णकाशी कामो गन्धर्वस्तस्याधयो-
प्सरसश्शोचयन्तीर्नाम स इदं ब्रह्म
क्षत्रं पातु ता इदं ब्रह्म क्षत्रं पान्तु तस्मै
स्वाहा ताभ्यस्स्वाहा स नो भुवन-

शीति कृपण—काशी । कामः । गन्धर्वः । तस्य । आधय इत्या—धयः । अप्सरसः । शोचयन्तीः । नाम । सः । इदम् । ब्रह्म । क्षत्रम् । पातु । ताः । इदम् । ब्रह्म । क्षत्रम् । पान्तु । तस्मै । स्वाहा । ताभ्यः । स्वाहा । [12]सः । नः । भुवनस्य । पते । य-

---

णेष्विन्द्रियार्थेषु मनः काशयतीति 'सुप्यजातौ' इति णिनिः । कामो गन्धर्वः । तेन हि यागादिद्वारेण वृत्तिरुत्पाद्यते । तस्याधयोप्सरसः आधीयन्ते ऋद्धावित्याधयः काम्या इन्द्रियार्था उच्यन्ते । 'उपसर्गे घोः किः' । शोचयन्तीः शोचयन्त्यः, तेषामलाभेन हि प्रजाः शोचन्ते । 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । नामेत्यादि पुनराम्नायते अनुषङ्गसमाप्तिं द्योतयितुम् ॥

[12]स न इत्यादि ॥ व्याख्यातमर्धर्चम्* । स त्वं नोस्माकं सम्बन्धिने अस्मै ब्रह्मणे अस्मै क्षत्राय उरु विस्तीर्णं महि महनीयं च शर्म सुखं यच्छ देहि । अन्ये आहुः—स न इति काम उच्यते । यस्य ते उपरि गृहाः इह च । स त्वं हे

---

*सं. ३-४-७.7

स्य पते यस्य त उपरि गृहा इह च।
उरु ब्रह्मणेऽस्मै क्षत्राय महि शर्म
यच्छ ॥ २१ ॥
राष्ट्रकामाय होतव्या राष्ट्रं वै राष्ट्र-
भृतो राष्ट्रेणैवास्मै राष्ट्रमव रुन्धे

स्य । ते । उपरि । गृहाः । इह । च । उरु । ब्रह्म-
णे । अस्मै । क्षत्राय । महि । शर्म । यच्छ ॥२१॥

मनो मृडयष्पञ्चत्वारिꣳशच्च ॥ ७ ॥

[1]राष्ट्रकामायेति राष्ट्र-कामाय । होतव्याः । राष्ट्रम् । वै । राष्ट्रभृत इति राष्ट्र-भृतः । राष्ट्रेण । एव । अस्मै । राष्ट्रम् । अवेति । रुन्धे । राष्ट्रम् ।

भुवनस्य पते काम ब्रह्मणे क्षत्राय च अस्मै उरु महनीयं च शर्म यच्छेति ॥

इति तृतीये चतुर्थे सप्तमोनुवाकः.

---

[1]अथ राष्ट्रभृतां ब्राह्मणं—राष्ट्रकामायेत्यादि ॥ राष्ट्रं प्राप्तु-कामो राष्ट्रकामः । 'शीलिकामि' इत्यादिना णः पूर्वपदप्रकृति-स्वरत्वं च । राष्ट्रं वा इति । तत्साधनत्वात्तच्छब्द्यम् । अस्मै

राष्ट्रमेव भवत्यात्मने होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रं प्रजा राष्ट्रं पशवो राष्ट्रं यच्छ्रेष्ठो भवति राष्ट्रेणैव राष्ट्रमव रुन्धे वसिष्ठस्समानानां भवति ग्रामकामाय होतव्या राष्ट्रं वै राष्ट्रभृतो राष्ट्रꣳ सजाता राष्ट्रेणैवास्मै

एव । भवति । [2]आत्मने । होतव्याः । राष्ट्रम् । वै । राष्ट्रभृत इति राष्ट्र–भृतः । राष्ट्रम् । प्रजेति प्र–जा । राष्ट्रम् । पशवः । राष्ट्रम् । यत् । श्रेष्ठः । भवति । राष्ट्रेण । एव । राष्ट्रम् । अवेति । रुन्धे । वसिष्ठः । समानानाम् । भवति । [3]ग्रामकामायेति ग्राम–कामाय । होतव्याः । राष्ट्रम् । वै । राष्ट्रभृत इति राष्ट्र–भृतः । राष्ट्रम् । सजाता इति स–जाताः । राष्ट्रेण । एव । अस्मै । राष्ट्रम् । सजाता-

---

यजमानाय राष्ट्रमवरुन्धे परिगृह्णात्यध्वर्युः । ततो यजमानो राष्ट्रं भवति । स्वस्वामिनोरभेदोपचारः विधेयत्वातिशयप्रदर्शनार्थः ॥

[2]आत्मन इति ॥ प्रजादिसमृद्ध्या यच्छ्रैष्ठ्यं तत्पुरुषस्यात्मा । राष्ट्रं प्रजा; राष्ट्रहेतुत्वाद्बलहेतुत्वाद्वा । राष्ट्रं पशवः; तत एव हेतोः यच्छ्रेष्ठः सर्वेषां प्रशस्यतमो भवति तदपि राष्ट्रतुल्यम् ।

राष्ट्रꣳ सजातानव रुन्धे ग्रामी॥२२॥
एव भवत्यधिदेवने जुहोत्यधिदेवन
एवास्मै सजातानव रुन्धे त एनम-
वरुद्धा उप तिष्ठन्ते रथमुख ओज-
स्कामस्य होतव्या ओजो वै राष्ट्र-

निति स-जातान् । अवेति । रुन्धे । ग्रामी ॥२२॥
एव । भवति । [4]अधिदेवन इत्यधि-देवने । जुहो-
ति । अधिदेवन इत्यधि-देवने । एव । अस्मै ।
सजातानिति स-जातान् । अवेति । रुन्धे । ते ।
एनम् । अवरुद्धा इत्यव-रुद्धाः । उपेति । तिष्ठन्ते ।
रथमुख इति रथ-मुखे । ओजस्कामस्येत्योजः-
कामस्य । होतव्याः । ओजः । वै । राष्ट्रभृत इति

वसिष्ठः वसुमत्तमः समानानां मध्ये भवति । प्रजादि धनं वसु । विन्मतोर्लुक्, 'टेः' इति टिलोपः ॥

[3]ग्रामकामायेति ॥ सजातसमवायो ग्रामः । सजाताः समानजन्मानः । पूर्ववत्ताच्छब्द्यम् । 'वा दान्त' इत्युत्तरपदान्तोदात्तत्वम् ॥

[4]अधि देवन इति ॥ अधि दीव्यत्यस्मिन्निति अधिदेवनं देवनस्थानं, तत्र प्रधानाग्निमुपसमाधाय निशायां जुहोति ॥

[5]रथमुख इति ॥ उपर्यग्नेः रथमुखं प्रगृह्य जुहुयात् । ओजो वा इत्यादि । गतम् । पूर्ववत्ताच्छब्द्यम् ॥

भृत ओजो रथ ओजसैवास्मा ओ-
जोवं रुन्ध ओजस्व्येव भवति यो
राष्ट्रादपभूतस्स्यात्तस्मै होतव्या या-
वन्तोस्य रथास्स्युस्तान्ब्रूयाद्युङ्ध्व-
मिति राष्ट्रमेवास्मै युनक्ति ॥ २३ ॥
आहुतयो वा एतस्याक्लृप्ता यस्य

राष्ट्र–भृतः । ओजः । रथः । ओजसा । एव । अस्मै । ओजः । अवेति । रुन्धे । ओजस्वी । एव । भवति । [6]यः । राष्ट्रात् । अपभूत इत्यप–भूतः । स्यात् । तस्मै । होतव्याः । यावन्तः । अस्य । रथाः । स्युः । तान् । ब्रूयात् । युङ्ध्वम् । इति । राष्ट्रम् । एव । अस्मै । युनक्ति ॥ २३ ॥ [7]आहुतय इत्या–हुतयः । वै । एतस्य । अक्लृप्ताः । यस्य ।

---

[6]यो राष्ट्रादित्यादि ॥ अपभूतः अपरुष्टः । पूर्ववद्गतेः प्रकृतिस्वरत्वम् । हुत्वा यावन्तोस्य राष्ट्रप्रेप्सोः रथाः भवन्ति तान् सर्वान् 'युङ्ध्वम्' इति प्रैषं ब्रूयात् । तेनास्मै राष्ट्रमेव युनक्ति ततो[न]पभूतो भवतीति । तिङः परत्वाद्युङ्ध्वमिति न निहन्यते ॥

[7]आहुतय इत्यादि ॥ अक्लृप्ताः स्वस्वकार्यकरणे असमर्था यस्य राष्ट्रं न कल्पते नेष्टसाधनसमर्थं भवति, स्वरथस्य दक्षिणं चक्रं

राष्ट्रं न कल्पते स्वरथस्य दक्षिणं
चक्रं प्रवृह्य नाडीमभि जुहुयादाहुं-
तीरेवास्य कल्पयति ता अस्य क-
ल्पमाना राष्ट्रमनु कल्पते संग्रामे
संयत्ते होतव्या राष्ट्रं वै राष्ट्रभृतो
राष्ट्रे खलु वा एते व्यायच्छन्ते ये

राष्ट्रम् । न । कल्पते । स्वरथस्येति स्व–रथस्य । दक्षिणम् । चक्रम् । प्रवृह्येति प्र–वृह्य । नाडीम् । अभीति । जुहुयात् । आहुतीरित्या–हुतीः । एव । अस्य । कल्पयति । ताः । अस्य । कल्पमानाः । राष्ट्रम् । अन्विति । कल्पते । [8]सङ्ग्राम इति सं–ग्रामे । संयत्त इति सं–यत्ते । होतव्याः । राष्ट्रम् । वै । राष्ट्रभृत इति राष्ट्र–भृतः । राष्ट्रे । खलु । वै । एते । व्यायच्छन्त इति वि–आयच्छन्ते । ये । स-

---

प्रवृह्य उपर्यग्नौ रथचक्रस्य नाडीं रन्ध्रं प्रगृह्य निशायां राष्ट्रभृतो जुहोति । तेनाहुतीरस्य कल्पयति । ताश्च कल्पमानाः अनु अस्य राष्ट्रं कल्पते । लक्षणे अनोः कर्मप्रवचनीयत्वम् ॥

[8]संग्रामे संयत्ते इत्यादि ॥ संग्रामे संयत्ते प्रक्रान्ते तज्जयार्थिनो होतव्याः । राष्ट्रार्थं खल्वेते व्यायच्छन्ते व्यायामं कुर्वन्ति,

संग्रामꣳ संयन्ति यस्य पूर्वस्य जुह्व-
ति स एव भवति जयति तꣳ सं-
ग्रामं मान्धुक इध्मः ॥ २४ ॥ भव-
त्यङ्गारा एव प्रतिवेष्टमाना अमि-
त्राणामस्य सेनां प्रति वेष्टयन्ति य

ङ्ग्राममिति सं–ग्रामम् । संयन्तीति सं–यन्ति । यस्य । पूर्वस्य । जुह्वति । सः । एव । भवति । जयति । तम् । सङ्ग्राममिति सं–ग्रामम् । मान्धुकः । इध्मः ॥ २४ ॥ भवति । अङ्गाराः । एव । प्रतिवे-ष्टमाना इति प्रति–वेष्टमानाः । अमित्राणाम् । अस्य । सेनाम् । प्रतीति । वेष्टयन्ति । [9]यः । उ-

---

ये संग्रामं संयन्ति प्राप्नुवन्ति । तस्माद्यस्य पूर्वस्य प्रथमभाजिन एव जुहोति स एव भवति आत्मवान् संपद्यते तेन इतरं जयति च तं संग्रामं स एव । अत्र विशेषमाह—मान्धुक इति । मान्धुकशब्दोधिक्रियन्ते? । बन्धूकविकार इत्येके । वृक्षान्तरमित्यन्ये । 'कोपधाच्च' इत्यण् । तत्रत्यं मित्रमग्निमुपसमाधाय मान्धुकमिध्ममभ्यज्य स्वाहाकारेणाभ्याधाय निशायामेतं जुहोति । त एवाङ्गाराः प्रतिवेष्टमानाः संहत्य ज्वलन्तः अस्यामित्राणां सेनाः प्रतिवेष्टयन्ति प्रत्यावेष्टच्य दहन्ति । 'अमेरित्रः' इतीत्रप्रत्ययः ॥

[9]य उन्माद्येदित्यादि ॥ गतम् । एते खल्विति । तेषां प्रतिपादकत्वात्तच्छब्द्यम् । तस्मा इत्यादि ॥ गन्धर्वाप्सरोभ्यः

उन्माद्येत्तस्मै होतव्या गन्धर्वाप्स-
रसो वा एतमुन्मादयन्ति य उन्मा-
द्यत्येते खलु वै गन्धर्वाप्सरसो य-
द्राष्ट्रभृतस्तस्मै स्वाहा ताभ्यस्स्वा-
हेति जुहोति तेनैवैनाञ्छमयति नै-
यग्रोध औदुम्बर आश्वत्थः प्लाक्ष
इतीध्मो भवत्येते वै गन्धर्वाप्सरसां

न्माद्येदित्युत्–माद्येत् । तस्मै । होतव्याः । गन्ध-
र्वाप्सरस इति गन्धर्व–अप्सरसः । वै । एतम् ।
उदिति । मादयन्ति । यः । उन्माद्यतीत्युत्–मा-
द्यति । एते । खलु । वै । गन्धर्वाप्सरस इति ग-
न्धर्व–अप्सरसः । यत् । राष्ट्रभृत इति राष्ट्र–भृतः ।
तस्मै । स्वाहा । ताभ्यः । स्वाहा । इति । जुहो-
ति । तेन । एव । एनान् । शमयति । नैयग्रोधः ।
औदुम्बरः । आश्वत्थः । प्लाक्षः । इति । इध्मः ।
भवति । एते । वै । गन्धर्वाप्सरसामिति गन्धर्व–

ष्टथक्स्वाहाकृत्य होमेन एनान् शमयति शान्तानेनुन्मादयितॄन् करोति । अत्र विशेषमाह—नैयग्रोध इत्यादि । एषामन्यतम इध्मो भवतीत्येके । एतच्चतुष्टयवानेक इध्म इत्यन्ये । 'अनु-दात्तादेश्च' इति विकारे न्यग्रोधादिभ्योञ् । एत इत्यादि ॥

गृहास्स्व एवैनान् ॥ २५ ॥ आयतने शमयत्यभिचरता प्रतिलोमꣳ होतव्याः प्राणानेवास्य प्रतीचः प्रति यौति तं ततो येन केन च स्तृणुते स्वकृत इरिणे जुहोति प्रदरे वैतद्वा

अप्सरसाम् । गृहाः । स्वे । एव । एनान् ॥ २५ ॥ आयतन इत्या—यतने । शमयति । [10]अभिचरते-त्यभि—चरता । प्रतिलोममिति प्रति—लोमम् । होतव्याः । प्राणानिति प्र—अनान् । एव । अस्य । प्रतीचः । प्रतीति । यौति । तम् । ततः । येन । केन । च । स्तृणुते । स्वकृत इति स्व—कृते । इरिणे । जुहोति । प्रदर इति प्र—दरे । वा । एतत् ।

एते न्यग्रोधादयः गन्धर्वाप्सरसां ग्रहवत्प्रीतिहेतवः । तस्मादेवं कुर्वन् स्वस्मिन्नेवायतनेऽवस्थितानेतान् शमयति शान्तानुन्मादयितॄन् करोति ॥

[10]अभिचरतेति ॥ प्रतिलोमं अन्त्यादारभ्य अस्याभिचर्यमाणस्य प्रतीचः प्रतिलोमान् प्रतियौति प्रातिकूल्येन प्रवर्तयति । 'चौ' इति पूर्वपदस्यान्तोदात्तत्वम्, दीर्घश्च । ततस्तं प्रातिकूल्यप्राणं [कारिणं] येन केन च आयुधादिं विना येन केन च स्तृणुते विनाशयितुं शक्नुयात् । स्वकृते स्वाभाविके, इरिणे ऊषरे प्रदरे भूविवरे वा जुहोति । स्वेनैव कृतम्, 'तृतीया कर्मणि' इति

अस्यै निरृ॑तिगृहीतं निरृ॑तिगृही-
त एवैनं॑ निरृ॑त्या ग्राहयति॒ यद्वाचः
क्रूरं॑ तेन॒ वषट्क॑रोति॒ वाच॑ एवैनं॑ क्रूरे-
ण॒ प्र वृ॑श्चति॒ ताजगार्ति॒मार्छ॑ति॒ य-
स्यं॑ कामये॒तान्नाद्य॑म् ॥ २६ ॥ आ
द॑दीयेति॒ तस्यं॑ सभायां॑मुत्ता॒नो नि॒-

वै । अस्यै । निरृ॑तिगृहीत॒मिति॒ निरृ॑ति—गृहीत॒म् । निरृ॑तिगृहीत॒ इति॒ निरृ॑ति—गृहीते॒ । एव । एन॒म् । निरृ॑त्येति॒ निः—ऋ॒त्या । ग्राह॒यति॒ । यत् । वा॒चः । क्रूर॑म् । तेन॑ । वषट् । क॒रो॒ति॒ । वा॒चः । एव । एन॒म् । क्रूरे॑ण । प्रेति॑ । वृ॒श्च॒ति॒ । ता॒जक् । आर्ति॑म् । एति॑ । ऋ॒च्छ॒ति॒ । [11]यस्य॑ । का॒मये॒त । अन्नाद्य॒मित्यन्न—अद्य॑म् ॥ २६ ॥ एति॑ । द॒दी॒य॒ । इति॑ । तस्य॑ । स॒भाया॑म् । उ॒त्ता॒न इत्यु॑त्—

पूर्वपदप्रकृतिस्वरत्वम् । प्रकर्षेण दीर्यते इति प्रदरः, 'ऋदोरप्' थाथादिनोत्तरपदान्तोदात्तत्वम् । अस्यै पृथिव्याः एतस्मिन् निरृतिगृहीतं निरृत्या अलक्ष्म्या समाश्रितम् । पूर्ववत्स्वरः । तस्मान्निरृतिगृहीते स्थाने होमादेनं निरृत्या ग्राहयति । यद्वाचः क्रूरं, तेन वाचः क्रूरेण एनं प्रकर्षेण वृश्चति । ततः ताजक् तदानीमेव स आर्तिं गच्छति ॥

[11]यस्य कामयेतेत्यादि ॥ अन्नमेवात्तव्यमन्नाद्यम्, छान्दसो

पद्य भुवनस्य पत इति तृणानि सं
गृह्णीयात्प्रजापतिर्वै भुवनस्य पतिः
प्रजापतिनैवास्यान्नाद्यमा दत्त इद-
महममुष्यामुष्यायणस्यान्नाद्य ँ ह-
रामीत्याहान्नाद्यमेवास्यं हरति षड्भिर्

तानः । निपद्येति नि–पद्य । भुवनस्य । पते । इति । तृणानि । समिति । गृह्णीयात् । प्रजापतिरिति प्रजा–पतिः । वै । भुवनस्य । पतिः । प्रजापतिनेति प्रजा–पतिना । एव । अस्य । अन्नाद्यमित्यन्न–अद्यम् । एति । दत्ते । [12]इदम् । अहम् । अमुष्य । आमुष्यायणस्य । अन्नाद्यमित्यन्न–अद्यम् । हरामि । इति । आह । अन्नाद्यमित्यन्न–अद्यम् । एव । अस्य । हरति । षड्भिरिति षट्–भिः ।

यत् । उत्तानो निपद्य निपतितशरीरस्सन् 'भुवनस्य पते'* इति मन्त्रेण तृणानि संगृह्णीयात् ॥

[12]इदमहमित्यादि ॥ अदश्शब्दान्नडादित्वात्फक् । इदं तृणान्यादाय इदमहं नारायणस्य गोविन्दसूनोरन्नाद्यमाहरामीत्याहरन् आहरत्येवास्यान्नाद्यम् । षड्भिरित्यादि । 'भुवनस्य'* इत्यादि 'स नो भुवनस्य'† इत्यन्तैः । एतानि तृणानि स्वस्यां वा सभायां स्वेषु वा अमात्येष्वपिसृजति । प्रजापतिनेत्यादि । गतम् ॥

---

*सं. ३-४-७.[7] †सं. ३-४-७.[12]

हरति षड्वा ऋतवः प्रजापतिनैवा-
स्यान्नाद्यमादायर्तवोस्मा अनु प्र य-
च्छन्ति ॥ २७ ॥ यो ज्येष्ठबन्धुर-
पभूतस्स्यात्तꣳ स्थलेऽवसाय्य ब्रह्मौ-
दनं चतुश्शरावं पक्त्वा तस्मै होत-
व्यां वर्ष्म वै राष्ट्रभृतो वर्ष्म स्थलं व-

हरति । षट् । वै । ऋतवः । प्रजापतिनेति प्रजा-
पतिना । एव । अस्य । अन्नाद्यमित्यन्न-अद्यम् ।
आदायेत्या-दाय । ऋतवः । अस्मै । अनु । प्रेति ।
यच्छन्ति ॥ २७ ॥ [13]यः । ज्येष्ठबन्धुरिति ज्येष्ठ-
बन्धुः । अपभूत इत्यप-भूतः । स्यात् । तं । स्थ-
लें । अवसाय्येत्यव-साय्य । ब्रह्मौदनमिति ब्रह्म-
ओदनम् । चतुश्शरावमिति चतुः-शरावम् ।
पक्त्वा । तस्मै । होतव्यायाः । वर्ष्म । वै । राष्ट्रभृत
इति राष्ट्र-भृतः । वर्ष्म । स्थलम् । वर्ष्मणा । एव ।

---

[13]यो ज्येष्ठबन्धुरित्यादि ॥ ज्येष्ठबन्धुरुच्छ्रितबन्धुः अपभूतः न्यक्कृतः । स्थले उच्छ्रिते भूप्रदेशे अवस्थाप्य । चतुश्शरावमिति । चत्वारश्शरावाः परिमाणमस्येति । आर्हीयस्य 'अध्यर्धपूर्वद्विगोः' इति लुक्, 'इगन्तकाल' इति पूर्वपदप्रकृतिस्वर-

ष्मैणैवैनं वर्ष्मं समानानां गमयति
चतुश्शरावो भवति दिक्षवेव प्रति ति-
ष्ठति क्षीरे भवति रुचमेवास्मिन्दधा-
त्युद्धरति शृतत्वाय सर्पिष्वान्भवति
मेध्यत्वाय चत्वार आर्षेयाः प्राश्नं-
न्ति दिशामेव ज्योतिषि जुहोति॥२८

एनम् । वर्ष्मं । समानानाम् । गमयति । चतुश्श-
राव इति चतुः—शरावः । भवति । दिक्षु । एव ।
प्रतीति । तिष्ठति । क्षीरे । भवति । रुचम् । एव ।
अस्मिन् । दधाति । उदिति । हरति । शृतत्वायेति
शृत—त्वाय । सर्पिष्वान् । भवति । मेध्यत्वायेति
मेध्य—त्वाय । चत्वारः । आर्षेयाः । प्रेति । अ-
श्नन्ति । दिशाम् । एव । ज्योतिषि । जुहोति ॥२८॥

ग्रामी युनक्तीध्मस्स्व एवैनान्नाद्यं
यच्छन्त्येकान्न पंञ्चाशच्च ॥८॥

त्वम् । वर्ष्म उच्छ्रायः । उद्धरति पात्रान्तरे शृतत्वाय अभि-
व्यक्तये । आर्षेयाः भवन्ति । अथवा शुश्रुवांसस्स्युः । दिशां
सम्बन्धिनि ज्योतिषि अग्नौ हुतं भवति तैः प्राशितम् ॥

इति तृतीये चतुर्थे अष्टमोनुवाकः.

देविकाः निर्वपेत्प्रजाकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसीव खलु वै प्रजाश्छन्दोभिरेवास्मै प्रजाः प्र जनयति प्रथमं धातारं करोति मिथुनी एव तेन करोत्यन्वेवास्मा अनुमतिः

देविकाः । निरिति । वपेत् । प्रजाकाम इति प्रजा-कामः । छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि । इव । खलु । वै । प्रजा इति प्र-जाः । छन्दोभिरिति छन्दः-भिः । एव । अस्मै । प्रजा इति प्र-जाः । प्रेति । जनयति । प्रथमम् । धातारम् । करोति । मिथुनी । एव । तेन । करोति । अन्विति । एव । अस्मै । अनुमतिरित्यनु-मतिः ।

---

[1]सन्ति देविकाहवींषि 'धात्रे पुरोडाशं द्वादशकपालम्'* इति प्रदेशान्तरविहितानि । तेषामिह काम्येन भेदेन प्रयोगविशेषान्दर्शयति—देविका निर्वपेत्प्रजाकाम इत्यादिना ॥ सर्वत्र 'शीलिकामि' इत्यादिना णः, पूर्वपदप्रकृतिस्वरत्वम् । 'छन्दांसि वै देविकाः' इत्यादि वक्ष्यति गायत्र्या भावमनुमत्यादीनाम् । यद्वा—छन्दसां प्रजादिसाधनत्वात् तादृशस्वभावानां हविषां तैरभेद उपचर्यते । प्रथममिति । धातुः द्वादशकपालं प्रजाकामस्य पञ्चानामाद्यं कुर्या-

---

*आ. १-७-२.

मतिर्मन्यते राते राका प्र सिनीवा-
ली जनयति प्रजास्वेव प्रजातासु
कुह्वां वाचं दधात्येता एव निर्वपे-
त्पशुकामश्छन्दाꣳसि वै देविकाः
श्छन्दाꣳसि ॥ २९ ॥ इव खलु वै
पशवश्छन्दोभिरेवास्मै पशून्प्र ज-

मन्यते । राते । राका । प्रेति । सिनीवाली । ज-
नयति । प्रजास्विति प्र–जासु । एव । प्रजातास्वि-
ति प्र–जातासु । कुह्वां । वाचम् । दधाति । [2]एताः ।
एव । निरिति । वपेत् । पशुकाम इति पशु–का-
मः । छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि ॥ २९
इव । खलु । वै । पशवः । छन्दोभिरिति छन्दः–
भिः । एव । अस्मै । पशून् । प्रेति । जनयति ।

दित्यर्थः । तेन धातुः प्राथम्येन मिथुनीकरोति संयोजयति जनयित्रीः प्रजाः । 'अस्य च्वौ' इतीकारः, 'व्यवहिताश्च' इति व्यवहितः प्रयुज्यते । अक्षादित्वात्संहितायां यणादेशाभावः । अनुमतिस्तं मिथुनीभावमनुमन्यते । राका प्रजां राते ददाति । रातेर्व्यत्ययेनात्मनेपदम् । सिनीवाली प्रजनयति प्रजाः । तासु प्रजासु प्रजातासु कुह्वा वाचं दधाति स्थापयति ॥

[2]पशुकामस्यापि प्रथमो धाता । तेन प्रवापयति निषिञ्चति

नयति प्रथमं धातारं करोति प्रैव तेनं वापयत्यन्वेवास्मा अनुमतिर्मन्यते राते राका प्र सिनीवाली जनयति पशूनेव प्रजातान्कुह्वा प्रतिष्ठापयत्येता एव निर्वपेद्ग्रामकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसीव खलु वै ग्रामश्छन्दोभिरेवास्मै ग्रामंम् ॥ ३० ॥ अवं रुन्धे मध्यतो

प्रथमम् । धातारम् । करोति । प्रेति । एव । तेनं । वापयति । अन्विति । एव । अस्मै । अनुमतिरित्यनु-मतिः । मन्यते । राते । राका । प्रेति । सिनीवाली । जनयति । पशून् । एव । प्रजातानिति प्र-जातान् । कुह्वा । प्रतीति । स्थापयति । एताः । एव । निरिति । वपेत् । ग्रामकाम इति ग्राम-कामः । छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि । इव । खलु । वै । ग्रामः । छन्दोभिरिति छन्दः-भिः । एव । अस्मै । ग्रामम् ॥ ३० ॥ अवेति ।

पशून् । प्रजातान्पशून् कुह्वा प्रतिष्ठापयति ॥

[3]ग्रामकामस्य मध्यतो धाता । तेन ग्रामस्य मध्ये एनं आधिपत्ये स्थापयति ॥

धातारं करोति मध्यत एवैनं ग्राम-
स्य दधात्येता एव निर्वपेज्ज्योगा-
मयावी छन्दाꣳसि वै देविकाश्छ-
न्दाꣳसि खलु वा एतमभि मन्यन्ते
यस्य ज्योगामयति छन्दोभिरेवैनम-
गदं करोति मध्यतो धातारं करोति
मध्यतो वा एतस्याक्लृप्तं यस्य ज्योगा-

रुन्धे । मध्यतः । धातारम् । करोति । मध्यतः । एव । एनम् । ग्रामस्य । दधाति । [4]एताः । एव । निरितिं । वपेत् । ज्योगामयावीति ज्योक्-आमयावी । छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि । खलु । वै । एतम् । अभीति । मन्यन्ते । यस्य । ज्योक् । आमयति । छन्दोभिरिति छन्दः-भिः । एव । एनम् । अगदम् । करोति । मध्यतः । धातारम् । करोति । मध्यतः । वै । एतस्य । अक्लृ-

[4]ज्योगामयावी दीर्घामयग्रस्तः । अभिमन्यन्ते अभिक्रुध्यन्ति यस्य ज्योगामयत्यामयः । 'रुजार्थानाम्' इति कर्मणि षष्ठी । मध्यतो धाता भवति । मध्यतो हि देहस्य अक्लृप्तं असामर्थ्यं एतस्य ज्योगामयाविनः । तेन धातुर्मध्यतः करणेन अस्य मध्यतः कल्पयति सामर्थ्यं जनयति ॥

मर्यति मध्यत एवास्य तेन कल्पय-
त्येता एव निः ॥ ३१ ॥ वपेद्यं
यज्ञो नोपनमेच्छन्दाꣳसि वै देविकाः
श्छन्दाꣳसि खलु वा एतं नोप न-
मन्ति यं यज्ञो नोपनमति प्रथमं
धातारं करोति मुखत एवास्मै छ-
न्दाꣳसि दधात्युपैनं यज्ञो नमत्येता

तम् । यस्य । ज्योक् । आमर्यति । मध्यतः । एव ।
अस्य । तेन । कल्पयति । [5]एताः । एव । निरिति ।
॥ ३१ ॥ वपेत् । यम् । यज्ञः । न । उपनमेदित्युप-नमेत् । छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि ।
खलु । वै । एतम् । न । उपेति । नमन्ति । यम् ।
यज्ञः । न । उपनमतीत्युप-नमति । प्रथमम् ।
धातारम् । करोति । मुखतः । एव । अस्मै । छ-
न्दाꣳसि । दधाति । उपेति । एनम् । यज्ञः । न-

[5]यं यज्ञो नोपनमेत् नोपनमति, स इयक्षुरेता निर्वपेत् । तत्र धातुः प्राथम्येन मुखत एव छन्दांसि धृतानि भवन्ति । ततो यज्ञं एनमुपनमति ॥

सौ श्री जगद्गुरु मठीय

एव निर्वपेदीजानश्छन्दाꣳसि वै दे-
विका यातयामानीव खलु वा एत-
स्य छन्दाꣳसि य ईजान उत्तमं
धातारं करोति ॥ ३२ ॥ उपरिष्टा-
देवास्मै छन्दाꣳस्ययातयामान्यव रु-
न्ध उपैनमुत्तरो यज्ञो नमत्येता ए-

मति । [6]एताः । एव । निरिति । वपेत् । ईजानः । छन्दाꣳसि । वै । देविकाः । यातयामानीति यात-यामानि । इव । खलु । वै । एतस्य । छन्दाꣳसि । यः । ईजानः । उत्तममित्युत्-तमम् । धातारम् । करोति ॥ ३२ ॥ उपरिष्टात् । एव । अस्मै । छन्दाꣳसि । अयातयामानीत्ययात-यामानि । अवेति । रुन्धे । उपेति । एनम् । उत्तर इत्युत्-तरः । यज्ञः । नमति । [7]एताः । एव । निरिति । वपेत् ।

---

[6]ईजानः इष्टवान् । य ईजानः एतस्य खलु यातयामानि गतसाराणि छन्दांसि भवन्ति । तत्रोत्तमं धातारं कुर्यात् । उपरिष्टात् यागोत्तरकालं अयातयामान्येव छन्दांस्यवरुन्धे । ततश्चैनमुत्तरो यज्ञः उपनमति येन इयक्षते ॥

[7]मेधाकामस्य प्रथमो धाता कार्यः ॥

व निर्वपेद्यं मेधा नोपनमेच्छन्दाꣳसि वै देविकाश्छन्दाꣳसि खलु वा एतं नोप नमन्ति यं मेधा नोपनमति प्रथमं धातारं करोति मुखत एवास्मै छन्दाꣳसि दधात्युपैनं मेधा नमत्येता एव निर्वपेत् ॥ ३३ ॥ रुक्कामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसीव खलु वै रुक्छन्दोभिरेवास्मि-

यम् । मेधा । न । उपनमेदित्युप–नमेत् । छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि । खलु । वै । एतम् । न । उपेति । नमन्ति । यम् । मेधा । न । उपनमतीत्युप–नमति । प्रथमम् । धातारम् । करोति । मुखतः । एव । अस्मै । छन्दाꣳसि । दधाति । उपेति । एनम् । मेधा । नमति । [8]एताः । एव । निरिति । वपेत् ॥ ३३ ॥ रुक्कामम् इति रुक्–कामः । छन्दाꣳसि । वै । देविकाः । छन्दाꣳसि । इव । खलु । वै । रुक् । छन्दोभिरिति छन्दः–भिः ।

[8]रुक्कामस्य मध्यतः । क्षीरे हवींषि भवन्तीति रुक्कामस्य विशेषः ॥

त्रुचं दधाति क्षीरे भवन्ति रुचमेवास्मिन्दधाति मध्यतो धातारं करोति मध्यत एवैनꣳ रुचो दधाति गायत्री वा अनुमतिस्त्रिष्टुप्राका जगती सिनीवाल्यनुष्टुप्कुहूर्धाता वषट्कारः पूर्वपक्षो राकाऽपरपक्षः कुहूरमा-

एव। अस्मिन्न्। रुचम्। दधाति। क्षीरे। भवन्ति। रुचम्। एव। अस्मिन्न्। दधाति। मध्यतः। धातारम्। करोति। मध्यतः। एव। एनम्। रुचः। दधाति। [9]गायत्री। वै। अनुमतिरित्यनु—मतिः। त्रिष्टुक्। राका। जगती। सिनीवाली। अनुष्टुबित्यनु—स्तुप्। कुहूः। धाता। वषट्कार इति वषट्—कारः। पूर्वपक्ष इति पूर्व—पक्षः। राका। अपरपक्ष इत्यपर—पक्षः। कुहूः। अमावास्येत्यमा—वा-

---

[9]गायत्री वा इत्यादि ॥ अनुमत्यादिधात्रन्ता गायत्र्यादिवषट्कारात्मना रूप्यते तद्वत्प्रजादिसाधनत्वात्। वषट्कारस्य च सर्वप्रवर्तकत्वात् धातृत्वम्। पूर्वपक्ष इत्यादि। राका पूर्णमासी पूर्वपक्षत्वेन रूप्यते। कुहूरमावास्या अपरपक्षत्वेन रूप्यते। सिनीवाली कृष्णपञ्चदशी दृष्टचन्द्रामावास्यारूपेण रूप्यते।

वास्या सिनीवाली पौर्णमास्यनुम-
तिश्चन्द्रमा धाताऽष्टौ ॥३४॥ वस-
वोऽष्टाक्षरा गायत्र्येकादश रुद्रा ए-
कादशाक्षरा त्रिष्टुब्द्वादशादित्या द्वाद-
शाक्षरा जगती प्रजापतिरनुष्टुब्धाता
वषट्कार एतद्वै देविकास्सर्वाणि च

स्या । सिनीवाली । पौर्णमासीति पौर्ण-मासी । अनुमतिरित्यनु-मतिः । चन्द्रमाः । धाता । [10]अष्टौ ॥ ३४ ॥ वसवः । अष्टाक्षरेत्यष्टा-अक्षरा । गायत्री । एकादश । रुद्राः । एकादशाक्षरेत्येकादश-अक्षरा । त्रिष्टुप् । द्वादश । आदित्याः । द्वादशाक्षरेति द्वादश-अक्षरा । जगती । प्रजापतिरिति प्रजा-पतिः । अनुष्टुबित्यनु-स्तुप् । धाता । वषट्कार इति वषट्-कारः । एतत् । वै । देविकाः । सर्वाणि । च । छन्दाꣳसि । सर्वाः । च । देवताः । व-

---

अनुमतिरूनचन्द्रा शुक्लपञ्चदशी पौर्णमासीरूपेण रूप्यते । धाता चन्द्रमस्त्वेन रूप्यते । स हि सर्वमिदं पूर्वपक्षादि प्रवर्तयति । पूर्वपक्षादीनामपि प्रजावृद्ध्यादिहेतुत्वात् तद्रूपेण रूपणम् ॥

[10]अष्टौ वसव इत्यादि ॥ गायत्र्यादिरूपेण अनुमत्यादयो

छन्दाꣳसि सर्वाꣳश्च देवता वषट्कार-
स्ता यत्सह सर्वा निर्वपेदीश्वरा एनं
प्रदहो द्वे प्रथमे निरुप्य धातुस्तृती-
यं निर्वपेत्तथो एवोत्तरे निर्वपेत्तथैनं
न प्र दहन्त्यथो यस्मै कामाय निरु-

ष्यट्कार इति वषट्–कारः । [11]ताः । यत् । सह । स-
र्वाः । निर्वपेदिति निः–वपेत् । ईश्वराः । एनम् ।
प्रदह इति प्र–दहः । द्वे इति । प्रथमे इति । निरु-
प्येति निः–उप्य । धातुः । तृतीयम् । निरिति ।
वपेत् । तथो इति । एव । उत्तरे इत्युत्–तरे । नि-
रिति । वपेत् । तथा । एनम् । न । प्रेति । दहन्ति ।
[12]अथो इति । यस्मै । कामाय । निरुप्यन्त इति

रूपिताः । इदानीं ता एव वस्वादिरूपेण रूप्यन्ते—अष्टाक्षरा गायत्र्यात्मिका अनुमतिः अष्टौ वसव इति । एवं सर्वत्र । एतद्वा इत्यादि । एतेन प्रकारेण ॥

[11]ता यदित्यादि ॥ तास्तादृश्यो देविकाः सर्वाः यत् यदि सह निर्वपेत्, एनं यजमानं प्रदहः प्रकर्षेण दग्धुमीश्वराः समर्थास्स्युः । 'ईश्वरे तोसुन्कसुनौ' इति तोसुन् । द्वे इत्यादि । गतम् । तथा उ तथो—निपातसमुदायात्मको निपातः ॥

[12]अथो इत्यादि ॥ अथो अपि च यस्मै कामाय उक्तेभ्यः

प्यन्ते तमेवाभिरुपाप्नोति ॥ ३५ ॥
वास्तोष्पते प्रति जानीह्यस्मांस्त्वा-
निः—उप्यन्ते । तम् । एव । आभिः । उपेति । आप्नोति ॥ ३५ ॥

पशुकामश्छन्दाꣳसि वै देविकाश्छन्दाꣳसि ग्रामं कल्पयत्येता एव निरुप्तमं धातारं करोति मेधा नमत्येता एव निर्वपेद्दृष्टौ दंहन्ति नवं च ॥ ९ ॥

देविकाः प्रजाकामो मिथुनी प्रजासु पशुकामः प्रैव ग्रामकामो ज्योगामयावी यं यज्ञो य ईजानो यं मेधा रुक्कामोष्टौ देविका भवन्ति दधति राष्ट्रकामाय भवति दधाति ॥

[1]वास्तोः । पते । प्रतीति । जानीहि । अस्मान् ।

प्रजादिकामेभ्यः अन्यस्मा अपि एता निरुप्यन्ते तं काममाभिरेवोपाप्नोति ॥

इति तृतीये चतुर्थे नवमोनुवाकः

---

[1]यत्र दशाहान्युषित्वा प्रयास्यन् स्रुचि तच्चतुर्गृहीतं गृहीत्वा गार्हपत्ये वास्तोष्पतीयं जुहोति—वास्तोष्पते इति त्रिष्टुब्भ्यां

वेशो अनमीवो भवा नः। यत्त्वेमहे
प्रति तन्नो जुषस्व शं नं एधि द्विपदे

स्वावेश इति सु-आवेशः । अनमीवः । भव । नः । यत् । त्वा । ईमहे । प्रतीति । तत् । नः । जुषस्व । शम् । नः । एधि । द्विपद इति द्वि-पदे।

याज्यानुवाक्याभ्याम् । वास्तोष्पते इति पुरोनुवाक्यामनूच्य वास्तोष्पते इति याज्यया जुहोति ॥ 'यदेकया जुहुयात्'* इत्यादि ब्राह्मणम् । हे वास्तोष्पते वास्तोः गृहस्य पालयितः । 'रुद्रः खलु वै वास्तोष्पतिः'* इति ब्राह्मणम् । 'सुषामन्त्रिते' इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य षाष्ठिकमामन्त्रितादुदात्तत्वम्, 'षष्ठ्याः पतिपुत्र' इति सत्वम्, सुषामादित्वात्षत्वम् । अस्मान् प्रतिजानीहि आत्मीयत्वेन बुद्ध्यस्व प्रत्येकं वा अस्मान् जानीहि अनुध्यातुमर्हसि । ततश्च स्वावेशः सुखावासः सुखं वासयिता अस्माकं भव । अनमीवः अरोगः अरोगहेतुश्चास्माकं भव । 'द्व्यचोतस्तिङः' इति संहितायां दीर्घत्वम्, 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । यत्त्वा ईमहे याचामहे तन्नोस्मान् प्रतिजुषस्व प्रतिप्रापय । प्रत्येकं वा प्रापय । यद्वा—तत्तत्प्रति तत्प्रदानार्थं नः अस्मान् जुषस्व । प्रतिगृहाण वा अस्मान् । किंच—नोस्माकं द्विपदे चतुष्पदे च शं सुखं सुखहेतुः एधि भव । 'द्वित्रिभ्यां पद्दन्' इति द्विपद इत्यत्रोत्तरपदान्तोदात्तत्वम् ॥

---

*सं. ३-४-१०.10,7

शं चतुंष्पदे । वास्तोंष्पते शग्मया॑ स॒ꣳसदा॑ ते सक्षीमहि॑ रण्वया॑ गातु॒-
मत्या॑ । आव॒ः क्षेम॑ उ॒त योगे॒ वर॑ं
नो यू॒यं पा॑त स्व॒स्तिभि॒स्सदा॑ नः ।

शम् । चतुंष्पद॒ इति॒ चतु॑ः—प॒दे॒ । [2]वास्तोः । प॒ते॒ ।
शग्मया॑ । स॒ꣳसदेति॑ सं—सदा॑ । ते॒ । सक्षीमहि॑ ।
रण्वया॑ । गा॒तुम॒त्येति॑ गातु—मत्या॑ । आव॒ः । क्षेम॑ ।
उ॒त । योगे॑ । वर॑म् । नः॒ । यू॒यम् । पा॒त॒ । स्व॒स्ति-

---

[2]अथ द्वितीया—हे वास्तोष्पते शग्मया सर्वार्थसाधनशक्त्या । छान्दसं जश्त्वम् । तव संसदा सन्तत्या श्लेषेण एतद्धोमनिमित्तेन संबन्धेन सक्षीमहि अभिभवेम शत्रून् । यद्वा—त्वया संसक्ता भूयास्म । सञेराशिषि लिङ्, छान्दसोनुनासिकलोपः । रण्वया गन्तव्यया । रवि गतौ, घञ् । पचाद्यजेव वाऽकर्तरि । रमणीयया वा । रमेरक्षरविकारश्छान्दसः, औणादिको यञ् प्रत्ययः । गातुमत्या गतिमत्या सर्वत्राप्रतिहतगत्या । 'ह्रस्वनु ङ्भ्यां मतुप्' । इति मतुप उदात्तत्वम् । किञ्च—आवः रक्ष । अवतेश्छान्दसो लुङ् । क्षेमे उत अपि च योगक्षेमार्थं योगार्थं च नः अस्मान् वरं उत्कृष्टं रक्षेति । लब्धपरिपालनं क्षेमः, अलब्धलाभो योगः । यूयमित्यादि । व्यख्यातम्* । पूजार्थं एकस्मिन् बहुवचनम्, वचनव्यत्ययो वा ॥

---

* सं २-२-१२.[17]

यत्सायंप्रातरग्निहोत्रं जुहोत्याहुती-
ष्टका एव ता उप धत्ते ॥ ३६ ॥
यजमानोऽहोरात्राणि वा एतस्येष्ट-
का य आहिताग्निर्यत्सायंप्रातर्जुहो-
त्यहोरात्राण्येवाप्त्वेष्टकाः कृत्वोप ध-

भिरिति स्वस्ति-भिः । सदा । नः । [3]यत् । साय-
म्प्रातरिति सायं-प्रातः । अग्निहोत्रमित्यग्नि-होत्रम् । जुहोति । आहुतीष्टका इत्याहुति-इष्टकाः । एव । ताः । उपेति । धत्ते ॥ ३६ ॥ यजमानः । [4]अहोरात्राणीत्यहः-रात्राणि । वै । एतस्य । इष्ट-काः । यः । आहिताग्निरित्याहित-अग्निः । यत् । सायंप्रातरिति सायं-प्रातः । जुहोति । अहोरात्रा-णीत्यहः-रात्राणि । एव । आप्त्वा । इष्टकाः ।

---

[3]अथ वास्तोष्पतीयस्य ब्राह्मणम्—यत्सायमित्यादि ॥ सायंप्रातः अग्निहोमेन आहुत्यात्मिका इष्टका यजमान उपधत्ते ॥

[4]अहोरात्राणीत्यादि ॥ अहानि रात्रयश्चाहोरात्राणि । 'हेम-न्तशिशिरावहोरात्रे च' इति नपुंसकत्वम् । आहिताग्नेरिष्टका-स्थानीयान्यहोरात्राणि सायंप्रातर्होमेन अहोरात्राण्याप्त्वा होमेन चेष्टकाः कृत्वा अहोरात्रात्मिका इष्टका उपधत्ते ॥

त्ते दश समानत्र जुहोति दशाक्षरा विराड्विराजमेवाप्त्वेष्टकां कृत्वोप धत्तेऽथो विराज्येव यज्ञमाप्नोति चित्यश्चित्यो स्य भवति तस्माद्यत्र दशो-

कृत्वा । उपेति । धत्ते । [5]दश । समानत्र । जुहोति । दशाक्षरेति दश—अक्षरा । विराडिति वि—राट् । विराजमिति वि—राजम् । एव । आप्त्वा । इष्टकाम् । कृत्वा । उपेति । धत्ते । अथो इति । विराजीति वि—राजि । एव । यज्ञम् । आप्नोति । चित्यश्चित्य इति चित्यः—चित्यः । अस्य । भवति । [6]तस्मात् । यत्र । दश । उषित्वा । प्रयातीति

---

[5]दशेत्यादि ॥ समानत्र वास्तौ दशाहुतीः दशस्वहोरात्रेषु जुहोति । दशसंख्यासंपत्त्या दशाक्षरां विराजमाप्त्वा विराडात्मिकामेवेष्टकामुपधत्ते । एवं त्रय्या [तिस्रः] इष्टका आहुतीष्टका अहोरात्रेष्टकौ विराडिष्टकेति । अथो अपि च विराजि लब्धायां यज्ञस्संपद्यते । चित्यश्चित्यः पुनःपुनश्च यजमानस्याग्निर्भवति न कदाचित्समाप्यते । 'चित्याग्निचित्ये च' इति निपात्यते, पौनःपुन्ये द्विर्वचनम्, 'अनुदात्तं च' इति द्वितीयस्य अनुदात्तत्वम् ॥

[6]यदुक्तं विराजि यज्ञमाप्नोतीति, तत्स्फुटीकरोति—तस्मादिति ॥ यस्मादेवं विराट्सम्पत्तौ यज्ञावाप्तिः, तस्माद्यत्र वसतौ दशरात्री-

षित्वा प्रयाति तद्यज्ञवास्त्ववांस्त्वेव तद्यत्ततोर्वाचीनम् ॥ ३७ ॥ रुद्रः खलु वै वास्तोष्पतिर्यदहुत्वा वास्तोष्पतीयं प्रयायाद्रुद्र एनं भूत्वाऽग्निरं-

प्र—याति । तत् । यज्ञवास्त्विति यज्ञ—वास्तु । अवांस्तु । एव । तत् । यत् । ततः । अर्वाचीनम् ॥ ३७ ॥ [7]रुद्रः । खलु । वै । वास्तोष्पतिरिति वास्तोः—पतिः । यत् । अहुत्वा । वास्तोष्पतीयमिति वास्तोः—पतीयम् । प्रयायादिति प्र—यायात् । रुद्रः । एनम् । भूत्वा । अग्निः । अनूत्थायेत्यनु—उत्थाय ।

रुषित्वा प्रयाति देशान्तरं गच्छति, तद्यज्ञवास्तु भवति वास्तोष्पतीयहोमः कर्तव्य इत्यर्थः । यत्ततो दशरात्रादर्वाचीनं न्यूनं नवरात्रादि वसति तदवास्त्वेव उक्तेन न्यायेन यज्ञानवाप्तेर्वास्तोष्पतीयहोमाभावादवास्तुत्वम् । अर्वागञ्चतीति ऋत्विगादिना क्विनि 'विभाषाञ्चेः' इति खः ॥

[7]कः पुनरत्र यष्टव्यः ? को वाऽस्य यागः ? इत्याह—रुद्र इति ॥ 'रुद्रो वा एष यदग्निस्स एतर्हि जातो यर्हि सर्वश्चितः'* इति न्यायेन अस्येष्टकचितस्य यज्ञस्य वास्तुनः पातृत्वेन स्वामित्वेन अग्निरात्मा रुद्रस्सन्निधत्ते भागं च लिप्सते । तस्माद्रुद्रो वास्तोष्पतिः । छान्दसष्षष्ठ्या अलुक्, 'पत्यावैश्वर्ये' इति व्यत्ययेन न प्रवर्तते । ततश्च यदहुत्वा वास्तोष्पतीयं प्रयायात्, एनं प्रयान्तं

* सं. ५-४-३.[1]

नूत्थायं हन्याद्वास्तोष्पतीयं जुहोति भागधेयेनैवैनꣳ शमयति नार्तिमार्च्छति यजमानो यद्युक्ते जुहुयाद्यथा प्रयाते वास्तावाहुतिं जुहोति तादृगेव तद्यदयुक्ते जुहुयाद्यथा क्षेम

हन्यात् । वास्तोष्पतीयमिति वास्तोः -पतीयम् । जुहोति । भागधेयेनेति भाग-धेयेन । एव । एनम् । शमयति । न । आर्तिम् । एति । ऋच्छति । यजमानः । [8]यत् । युक्ते । जुहुयात् । यथा । प्रयात इति प्र-याते । वास्तौ । आहुतिमित्या-हुतिम् । जुहोति । तादृक् । एव । तत् । यत् । अयुक्ते । जुहुयात् । यथा । क्षेमे । आहुतिमित्या-हुतिम् ।

रुद्रो भूत्वा अग्निरनूत्थाय हन्यात् अनुद्रुत्य नाशयेत् । वास्तोष्पतीयमित्यादि । वास्तोष्पते इति द्वाभ्याम् । संयोजिते वा अयं होमः स्यात्, अयुक्ते वा प्रागेव भवेत् ॥

[8]अत्र पक्षद्वयेऽपि दोषमुक्त्वा समाधातुमारभते—यद्युक्ते इत्यादि ॥ अत्रानेन वास्तोष्पतीयं होतव्यं, तत्रापि प्रयास्यता होतव्यम्, यत्र यत् युक्ते जुहुयात् यथा प्रयाते अपगते वास्तौ अवास्तुन्येव जुहोति तादृक्तत्तुल्यं भवति । युक्ते तु स्थितस्यैव भाण्डाधारत्वादवास्तुत्वं वसतेर्व्यज्यते । अथ यदयुक्ते जुहुयात्

आहुतिं जुहोति तादृगेव तदहुतम-
स्य वास्तोष्पतीयꣳ स्यात् ॥ ३८ ॥
दक्षिणो युक्तो भवति सव्योऽयुक्तोथं
वास्तोष्पतीयं जुहोत्युभयमेवाकरपं-

जुहोति । तादृक् । एव । तत् । अहुतम् । अस्य । वास्तोष्पतीयमिति वास्तोः—पतीयम् । स्यात् ॥ ३८ ॥ [9]दक्षिणः । युक्तः । भवति । सव्यः । अयुक्तः । अथं । वास्तोष्पतीयमिति वास्तोः—पतीयम् । जुहोति । उभयम् । एव । अकः । अपरि-

---

यथा क्षेमे निवासे प्रयाणप्रसङ्ग एव जुहोति तादृक्तत् एवं पक्षद्वयेऽपि वास्तोष्पतीयं हुतं स्यात्, ततो रुद्रः क्रुद्धचेत् ॥

[9]अथ समाधत्ते—दक्षिण इत्यादि ॥ दक्षिणो गौर्युक्तो भवति, सव्यस्त्वयुक्तः, तथाऽस्मिन्नवसरे वास्तोष्पतीयं जुहोति उभयमप्यकः करोति वास्तुनि होतव्यं, प्रयास्यता होतव्यमिति तदुभयमनुष्ठितं भवति । एकस्य योगे प्रयाणस्य प्रस्तुतत्वात्, एकस्य चायोगेन प्रयाणस्याप्रस्तुतत्वात् एकस्य व्यवायोपगमात् । ततश्चैनमपरिवर्गं किंचिदप्यपरिवर्ग्यं सर्वात्मना शमयति । वृजेश्छान्दसो घञ्, तेन बहुव्रीहिः । करोतेश्छान्दसो लुङ्, 'मन्त्रे घस' इत्यादिना च्लेर्लुक् ॥

रिवर्गमेवैनꣳ शमयति यदेकया जुहुयाद्दर्विहोमं कुर्यात्पुरोनुवाक्यामनूच्य याज्यया जुहोति सदेवत्वाय यद्धुत आदध्याद्रुद्रं गृहानन्वारोहयेद्यदवक्षाणान्यसंप्रक्षाप्य प्रयायाद्यथा

वर्गमित्यपरि–वर्गम् । एव । एनम् । शमयति । [10]यत् । एकया । जुहुयात् । दर्विहोममिति दर्वि–होमम् । कुर्यात् । पुरोनुवाक्यामिति पुरः–अनुवाक्याम् । अनूच्येत्यनु–उच्य । याज्यया । जुहोति । सदेवत्वायेति सदेव–त्वाय । [11]यत् । हुते । आदध्यादित्या–दध्यात् । रुद्रम् । गृहान् । अन्वारोहयेदित्यनु–आरोहयेत् । यत् । अवक्षाणानीत्यव–क्षाणानि । असंप्रक्षाप्येत्यसं–प्रक्षाप्य । प्रयायादिति प्र–यायात् । यथा । यज्ञवेशसमिति यज्ञ–वेशसम् ।

---

[10]वषट्कारान्तानामभावाद्दर्विहोमः स्यात् । तस्मात्पुरोनुवाक्यामनूच्य अनुद्रुत्य द्वितीयया याज्यया जुहोति सदेवत्वाय देवसंमितत्वाय देवयोग्यत्वायेत्यर्थः । दर्विहोमप्रियतमत्वाद्देवानाम् ॥

[11]यद्धुत इत्यादि ॥ हुतहोमे भाण्डादि शकट आदध्यात् आरोपयेत् तदा गृहानश्मादीन्यनुरुद्रमप्यारोपयेत् । स हि हुते

यज्ञवेशसं वाऽऽदहनं वा तादृगेव तद्यं ते योनिर् ऋत्विय इत्यरण्योस्समारोहयति ॥ ३९ ॥ एष वा अग्नेर्योनिस्स्व एवैनं योनौ समारोहयत्यथो खल्वाहुर्यदरण्योस्समारूढो वा । आदहनमित्या—दहनम् । वा । तादृक् । एव । तत् । अयम् । ते । योनिः । ऋत्वियः । इति । अरण्योः । समारोहयतीति सं—आरोहयति ॥३९॥ एषः । वै । अग्नेः । योनिः । स्वे । एव । एनम् । योनौ । समारोहयतीति सं—आरोहयति । [12]अथो इति । खलु । आहुः । यत् । अरण्योः । समारूढ

होमे वास्तुं जहाति । तस्मादहुते यानेषु भाण्डान्यारोपयितव्यानीति भावः । यदवक्षाणानीत्यादि । यद्यवक्षाणानि ज्वलितकाष्ठसंहतीः असंप्रक्षाप्य समारोपितानि न कृत्वा अनिर्वापिताग्निरेव स्थापयित्वा प्रयायात् । क्षै जै षै क्षये, णौ पुगागमः । यथायज्ञवेशसं यज्ञविध्वंसनं वा आदहनं सर्वतो दहनं वा क्रियते तत्तुल्यं तादृशं व्यसनं अनारोपितोग्निरुत्पादयेदित्यर्थः । तस्मात् 'अयं ते योनिर् ऋत्वियः'* इत्यनया ऋचा अरण्योरग्निं समारोहयति । एष वा इत्यादि । गतम् ॥

[12]अथो खल्वाहुरिति ॥ यदरण्योः समारूढोग्निः अरण्यो-

---

*सं. १-५-५.[6]

द्वो नश्येदुदस्याग्निस्सीदेत्पुनराधेयं-
स्यादिति या ते अग्ने यज्ञिया तनू-
स्तयेह्या रोहेत्यात्मन्त्समारोहयते
यजमानो वा अग्नेर्योनिस्स्वायामे-
वैनं योन्या समारोहयते ॥ ४० ॥

इति सं-आरूढः । नश्येत् । उदिति । अस्य । अग्निः । सीदेत् । पुनराधेय इति पुनः-आधेयः । स्यात् । इति । या । ते । अग्ने । यज्ञिया । तनूः । तया । एति । इहि । एति । रोह । इति । आत्मन् । समारोहयत इति सं-आरोहयते । यजमानः । वै । अग्नेः । योनिः । स्वायाम् । एव । एनम् । योन्याम् । समारोहयत इति सं-आरोहयते ॥ ४० ॥

धत्तेऽर्वाचीनस्स्याथ्समारोहयति
पञ्चचत्वारिश्च ॥ १० ॥

र्व्यासचादिना* नश्येत् अस्याग्निरुत्सीदेत् गत एव स्यात्, ततः पुनराधेयस्स्यात् इत्यरण्योस्समारोपणे दोषमाहुः । तस्मात् 'या ते अग्ने यज्ञिया तनूः'† इत्यादिमन्त्रेण आत्मनि समारोहयते । यजमानो वा इत्यादि । गतम् ॥

इति तृतीये चतुर्थे दशमोनुवाकः.

---

*ण्योष्ठ्यासचा. †ब्रा. २-५-८.

त्वमग्ने बृहद्वयो दधासि देव दाशुषे।
कविर्गृहपतिर्युवा। हव्यवाडग्निरजरः
पिता नो विभुर्विभावा सुदृशीको

[1]त्वम् । अग्ने । बृहत् । वयः । दधासि । देव । दाशुषे । कविः । गृहपतिरिति गृह–पतिः । युवा । [2]हव्यवाडिति हव्य–वाट् । अग्निः । अजरः । पिता । नः । विभुरिति वि–भुः । विभावेति वि–भावा । सुदृशीक इति सु–दृशीकः । अस्मे इति ।

---

[1]सन्ति देवसुवां हवींष्यष्टौ 'अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपेत्कृष्णानां व्रीहीणाम्,* इत्यादौ विहितानि, 'देवसुवांसि एतानि हवींषि भवन्ति'† इति च तेषां याज्यानुवाक्याः। तस्याग्नेयस्य पुरोनुवाक्या—त्वमग्ने इति गायत्री हे अग्ने देव त्वं बृहत् महत् वयः अन्नं दधासि धारयसि दाशुषे हविर्दत्तवते यजमानाय दातुं दधासि । कविः क्रान्तदर्शनः गृहपतिः गृहस्य पाता युवा हविषां देवैर्मिश्रयिता, नित्यतरुणो वा। 'दाश्वान्' इति निपातितः ॥

[2]तत्रैव याज्या—हव्यवाडिति त्रिष्टुप् ॥ हव्यवाट् हविषां वोढा अग्निः अङ्गनादिगुणयुक्तः अजरो जरारहितः । 'नञो जरमर' इत्युदात्तत्वम् । पिता पालयिता नः अस्माकं विभुः भुवनस्य व्यापी विभावा विशेषेण भानशीलः । भातेर्वनिप्।

---

*सं १-८-१०.[1] †ब्रा १-७-४.

अस्मे। सुगार्हपत्यास्समिषो दिदी-
ह्यस्मद्रियक्सं मिमीहि श्रवाꣳसि।
त्वं च सोम नो वशो जीवातुं न

सुगार्हपत्या इति सु–गार्हपत्याः। समिति। इ-
षः। दिदीहि। अस्मद्रियगित्यस्म–द्रियक्। समि-
ति। मिमीहि। श्रवाꣳसि। [3]त्वम्। च। सोम।
नः। वशः। जीवातुम्। न। मरामहे। प्रिय-

सुदृशीकः सुखदर्शनः। दृशीकादयो निपात्यन्ते, 'ऋत्वादयश्च' इत्युत्तरपदाद्युदात्तत्वम्। ईदृशस्त्वं अस्मै अस्माकम्। 'सुपां सुलुक्' इति शे आदेशः। सुगार्हपत्याः शोभनगृहपतित्वहेतुभूताः इषः अन्नानि संदिदीहि एकीकृत्य दीपय देहीत्यर्थः। दिदेतिः दीप्तिकर्मा छान्दसः, ददातेर्वा रूपं छान्दसविकारः। किं च—अस्मद्रियक् अस्मदाभिमुख्येनागतिमत्। 'विष्वग्देवयोश्च' इत्यद्रयादेशः। श्रवांसि यशांसि अन्नानि वा संमिमीहि सम्यङ्निष्पादय। माङ् माने, जौहोत्यादिकः, व्यत्ययेन परस्मैपदम्॥

[3]अथ 'सोमाय वनस्पतये श्यामाकं चरुम्'* इत्यस्य सौम्यस्य पुरोनुवाक्या—त्वं चेति गायत्री॥ त्वमपि महानुभावः सोम नः वशः कामयसे रक्ष्यत्वेन। वष्टेर्लोटच्याडागमः। 'निपातैर्यद्यदिहन्त' इति निघाताभावः। यद्वा—चशब्दोवधारणे। हे सोम नोस्माकं त्वमेव वशः कान्तः इष्टतमः। किमर्थम्? जीवातुं

*सं. १-८-१०.[1]

मरामहे। प्रियस्तोत्रो वनस्पतिः ।
ब्रह्मा देवानां पदवीः कवीनामृषि-
र्विप्राणां महिषो मृगाणाम्। श्येनो
गृध्राणाꣳ स्वधितिर्वनानाꣳ सोमः

स्तोत्र इति प्रिय-स्तोत्रः । वनस्पतिः । ब्रह्मा । देवानाम् । पदवीरिति पद-वीः । कवीनाम् । ऋषिः । विप्राणाम् । महिषः । मृगाणाम् । श्येनः । गृध्राणाम् । स्वधितिरिति स्व-धितिः । वनानाम् ।

जीवनाय । व्यत्ययेन चतुर्थ्यर्थे द्वितीया । तुमुनि वा आडागमश्छान्दसः, तस्योदात्तत्वं च । अतः त्वत्प्रसादात् न मरामहे न म्रियामहे । व्यत्ययेन शप् । पुनश्च सोमो विशेष्यते—प्रियस्तोत्रः । गतम् । वनस्पतिः वनानां पाता । 'सोमो वा ओषधीनां राजा'* इति । वनस्थानां वा पाता 'सोमो वनस्पतीनाम्'† इति । पारस्करादित्वात्सुट्, 'उभे वनस्पत्यादिषु युगपत्' इति पूर्वयोर्युगपत्प्रकृतिस्वरत्वम् ॥

[4]तत्रैव याज्या—देवानां मध्ये ब्रह्मा सोमः ब्रह्मात्मना वर्तते । यद्वा—देवानां यथा ब्रह्मा श्रेष्ठो भवति, एवं सोमः पवित्राणां श्रेष्ठ इति । पदवीः पदव्यः यज्ञाः अभेदेन तद्विद उच्यन्ते । कवीनां क्रान्तदर्शनानां मध्ये यज्ञविदः श्रेष्ठाः । व्यत्ययेन वा बहुवचनम् । हल्ङ्यादिलोपाभावो वा । यज्ञश्रेष्ठ इति । यद्वा—वेतेर्गतिकर्मणो बुद्ध्यर्थात्क्विप् । पदानां पद्यमानानां यज्ञानामेव वेदितोच्यते, अनवधारणादनवग्रहः । ऋषिः

---

*सं. ६-१-९. †सं. १-८-१०[2]. *47

॥ ४१ ॥ पवित्रमत्येति रेभन् । आ विश्वदेवꣳ सत्पतिꣳ सूक्तैरद्या वृणीमहे । सत्यसवꣳ सवितारम् । आ सोमः ॥ ४१ ॥ पवित्रम् । अतीति । एति । रेभन् । [5]एति । विश्वदेवमिति विश्व–देवम् । सत्पतिमिति सत्–पतिम् । सूक्तैरिति सु–उक्तैः । अद्य । वृणीमहे । सत्यसवमिति सत्य–सवम् । सवितारम् । [6]एति । सत्येन । रजसा । वर्तमानः । निवेशय-

द्रष्टा विप्राणां श्रेष्ठः, महाबलत्वात् । श्येनः शंसनीयो गच्छतीति गृध्राणां श्रेष्ठः । स्वधितिः अग्निः विनाशनसामर्थ्यात्तात्च्छब्दचम् । आत्मनि धीयते इति । वनानां वननीयानां अग्निः श्रेष्ठः । महावृक्षः कश्चिदित्येके । एवं सोमः पवित्राणां मध्ये पवित्रमत्येति ब्रह्मादिकम् । यद्वा—यन्नाम किंचित् पवित्रं तत् सर्वमत्येति रेभन् स्तूयमानः । रेभृ शब्दे, व्यत्ययेन कर्तृप्रत्ययः ॥

[5] सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालमाशूनां व्रीहीणाम्'* इत्यस्य सावित्रस्य पुरोनुवाक्या—आ विश्वदेवमिति गायत्री ॥ विश्वदेवं विश्वेऽपि देवा दीव्यन्तेऽस्मिन्निति विश्वदेवस्सविता । 'विश्वं संज्ञायाम्' इति विश्वशब्दस्याद्युदात्तत्वम् । सत्पतिं सतां विदुषां पातारम् । 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरत्वम् । सूक्तैस्सम्यगुक्तैः स्तोत्रैः अद्यास्मिन् यज्ञे वृणीमहे सत्यसवं सत्यानुज्ञं सवितारं देवम् ॥

[6] तत्रैव याज्या—आ सत्येनेति त्रिष्टुप् ॥ सत्येन नित्येन

* सं. १-८-१०,[1]

सत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च । हिरण्ययेन सविता रथेना देवो याति भुवना विपश्यन्नं । यथा नो अदितिः करत्पश्वे नृभ्यो

न्निति नि–वेशयन्नं । अमृतम् । मर्त्यम् । च । हि । रण्ययेन । सविता । रथेन । एति । देवः । याति-भुवना । विपश्यन्निति वि–पश्यन्नं । [7]यथा । नः । अदितिः । करत् । पश्वे । नृभ्य इति नृ–भ्यः ।

रजसा लोकेन ज्योतिर्मयेन मण्डलात्मना आवर्तमानः उदयमस्तमयं चानुपूर्व्येण कुर्वाणः निवेशयन् स्थापयन् जीवयन् अमृतं देवादिलक्षणं मर्त्यं मनुष्यादिलक्षणं च । 'नञो जरमर' इत्युत्तरपदाद्युदात्तत्वम् । हिरण्ययेन हिरण्मयेन रथेन । 'ऋत्व्यवास्त्व' इति निपात्यते । हिरण्यया हिरण्ययानी[नने]त्येके । सविता देवः । एवं भुवना भुवनानि भूतजातानि विपश्यन् विविधं पश्यन् हितेन योजयन् आयाति आगच्छतु ॥

[7] 'रुद्राय पशुपतये गावीधुकं चरुम्'* इत्यस्य रौद्रस्य पुरोनुवाक्या—यथा न इति गायत्री ॥ अदितिः अखण्डनीयो रुद्रः' कर्मणि क्तिन् । स देवः यथा नोस्माकं पश्वे पशुभ्यः । जातावेकवचनम्, 'जसादिषु वा वचनम्' इति गुणाभावः । यथा वा नृभ्यः मनुष्येभ्यः यथा गवे गोभ्यः । पूर्ववदेकवचनम् । उभयत्रापि 'सावेकाचः' इति प्राप्तं विभक्त्युदात्तत्वं 'न गोश्वन्

---

*सं. १-८-१०[1].

यथा गवे। यथा तोकाय रुद्रियम्।
मा नस्तोके तनये मा न आयुषि
मा नो गोषु मा ॥ ४२ ॥ नो अ-
श्वेषु रीरिषः। वीरान्मा नो रुद्र भा-

यथा। गवे। यथा। तोकाय। रुद्रियम्। [8]मा।
नः। तोके। तनये। मा। नः। आयुषि। मा।
नः। गोषु। मा ॥ ४२ ॥ नः। अश्वेषु। रीरिषः।
वीरान्। मा। नः। रुद्र। भामितः। वधीः।

इत्यादिना निषिद्ध्यते। यथा च तोकाय अस्मदीयाय बालापत्यादिकाय रुद्रियं रुद्रस्य पशुपतेः यत्कृत्यं सशिवया तन्वा यत्करोति तद्रुद्रियं पशूनां रक्षणं करत् करोति। यथा पश्वादिभ्यो यद्देवः करोति तथा तमनेन हविषाऽऽराधयाम इति शेषः। रुद्रशब्दादिदमर्थे घः, अर्हार्थे वा यद्रुद्रस्यार्हमिति। करोतेश्छान्दसो लुङ्, 'कृ मृ दृ रुहिभ्यः' इति अङ्, 'ऋदृशोङि गुणः'॥

[8]तत्रैव याज्या—मा न इति जगती॥ हे रुद्र भामितः क्रुद्धस्त्वं नोस्माकं तोकादीन् मा रीरिषः मा हिंसीः तोकादिविषये हिंसां मा कृधाः। सर्वत्र जातावेकवचनम्। तोकेष्वपत्येषु तनयेषु तदपत्येषु नप्त्रादिषु आयुषि जीविते गोषु अश्वेषु च। किञ्च—वीरान् विक्रान्तान् नोस्मदीयान् क्रोधेन मा वधीः।

मितो वधीर् हविष्मन्तो नमसा वि-
धेम ते। उद्प्रुतो न वयो रक्षमाणा
वावदतो अभ्रियस्येव घोषाः। गिरि-
भ्रजो नोर्मयो मदन्तो बृहस्पतिम्-

हविष्मन्तः । नमसा । विधेम । ते । [9]उद्प्रुत इत्युद्–प्रुतः । न । वयः । रक्षमाणाः । वावदतः । अभ्रियस्य । इव । घोषाः । गिरिभ्रज इति गिरि–भ्रजः । न । ऊर्मयः । मदन्तः । बृहस्पतिम् । अ-

---

यथा वयं हविष्मन्तोनेन गावीधुकेन चरुणा तद्वन्तः नमसा नमस्कारेण ते त्वां विधेम परिचरेम तदर्थं मा रीरिषः इति। पूर्ववत्कर्मणि षष्ठी ॥

[9] 'बृहस्पतये वाचस्पतये नैवारं चरुं'* इत्यस्य पुरोनुवाक्या—उदप्रुत इति त्रिष्टुप् ॥ उदप्रुतः उदकस्य प्रापयितारः प्रवोढारः प्रवर्तयितारो वा मेघा उच्यन्ते । प्लुङ् प्लुङ् प्लुङ् गतौ, उदभावश्छान्दसः । उदप्लुतो न उदप्लुत इव वयोन्नं रक्षमाणाः वृष्टिद्वारेण रक्षन्तः । व्यत्ययेनात्मनेपदम् । वावदतः अभ्रियस्य घोषा इव विश्वं जगद्वादयन्तः । वदेर्यङ्लुगन्ताच्छतरि 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् । गिरिभ्रजो न गिरिभ्रज इव गिरिपृष्ठगामिनः । भ्रजतिर्गतिकर्मा, भ्राजतेर्वा ह्रस्वत्वम् । ऊर्मयः उदकसंघाता इव मदन्तः मादयन्तस्तर्पयन्तः

*सं. १-८-१०.]

**भ्यर्का अनावन् । हꣳसैरिव सखि-
भिर्वावदद्भिरश्मन्मयानि नहना व्य-
स्यन् । बृहस्पतिरभिकनिक्रदद्गा**

**भीति । अर्काः । अनावन् । [10]हꣳसैः । इव । सखि-
भिरिति सखि–भिः । वावदद्भिरिति वावदत्–भिः ।
अश्मन्मयानीत्यश्मन्–मयानि । नहना । व्यस्य-
न्निति वि–अस्यन् । बृहस्पतिः । अभिकनिक्रददि-
त्यभि–कनिक्रदत् । गाः । उत । प्रेति । अस्तौत् ।**

प्रजाः । स्वरितत्वाच्चौरादिकस्य णिलुक् । ईदृशार्काः अर्चनादि-साधनभूताः स्तुतयः । अर्चतेः करणे घञ्, 'चजोः कुघिण्य-तोः' इति कुत्वम् । यद्वा—अर्क स्तुतौ । बृहस्पतिमभ्यनावन् बृहस्पतिमभिष्टुवन्ति, तस्माद्वयमपि तं महानुभावं यजामहे इति । नौतेश्छान्दसो लुङ्, व्यत्ययेन शप्, धातोश्च वृद्धिः । बृह-स्पतेस्सुट्ट्वावुक्तौ ॥

[10]तत्रैव याज्या—हꣳसैरिति त्रिष्टुप् ॥ हꣳसैः हननशीलैः ज्ञा-नशीलैः शुद्धात्मभिः तैरिव सखिभिः समानख्यानैः ऋत्विग्भिः यावदर्थं वदद्भिः अश्मन्मयानि व्याप्तिमदुदकवन्ति । अयस्म-यादित्वेनाश्मन्नलोपाभावः नहना नहनानि बन्धनानि मेघान् व्यस्यन् विविधं क्षिपन् प्रेरयन् बृहस्पतिः अभिकनिक्रदत् अभि-तस्स्तनयन् । दाधर्त्यादौ निपात्यते, शतर्यनुनासिकलोपः, 'अभ्य-

उत प्रास्तौदुच्च विद्वाꣳ अगायत् ।
एन्द्र सानसिꣳ रयिम् ॥ ४३ ॥
सजित्वानꣳ सदासहम् । वरीषि-

उदिति । च । विद्वान् । अगायत् । [11]एति । इन्द्र ।
सानसिम् । रयिम् ॥ ४३ ॥ सजित्वानमिति स-
जित्वानम् । सदासहमिति सदा-सहम् । वरीषिम् ।

स्तानामादिः' इत्याद्युदात्तत्वम् । गाः अपः । उतशब्दश्चार्थे । प्रास्तौत् उच्च मेघसन्निधानादिना वृष्ट्याभिमुख्यवतीः कृतवान् उदगायच्च, उदक्षिपच्च अवर्षच्चेत्यर्थः । विद्वान् वर्षणोपायज्ञः । विद्वानेव प्रस्तोता उदगायदिति भावः । 'दीर्घादटि समानपादे' इति रुत्वम् ॥

[11]'इन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालं महाव्रीहीणाम्'* इत्यस्य पुरोनुवाक्या—एन्द्रेति गायत्री ॥ हे इन्द्र सानसिं संभजनीयम् । सनोतेरसिप्रत्ययः, वृद्धिश्च निपात्यते । रयिं धनं सजित्वानं सर्वानरीन् जेतुं शीलं यस्य । 'अन्येभ्योपि दृश्यते' इति जयतेः क्वनिप् । यद्वा—जेतृभिस्सहितम् । 'परादिश्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । सदासहं सर्वकालमरीणामभिभवितारं वर्षिष्ठं वृद्धतरं अतिप्रभूतं ईदृशं रयिमस्मभ्यं आभर । 'बृह्महोः' इति भः । ऊतये रक्षणाय तर्पणाय वा । 'ऊतियूति' इत्यादिना क्तिन उदात्तत्वं निपात्यते ॥

---

*सं. १-८-१०,[1]

मूतयें भर। प्र ससाहिषे पुरुहूत शत्रूञ्ज्येष्ठस्ते शुष्म इह रातिरस्तु। इन्द्रा भर दक्षिणेना वसूनि पतिस्सिन्धूनामसि रेवतीनाम् । त्वꣳ ऊतयें। भर। [12]प्रति। ससाहिषे। पुरुहूतेति पुरु-हूत। शत्रून्। ज्येष्ठः। ते। शुष्मः। इह। रातिः। अस्तु। इन्द्र। एति। भर। दक्षिणेन। वसूनि। पतिः। सिन्धूनाम्। असि। रेवतीनाम्। [13]त्वम्। सुतस्य। पीतये। सद्यः। वृद्धः। अजा-

[12]तत्रैव याज्या—प्र ससाहिषे इति त्रिष्टुप् ॥ हे इन्द्र पुरुहूत बहुभिराहूत शत्रून् प्रससाहिषे प्रकर्षेणाभिभवसि । छान्दसे लिटि 'तुजादीनाम्' इत्यभ्यासस्य दीर्घत्वम् । यद्वा—अभ्यासयोर्विपर्ययः । कस्मादेवमुच्यत इति चेत् ज्येष्ठः श्रेष्ठः प्रभूततमो वा ते तव शुष्मः बलम् । अत एव इहास्मिन् कर्मणि रातिः दानं हविषः तवैवास्तु त्वामेव यजामहे । 'मन्त्रे वृष' इति क्विन उदात्तत्वम् । त्वं चास्मभ्यं दक्षिणेन हस्तेन वसूनि धनानि उदकादीनि आभर आहर । पूर्ववद्भत्वम्, 'अन्येषामपि दृश्यते' इति दक्षिणेत्यस्य दीर्घत्वम् । यस्मात्सिन्धूनां अपां रेवतीनां साधनभूतानां पतिः पाता त्वमसि । 'रयेर्मतुब्बहुलम्' इति संप्रसारणत्वम् । यस्मात्पतिरसि, तस्मात्त्वमेव देहीत्युच्यते; बलवत्त्वाच्च तव दातुं नास्ति प्रतिबन्ध इति ॥

[13]अथैन्द्रे याज्यानुवाक्ये विकल्प्येते । तत्र पुरोनुवाक्या—

सुतस्य पीतये सद्यो वृद्धो अजायथाः।
इन्द्र ज्यैष्ठ्याय सुक्रतो । भुवस्त्व-
मिन्द्र ब्रह्मणा महान्भुवो विश्वेषु स-
वनेषु यज्ञियः । भुवो नृँश्च्यौत्नो

यथाः । इन्द्र । ज्यैष्ठ्याय । सुक्रतो इति सु–क्रतो।
[14]भुवः । त्वम् । इन्द्र । ब्रह्मणा । महान् । भुवः ।
विश्वेषु । सवनेषु । यज्ञियः । भुवः । नृन् । च्यौ-

त्वं सुतस्येति गायत्री ॥ हे इन्द्र त्वं सुतस्याभिषुतस्य सोमस्य पीतये सद्यो वृद्धो अजायथाः सर्वेषां ज्येष्ठभावाय [वः] तव भवति । हे सुक्रतो सुकर्मन् । तस्मात्सर्वज्येष्ठं त्वामेव यजामहे इति ॥

[14]अथ याज्या—भुव इति गायत्री ॥ हे इन्द्र त्वं कर्म, ब्रह्मणा परिबृढेन श्रोत्रेण वा महान् भुवः असि सर्वैस्तूयमनो वर्धसे इत्यर्थः स्तूयमानानि तेजांसि वर्धन्ते । भवतेर्लेटि शपो लुक्, लेटोडागमः, 'भूसुवोस्तिङि' इति गुणाभावः पादादित्वान्न निहन्यते । भवसि च विश्वेषु सवनेषु यज्ञेषु यज्ञियः यागार्हः । 'यज्ञर्त्विग्भ्याम्' इति घः । विश्वस्मिन् भरे संग्रामे नॄन् नृणां शत्रूणां च्यौत्नः च्यावयिता विनाशयिता । च्यवतेरौणादिकोत्नप्रत्ययः, वृद्धिश्चातोः । नृशब्दात् 'कर्तृकर्मणोः' इति षष्ठी व्यत्ययेन न प्रवर्तते । हे विश्वचर्षणे सर्वमनुष्यवद्वेऽपि मनुष्यास्त्वयि भवन्ति सत्त्वेन । यद्वा—विश्वस्य द्रष्टः, मन्त्रः मन्द्रः

विश्वस्मिन्भरे ज्येष्ठश्च मन्त्रः ॥४४॥
विश्वचर्षणे । मित्रस्य चर्षणी-
धृतश्रवो देवस्य सानसिम् । सत्यं
चित्रश्रवस्तमम् । मित्रो जनान्

तः । विश्वस्मिन् । भरे । ज्येष्ठः । च । मन्त्रः ॥४४॥
विश्वचर्षण इति विश्व–चर्षणे । [15]मित्रस्य ।
चर्षणीधृत इति चर्षणि–धृतः । श्रवः । देवस्य ।
सानसिम् । सत्यम् । चित्रश्रवस्तममिति चित्रश्र-
वः–तमम् । [16]मित्रः । जनान् । यातयति । प्रजा-

मननीयः स्तुतो वा । तस्मात्त्वमसि ज्येष्ठो भवसि च सर्वेषाम् । चशब्देन भुव इत्यनुकृष्यते ॥

[15] मित्राय सत्यायाम्बानां चरुम्'* इत्यस्य मैत्रस्य पुरोनुवाक्या—मित्रस्येति गायत्री ॥ मित्रस्य देवस्य मित्रणादिकृतः चर्षणीधृतः मनुष्याणां धारयितुः श्रवः अन्नं यशो वा सानसिं सननीयं सर्वेषां, देयं वा सर्वेभ्यः। व्यत्ययेन 'स्वमोर्नपुंसकात्' इति लुक् ङि प्रवर्तते । सत्यमविनश्वरं चित्रश्रवस्तमं अतिशयेन चित्रं चायनीयं श्रवणमस्येति चायनीयः । यशस्तमं वा । तस्मात्त्वामेव यजामहे इति ॥

[16] तत्रैव याज्या—मित्र इति त्रिष्टुप् ॥ मित्रो देवः जनान् सर्वान् यातयति चेष्टयति प्रजानन् तत्तदधिकारानुरूपविधानज्ञः

*सं. १-८-१०,१

यातयति प्रजानन्मित्रो दाधार पृथिवीमुत द्याम् । मित्रः कृष्टीरनिमिषाऽभि चष्टे सत्याय हव्यं घृतवद्विधेम । प्र स मित्र मर्तो अस्तु

नन्नितिं प्र-जानन्न् । मित्रः । दाधार । पृथिवीम् । उत । द्याम् । मित्रः । कृष्टीः । अनिमिषेत्यनि-मिषा । अभीति । चष्टे । सत्याय । हव्यम् । घृतवदितिं घृत-वत् । विधेम । [17]प्रेति । सः । मित्र ।

मित्र एव पृथिवीमपि द्यामपि दाधार धारयितुं प्रभवति । ध्रियतेः छन्दसि लिटि तुजादित्वादभ्यासस्य दीर्घत्वम् । मित्र एव कृष्टीः मनुष्यान् विशेषेण अनिमिषा अनिमिषेणादरेणाभिचष्टे आभिमुख्येन पश्यति उपकरोतीत्यर्थः । दर्शनमुपकारः, तथाहि—'वक्तारो भवन्ति, सुपश्यति' इति । मिषतेर्भावे क्विप् । यद्वा—अनिमिषाः देवाः । इगुपधलक्षणः कः, 'सुपां सुलुक्' इति शस आकारः । मनुष्यान् देवांश्च विशेषेण पश्यतीति । तस्मात्तस्मै सत्यायामोघफलाय देवाय हव्यं चरुलक्षणं घृतवत् घृतसंयुक्तं विधेम कुर्मः ददाम इत्यर्थः । विदधातिर्दानकर्मा, विध विधाने, तौदादिकः ॥

[17]अथ तत्रैव याज्या विकल्प्यते—प्र स मित्रेति त्रिष्टुप् । 'प्रयस्वान्' इति प्रथमपादान्तः, 'त्वोतः' इति तृतीयपादान्तः ॥ हे मित्र स मर्तः मनुष्यः प्रयस्वान् अन्नवान् प्रास्तु प्रकर्षेण

प्रयस्वान् यस्त आदित्य शिक्षति
व्रतेन । न हन्यते न जीयते त्वोतो
नैनमꣳहो अश्नोत्यन्तितो न दूरात् ।

मतीः । अस्तु । प्रयस्वान् । यः । ते । आदित्य । शिक्षति । व्रतेन । न । हन्यते । न । जीयते । त्वोतः । न । एनम् । अꣳहः । अश्नोति । अन्ति-

---

भवतु । क इत्याह—हे आदित्य अदितेः पुत्र यस्तव प्रीतेन कर्मणा यागादिना शिक्षति शक्तो भवितुमिच्छति अविघ्नेनान्वतिष्ठदित्यर्थः । शकेः 'सनि मीमा' इत्यादिना इस् । यद्वा—शिक्ष विद्योपादाने । व्रतेनेति, व्यत्ययेन द्वितीयाबहुवचनस्य स्थाने तृतीयैकवचनम् । व्रतानि शिक्षति पुनःपुनरभ्यस्यतीति । कस्मादेवमुच्यते इत्यत आह—न हन्यते न पीड्यते शत्रुभिः, व्याध्यादिभिश्च । न जीयते नाभिभूयते दारिद्र्यादिभिः । कः? त्वोतः त्वया ऊतो रक्षितः । पूषोदरादित्वादिष्टस्वररूपसिद्धिः, 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् । किं च—नैनं त्वया रक्षितं अंहः पापं अश्नोति अन्तितः अन्तिके समीपे सन्तं न दूरात् सन्तम् । 'दूरान्तिकार्थैभ्यो द्वितीया च' इति पञ्चमी, 'कादिलोपो बहुलम्' इत्यन्तिकस्य लोपः, । अतस्त्वामेव परिचरेमेति ॥

यत् ॥ ४५ ॥ चिद्धि ते विशो यथा
प्र देव वरुण व्रतम् । मिनीमसि द्य-
विद्यवि । यत्किं चेदं वरुण दैव्ये

तः । न । दूरात् । [18]यत् ॥ ४५ ॥ चित् । हि । ते ।
विशः । यथा । प्रेति । देव । वरुण । व्रतम् । मि-
नीमसि । द्यविद्यवीति द्यवि–द्यवि । [19]यत् । किम् ।

---

[18]'वरुणाय धर्मपतये यवमयं चरुम्'* इत्यस्य पुरोनुवाक्या—यच्चिदिति गायत्री ॥ हे देव वरुण यत्किंचित्ते त्वयि यद्व्रतं यागादिकं कर्म वयं विशः मनुष्यमात्रभूताः द्यविद्यवि दिनेदिने प्रमिनीमसि प्रतर्कयामः अविच्छेदेनानुष्ठातुमिच्छामः तत्तथा करोषि त्वमेव तस्मात् त्वामेव परिचरेमेति । मीञ् हिंसायां, क्र्यादिकः प्वादित्वाद्ध्रस्वत्वम्, 'इदन्तो मसि' प्रपूर्वोयं हिंसाभावे वर्तते । यथा प्रस्मरतीति स्मृत्यभावे, प्रतिष्ठतीति स्थित्यभावे, एवमिहापि द्रष्टव्यम् । यद्वा—यद्व्रतं प्रमिनीमः हिंसितवन्तः विशो यथा यथाजाता मनुष्याः उपतापादापूरयेमेति शेषः ॥

[19]तत्रैव याज्या—यत्किं चेदमिति जगती—हे वरुण देव दैव्ये देवप्रभवे जने । 'देवाद्यञौ' इति यञ् । तद्विषये किंचित् स्वल्पमपि वा अभिद्रोहं अभितो द्रोहं मनुष्या वयं मनुष्यस्वभावात्संभाव्यमानप्रमादाः यदिदं चरामसि चरामः 'इद-

*सं. १-८-१०[1].

जनेऽभिद्रोहं मनुष्याश्चरामसि । अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः । कितव

च । इदम् । वरुण । दैव्ये । जने । अभिद्रोहमित्यभि-द्रोहम् । मनुष्याः । चरामसि । अचित्ती । यत् । तव । धर्मा । युयोपिम । मा । नः । तस्मात् । एनसः । देव । रीरिषः । [20]कितवासः ।

न्तो मसि' । इदमिति क्रियाविशेषणम् । किंच—यत्तव धर्मा धर्माणि । 'शेश्छन्दसि' इति लोपः । अचित्ती अचित्त्या अज्ञानेन । 'सुपां सुलुक्' इति पूर्वसवर्णः । युयोपिम विनाशयामः । युपु विमोहने, ण्यन्ताच्छान्दसः आर्धधातुकत्वाण्णिलोपः । तस्मादेनसः पापादभिद्रोहलक्षणाद्धर्मविलोपलक्षणाच्च हेतुभूतान्नः अस्मान्मा रीरिषः, अपि तु अनुगृह्णीव ॥

[20]तत्रैव याज्याविकल्पः—कितवास इति त्रिष्टुप् ॥ हे देव वरुण कितवासः स्वार्थसाधनतत्पराः कितवेति प्रवर्तमाना ऋत्विजः यत् येन रिरिपुः नाशितवन्तोस्मान्न दीवि न तु देवने सम्यग्व्यवसिताः प्रवर्तन्ते । दिवेरौणादिकेऽसिचि छान्दसं दीर्घत्वम् । 'ऊडिदम्' इति सप्तम्युदात्ता । यद्वा—यच्च सत्यं बुद्धिपूर्वमेव कृतं पापमश्रद्धादिना । 'घ' इति पादपूरणः, प्रसिद्धौ वा । 'ऋचि मनु' इत्यादिना संहितायां दीर्घत्वम् । उत अपि च यत् न विद्म कृतमपि न जानीमः सौकर्म्यात् । सर्वा ता सर्वाणि तानि तस्माद्दुश्चरितानि । 'शेश्छन्दसि' इति

वासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म । सर्वा ता विष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः ॥ ४६ ॥

यत् । रिरिपुः । न । दीवि । यत् । वा । घ । सत्यम् । उत । यत् । न । विद्म । सर्वा । ता । वीति । स्य । शिथिरा । इव । देव । अथ । ते । स्याम । वरुण । प्रियासः ॥ ४६ ॥

सोमो गोषु मा रयिं मन्त्रो यच्छिथिरा सप्त च ॥ ११ ॥

वि वा आ वायो इमे वै चित्तं चाग्निर्भूतानां देवा वा अभ्यातानानृताषाड्ढाष्ट्रकामाय दीक्षिका वास्पोष्पते त्वमग्ने बृहदेकादश ॥ ११ ॥

वि वा एतस्येत्याह मृत्युर्गन्धर्वो वं रुन्धे मध्यतस्त्वमग्ने बृहथ्षट्त्वारिꣳशत् ॥ ४६ ॥

वि वा एतस्य प्रियासः ॥

लोपः । विष्य विमुक्तबन्धनानि कुरु क्षमस्वेति यावत् । 'उपसर्गात्सुनोति' इत्यादिना स्येतेष्षत्वम् । शिथिरा शिथिलानीव सुमोचनानीव विमुञ्च । कपिलकादित्वाच्छत्वविकल्पः । अथानन्तरं विमुक्तैनसो वयं तव प्रियासः इष्टास्स्याम भवेम । 'आज्ञसेरसुक्', 'निपातस्य च' इति संहितायां अथशब्दस्य दीर्घत्वम् ॥

इति भट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये तृतीयकाण्डे चतुर्थप्रपाठके एकादशोनुवाकः.

समाप्तश्च प्रपाठकः.

पूर्णा पश्चादुत पूर्णा पुरस्तादुन्म-
ध्यतः पौर्णमासी जिगाय। तस्यां
देवा अधि संवसन्त उत्तमे नाक इह

[1]पूर्णा। पश्चात्। उत। पूर्णा। पुरस्तात्। उदिति। मध्यतः। पौर्णमासीति पौर्ण-मासी। जिगाय। तस्याम्। देवाः। अधीति। संवसन्त इति सं-वसन्तः। उत्तम इत्युत्-तमे। नाके।

अथ पञ्चमप्रपाठकः.

[2]दर्शपूर्णमासावारभमाणस्य द्वौ सारस्वतौ होमौ स्तः, तयोर्द्वे अनुवाक्ये द्वे याज्ये। तत्र प्रथमस्यानुवाक्या—पूर्णेति त्रिष्टुप्॥ पूर्णा पूरिता पूर्णचन्द्रसंबन्धात् पञ्चदशी तिथिः (पूर्णेति स्थितिः) पूर्णेत्युच्यते। सा पश्चात् तिथेरन्ते पूर्णा, उत अपि च पुरस्तादादौ च पूर्णा, मध्यतश्च पूर्णा। तस्यां हि तिथौ सर्वसवितृकरणामनुप्रवेशेन भासमानाशेषमण्डलश्चन्द्रो भवति। यद्यपि परमार्थतः तिथ्यन्ते सर्वात्मना चन्द्रः पूर्यते। तथाप्युपलब्ध्यभिप्रायेणैवमुक्तं, आरम्भात्प्रभृति तस्यां मण्डलं पूर्णमुपलभामहे न तिथ्यन्तरवत् न्यूनमुपलभ्यते। 'वा दान्तशान्त' इति ण्यन्तस्य पूर्णेति निपात्यते। एवं त्रिष्वपि कालेषु पूर्णश्चन्द्रोस्यामिति पूर्णमासी तिथिः। मसी परिमाणे, ण्यन्तात्किप्। मित्रः परिमितिहेतुः। मिमीतेर्वा असुनि माः, पूर्णश्चासौ मासश्च

मादयन्ताम् । यत्ते देवा अदधुर्भाग-
धेयममावास्ये संवसन्तो महित्वा ।

इह । मादयन्ताम् । [2]यत् । ते । देवाः । अदधुः । भागधेयमिति भाग–धेयम् । अमावास्य इत्यमा–वास्ये । संवसन्त इति सं–वसन्तः । महित्वेति महि–त्वा । सा । नः । यज्ञम् । पिपृहि । विश्व-

---

पूर्णमाः, तस्येयं पौर्णमासी पञ्चदशी । यद्वा—पूर्णो मा अस्मिन्निति पूर्णमासः पर्वान्तः कर्मविशेषो वा । अच्समासान्तः । यद्वा —करणे घञ्, मासः चन्द्रः, तत्सम्बन्धिनी पौर्णमासी । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम् । सा उज्जिगाय उज्जयत्यन्याः तिथीः । उत्कृष्टा भवतीति यावत् । छान्दसे लिटि 'सन् लिटोर्जेः' इति कुत्वम् । तस्यां तादृश्यां देवा अधिसंवसन्त एकीभूय वर्तमाना उत्तमे उद्गततमे नाके सुखैकरूपे इहास्मिन् लोके मादयन्ताम् । मद तृप्तियोगे, चौरादिकः, उत्तमशब्द उच्छादिरन्तोदात्तः ॥

[2]अथ द्वितीयस्य याज्या—यत्ते इति त्रिष्टुप् ॥ हे अमावास्ये ते तव देवाः भागधेयं इमं होमं यत् यस्मात् अदधुः दत्तवन्तः । अमा सह सूर्याचन्द्रमसावस्यां संवसत इत्यमावास्या । 'अमावस्यदन्यतरस्याम्' इति निपात्यते, पादादित्वादामन्त्रिताद्युदात्तत्वम् । देवा विशेष्यन्ते—संवसन्तः संभूयैकत्र वसन्तः महित्वा तव माहात्म्येन । यस्मात्तव भागमिमं होममदधुः, तस्मात्

सा नो यज्ञं पिपृहि विश्ववारे रयिं
नो धेहि सुभगे सुवीरम्। निवेशनी
संगमनी वसूनां विश्वा रूपाणि व-
सून्यावेशयन्ती। सहस्रपोषꣳ सुभगा

वार इति विश्व–वारे । रयिम् । नः । धेहि । सुभग इति सु–भगे । सुवीरमिति सु–वीरम् । [3]निवेशनीति नि–वेशनी । सङ्गमनीति सं–गमनी । वसूनाम् । विश्वा । रूपाणि । वसूनि । आवेशय-न्तीत्या–वेशयन्ती । सहस्रपोषमिति सहस्र–पो-

---

हे विश्ववारे विश्वकालवति विश्वैर्वा वरणीये सा तादृशी देवै-र्दत्तभागा नोस्माकमिमं यज्ञं होमात्मकं पिपृहि पूरय कामैः, पालय वा । पॄ पालनपूरणयोः, शपः श्लुः, धातोर्ह्रस्वत्वम्, अभ्यासस्य चेत्वम् । यद्वा—पृ प्रीतौ, प्रीत्या गृहाणेत्यर्थः । महित्वशब्दात्तृतीयैकवचनस्याजादेशः । किंच—हे सुभगे कल्याण-धने अनेन हविषा प्रीता त्वं नः अस्मभ्यं रयिं धनं सुवीरं कल्याणवीरयुक्तं धेहि धनं देहीति । 'वीरवीर्यौ च' इत्युत्तर-पदाद्युदात्तत्वम् ॥

[3]अथ द्वितीयस्यानुवाक्या—निवेशनीति त्रिष्टुप् ॥ निवेशनी वसूनाम्, निविशते वसूनि यस्यां तादृशी, संगमनी संगच्छ-न्ती वसून्यनया तादृशशीलया विश्वानि च रूपाणि यानि रूपवन्ति वसूनि तानि आवेशयन्ती अस्मात्प्रत्युत्कर्षन्ती सहस्रपोषं

रराणा सा न आ गन्वर्चसा ॥१॥
संविदाना । अग्नीषोमौ प्रथमौ वी-
र्येण वसून्रुद्रानादित्यानिह जिन्वत-
म् । माध्यꣳ हि पौर्णमासं जुषेथां ब्र-

षम् । सुभगेति सु–भगा । रराणा । सा । नः । एति । गन्न् । वर्चसा ॥ १ ॥ संविदानेति सं–वि-दाना । [1]अग्नीषोमावित्यग्नी–सोमौ । प्रथमौ । वीर्येण । वसून् । रुद्रान् । आदित्यान् । इह । जिन्वतम् । माध्यम् । हि । पौर्णमासमिति पौर्ण–मासम् । जुषेथाम् । ब्रह्मणा । वृद्धौ । सुकृतेनेति

सहस्रपुष्टियुक्तं यथा तथा रराण ददातु । रातेर्व्यत्ययेनात्मनेपदम्, शपः श्लुः । सुभगा शोभनधना सा तादृशी सती अमावास्या नोस्मान् आगन् आगच्छतु वर्चसा दीप्त्या उपलक्षिता संविदाना सम्यग्जानती । 'समो गमृच्छि' इत्यात्मनेपदम्, गमेश्छान्दसे लङि शपो लुक्, 'मो नो धातोः' ॥

[1]अथ प्रथमस्य याज्या—अग्नीषोमावित्यतिशक्करी पञ्चपदा ॥ हे अग्नीषोमौ युवां प्रथमौ प्रधानौ वीर्येणात्मीयेन बलेन वसून् रुद्रानादित्यान् च इहास्मिन् कर्मणि जिन्वतं प्रीणयतम् । जिवि प्रीणने, इदित्वान्नुम् । माध्यं मध्यभावं सर्वदेवसाधारणं मध्यस्थमित्यर्थः । पौर्णमासं पौर्णमास्यां भवमिदं हविः जुषेथां ततो

ब्रह्मणा वृद्धौ सुकृतेन सातावथास्म-
भ्यꣳसहवीराꣳरयिं नि यच्छतम्।
आदित्याश्चाङ्गिरसश्चाग्नीनाऽदधत ते
दर्शपूर्णमासौ प्रैप्सन्तेषामङ्गिरसां
निरुप्तꣳ हविरासीदथादित्या एतौ
होमावपश्यन्तावजुहवुस्ततो वै ते

सु-कृतेन । सातौ । अथ । अस्मभ्यमित्यस्म-
भ्यम् । सहवीरामिति सह-वीराम् । रयिम् । नी-
ति । यच्छतम् । [5]आदित्याः । च । अङ्गिरसः ।
च । अग्नीन् । एति । अदधत । ते । दर्शपूर्णमा-
साविति दर्श-पूर्णमासौ । प्रेति । ऐप्सन् । ते-
षाम् । अङ्गिरसाम् । निरुप्तमिति निः-उप्तम् ।
हविः । आसीत् । अथ । आदित्याः । एतौ । हो-
मौ । अपश्यन् । तौ । अजुहवुः । ततः । वै । ते ।

ब्रह्मणाऽनेन अन्नेन वृद्धौ सुकृतेन शोभनकर्मणा सातौ संसक्तौ। 'सूपमानात्क्तः' इति सुकृतशब्दोन्तोदात्तः । अथानन्तरमस्मभ्यं सहवीरां विक्रान्तपुरुषसहितां रयिं धनं नियच्छतं नियमेन दत्तम् ॥

[5]अथैनयोर्हैमयोर्ब्राह्मणम्—आदित्याश्चाङ्गिरसश्चाग्नीनादधत, दर्शपूर्णमासौ प्राप्तुं प्रारब्धुमैच्छन् । 'आप्ज्ञप्यृधाम्' इतीत्वम् ।

दर्श॒पूर्ण॒मा॒सौ ॥ २ ॥ पूर्व॒ आऽल॑-
भन्त दर्श॒पूर्ण॒मा॒सावा॒लभ॑मान ए॒तौ
होमौ॑ पु॒रस्ता॑ज्जुहुया॒त्सा॒क्षादे॒व दर्श॒-
पूर्ण॒मा॒सावा लभते ब्रह्मवा॒दिनो॑ व-

दर्श॒पूर्ण॒मा॒साविति॑ दर्श—पूर्ण॒मा॒सौ ॥२॥ पूर्वे॑ । ए॒ति॑ । अल॒भन्त॒ । दर्श॒पूर्ण॒मा॒साविति॑ दर्श—पूर्ण॒-
मा॒सौ । आल॑भमा॒न इत्या॑—लभमानः । ए॒तौ । होमौ॑ । पु॒रस्ता॑त् । जु॒हु॒या॒त् । सा॒क्षादिति॑ स—
अ॒क्षात् । एव । दर्श॒पूर्ण॒मा॒साविति॑ दर्श—पूर्ण॒-
मा॒सौ । ए॒ति॑ । ल॒भते॒ । [6]ब्रह्मवा॒दिन॒ इति॑ ब्रह्म—

तेषां मध्ये अङ्गिरसां निरुप्तमासीद्धविः । अहुर्वैव सारस्वतौ होमौ हविरुप्तवन्तः । दर्शपूर्णमासस्थानीयत्वादेतयोः होमयोर्दर्शपूर्णमास-शब्दौ कर्मप्रवचनौ । तत्र दृशिरयं ज्ञानमात्रे वर्तते । अथा-दृष्टार्थः 'पश्यार्थैश्चानालोचने' इत्यालोचनेन न गृह्यते, अस्ति चेति तु केवलं ज्ञायते । अधिकरणे सन्तन्यते दिनेदिने चा-प्यते तं सन्ततमुत्तरार्धमासः आत्मलाभत्वात्तदनुविधायिनोः तदपेक्षे आनुलोम्यप्रातिलोम्ये । विपर्ययलक्षणेत्येके । पूर्णमासो व्याख्यातः ॥

[6]ब्रह्मवादिन इत्यादि ॥ तुशब्दोनुलोमविदन्येभ्यो व्यावर्तयति अत्रायं यज्ञात्मनः औत्तरस्मादर्धमासात् प्रतिपत्प्रभृति सन्ततं सन्त-न्यते दिनेदिने चाप्यते तं सन्ततमुत्तरार्धमासे आगते आलभते

दन्ति स त्वै दर्शपूर्णमासावा लं-
भेत य एनयोरनुलोमं च प्रतिलोमं
च विद्यादित्यमावास्यायां ऊर्ध्वं त-
दनुलोमं पौर्णमास्यै प्रतीचीनं तत्प्र-
तिलोमं यत्पौर्णमासीं पूर्वामालभेत

वादिनः । वदन्ति । सः । तु । वै । दर्शपूर्णमा-
सावितिं दर्श–पूर्णमासौ । एतिं । लभेत । यः ।
एनयोः । अनुलोममित्यनु–लोमम् । च । प्रति-
लोममितिं प्रति–लोमम् । च । विद्यात् । इतिं ।
अमावास्यायां इत्यमा–वास्यायाः । ऊर्ध्वम् ।
तत् । अनुलोममित्यनु–लोमम् । पौर्णमास्या इतिं
पौर्ण–मास्यै । प्रतीचीनंम् । तत् । प्रतिलोममितिं
प्रति–लोमम् । यत् । पौर्णमासीमितिं पौर्ण–मा-

न विकरोति । ततस्तं कालेकाले आगते यजते तत्र मध्यात् पूर्वपर्वसन्धौ भूयिष्ठस्योत्तरार्धमासस्य तस्मिन्नह्नि यागः कर्तव्यः, अन्ययोत्तरेद्युः । एतयोश्चन्द्राधीनात्मलाभत्वात्तदनुविधायिनोः तदपेक्षे आनुलोम्यप्रातिलोम्ये । तत्रामावास्यायाः परस्तादूर्ध्वं उपर्युपर्युपचीयमानस्वस्वरूपं चन्द्रस्यावस्थानं, यज्ञस्य तु विपरीतं तत्प्रतिलोमं भवति, ततश्च यदि पौर्णमासीं पूर्वामालभेत प्रतिलोममेनावालभेत प्राप्नुयात् तदानीं हि चन्द्रोपचीयते यज्ञ उपचीयते इति प्रतिलो-

प्रतिलोममेनावा लभेतामुमपक्षीयं-
माणमन्वपर्व ॥ ३ ॥ क्षीयेत सारस्व-
तौ होमौ पुरस्तांज्जुहुयादमावास्यां

सीम् । पूर्वाम् । आलभेतेत्या—लभेत । प्रतिलो-
ममिति प्रति—लोमम् । एनौ । एति । लभेत ।
अमुम् । अपक्षीयमाणमित्यप—क्षीयमाणम् । अ-
नु । अपेति ॥ ३ ॥ क्षीयेत । सारस्वतौ । होमौ ।
पुरस्तात् । जुहुयात् । अमावास्येत्यमा—वास्या ।
वै । सरस्वती । अनुलोममित्यनु—लोमम् । एव ।

मत्वम् । ततश्चामुं चन्द्रमपक्षीयमाणमनु यज्ञोऽप्यपक्षीयेत । अमा-
वास्योपक्रमे तु नायं दोषः, तदानीं हि चन्द्रोऽप्युपचीयते यज्ञो-
पीत्यनुलोमत्वम् । 'अच्प्रत्यन्ववपूर्वात्' इत्युभयत्राच्प्रत्ययस्समासान्तः ।
तर्ह्यमावास्यैव पूर्वमारभ्यताम् । नैवं शक्यम् । यथोक्तमाचार्येण—
'अथेमौ दर्शपूर्णमासौ पौर्णमास्युपक्रमावमावास्यासंस्थावाचार्या ब्रुवते ।
तत्रोदाहरन्ति—ऊर्ध्वं मध्यरात्रात्पौर्णमास्याः चन्द्रमाः पूर्यते स एतं
चापररात्रं पूर्णो भवति सर्वं चाहरुत्तरस्याश्च रात्रेरा मध्यरा-
त्रात् । अथामावास्याया उपवसथीयेऽह्नि ऊर्ध्वं मध्याह्नरात्राच्चन्द्र-
ममसमादित्यौ रेतस एतं चापराह्णे उपरब्धो भवति सर्वां च
रात्रिमुत्तरस्य चाह्न आ मध्यन्दिनात् एवं सन्धिमभियजेतेति ।
रात्रिर्हि पौर्णमास्यां संशुद्धमाभाति अहरमावास्यायां द्वे पौर्ण-

वै सरस्वत्यनुलोममेवैनावा लभतेऽ-
मुमाप्यायमानमन्वा प्यायत आग्ना-
वैष्णवमेकादशकपालं पुरस्तान्निर्वं-
पेत्सरस्वत्यै चरुꣳ सरस्वते द्वादश-
कपालं यदाग्नेयो भवत्यग्निर्वै यज्ञ-

एनौ । एति । लभते । अमुम् । आप्यायमानमिति-
त्या—प्यायमानम् । अनु । एति । प्यायते । [7]आ-
ग्नावैष्णवमित्याग्ना—वैष्णवम् । एकादशकपालमि-
त्येकादश—कपालम् । पुरस्तात् । निरिति । वपेत् ।
सरस्वत्यै । चरुम् । सरस्वते । द्वादशकपालमिति
द्वादश—कपालम् । यत् । आग्नेयः । भवति । अ-
ग्निः । वै । यज्ञमुखमिति यज्ञ—मुखम् । यज्ञमुख-

मास्यौ द्वे अमावास्ये पूर्वा पूर्वा पौर्णमासीमुत्तरामुत्तराममावास्यां, या पूर्वा पौर्णमासी साऽनुमतिः, योत्तरा सा राका, या पूर्वाऽमावास्या सा सिनीवाली, योत्तरा सा कुहूरित्येवमुपक्रमाणि च कर्माणि शुक्लादयः चार्धमासाः' इति । एवं पौर्णमास्युपक्रमत्वे प्रातिलोम्यं प्रसक्तं तत्परिहारार्थमाह—सारस्वतावित्यादि । अमावास्या अमावास्यास्थानीया । सरस्वत्याः प्रथमयागात्पौर्णमास्युपक्रमदोषाप्रसंगः ॥

[7]आग्नावैष्णवमित्यादि ॥ साक्षादारभते इति । अन्वारम्भणी-

मुखं यज्ञमुखमेवार्धं पुरस्ताद्धत्ते य-
द्वैष्णवो भवति यज्ञो वै विष्णुर्यज्ञ-
मेवारभ्य प्र तनुते सरस्वत्यै चरुर्भ-
वति सरस्वते द्वादशकपालोमावा-
स्या वै सरस्वती पूर्णमासस्सरस्वा-
न्तावेव साक्षादा रभत ऋध्नोत्याभ्यां
द्वादशकपालस्सरस्वते भवति मिथु-

मिति यज्ञ–मुखम् । एव । ऋद्धिम् । पुरस्तात् । धत्ते । यत् । वैष्णवः । भवति । यज्ञः । वै । विष्णुः । यज्ञम् । एव । आरभ्येत्या–रभ्य । प्रेति । तनुते । सरस्वत्यै । चरुः । भवति । सरस्वते । द्वादशकपाल इति द्वादश–कपालः । अमावास्येत्यमा–वास्या । वै । सरस्वती । पूर्णमास इति पूर्ण–मासः । सरस्वान् । तौ । एव । साक्षादिति स–अक्षात् । एति । रभते । ऋध्नोति । आभ्याम् । द्वादशकपाल इति द्वादश–कपालः । सरस्वते । भवति । मिथुनत्वायेति मिथुन–त्वाय । प्रजात्या

नत्वाय प्रजात्यै मिथुनौ गावौ दक्षि-
णा समृद्ध्यै ॥ ४ ॥
ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यन्तं
वसिष्ठः प्रत्यक्षमपश्यत्सोब्रवीद्ब्राह्मणं

इति प्र–जात्यै । मिथुनौ । गावौ । दक्षिणा । स-
मृध्या इति सं–ऋध्यै ॥ ४ ॥

वर्चसा वै ते दर्शपूर्णमासावप तनुते
सरस्वत्यै पञ्चविꣳशतिश्च ॥ १ ॥

[1]ऋषयः । वै । इन्द्रम् । प्रत्यक्षमिति प्रति–अ-
क्षम् । न । अपश्यन् । तम् । वसिष्ठः । प्रत्यक्ष-
मिति प्रति–अक्षम् । अपश्यत् । सः । अब्रवीत् ।
ब्राह्मणम् । ते । वक्ष्यामि । यथा । त्वत्पुरोहिता

येयमिति त्रीण्येतानि हवींषि । मिथुनौ गावौ स्त्रीपुंसौ । गतमन्यत् ॥
इति तृतीये पञ्चमे प्रथमोनुवाकः.

---

[1]ऋषयो वा इत्यादि ॥ ब्रह्मैव ब्राह्मणम् । जातावेकवचनम् । ब्राह्मणमन्त्रांस्तव वक्ष्यामीति । यद्वा—ब्रह्मत्वसाधनं ब्राह्मणं ज्ञानं

ते वक्ष्यामि यथा त्वत्पुरोहिताः प्र-
जाः प्र जनिष्यन्तेऽथ मेतरेभ्य ऋ-
षिभ्यो मा प्र वोच इति तस्मा ए-
तान्स्तोमभागानब्रवीत्ततो वसिष्ठपु-

इति त्वत्–पुरोहिताः । प्रजा इति प्र–जाः । प्रज-
निष्यन्त इति प्र–जनिष्यन्ते । अथ । मा । इत-
रेभ्यः । ऋषिभ्य इत्यृषि–भ्यः । मा । प्रेति । वो-
चः । इति । तस्मै । एतान् । स्तोमभागानिति
स्तोम–भागान् । अब्रवीत् । ततः । वसिष्ठपुरो-

तद्वक्ष्यामि । शान्तिकादिकर्तृत्वसामान्यात् पुरोहितशब्देन ब्रह्मोच्यते । शान्तिकादिषु पुरस्तान्निधीयते स्थाप्यते इति । त्वं पुरोहितो ब्रह्म यासां तादृश्यः प्रजाः प्रजनिष्यन्ते येन तादृशं तव ब्राह्मणं ब्रह्मत्वप्रदं ज्ञानं मन्त्रजातं वा ते वक्ष्यामि । एतत्त्वमितरेभ्यः ऋषिभ्यो मा प्रवोचः इति वसिष्ठमब्रवीदिन्द्रः । उक्त्वा च तस्मै वसिष्ठाय एतान् स्तोमभागान् 'रश्मिरसि'* इत्यादीन् अब्रवीत् । ततो वसिष्ठपुरोहिताः वासिष्ठकाः प्रजाः प्राजायन्त । तस्माद्वासिष्ठो ब्रह्मा कार्यः स्तोमभागान्विद्यादिति सामर्थ्याद्गम्यते तेन चैव जायते यजमानः । वसिष्ठशब्दादृष्यण् । अत्रायं प्रयोगक्रमः—यत्राह ब्रह्मन् स्तोष्यामः प्रशास्तरिति तद्ब्रह्म प्रसौति 'देव सवितः'† इत्येतां प्रतिपदमुक्त्वा 'रश्मिरसि क्षयाय त्वा क्षयं जिन्व'* इति एतस्यानुवाकस्य एकैकमु-

---

*सं ४-४-१.[1] †सं १-७-७.[1]

रोहिताः प्रजाः प्राजायन्त तस्मा-
द्वासिष्ठो ब्रह्मा कार्यः प्रैव जायते
रश्मिरसि क्षयाय त्वा क्षयं जिन्वे-
ति ॥ ५ ॥ आह देवा वै क्षयो देवे-
भ्य एव यज्ञं प्राह प्रेतिरसि धर्माय

हिता इति वसिष्ठ—पुरोहिताः । प्रजा इति प्र—जाः । प्रेति । अजायन्त । तस्मात् । वासिष्ठः । ब्रह्मा । कार्यः । प्रेति । एव । जायते । [2]रश्मिः । असि । क्षयाय । त्वा । क्षयम् । जिन्व । इति ॥ ५ ॥ आह । देवाः । वै । क्षयः । देवेभ्यः । एव । यज्ञम् । प्रेति । आह । [3]प्रेतिरिति प्र—इतिः । असि । ध-

---

पादाय प्रसौति । एवमेव प्रसवद्वादशभिः अग्निष्टोमं प्रसौति, त्रयोदशभिरत्यग्निष्टोमं पञ्चदशभिरुक्थ्यं, षोडशभिष्षोडशिनम्, सप्तदशभिर्वाजपेयम्, एकोनत्रिंशताऽतिरात्रम्, सर्वैरप्तोर्यामम् । यत्र राथन्तराय सन्धये सर्पन्ति तदाह—'वसुकोसि वेषश्रिरसि वस्यष्टिरसि'* इति । एवमेव प्रसौत्याप्तोर्यामादिति । यज्ञस्य स्तोमानां तेजोभागाः स्तोमभागाः । उक्तं च—'बृहस्पतिर्वा एतद्यज्ञस्य तेजस्समभरद्यत्स्तोमभागाः'† इति । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् ॥

[2–5]इदानीं मन्त्रपदानि व्याचष्टे—रश्मिरसीत्यादि ॥ क्षयति

---

*सं. ४-४-१. †सं ५-३-५.

त्वा धर्मं जिन्वेत्याह मनुष्या वै ध-
र्मो मनुष्येभ्य एव यज्ञं प्राहान्विति-
रसि दिवे त्वा दिवं जिन्वेत्याहैभ्य
एव लोकेभ्यो यज्ञं प्राह विष्टम्भोसि
वृष्ट्यै त्वा वृष्टिं जिन्वेत्याह वृष्टिमे-
वावं ॥ ६ ॥ रुन्धे प्रवाऽस्यनुवाऽसी-

मोय । त्वा । धर्मम् । जिन्व । इति । आह । मनुष्याः । वै । धर्मः । मनुष्येभ्यः । एव । यज्ञम् । प्रेति । आह । [4]अन्विति-रित्यनु-इतिः । असि । दिवे । त्वा । दिवम् । जिन्व । इति । आह । एभ्यः । एव । लोकेभ्यः । यज्ञम् । प्रेति । आह । [5]विष्टम्भ इति वि-स्तम्भः । असि । वृष्ट्यै । त्वा । वृष्टिम् । जिन्व । इति । आह । वृष्टिम् । एव । अवेति ॥६॥ रुन्धे । [6]प्रवेति प्र-वा । असि । [7]अनुवेत्यनु-

---

निवसत्यस्मिन्विश्वमिति गतम् ॥

[6-7]प्रवाऽस्यनुवाऽसीति द्वयोर्ग्रहणम् ॥

त्याह मिथुनत्वायोशिगसि वसुभ्य-
स्त्वा वसूञ्जिन्वेत्याहाष्टौ वसव एका-
दश रुद्रा द्वादशादित्या एतावन्तो वै
देवास्तेभ्य एव यज्ञं प्राहौजोसि पि-
तृभ्यस्त्वा पितॄञ्जिन्वेत्याह देवानेव
पितॄननु सं तनोति तन्तुरसि प्रजा-
भ्यस्त्वा प्रजा जिन्व ॥ ७ ॥ इत्याह

वा । असि । इति । आह । मिथुनत्वायेति मिथुन-
त्वाय । [8]उशिक् । असि । वसुभ्य इति वसु-भ्यः ।
त्वा । वसून् । जिन्व । इति । आह । अष्टौ । व-
सवः । एकादश । रुद्राः । द्वादश । आदित्याः ।
एतावन्तः । वै । देवाः । तेभ्यः । एव । यज्ञम् ।
प्रेति । आह । [9]ओजः । असि । पितृभ्य इति
पितृ-भ्यः । त्वा । पितॄन् । जिन्व । इति । आह ।
देवान् । एव । पितॄन् । अनु । समिति । तनोति ।
[10]तन्तुः । असि । प्रजाभ्य इति प्र-जाभ्यः । त्वा ।
प्रजा इति प्र-जाः । जिन्व ॥ ७ ॥ इति । आह ।

[8-10]उशिगसीत्यादीनां त्रयाणां वस्वादिमन्त्राणां ग्रहणम् । त-
दाह—अष्टौ वसव इत्यादि । देवानेवेत्यादि । स्थापयति ॥

पितॄनेव प्रजा अनु सं तनोति पृ-
तनाषाडसि पशुभ्यस्त्वा पशूञ्जि-
न्वेत्याह प्रजा एव पशूननु सं त-
नोति रेवदस्योषधीभ्यस्त्वौषधीञ्जि-
न्वेत्याहौषधीष्वेव पशून्प्रतिष्ठापय-
त्यभिजिदसि युक्तग्रावेन्द्राय त्वेन्द्रं

पितॄन् । एव । प्रजा इति प्र–जाः । अनु । समि-
ति । तनोति । [11]पृतनाषाट् । असि । पशुभ्य इति
पशु–भ्यः । त्वा । पशून् । जिन्व । इति । आह ।
प्रजा इति प्र–जाः । एव । पशून् । अनु । समि-
ति । तनोति । [12]रेवत् । असि । ओषधीभ्य इत्यो-
षधि–भ्यः । त्वा । ओषधीः । जिन्व । इति ।
आह । ओषधीषु । एव । पशून् । प्रतीति । स्था-
पयति । [13]अभिजिदित्यभि–जित् । असि । युक्त-
ग्रावेति युक्त–ग्रावा । इन्द्राय । त्वा । इन्द्रम् ।

---

[11]प्रजा एवेति ॥ पितॄणामनन्तरं प्रजास्सन्तनोति, प्रजानां पशून् सन्तनोति ॥

[12–13]रेवदसीत्यादि ॥ गतम् ॥

जिन्वेत्याहाभिजित्या अधिपतिरसि प्राणाय त्वा प्राणम् ॥ ८ ॥ जिन्वेत्याह प्रजास्वेव प्राणान्दधाति त्रिवृदसि प्रवृदसीत्याह मिथुनत्वाय सꣳरोहोसि नीरोहोसीत्याह प्रजात्यै वसुकोसि वेषश्रिरसि व-

जिन्व । इति । आह । अभिजित्या इत्यभि–जित्यै । [14]अधिपतिरित्यधि–पतिः । असि । प्राणायेति प्र–अनाय । त्वा । प्राणमिति प्र–अनम् ॥८॥ जिन्व । इति । आह । प्रजास्विति प्र–जासु । एव । प्राणानिति प्र–अनान् । दधाति । [15]त्रिवृदिति त्रि–वृत् । असि । [16]प्रवृदिति प्र–वृत् । असि । इति । आह । मिथुनत्वायेति मिथुन–त्वाय । [17]सꣳरोह इति सं–रोहः । असि । [18]नीरोह इति निः–रोहः । असि । इति । आह । प्रजात्या इति प्र–जात्यै । [19]वसुकः । असि । [20]वेषश्रिरिति वेष-

[14–16]अधिपतिरसीत्यादि ॥ चतुर्णां प्राणादिमन्त्राणां ग्रहणम् । प्राणानिति । प्राणापानचक्षुश्श्रोत्राणि । मिथुनत्वायेति 'तासु त्रिवृदसीत्येव मिथुनमदधात्'* इति दर्शनात् ॥

[17–21]संरोहोसीत्यादीनां चतुर्णां प्रजननमन्त्राणां ग्रहणम् । 'ता-

* सं. ५-३-६.

स्यांष्टिरसीत्याह प्रतिष्ठित्यै ॥ ९ ॥
अग्निना देवेन पृतना जयामि गा-
यत्रेण छन्दसा त्रिवृता स्तोमेन रथं-
तरेण साम्ना वषट्कारेण वज्रेण पूर्व-

श्रिः । असि । [2]वस्यष्टिः । असि । इति । आह । प्रतिष्ठित्या इति प्रति-स्थित्यै ॥ ९ ॥

जिन्वेत्यवं प्रजा जिन्व प्राणं त्रिरुशच्च ॥२॥

[1]अग्निना । देवेन । पृतनाः । जयामि । गायत्रेण । छन्दसा । त्रिवृतेति त्रि-वृता । स्तोमेन । रथन्तरेणेति रथं-तरेण । साम्ना । वषट्कारेणेति वषट्-कारेण । वज्रेण । पूर्वजानिति पूर्व-जान् ।

स्संरोहोसि नीरोहोसीत्येव प्राजनयत्' * इति दर्शनात् । प्रतिष्ठित्या इति । 'प्रजा एव प्रजाता एषु लोकेषु प्रतिष्ठापयति'* इति । 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् ॥

इति तृतीये पञ्चमे द्वितीयोनुवाकः.

---

[1]अग्निना देवेनेत्याद्या अभिचारादिः । संवत्सरमेतैः क्रमैः क्रमेत—अग्निना देवेन पृतनाः परसेनाः जयामि अभिभवामि गायत्रेण छन्दसा । गायत्र्येव गायत्रं, 'नपुंसके स्वार्थ उपसंख्या-

* सं ५-३-६.

जान्भ्रातृव्यानधरान्पादयाम्यवैना-
न्बाधे प्रत्येनानुदेऽस्मिन्क्षयेऽस्मि-
न्भूमिलोके योऽस्मान्द्वेष्टि यं च व-
यं द्विष्मो विष्णोः क्रमेणात्येनान्क्रा-

भ्रातृव्यान् । अधरान् । पादयामि । अवेति । ए-
नान् । बाधे । प्रतीति । एनान् । नुदे । अस्मिन् ।
क्षये । अस्मिन् । भूमिलोक इति भूमि—लोके ।
यः । अस्मान् । द्वेष्टि । यम् । च । वयम् । द्वि-
ष्मः । विष्णोः । क्रमेण । अतीति । एनान् ।

नम्' इत्यण् । त्रिवृता स्तोमेन नवस्तोत्रीयेण स्तोमेन त्रयवय-
वास्तिस्रो वृत्तयः यस्य इति त्रिवृत्, त्रिचक्रादित्वादुत्तरपदान्तो-
दात्तत्वम् । रथन्तरेण साम्ना 'अभि त्वा शूर नोनुमः'* इत्येत-
द्योनिना वषट्कारेणायुधेन अग्निप्रसादेन गायत्र्यादिभिस्साधनभूतैर्ज-
यामि पूर्वजान् प्रथमजान् भ्रातृव्यान् शत्रून् । 'व्यन् सपत्ने'
इति व्यन् । अधरान् पादयामि अधोमुखान्निपातयामि । किंच—
एनानवबाधे अवमतान् कृत्वा बहुधा पीडयामि यथा मामेव श-
रणं भजेयुः । एनादेशोनुदात्तः । किं च—एनान् प्रतिनुदे
प्रत्येकं प्रातिलोम्येन वा व्यथयामि अस्मिन् क्षये गृहे । 'क्ष-
यो निवासे' इत्याद्युदात्तत्वम् । 'ऊडिदम्' इतीदमो विभक्तिरु-
दात्ता । अस्मिन् भूमिलोके पृथिवीस्थाने न गृहमात्र एव ।
योस्मान् द्वेष्टि अविदितमस्माकं, यं च वयं द्विष्मः अविदितं

---

*ऋ. २-४-१४.[6]

मामीन्द्रेण देवेन पृतना जयामि
त्रैष्टुभेन छन्दसा पञ्चदशेन स्तोमेन
बृहता साम्ना वषट्कारेण वज्रेण ॥१०॥
सहजान् विश्वेभिर्देवेभिः पृतना

क्रामामि । [2]इन्द्रेण । देवेन । पृतनाः । जयामि । त्रैष्टुभेन । छन्दसा । पञ्चदशेनेति पञ्च-दशेन । स्तोमेन । बृहता । साम्ना । वषट्कारेणेति वषट्-कारेण । वज्रेण ॥ १० ॥ सहजानिति सह-जान् । [3]विश्वेभिः । देवेभिः । पृतनाः । जयामि । जागतेन ।

तस्य तावुभावपि भ्रातृव्यौ पीडयामि । किं च—विष्णोः क्रमेण विष्णोरेव वा क्रमेण तेन पूर्वकृतेन साधनभूतेन निरस्य अतिक्रम्य अधितिष्ठामि ॥

[2]इन्द्रेणेत्यादि ॥ द्वितीयोतिक्रमः । त्रिष्टुबेव त्रैष्टुभम् । उत्सादित्वात्स्वार्थिकोञ् । पञ्चदशः पञ्चदशस्तोत्रीयः । 'स्तोमे डविधिः पञ्चदशाद्यर्थे' इति डः । बृहता साम्ना 'त्वामिद्धि हवामहे'* इत्येतद्योनिना । समानमन्यत् । सहजानिति विशेषः । सकुल्याः स्वाभाविका वा । पूर्ववत्सः । 'भ्रातृव्यान्' इत्याद्यनुषज्यते ॥

[3]विश्वेभिरिति ॥ तृतीयोतिक्रमः । जगतीशब्दोप्युत्सादिः । सप्तदशस्तोत्रीयः प्रवसथः । वामदेव्येन दृष्टं साम वामदेव्यं,

* सं २-४-१४[7]

जयामि जागतेन छन्दसा सप्तदशेन स्तोमेन वामदेव्येन साम्ना वषट्कारेण वज्रेणापरजानिन्द्रेण सयुजो वयꣳ सासह्याम पृतन्यतः। घ्नन्तो वृत्राण्यप्रति। यत्ते अग्ने तेजः छन्दसा। सप्तदशेनेति सप्त–दशेन। स्तोमेन। वामदेव्येनेति वाम–देव्येन। साम्ना। वषट्कारेणेति वषट्–कारेण। वज्रेण। अपरजानित्यपर–जान्। [4]इन्द्रेण। सयुज इति स–युजः। वयम्। सासह्याम। पृतन्यतः। घ्नन्तः। वृत्राणि। अप्रति। [5]यत्। ते। अग्ने। तेजः। तेन। अहम्। तेज-

---

वामदेवाद्यत्। समानमन्यत्। 'कया नश्चित्र आ भुवत्'* इत्यैतद्योनि वामदेव्यम्। अपरजानिति विशेषः। अपरेण केनचिन्निमित्तेन सजाताश्शत्रवः। स एव सः। पूर्ववद्भ्रातृव्यानित्याद्यनुषज्यते॥

[4]अथ शुक्रामन्थिनः—इन्द्रेणेति गायत्री॥ इन्द्रेण सयुजः संयुक्ता वयं सासह्याम भृशमभिभवेम। यङन्ताद्वचत्ययेन परस्मैपदम्। पृतन्यतः पृतनां सङ्घाममस्माभिस्सह कर्तुमिच्छतः। क्यचि 'कव्यध्वरपृतनस्य' इति लोपः। घ्नन्तो वृत्राणि वारकाणि परबलानि पापानि वा। अप्रति अप्रतिबलं यथा भवति तथा। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्॥

[5]यत्ते अग्ने इत्यादि यजुः॥ तेजो दीप्तिः। वर्चोन्नम्।

---

* सं ४-२-११.

स्तेनाहं तेजस्वी भूयासं यत्ते अग्ने
वर्चस्तेनाहं वर्चस्वी भूयासं यत्ते
अग्ने हरस्तेनाहꣳ हरस्वी भूयासम्॥
ये देवा यज्ञहनो यज्ञमुषः पृथि-

स्वी । भूयासम् । यत् । ते । अग्ने । वर्चैः । तेन । अहम् । वर्चस्वी । भूयासम् । यत् । ते । अग्ने । हरः । तेन । अहम् । हरस्वी । भूयासम् ॥ ११ ॥

बृहता साम्ना वषट्कारेण वज्रेण
षट्त्वारिꣳशच्च ॥ ३ ॥

[1]ये । देवाः । यज्ञहन इति यज्ञ–हनः । यज्ञ-मुष इति यज्ञ–मुषः । पृथिव्याम् । अधीति ।

हरः बलम् । त्वदीयैस्तेजःप्रभृतिभिः मदीयेन यागेन वर्धमानैर्हे-तुभिः अहं तेजःप्रभृतिमान् भूयासमिति ॥

इति तृतीये पञ्चमे तृतीयोनुवाकः

---

[1]अथातिमोक्षः । वैश्वकर्मणानि हुत्वा गार्हपत्ये आज्यं विलाप्य उत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा गार्हपत्ये जुहोत्यन्वारब्धे यज-माने—ये देवा इत्यादि ॥ अत्र प्रथमे अनुष्टुभौ । तृतीया

व्यामध्यासंते । अग्निर्मा तेभ्यो र-
क्षतु गच्छेम सुकृतो वयम् । आऽगन्म
मित्रावरुणा वरेण्या रात्रीणां भागो
युवयोर्यो अस्ति । नाकं गृह्णानास्सु-
कृतस्य लोके तृतीये पृष्ठे अधि रो-

आसंते । अग्निः । मा । तेभ्यः । रक्षतु । गच्छेम । सुकृत इति सु–कृतः । वयम् । [2]एति । अगन्म । मित्रावरुणेति मित्रा–वरुणा । वरेण्या । रात्रीणाम् । भागः । युवयोः । यः । अस्ति । नाकम् । गृह्णानाः । सुकृतस्येति सु–कृतस्य । लोके । तृ-

---

त्रिष्टुप् । चतुर्थीपञ्चम्यौ अनुष्टुभौ । षष्ठी त्रिष्टुप् । सप्तम्यष्टम्यावनुष्टुभौ । नवमी त्रिष्टुप् । 'ये देवा यज्ञहनो यज्ञमुषः' इति प्रथमयोः प्रथमौ पादौ, समाना अन्येऽपि पादाः । एवं सर्वत्र वाक्यभेदेन द्वे द्वे अनुष्टुभौ । ये देवा यज्ञहनः यज्ञस्य हन्तारः ये च यज्ञमुषः यज्ञफलस्य नाशयितारः घृथिव्यामधि घृथिव्या उपर्यासते अग्निर्मा तेभ्यो यज्ञहभ्यो यज्ञमुड्भ्यश्च सुकृतः शोभनकारिणः अहतामुषितयज्ञाः वयं कर्मस्थानफलं गच्छेम ॥

[2]अथाग्नीध्रमभिप्रैति—आऽगन्मेति ॥ हे मित्रावरुणा मित्रावरुणौ वरेण्या वरेण्यौ वरणीयौ रात्रीणां सम्बन्धी अहोरात्रेषु अस्मा-

चने दिवः । ये देवा यज्ञहनो य-
ज्ञमुषोन्तरिक्षेऽध्यासते । वायुर्मा
तेभ्यो रक्षतु गच्छेम सुकृतो वयम् ।
यास्ते रात्रीस्सवितः ॥ १२ ॥ देव-

तीये । पृष्ठे । अधीति । रोचने । दिवः । [3]ये । देवाः । यज्ञहन इति यज्ञ–हनः । यज्ञमुष इति यज्ञ–मुषः । अन्तरिक्षे । अधीति । आसते । वायुः । मा । तेभ्यः । रक्षतु । गच्छेम । सुकृत इति सु–कृतः । वयम् । [4]याः । ते । रात्रीः । सवितः ॥ १२ ॥ देवयानीरिति देव–यानीः । अ-

---

भिर्दत्तः युवयोर्भागः हविरंशो योस्ति सामर्थ्यात्तस्य फलं वयमागन्म आभिमुख्येन गच्छेम नाकं स्वयमेव गृह्णानाः आददानाः सुकृतस्य लोके सुष्ठुकृतानां कर्मणां तृतीये फलस्थाने दिवः पृष्ठे रोचने दीप्यमाने अधि उपरि सुकृतमागन्मेति । यद्वा—अधिकं रोचमाने दिवः पृष्ठे आगन्मेति । 'कर्षात्वतः' इति भागशब्दोन्तोदात्तः, न 'भ्राण्नपात्' इत्यादौ नाकशब्दोन्तोदात्तो निपात्यते । 'सूपमानात्कः' इति सुकृतशब्दोन्तोदात्तः, 'अनुदात्तेतश्च हलादेः' इति रोचनशब्दो युजन्तः ॥

[3]अथाग्नीध्रं गत्वा स्रुचि चतुर्गृहीतं गृहीत्वा शये[आग्नीध्रे]ऽन्वारब्धे यजमाने जुहोति—ये देवा इति द्वाभ्यां पृथगाहुतिद्वयम् । गतौ च मन्त्रौ ॥

[4]अथाग्नीध्रमुपतिष्ठते—यास्ते इति ॥ हे सवितः यास्तव स-

यानीरन्तरा द्यावापृथिवी वियन्ति । गृहैश्च सर्वैः प्रजया न्वग्रे सुवो रुहाणास्तरता रजाꣳसि । ये

न्तरा । द्यावापृथिवी इति द्यावा–पृथिवी । वियन्तीति वि–यन्ति । गृहैः । च । सर्वैः । प्रजयेति प्र–जया । नु । अग्रे । सुवः । रुहाणाः । तरत । रजाꣳसि । [5]ये । देवाः । यज्ञहन इति यज्ञ–हनः ।

स्बन्धिन्यो रात्रीः रात्रयः अग्निसमीपप्राप्तिहेतवः देवयानीः देवान् गच्छन्ति यासु ता देवयान्यः यागवत्य इति यावत्, उभयत्रापि 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । द्यावापृथिवी अन्तरा द्यावापृथिव्योर्मध्ये या वियन्ति विविधं गच्छन्ति । 'दिवो द्यावा' इति द्यावादेशः 'देवताद्वन्द्वे च' इत्याद्युदात्तत्वम् । 'अन्तराऽन्तरेण' इति द्वितीया । ताभिर्हेतुभूताभिः अग्रे प्रथममेव गृहैः गृहवासिभिः सर्वैर्जनैः प्रजया सह । समुच्चये नुशब्दः । सुवो रुहाणाः सुखैकरूपं स्वर्गं आरोहन्तः ऋत्विग्यजमानाः रजांसि लोकान्तराणि दुःखबलानि तरतः तरन्तु त्वत्प्रसादेन । व्यत्ययेन मध्यमः । यद्वा—वयं तराम त्वत्प्रसादादिति । सर्वधा मध्यमव्यत्ययेन मुच्यामहे । 'अन्येषामपि दृश्यते' इति संहितायामस्य दीर्घत्वम् । 'इमानेव लोकांस्तीर्त्वा सगृहस्सपशुस्सुवर्गं लोकमेति'* इति ब्राह्मणम् । 'स्वरो रोहतौ छन्दसि' इत्युत्वम् । रुहेर्व्यत्ययेनात्मनेपदम् । लसार्वधातुकानुदात्तत्वं च ॥

[5]अथाहवनीयं[अनु]द्रुत्य स्रुचि चतुर्गृहीतं गृहीत्वा आहवनीये जुहो-

* सं ३-५-४.7

देवा यज्ञहनो यज्ञमुषो दिव्यध्यास-
ते । सूर्यो मा तेभ्यो रक्षतु गच्छेम
सुकृतो वयम् । येनेन्द्राय समभरः
पयाꣳस्युत्तमेनं हविषा जातवेदः ।
तेनाग्ने त्वमुत वर्धयेमꣳ संजातानाꣳ

यज्ञमुष इति यज्ञ–मुषः । दिवि । अधीति । आ-
सते । सूर्यः । मा । तेभ्यः । रक्षतु । गच्छेम ।
सुकृत इति सु–कृतः । वयम् । येन । इन्द्राय ।
समभर इति सं–अभरः । पयाꣳसि । उत्तमेने-
त्युत्–तमेनं । हविषा । जातवेद इति जात–वेदः ।
तेन । अग्ने । त्वम् । उत । वर्धय । इमम् । स-
जातानामिति स–जातानाम् । श्रैष्ठ्ये । एति ।

त्यन्वारब्धे यजमाने—ये देवा इति द्वाभ्यां पृथगाहुतिद्वयम् । गतौ च मन्त्रौ ॥

[6]अथाहवनीयमुपतिष्ठते—येनेन्द्रायेति ॥ हे जातवेदः जातानां वेदितः अग्ने येन बलेन स्नेहेन वा इन्द्राय पयांसि दधिघर्मादीनि समभरः संभरसि । छान्दसो लङ् । उत्तमेन तेन बलेन स्नेहेन वा । उत अपि च हविषा एतद्धुतेन हेतुना इमं यजमानं त्वं वर्धय । कीदृशी वृद्धिरस्य कर्तव्येति चेद्ब्रूमः—सजातानां समानजातानां श्रैष्ठ्ये श्रेष्ठभावे यथाऽयं सजातानां श्रेष्ठः

श्रैष्ठ्य आ धेह्येनम् । यज्ञहनो वै देवा यज्ञमुषः ॥ १३ ॥ सन्ति त एषु लोकेष्वासत आददाना विमथ्नाना यो ददाति यो यजते तस्य । ये देवा यज्ञहनः पृथिव्यामध्यासते ये अन्तरिक्षे ये दिवीत्याहेमानेव

धेहि । एनम् । [7]यज्ञहन इति यज्ञ-हनः । वै । देवाः । यज्ञमुष इति यज्ञ-मुषः ॥ १३ ॥ सन्ति । ते । एषु । लोकेषु । आसते । आददाना इत्या-ददानाः । विमथ्नाना इति वि-मथ्नानाः । यः । ददाति । यः । यजते । तस्य । ये । देवाः । यज्ञ-हन इति यज्ञ-हनः । पृथिव्याम् । अधीति । आ-सते । ये । अन्तरिक्षे । ये । दिवि । इति । आह । इमान् । एव । लोकान् । तीर्त्वा । सगृह इति

प्रशस्यतमो भवति तथा तत्र एनं यजमानं धेहि स्थापय सजातानां मध्ये । उत्तमशब्द उज्छादिरन्तोदात्तः । 'वा जाते' इति सजातशब्दोन्तोदात्तः । केचिदाहुः—तिस्र एव गार्हपत्ये जुहोति, तिस्र आग्नीध्रे, तिस्र आहवनीये इति ॥

[7]अथैषामतिमोक्षाणां ब्राह्मणम्—यज्ञहनो वा इत्यादि ॥ आददाना हविरादि । विमथ्नानाः शालाभङ्गादिकमाचरन्तः । कस्य?

लोकाꣳस्तीर्त्वा सगृहस्सपशुस्सुव-
र्गं लोकमेत्यप वै सोमेनेजानाद्दे-
वताश्च यज्ञश्च क्रामन्त्याग्नेयं पञ्चक-
पालमुदवसानीयं निर्वपेदग्निस्सर्वा
देवताः ॥ १४ ॥ पाङ्क्तो यज्ञो देव-

स—गृहः । सपशुरिति स—पशुः । सुवर्गमिति सु-
वः—गम् । लोकम् । एति । [8]अपेति । वै । सोमे-
न । ईजानात् । देवताः । च । यज्ञः । च । क्राम-
न्ति । आग्नेयम् । पञ्चकपालमिति पञ्च—कपालम् ।
उदवसानीयमित्युत्—अवसानीयम् । निरिति । व-
पेत् । अग्निः । सर्वाः । देवताः ॥ १४ ॥ पाङ्क्तः ।
यज्ञः । देवताः । च । एव । यज्ञम् । च । अवेति ।

यो ददाति, यश्च यजते तस्य । ये देवा यज्ञहन इति । यज्ञमोक्षणमन्त्राणामप्युपलक्षणम् । येऽन्तरिक्षे ये दिवीति शिष्टानां चतुर्णां ग्रहणम् ॥

[8]अप वै सोमेनेत्यादि ॥ उदवसानीयं उदवसीयतेऽनेनेत्युदव-सानीयं, करणे कृत्यः, 'उपोत्तमं रिति' इत्युपोत्तमस्योदात्तत्वम् । अग्निस्सर्वा देवता इति । अग्न्यधीनस्थितित्वात्सर्वदेवानाम् । पाङ्क्तो यज्ञ इति । धानादिपञ्चकात्मकपाङ्क्तप्रभवत्वात् ॥

ताश्चैव यज्ञं चार्वं रुन्धे गायत्रो वा अग्निर्गायत्रछंन्दास्तं छन्दंसा व्यर्ध-यति यत्पञ्चंकपालं करोत्यष्टाकंपालः कार्योंऽष्टाक्षंरा गायत्री गांयत्रोंऽग्निर्गा-यत्रछंन्दास्स्वेनैवैनं छन्दंसा समंर्ध-यति पङक्त्यौं याज्यानुवाक्यें भवतः

रुन्धे । [9]गायत्रः । वै । अग्निः । गायत्रछंन्दा इतिं गायत्र—छन्दाः । तम् । छन्दंसा । वीतिं । अर्धय-ति । यत् । पञ्चंकपालमितिं पञ्चं—कपालम् । क-रोतिं । अष्टाकंपाल इत्यष्टा—कपालः । कार्यंः । अष्टाक्षरेत्यष्टा—अक्षरा । गायत्री । गायत्रः । अ-ग्निः । गायत्रछंन्दा इतिं गायत्र—छन्दाः । स्वेनं । एव । एनम् । छन्दंसा । समितिं । अर्धयति । पङ्क्त्यौं । याज्यानुवाक्यें इतिं याज्या—अनुवाक्यें ।

---

[9]पञ्चकपालं निन्दति—गायत्रीप्रभवस्य गायत्रछन्दसः अग्नेः पञ्चकपालोऽवृद्धिहेतुः । तस्मादष्टाकपाल एव कार्यः । तर्हि पञ्चकपालान्वयाभावात् पाङ्क्तो यज्ञो न लभ्यते तत्राह—पङ्क्त्या-विति । स्विष्टकृत इत्येके । प्रधानस्येत्यन्ये । याज्यानुवाक्ययोः पङ्क्तित्वात्पाङ्क्तयज्ञलाभः । पङ्क्तिशब्दोप्युत्सादिः । 'अग्ने तमद्या-

पाङ्क्तो यज्ञस्तेनैव यज्ञान्नैति ॥ १५ ॥
सूर्यो मा देवो देवेभ्यः पातु वायु-
रन्तरिक्षाद्यजमानोऽग्निर्मा पातु चक्षुः-

भवतः । पाङ्क्तः । यज्ञः । तेन । एव । यज्ञात् । न । एति ॥ १५ ॥

सवितर्देवा यज्ञमुषस्सर्वा देवतास्त्रि-
चत्वारिꣳशच्च ॥ ४ ॥

[1]सूर्यः । मा । देवः । देवेभ्यः । पातु । वायुः । अन्तरिक्षात् । यजमानः । अग्निः । मा । पातु ।

श्वं न स्तोमैः'* इत्यक्षरपङ्क्तयः याज्यानुवाक्या भवन्ति । द्वे आग्नेयस्य । द्वे स्विष्टकृतः ॥

इति तृतीये पञ्चमे चतुर्थोनुवाकः.

---

[1]प्रवृताहुतिं द्वितीयां जुहोति—सूर्यो मेति । इयं त्रिष्टुप् । 'यजमानः' इति तृतीयपादान्तः ॥ सूर्यो देवो मा देवेभ्यः पातु देवापराधनिमित्तादुपद्रवाद्रक्षतु । वायुर्देवः अन्तरिक्षादन्तरिक्षचारिनिमित्तादुपद्रवात्पातु इत्येव । अग्निर्देवः यजमानः यजमा-

*सं. ४-४-४.

षः । सक्ष शूष सवितर्विश्वचर्षण
एतेभिस्सोम नामभिर्विधेम ते ते-
भिस्सोम नामभिर्विधेम ते । अहं

चक्षुषः । [2]सक्ष । शूष । सवितः । विश्वचर्षण
इति विश्व–चर्षणे । एतेभिः । सोम । नामभि-
रिति नाम–भिः । विधेम । ते । तेभिः । सोम ।
नामभिरिति नाम–भिः । विधेम । ते । [3]अहम् ।

नात्मा देवानां वा स्वयमेव यष्टा चक्षुषः चक्षूरूपादपराधात् मां पातु ॥

[2]अभिचरन् बभ्रुवा बभ्रुवत्सायाः पयो जुहोति—सक्षेति । इयं त्रिपदा जगती । हे सक्ष अभिभवितः शत्रूणाम् । सहतेरौणादिकस्सः । यद्वा—सक्षतिरभिभवकर्मा छान्दसः । यद्वा—समानं क्षपति विश्वमिति सक्षः, समानं क्षियत्यस्मिन्निति वा सक्षः, ष्टषोदरादिः । शूष शोषयितः । छान्दसस्स्वरविकारः । सवितः सर्वस्य प्रेरक । यद्वा—सर्वस्यानुज्ञातः । विश्वचर्षणे विश्वमनुष्य विश्वेऽपि मनुष्यास्स्वत्वेन भवन्तीति । यद्वा—विश्वदर्शन । 'आमन्त्रितं पूर्वमविद्यमानवत्' इति सर्वेषामामन्त्रिताद्युदात्तत्वम् । हे सोम प्रसवैश्वर्ययुक्त एतेभिः एभिश्चतुर्भिः सक्षादिभिर्नामभिः ते त्वां विधेम परिचरेम । विधतिः परिचरणकर्मा, 'बहुलं छन्दसि' इत्यैसभावः ॥

[3]पालीवतस्य श्रयणम्—अहमिति । इयं पञ्चपदा शक्करी ॥ अहं परस्तादुपरिष्टात् भूयासम् । अहमेवावस्तात् अधस्ताच्च भूया-

पुरस्तादहमवस्तादहं ज्योतिषा वि
तमो ववार । यदन्तरिक्षं तदु मे
पिताऽभूदहꣳ सूर्यमुभयतो ददर्शा-
हं भूयासमुत्तमस्समानानाम्॥१६॥
आ समुद्रादाऽन्तरिक्षात्प्रजापतिरुद-

पुरस्तात् । अहम् । अवस्तात् । अहम् । ज्योति-
षा । वीति । तमः । ववार । यत् । अन्तरिक्षम् ।
तत् । उ । मे । पिता । अभूत् । अहम् । सूर्यम् ।
उभयतः । ददर्श । अहम् । भूयासम् । उत्तम
इत्युत्–तमः । समानानाम् ॥ १६ ॥ [4]एति । स-
मुद्रात् । एति । अन्तरिक्षात् । प्रजापतिरिति प्र-

सम् । सर्वव्यापी भूयासमिति यावत् । ज्योतिषा तेजसा । तमः ध्वान्तं तमोहेतुभूतमनिष्टं वा अहं विववार विशेषेण वारयितुं समर्थो भूयासम् । छान्दसो लिट् । यदन्तरिक्षं परमं व्योम तदेव मे पिता अभूत् भूयात् । छान्दसो लुङ् । किञ्च—उभयतः इह च प्रेत्य चाहं सूर्यं ददर्श, अहं भूयासम् । सूर्यवत्स्वेष्वेव लोकेषु वर्तीतिवत् । छान्दसो लिट् । किञ्च—अहं समानानामुत्तमो भूयासम् । उञ्छादित्वादन्तोदात्तः ॥

[4]उपांशुसवनेनादित्यग्रहमधस्तादुदाहरन्ति—आ समुद्रादिति त्रिष्टुभा ॥ आ समुद्रात् अन्तरिक्षावधिकायां प्रजापतिरुदधिं उद-

धिं च्यावयातीन्द्रः प्र स्रौतु मरुतो व-
र्षयन्तून्नम्भय पृथिवीं भिन्धीदं दि-
व्यं नभः । उद्वो दिव्यस्य नो देही-

जा—पतिः । उदधिमित्युद—धिम् । च्यावयाति । इन्द्रः । प्रेति । स्रौतु । मरुतः । वर्षयन्तु । [5]उदिति । नम्भय । पृथिवीम् । भिन्धि । इदम् । दिव्यम् । नभः । उद्वः । दिव्यस्य । नः । देहि । ईशानः ।

कस्य धारयितारं च्यावयाति च्यावयतु सर्वत्र वर्षतु । लेट्याडागमः । इन्द्रः प्रस्रौतु स्रावयतु वर्षत्विति यावत् । स्रु प्रस्रवणे । मरुतश्च वर्षयन्तु । इन्द्रस्य साहाय्यकं प्रतिबन्धन्तां त्वत्प्रसादेन हे आदित्यग्रह ॥

[5]अथ द्वितीया—उन्नम्भयेति ॥ व्याख्यातेयं 'देवा वसव्या अग्ने'* इत्यत्र । हे आदित्यग्रह त्वं पृथिवीमुन्नम्भय अविचलितां कुरु पृथिवीम् । नभ हिंसायां, छान्दसो नुट् । इदं दिव्यं दिवि भवं नभः नभस्थं मेघम्, तात्स्थ्यात्ताच्छब्द्यम् । यथा मञ्चाः क्रोशन्तीति । भिन्धि विदारय । भित्त्वा च उद्वः उदकस्य । 'पद्दन्' इत्यादिना उदन्भावः । दिव्यस्य देवार्हस्य । दण्डादित्वाद्यः, 'क्रियाग्रहणं कर्तव्यम्' इति सम्प्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । दिव्यमुदकं नः अस्मभ्यं देहि विसृज विमुञ्च वर्तिं मेघं विश्लथितबन्धं कुरु ईशानः । संहितायां दीर्घत्वम् ॥

---

*सं. २-४-८.[9]

शान्नो विसृजा दृतिम् । पशवो वा एते यदादित्य एष रुद्रो यदग्निरोषधीः प्रास्याग्नावादित्यं जुहोति रुद्रादेव पशूनन्तर्दधात्यथो ओषधीष्वेव पशून् ॥ १७ ॥ प्रतिष्ठापयति कविर्वीतिं । सृज । दृतिम् । [6]पशवः । वै । एते । यत् । आदित्यः । एषः । रुद्रः । यत् । अग्निः । ओषधीः । प्रास्येति प्र–अस्य । अग्नौ । आदित्यम् । जुहोति । रुद्रात् । एव । पशून् । अन्तः । दधाति । अथो इति । ओषधीषु । एव । पशून् ॥ १७ ॥ प्रतीतिं । स्थापयति । [7]कविः । यज्ञस्य । वीतिं । तनोति ।

---

[6]अथादित्यग्रहस्य च प्रयोगविशेषार्थं ब्राह्मणं—पशवो वा इत्यादि ॥ पशुसाधनत्वादादित्यग्रहः पशुत्वेनोच्यते । अग्नावोषधीः प्रास्य प्रक्षिप्य आदित्यग्रहं जुहोति । ततो रुद्रात्पशूनन्तर्दधाति व्यवहितान् करोति । अथो अपि च अग्नावोषधीः प्रक्षिप्यादित्यग्रहहोमात् ओषधीषु पशवः प्रतिष्ठापिता भवन्ति ॥

[7]प्रायणीयोदयनीययोः स्रुवां जुहोति—कविर्यज्ञस्येति द्वाभ्यां त्रिष्टुब्भ्याम् ॥ तत्र प्रथमा—कविः क्रान्तदर्शनः वितनोति विस्तारयति । किम्? यज्ञस्य पन्थां मार्गम् । व्यत्ययेन द्वितीयायामप्याकारः । क्व? नाकस्य केवलसुखरूपस्य दिवः द्युलोकस्य पृष्ठे अधि

यज्ञस्य वि तनोति पन्थां नाकस्य
पृष्ठे अधि रोचने दिवः । येन हव्यं
वहसि यासि दूत इतः प्रचेता अमु-
तस्सनीयान् । यास्ते विश्वास्समि-

पन्थाम् । नाकस्य । पृष्ठे । अधीति । रोचने ।
दिवः । येन । हव्यम् । वहसि । यासि । दूतः । इ-
तः । प्रचेता इति प्र–चेताः । अमुतः । सनीयान् ।
[8]याः । ते । विश्वाः । समिध इति सं–इधः । स-

भूलोकोपरि रोचने रोचमाने । नाकरोचनशब्दौ व्याख्यातौ* । येन पथा हव्यं वहसि देवेभ्यः, येन पथा सुखं यासि गच्छसि । कुतः? (त्वमस्माकम्) इतः अस्मात्सकाशात् प्रचेताः प्रवृद्धचेताः अमुतः अमुष्माल्लोकात् आदाय मनुष्येभ्यः सनीयान् संभक्तृतरः तेन पथा आयाहि इति सामर्थ्याद्गम्यते । सनितृशब्दात् 'परादिश्छन्दसि' इतीयसुन्, 'तुरिष्टेमेयस्सु' इति तृलोपः । वहसि, 'यद्वृत्तान्नित्यम्' इति न निहन्यते । यासीत्येतत्तु तिङःपरत्वान्न निहन्यते । अनेन पथा गत्वा अस्मदर्थं साधयेति ॥

[8]द्वितीया—यास्तव सर्वा अपि समिधः समिन्धनहेतवः सन्ति काष्ठादयः पृथिव्यां सन्ति । याश्च बर्हिषि परिवृढे आकाशे सन्ति । याश्च सूर्ये द्युलोके सन्ति । तास्सर्वा अपि तव घृतस्याहुतिं गच्छन्ति अनुगच्छन्तु वा । यद्वा—घृताहुतिभावं

* सं. ३-५-४.[2]

धस्सन्त्यग्ने याः पृथिव्यां बर्हिषि
सूर्ये याः । तास्ते गच्छन्त्वाहुतिं
घृतस्य देवायते यजमानाय शर्म ।
आशासानस्सुवीर्यꣳ रायस्पोषꣳ
स्वश्वियम् । बृहस्पतिना राया स्व-

न्ति । अग्ने । याः । पृथिव्याम् । बर्हिषि । सूर्ये । याः । ताः । ते । गच्छन्तु । आहुतिमित्या–हुतिम् । घृतस्य । देवायत इति देव–यते । यजमानाय । शर्म । [9]आशासान इत्या–शासानः । सुवीर्यमिति सु–वीर्यम् । रायः । पोषम् । स्वश्वियमिति सु–अश्वियम् । बृहस्पतिना । राया । स्वगाकृत इति

गच्छन्तु घृताहुतिवत्तव प्रीणयित्र्यस्सन्तु । 'तादौ च' इति गतेः प्रकृतिस्वरत्वम् । यथा देवायते देवान् कामयमानाय यजमानाय शर्म सुखं भवति तथा आहुतिभावं भजन्तामिति । देवशब्दात्क्यचि 'न छन्दसि' इतीत्वाभावः ॥

[9]पशौ यूपोपस्थानमन्त्रः—आशासान इति पथ्याबृहती ॥ आशासानः प्रार्थयमानः सुवीर्यं शोभनवीर्ययुक्तं रायः धनस्य पोषं पुष्टिम् । सत्वस्वरावुक्तौ । स्वश्वियं शोभनाश्वसमूहम् । 'केशाश्वाभ्याम्' इति छः, छान्दसं ह्रस्वत्वम् । बृहस्पतिना राया धनभूतेन धात्रा स्वगाकृतः स्वगः आत्मगामी तथाकृतः ।

गाकृतो मह्यं यजमानाय तिष्ठ ॥१८
सं त्वा नह्यामि पयसा घृतेन सं
त्वा नह्याम्यप ओषधीभिः । सं त्वा
नह्यामि प्रजयाऽहमद्य सा दीक्षिता
स्वगा-कृतः । मह्यम् । यजमानाय । तिष्ठ ॥१८॥

समानानामोषधीष्वेव पशून्मह्यं
यजमानायैकं च ॥ ५ ॥

[1]समिति । त्वा । नह्यामि । पयसा । घृतेन । समिति । त्वा । नह्यामि । अपः । ओषधीभिरित्योषधि-भिः । समिति । त्वा । नह्यामि । प्रजयेति प्र-जया । अहम् । अद्य । सा । दीक्षिता ।

छान्दसो डाच्, 'ऊर्यादिच्विडाचश्च' । यजमानाय मह्यं तिष्ठ ॥

इति तृतीये पञ्चमे पञ्चमोनुवाकः

---

[1]पत्नीं संनह्यति—हे पत्नि त्वां संनह्यामि पयसा घृतेन च सह बध्नामि अनेन योक्त्रसंनहनेन हेतुना । किं च—अद्भिरोषधीभिश्च त्वां संनह्यामि । अप इति व्यत्ययेन तृतीयार्थे द्वितीया । यद्वा—त्वत्सन्नहनेन हेतुना अप ओषधीभिस्सह सन्नह्यामि । किं च—त्वां प्रजया पुत्रादिकयाऽहमद्य इदानीं सन्नह्यामि । सा त्वमनेन दीक्षिता अस्मे अस्मभ्यं वाजमन्नं सनवः

सनवो वाजमस्मे । प्रैतु ब्रह्मणस्प-
त्नी वेदिं वर्णेन सीदतु । अथाहमनु-
कामिनी स्वे लोके विशा इह । सु-
प्रजस्त्वा वयꣳ सुपत्नीरुप सेदिम ।

सनवः । वाजम् । अस्मे इति । [2]प्रेति । एतु । ब्रह्मणः । पत्नी । वेदिम् । वर्णेन । सीदतु । अथ । अहम् । अनुकामिनीत्यनु-कामिनी । स्वे । लोके । विशै । इह । [3]सुप्रजस इति सु-प्रजसः । त्वा । वयम् । सुपत्नीरिति सु-पत्नीः । उपेति । सेदिम ।

संविभज देहि वा । यद्वा—अस्मदर्थं हविर्लक्षणमन्नं साधय ॥

[2]दीक्षणीयायां पत्नीं प्राचीमुदानयन् वाचयति—प्रैवित्यनुष्टुभा ॥ प्रैतु गच्छतु । ब्रह्मणः परिबृढस्यास्य यज्ञस्य पत्नी पालयित्री वेदिं प्राप्नोतु । 'षष्ठ्याः पतिपुत्र' इति सत्वम् । प्राप्य च वर्णेन रूपेण सीदतु उपविशतु आत्मानमेवाह, पुरुषव्यत्ययो वा । अथानन्तरमहं अनुकामिनी. अनुक्रमेण यज्ञफलं यज्ञस्यापि धनसंपादनद्वारेण कामयमाना स्वे लोके बर्हिस्थाने जघनेन गार्हपत्यं विशै उपविशानि । कारकस्य सर्वान्यत्वात् लोपे सति निघाताभावः । इहास्मिन् कर्मणि ॥

[3]तत्रोपसीदति—सुप्रजस इत्यनुष्टुभा ॥ व्याख्यातेयं 'प्रत्युष्टम्'* इत्यत्र । सुप्रजसः शोभनपुत्रादिकाः सुपत्नीः शोभनभर्तृकाश्च वयं त्वामुपसेदिम उपसीदामहे । अग्ने सपत्नानां शत्रूणां दम्भनं हिं-

---

*सं. १-१-१२.[7]

अग्ने॑ सपत्नद॒म्भन॒मद॑ब्धासो॒ अदा॑भ्यम् । इ॒मं वि॒ष्या॑मि॒ वरु॑णस्य॒ पा॒शम् ॥ १९ ॥ यमब॑ध्नीत सावि॒ता सु॒केत॑ः । धा॒तुश्च॒ योनौ॑ सुकृ॒तस्य॑ लो॒के स्यो॒नं मे॒ स॒ह पत्या॑ करोमि। प्रेह्यु॑देह्यृ॒तस्य॑ वा॒मीर॒न्वग्नि॒स्तेऽग्रे॑ न-

अग्ने॑ । सपत्नदम्भ॒नमिति॑ सपत्न–दम्भ॑नम् । अद॑ब्धासः । अदा॑भ्यम् । [4]इ॒मम् । वीति॑ । स्या॒मि॒ । वरु॑णस्य । पा॒श॑म् ॥ १९ ॥ यम् । अब॑ध्नीत । सावि॒ता । सु॒केत॒ इति॑ सु–केत॑ः । धा॒तुः । च॒ । योनौ॑ । सु॒कृ॒तस्येति॑ सु–कृ॒तस्य॑ । लो॒के । स्यो॒नम् । मे॒ । स॒ह । पत्या॑ । क॒रो॒मि॒ । [5]प्रेति॑ । इ॒हि॒ । उ॒दे-हीत्यु॑त्–एहि॑ । ऋ॒तस्य॑ । वा॒मीः । अन्विति॑ । अ॒-

सितारं अदाभ्यं केन चिदप्यनुपहिंसितव्यम् । अदब्धासः त्वत्प्रसादेन केनचिदप्यनुपहिंस्या वयम् ॥

[4]इमं विष्यामीति योक्त्रविमोचनमन्त्रोपि तत्रैव व्याख्यातः* त्रिष्टुप् ॥ इमं विष्यामि वरुणस्य वारकस्य पाशं विष्यामि विश्लथयामि, यमबध्नीत सविता सुकेतः सुज्ञानः । धातुरपि कारणभूते सुकृतस्य फलस्थाने स्योनं सुखं मम पत्या सह करोमीति ॥

[5]पन्नेजनीहस्तां पत्नीमुदानयन् वाचयति—प्रेहीति यजुरन्तमानु-

*सं. १-१-१०,

यत्वदितिर्मध्यं ददताꣳरुद्रावसृष्टाऽ-
सि युवा नाम मा मा हिꣳसीर्व-
सुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वे-

ग्निः । ते । अग्रम् । नयतु । अदितिः । मध्यम् । ददताम् । रुद्रावसृष्टेति रुद्र–अवसृष्टा । असि । युवा । नाम । मा । मा । हिꣳसीः । [6–7]वसुभ्य इति वसु–भ्यः । रुद्रेभ्यः । आदित्येभ्यः । विश्वे-

---

ष्टुभम् ॥ हे पत्नि प्रेहि प्रथमं गच्छ, उदेह्युदयं भज यद्वा—उत्कृष्टं गच्छ, प्रथमगामित्वात् । ऋतस्य यज्ञस्य वामीः वननीयेन तद्वती । 'छन्दसीवनिपौ' अग्निस्ते अग्रं अग्रचं मार्गं अनुपश्चान्नयतु सेवताम् । अदितिस्तु मध्यं मार्गस्य मध्यदेशं ददतां धारयतु । व्यत्ययेन द्विवचनम् । धात्वाकारस्य वा छान्दसं ह्रस्वत्वम् । रुद्रैरवसृष्टाऽसि अनुज्ञाताऽसि त्वम् । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् । अनुज्ञाकरणमाह—युवा युवतिर्नाम त्वमसि तस्मादहिंस्याऽसि । युवशब्दात् 'यूनः' इति तिप्रत्ययापवादोसौ प्रत्ययः छान्दसः, अत एवान्तोदात्तत्वम् । मां मा हिंसीः यज्ञस्यानिवृत्तौ अहं हिंसितस्स्याम् । अत एनामादाय प्रेहीति ॥

[6–7]पन्नेजनीनां ग्रहणसाद न मन्त्रौ वसुभ्य इत्यादिकौ उष्णिहौ, मध्ये अष्टाक्षरः पादः, अभित एकादशाक्षरौ । 'यज्ञाय वः'

भ्यो वो देवेभ्यः पत्नेजनीर्गृह्णामि
यज्ञाय वः पत्नेजनीस्सादयामि वि-
श्वस्य ते विश्वावतो वृष्णियावतः
॥ २० ॥ तवाग्ने वामीरनु संदृशि

भ्यः । वः । देवेभ्यः । पत्नेजनीरिति पत्-नेजनीः । गृह्णामि । यज्ञाय । वः । पत्नेजनीरिति पत्-नेजनीः । सादयामि । [8]विश्वस्य । ते । विश्वावत इति विश्व-वतः । वृष्णियावत इति वृष्णिय-वतः ॥ तव । अग्ने । वामीः । अन्विति । सन्दृशीति सं-

---

इति मन्त्रयोरन्तः । गृह्णामीति सादयामीति चेति । सादने वसुभ्य इत्याद्यनुषज्यते ॥

[8]पत्न्यास्सदसि सादनमुद्गात्रा संख्याप्य वाचयति—विश्वस्य त इति द्वाभ्याम् ॥ तत्र प्रथमाऽनुष्टुप्, तवान्तो द्वितीयः पादः सन्दृश्यन्तः तृतीयः, धिषीयान्तश्चतुर्थः । द्वितीया शाक्करी पङ्क्तिर्वा । हे अग्ने । पादादावपि व्यत्ययेन निघातः । तत् विश्वस्य विश्वात्मनो विश्वावतः विश्वस्वामित्वात्तद्वतः । छान्दसं संहितायां दीर्घत्वम् । वृष्णियावतः वृष्णियं वीर्यं मर्माणि तद्वतः । पूर्ववद्दीर्घत्वम् । ईदृशस्य तव सन्दृशि सन्दर्शने उद्गातुरभेदोपचारः । वामीः वननीयाः पत्नेजनीरिमा आपः । गौरादित्वान्ङीष् । विश्वा विश्वानि रेतांसि विकारजातानि । तद्धेतुत्वात्तच्छब्द्यम् । ईदृशीरिमा अनुधिषीय तव सन्दर्शनलाभानन्तरं त्वां धारयामि तेनैव

विश्वा रेताꣳसि धिषीयागन्देवान्
यज्ञो नि देवीर्देवेभ्यो यज्ञमशिषन्न-
स्मिन्थ्सुन्वति यजमान आशिष-
स्स्वाहाकृतास्समुद्रेष्ठा गन्धर्वमा तिं-

दृशिं । विश्वा । रेताꣳसि । धिषीय । [9]अगन्न् । देवान् । यज्ञः । नीतिं । देवीः । देवेभ्यः । यज्ञम् । अशिषन्न् । अस्मिन्न् । सुन्वति । यजमाने । आशिष इत्याशिषः । स्वाहाकृता इति स्वाहाकृताः । समुद्रेष्ठा इति समुद्रे-स्थाः । गन्धर्वम् ।

हेतुना । धि धारणे, आशिषि लिङ्, 'सुधितवसुधित' इति निपात्यते ॥

[9]अथ द्वितीया—अगन्देवानिति ॥ यज्ञो देवान् न्यगन् निष्कृष्टमगन्, अभिमतानां साकल्येन संपादनं निष्कर्षः । गमेश्छान्दसे लुङि 'मन्त्रे घस' इत्यादिना च्लेर्लुक् । ततो यज्ञस्ताटक्स्वभावः । देवीः देव्यः आपः देवेभ्यः देवार्थं अशिषन् देवानां विधेयमकुर्वन् । 'सर्तिशास्त्यर्तिभ्यश्च' इत्यङ्, 'शास इदङ्हलोः' इतीत्वम् । किं च—अस्मिन् सुन्वति सोमेन यष्टरि यजमाने या आशिषः प्रार्थनीया अर्थाः, ता अप्यशिषन्नित्येव । यथाऽस्मिन् साकल्येन संपद्यन्ते तथा कृतवत्यः । तस्माद्यूयमपि स्वाहाकृताः यागोपयुक्ताः । ऊर्यादित्वेन गतित्वात् 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । समुद्रेष्ठाः समुद्रवन्ति अस्मादाप इति समुद्र

ष्टानु । वातस्य पत्मन्निड ई-
डिताः ॥ २१ ॥
वषट्कारो वै गायत्रियै शिरोच्छिन-
त्तस्यै रसः परोऽपतत्स पृथिवीं प्रा-
एति । तिष्ठत । अनु । वातस्य । पत्मन् । इडः ।
ईडिताः ॥ २१ ॥

पाशं वृष्णियावतस्त्रिꣳशच्च ॥ ६ ॥

[1]वषट्कार इति वषट्-कारः । वै । गायत्रियै ।
शिरः । अच्छिनत् । तस्यै । रसः । परेति । अप-
तत् । सः । पृथिवीम् । प्रेति । अविशत् । सः ।

आदित्यः तत्र तिष्ठन्तीति 'सुपि स्थः' इति कः, 'तत्पुरुषे कृति बहुलम्' इति सप्तम्या अलुक् । अनु अनन्तरं च गन्धर्व गवामुदकानां धारकं आतिष्ठत वर्तध्वम् । ततो वातस्य पत्मन् पतनस्थाने आकाशे । पतेरौणादिको मनिन् । तत्र वृष्टिद्वारेणागत्येत्यर्थः । इडः अन्नान्योषधीरातिष्ठत । व्यत्ययेन शस उदात्तत्वम्, व्यञ्जनविकारश्च । ईडितः स्तुतः सर्वैः प्रशंसनीयः ॥

इति तृतीये पञ्चमे षष्ठोनुवाकः.

---

[1]अथ स्तुचां लक्षणार्थं ब्राह्मणं—वषट्कार इत्यादि ॥ स्तुत्यर्थमुत्प्रेक्षेयं क्रियते । वषट्क्रियतेऽनेनेति वषट्कारः, वौषट्शब्दः,

विंशत्स खादिरोभवद्यस्यं खादिर-
स्स्रुवो भवंति छन्दसामेव रसेनावं
द्यति सरसा अस्याहुतयो भवन्ति
तृतीयस्यामितो दिवि सोमं आ-
सीत्तं गायत्र्याऽहरत्तस्यं पर्णमच्छि-
द्यत तत्पर्णोभवत्तत्पर्णस्यं पर्णत्वं
यस्यं पर्णमयीं जुहूः ॥ २२ ॥ भ-

खदिरः । अभवत् । यस्यं । खादिरः । स्रुवः । भ-
वंति । छन्दसाम् । एव । रसेन । अवेति । द्यति ।
सरसा इति स–रसाः । अस्य । आहुतय इत्या–
हुतयः । भवन्ति । [2]तृतीयस्याम् । इतः । दिवि ।
सोमः । आसीत् । तम् । गायत्री । एति । अह-
रत् । तस्यं । पर्णम् । अच्छिद्यत । तत् । पर्णः ।
अभवत् । तत् । पर्णस्यं । पर्णत्वमिति पर्ण–त्वम् ।
यस्यं । पर्णमयीति पर्ण–मयीं । जुहूः ॥ २२ ॥

थाथादिनोत्तरपदान्तोदात्तात्वम् । खादिर इति । बिल्वादित्वादण् । छन्दसामिति । सर्वच्छन्दःप्रकृतित्वाद्गायत्र्याः । गतमन्यत् ॥

[2]तृतीयस्यां दिवि इतः तृतीये लोके द्युसंज्ञे सोम आसीत् । पर्णं पत्रं सोमाभरणं रभसेनाच्छिद्यत । पर्णमयीति । 'नित्यं वृद्धशरादिभ्यः' इति मयट् । सौम्या इति । सोममाहरन्त्याः

वंति सौम्या अस्याहुतयो भवन्ति जुषन्तेऽस्य देवा आहुतीर्देवा वै ब्रह्मन्नवदन्त तत्पर्ण उपाशृणोत्सुश्रवा वै नाम यस्य पर्णमयी जुहूर्भवति न पापꣳ श्लोकꣳ शृणोति ब्रह्म वै पर्णो विण्मरुतोन्नं विण्मारुतोश्वत्थो यस्य

भवंति । सौम्याः । अस्य । आहुतय इत्या–हुतयः । भवन्ति । जुषन्ते । अस्य । देवाः । आहुतीरित्या–हुतीः । [3]देवाः । वै । ब्रह्मन्न् । अवदन्त । तत् । पर्णः । उपेति । अशृणोत् । सुश्रवा इति सु–श्रवाः । वै । नाम । यस्य । पर्णमयीति पर्ण–मयी । जुहूः । भवंति । न । पापम् । श्लोकम् । शृणोति । [4]ब्रह्म । वै । पर्णः । विट् । मरुतः । अन्नम् । विट् । मारुतः । अश्वत्थः । यस्य । पर्णमयीति पर्ण–मयी ।

गायत्र्याः ऋक्पर्णात्मिकया जुह्वा हुतत्वात् । 'सोमाङ्चण्' । अस्याहुतीर्देवा जुषन्ते प्रीयमाणा भजन्ते ॥

[3]ब्रह्मन् ब्रह्मविषये अवदन्त वादं कृतवन्तः । आसने आत्मनेपदम् । ब्रह्मवादश्रवणं पूरणवर्णात्मकजुहूसंबन्धेन पापशब्दानामश्रवणम् ॥

[4]ब्रह्म वै पर्ण इति ॥ ब्राह्मणजातिः, तदेव पर्णः; प्रशस्तत्वसामान्यात् । विट् वैश्यजातिः, सा मरुतः; कृष्यादिप्रया-

पर्णमयी जुहूर्भवत्याश्वत्थ्युपभृद्ब्रह्म-
णैवान्नमव रुन्धेऽथो ब्रह्म ॥ २३ ॥
एव विशयध्यूहति राष्ट्रं वै पर्णो वि-
डश्वत्थो यत्पर्णमयी जुहूर्भवत्याश्व-
त्थ्युपभृद्राष्ट्रमेव विशयध्यूहति प्र-
जापतिर्वा अजुहोत्सा यत्राहुतिः प्र-
त्यतिष्ठत्ततो विकङ्कत उदतिष्ठत्ततः

जुहूः । भवति । आश्वत्थी । उपभृदित्युप–भृत् । ब्रह्मणा । एव । अन्नम् । अवेति । रुन्धे । अथो इति । ब्रह्म ॥२३॥ एव । विशि । अधीति । ऊहति । राष्ट्रम् । वै । पर्णः । विट् । अश्वत्थः । यत् । पर्णमयीति पर्ण–मयी । जुहूः । भवति । आश्वत्थी । उपभृदित्युप–भृत् । राष्ट्रम् । एव । विशि । अधीति । ऊहति । [5]प्रजापतिरिति प्रजा–पतिः । वै । अजुहोत् । सा । यत्र । आहुतिरित्या–हुतिः । प्रत्यतिष्ठदिति प्रति–अतिष्ठत् । ततः । विकङ्कत इति वि–कङ्कतः । उदिति । अतिष्ठत् । ततः । प्रजा

सबहुलत्वात्, विशोन्नत्वात् । अपि च—विश उपरि ब्रह्माध्यूहति स्थापयति ॥

[5]प्रजापतिर्वा इत्यादि ॥ गतम् । वैकङ्कती । पूर्ववदत्र ॥

प्रजा असृजत यस्य वैकङ्कती ध्रुवा
भवति प्रत्येवास्याहुतयस्तिष्ठन्त्यथो
प्रैव जायत एतद्वै स्रुचाꣳ रूपं य-
स्यैवꣳरूपास्स्रुचो भवन्ति सर्वाण्ये-
वैनꣳ रूपाणि पशूनामुपं तिष्ठन्ते
नास्यापंरूपमात्मञ्जायते ॥ २४ ॥

इति प्र—जाः । असृजत । यस्य । वैकङ्कती । ध्रु-
वा । भवति । प्रतीति । एव । अस्य । आहुतय
इत्या—हुतयः । तिष्ठन्ति । अथो इति । प्रेति । एव ।
जायते । [6]एतत् । वै । स्रुचाम् । रूपम् । यस्य ।
एवꣳरूपा इत्येवं—रूपाः । स्रुचः । भवन्ति । स-
र्वाणि । एव । एनम् । रूपाणि । पशूनाम् । उपे-
ति । तिष्ठन्ते । न । अस्य । अपरूपमित्यप—रूपम् ।
आत्मन् । जायते ॥ २४ ॥

जुहूरथो ब्रह्म स्रुचाꣳ सप्तदश च ॥ ७ ॥

[6]स्रुचामिति ॥ स्रुक्साहचर्यात् स्रुवोपि स्रुगिति व्यपदिश्यते। नास्येति । अस्य यजमानस्य आत्मन् शरीरे अपरूपं रूपशून्यं न जायते रूपवानेव भवतीति ॥

इति तृतीये पञ्चमे सप्तमोनुवाकः.

उपयामगृहीतोसि प्रजापतये त्वा
ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि द-
क्षाय दक्षवृधे रातं देवेभ्योग्निजिह्वेभ्य-
स्त्वर्तायुभ्य इन्द्रज्येष्ठेभ्यो वरुणरा-

[1]उपयामगृहीत इत्युपायम—गृहीतः । असि । प्रजापतय इति प्रजा—पतये । त्वा । ज्योतिष्मते । ज्योतिष्मन्तम् । गृह्णामि । दक्षाय । दक्षवृध इति दक्ष—वृधे । रातम् । देवेभ्यः । अग्निजिह्वेभ्य इत्यग्नि—जिह्वे-भ्यः । त्वा । ऋतायुभ्य इत्यृतायु—भ्यः । इन्द्रज्येष्ठेभ्य इतीन्द्र—ज्येष्ठेभ्यः । वरुणराजभ्य इति वरुणराज—

---

[1]प्राजापत्यं दधिग्रहं गृह्णाति—उपयामगृहीतोसीत्यादि ॥ 'इयं वा उपयामः'* तयैव गृहीतोसि । 'तृतीया कर्मणि' इति पूर्वपद-प्रकृतिस्वरत्वम् । प्रजापतये ज्योतिष्मते दीप्तिमते हे दधिग्रह त्वां दीप्तिमन्तं गृह्णामि । दक्षाय सर्वोत्पादनसमर्थाय दक्षवृधे दक्षयोरुत्साहवतोरध्वर्युयजमानयोर्वर्धयित्रे; अन्तरितत्वादिदोषापनय-नात् । 'यां वा अध्वर्युश्च यजमानश्च देवतामन्तरितः'† इति ब्राह्मणम्। वृधेर्ण्यन्तात्क्विप्, 'बहुलमन्यत्रापि' इति णिलुक् । ग्रहो विशे-ष्यते—रातं दत्तं देवेभ्यः । प्रजापतेस्सर्वदेवतात्मकत्वात् तस्मै गृहीतं सर्वदेवेभ्यो दत्तं भवतीति । देवा विशेष्यन्ते—अग्निजिह्वे-भ्यः अग्निः जिह्वास्थानीयो येषां तेभ्यः । ऋतायुभ्यः ऋतं

---

*सं. ६-५-८. †सं. ३-५-९.1

जभ्यो वातापिभ्यः पर्जन्यात्मभ्यो
दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वा-
ऽपेन्द्र द्विषतो मनोप जिज्यासतो ज-

भ्यः । वातापिभ्य इति वातापि—भ्यः । पर्जन्या-
त्मभ्य इति पर्जन्यात्म—भ्यः । [2]दिवे । त्वा । अ-
न्तरिक्षाय । त्वा । पृथिव्यै । त्वा । [3]अपेति । इन्द्र ।
द्विषतः । मनः । अपेति । जिज्यासतः । जहि ।

यज्ञः सत्यं वा आयुर्येषां तेभ्यः । इन्द्रज्येष्ठेभ्यः इन्द्रो ज्येष्ठः श्रेष्ठो येषां तेभ्यः । वरुणराजभ्यः वरुणो राजा येषां तेभ्यः। वातापिभ्यः वातवद्व्याप्नुवद्भ्यः वातमाविश्य व्याप्नुवद्भ्यः अमूर्तेभ्यः पितृभ्यः । उक्तमुत्तरपदाद्युदात्तत्वम् । पर्जन्यात्मभ्यः वर्षणस्वभावेभ्यः । एभ्यः सर्वेभ्यो यो दत्तो भवति, तं त्वां प्रजापतये गृह्णामीति ॥

[2]आदायोत्तिष्ठति—दिव इत्यादि ॥ दिवाद्यर्थं त्वामुद्यच्छामीति शेषः । 'ऊडिदम्' इति दिवश्चतुर्थ्या उदात्तत्वम् । 'उदात्तयणः' इति घथिव्याः ॥

[3]पूर्वया द्वारा निष्क्रामति—अपेन्द्रेति पुरोष्णिहा ॥ तृतीयस्याष्टाक्षरत्वात्, (द्वितीयस्य) । हे इन्द्र द्विषतः योस्मान् द्वेष्टि भवन्तं वा, तस्य मनः अपजहि अपगमय नाशय । किञ्च—जिज्यासतः योस्मान् क्षपयितुमिच्छति, तस्य च मनोपजहि । तानेन पापेन जहि । यद्वा—जिज्यासतः अस्माकं शत्रूनपजहि

ह्यप॒ यो नोऽरा॑तीयति॒ तं ज॑हि प्रा॒णा-
यं॑ त्वाऽपा॒नायं॑ त्वा व्या॒नायं॑ त्वा स॒ते
त्वाऽस॑ते त्वाऽद्र॒यस्त्वौष॑धीभ्यो वि-
श्वे॑भ्यस्त्वा भू॒तेभ्यो॒ यतः॑ प्र॒जा अ-
क्खि॑द्रा अजा॑यन्त॒ तस्मै॑ त्वा प्र॒जा-

अपे॑तिं । यः । नः॒ । अ॒रा॒तीय॑तिं । तम् । ज॒हि॒ । [4]प्रा॒णायेति॑ प्र॒-अ॒नाय॑ । त्वा॒ । अ॒पा॒नायेत्य॑प॒-अ॒-नाय॑ । त्वा॒ । व्या॒नायेति॑ वि॒-अ॒नाय॑ । त्वा॒ । स॒ते । त्वा॒ । असं॑ते । त्वा॒ । अ॒द्र॒य इत्य॑त्-भ्यः । त्वा॒ । ओष॑-धीभ्य॒ इत्योष॑धि-भ्य॒ः । विश्वे॑भ्यः । त्वा॒ । भू॒तेभ्य॑ः । यत॑ः । प्र॒जा इति॑ प्र॒-जाः । अक्खि॑द्राः । अजा॑-यन्त । तस्मै॑ । त्वा॒ । प्र॒जाप॑तय॒ इति॑ प्र॒जा-प॒त॒ये॒ ।

जिज्यासतश्च मनोऽपजहि । अरातीयति अदानमिच्छति योस्मभ्यं न किञ्चिदपि दातुमिच्छति, तं चादानशीलं शत्रुं जहि । अरातिशब्दात् 'छन्दसि परेच्छायाम्' इति क्यच् ॥

[4]अथ जुहोति—प्राणाय त्वेत्यादिभिः । सर्वे निगदसिद्धाः । प्राणादयश्शब्दा व्युत्पादिताः* । सते । 'शतुरनुमः' इति चतुर्थ्या उदात्तत्वम् । अद्रयः । 'ऊडिदम्' इति । अक्खिद्रा अदीनाः ऊर्जिताः अजायन्त । खिद दैन्ये, औणादिको रक्प्रत्ययः, छान्दसो वर्णोपजनः । तस्मै त्वा प्रजापतये विभूदात्रे विभूनां

---

*सं. 1-1-6.[8]

पतये विभूदाव्ने ज्योतिष्मते ज्यो-
तिष्मन्तं जुहोमि ॥ २५ ॥
यां वा अध्वर्युश्च यजमानश्च देव-
तामन्तरितस्तस्या आ वृश्चयेते प्रा-
जापत्यं दधिग्रहं गृह्णीयात्प्रजापति-

विभूदाव्न इति विभु–दाव्ने । ज्योतिष्मते । ज्योतिष्मन्तम् । जुहोमि ॥ २५ ॥

ओषधीभ्यश्चतुर्दश च ॥ ८ ॥

[1]याम् । वै । अध्वर्युः । च । यजमानः । च । देवताम् । अन्तरित इत्यन्तः–इतः । तस्यै । एति । वृश्चयेते इति । प्राजापत्यमिति प्राजा–पत्यम् । दधिग्रहमिति दधि–ग्रहम् । गृह्णीयात् । प्रजापति-

---

महतामर्थानां दात्रे । 'आतो मनिन्' इति वनिप् 'अन्येषामपि दृश्यते' इति संहितायां पूर्वपदस्य दीर्घत्वम् । ज्योतिष्मत इत्यादि । व्याख्यातम्* । तादृशाय प्राणाद्यर्थं त्वां जुहोमीति ॥

इति तृतीये पञ्चमे अष्टमोनुवाकः.

---

[1]अथास्य दधिग्रहस्य ब्राह्मणम्—यां वा इत्यादि ॥ यां देवतामन्तरितः अन्तर्हितां कुरुतः, लुप्तभागत्वात् । तस्यै तस्या-

---

* सं. ३-५-८.[1]

स्सर्वा देवता देवताभ्य एव नि ह्नु-
वाते ज्येष्ठो वा एष ग्रहाणां यस्यै-
ष गृह्यते ज्यैष्ठ्यमेव गच्छति सर्वा-
सां वा एतद्देवतानाꣳ रूपं यदेष ग्र-
हो यस्यैष गृह्यते सर्वाण्येवैनꣳ रू-

रिति प्रजा—पतिः । सर्वाः । देवताः । देवताभ्यः । एव । नीति । ह्नुवाते इति । [2]ज्येष्ठः । वै । एषः । ग्रहाणाम् । यस्य । एषः । गृह्यते । ज्यैष्ठ्यम् । एव । गच्छति । सर्वासाम् । वै । एतत् । देवता-नाम् । रूपम् । यत् । एषः । ग्रहः । यस्य । एषः । गृह्यते । सर्वाणि । एव । एनम् । रूपाणि । पशू-

---

स्सकाशादेव तौ आवृश्चेते हियेते । तत्परिहारार्थं प्राजापत्यं दधिग्रहं गृह्णीयात् । प्रजापतिस्सर्वदेवतात्मकः सर्वदेवतोपकारार्थ-मेवान्तरायस्य निह्नवः कृतो भवति योध्वर्युयजमानाभ्यामेकस्यै देवतायै हविरन्तरायः कृतः, सर्वदेवतानां दधिग्रहद्वारेण हविर्ला-भहेतुस्सम्पन्न इति ॥

[2]ज्येष्ठो वा इत्यादि ॥ ज्येष्ठो वृद्धतमः । 'वृद्धस्य च' इति ज्यादेशः । ज्येष्ठकनिष्ठयोर्वृद्धत्वं ज्यैष्ठ्यम् । गुणवचने ष्यञ् । सर्वासामित्यादि । गतम् ॥

पाणिं पशूनामुप तिष्ठन्त उपया-
मगृहीतः ॥ २६ ॥ असि प्रजाप-
तये त्वा ज्योतिष्मते ज्योतिष्मन्तं
गृह्णामीत्याह ज्योतिरेवैनꣳ समा-
नानां करोत्यग्निजिह्वेभ्यस्त्वर्तायुभ्य
इत्याहैतावतीर्वै देवतास्ताभ्य एवै-
नꣳ सर्वाभ्यो गृह्णात्यपेन्द्र द्विषतो म-
न इत्याह भ्रातृव्यापनुत्यै प्राणाय

नाम्। उपेति। तिष्ठन्ते। [3]उपयामगृहीत इत्युप-
याम-गृहीतः ॥ २६ ॥ असि। प्रजापतय इति
प्रजा-पतये। त्वा। ज्योतिष्मते। ज्योतिष्मन्तम्।
गृह्णामि। इति। आह। ज्योतिः। एव। एनम्।
समानानाम्। करोति। अग्निजिह्वेभ्य इत्यग्नि-
जिह्वेभ्यः। त्वा। ऋतायुभ्य इत्यृतायु-भ्यः।
इति। आह। एतावतीः। वै। देवताः। ताभ्यः।
एव। एनम्। सर्वाभ्यः। गृह्णाति। अपेति। इन्द्र।
द्विषतः। मनः। इति। आह। भ्रातृव्यापनुत्या
इति भ्रातृव्य-अपनुत्यै। प्राणायेति प्र-अनाय।

[3]अथ मन्त्रपदानि व्याचष्टे—उपयामगृहीत इति ॥ ज्योतिः द्युतिमन्तं समानानां मध्ये यजमानं करोति। एतावतीः एता-

त्वाऽपानाय त्वेत्याह प्राणानेव यजमाने दधाति तस्मै त्वा प्रजापतये विभूदावन्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमि ॥२७॥ इत्याह प्रजापतिस्सर्वा देवतास्सर्वाभ्य एवैनं देवताभ्यो जुहोत्याज्यग्रहं गृह्णीयात्तेत्वा । अपानायेत्यप–अनाय । त्वा । इति । आह । प्राणानिति प्र–अनान् । एव । यजमाने । दधाति । तस्मै । त्वा । प्रजापतय इति प्रजा–पतये । विभूदावन्न इति विभु–दावन्ने । ज्योतिष्मते । ज्योतिष्मन्तम् । जुहोमि ॥ २७ ॥ इति । आह । प्रजापतिरिति प्रजा–पतिः । सर्वाः । देवताः । सर्वाभ्यः । एव । एनम् । देवताभ्यः । जुहोति । [4]आज्यग्रहमित्याज्य–ग्रहम् । गृह्णीयात् । तेजस्कामस्ये-

---

वत्यः या अग्निजिह्वाद्याः पर्जन्यान्ताः एतावत्प्रमाणाः भ्रातृव्याभिभूत्यै । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम् ॥

[4]आज्यग्रहमित्यादयः काम्या विधयः । तेजस्कामस्य । 'शीलिकामि' इत्यादिना णः, पूर्वपदप्रकृतिस्वरत्वम्, 'अतः कृकमि' इत्यादिना सत्वम् । तेजो वा इति । तद्धेतुत्वात्ताच्छब्द्यम् । एवं

जꣳस्कामस्य तेजो वा आज्यं तेज-
स्व्येव भवति सोमग्रहं गृह्णीयाद्ब्रह्म-
वर्चसकामस्य ब्रह्मवर्चसं वै सोमो
ब्रह्मवर्चस्येव भवति दधिग्रहं गृह्णी-
यात्पशुकामस्योग्वै दध्यूर्क्पशवः ऊ-
र्जैवास्मा ऊर्जं पशूनव रुन्धे ॥२८॥

ति तेजः—कामस्य । तेजः । वै । आज्यम् । तेजस्वी । एव । भवति । सोमग्रहमिति सोम—ग्रहम् । गृह्णीयात् । ब्रह्मवर्चसकामस्येति ब्रह्मवर्चस—कामस्य । ब्रह्मवर्चसमिति ब्रह्म—वर्चसम् । वै । सोमः । ब्रह्मवर्चसीति ब्रह्म—वर्चसी । एव । भवति । दधिग्रहमिति दधि—ग्रहम् । गृह्णीयात् । पशुकामस्येति पशु—कामस्य । ऊर्क् । वै । दधि । ऊर्क् । पशवः । ऊर्जा । एव । अस्मै । ऊर्जम् । पशून् । अवेति । रुन्धे ॥ २८ ॥

उपयामगृहीतो जुहोमि त्रिचत्वारिꣳशच्च ॥९॥

सर्वत्र । 'सावेकाचः' इत्यूर्जस्तृतीयाया उदात्तत्वम् । अस्मा इत्यन्वादेशेऽशनुदात्तः । 'बर्हिषो बर्हिषि गृह्णीयात् । अंशूनुपसंगृह्य सोमं गृह्णीयात्' इत्याचार्याः ॥

इति तृतीये पञ्चमे नवमोनुवाकः.

त्वे क्रतुमपि वृञ्जन्ति विश्वे द्विर्यदेते त्रिर्भवन्त्यूमाः । स्वादोस्स्वादीय-स्स्वादुना सृजा समत ऊषु मधु मधु-

[1]त्वे इति । क्रतुम् । अपीति । वृञ्जन्ति । विश्वे । द्विः । यत् । एते । त्रिः । भवन्ति । ऊमाः । स्वादोः । स्वादीयः । स्वादुना । सृज । समिति । अतः । उ । स्विति । मधु । मधुना । अभीति ।

---

[1]अथ तृतीयेऽह्नि प्राजापत्यमतिग्राह्यं गृह्णाति—त्वे क्रतुमपि वृञ्जन्तीत्येकां त्रिष्टुभमनुद्रुत्य उपयामगृहीतोसीति यजुषा ॥ त्वे तव । 'सुपां सुलुक्' इति शे आदेशः । क्रतुं कर्म पूजादिकं विश्वे सर्वेऽपि वृञ्जन्ति सकृदनुष्ठाय संस्थापयन्ति । तत्र द्विरनुष्ठानं, तेनैते स्मः अस्मदादीनां विलक्षणानां यज्ञकर्मणि वर्तमानानां सः स्वभाव इति । ये त्रिरनुतिष्ठन्ति ते ऊमाः अवितारस्सर्वस्य अस्मत्तोपि विलक्षणाः देवा भवन्ति, देवानां स स्वभाव इति । तस्मादस्माभिः द्वितीयः प्राजापत्यग्रहो गृह्यते इति । त्रिरिति । एकवाक्ये पदात्परत्वाभावाद्भवन्तीति न निहन्यते । अवतेरौणादिके मत्प्रत्यये 'ज्वरत्वर' इत्यादिना ऊठ् । तस्मात्स्वादोः पूर्वस्मात् प्राजापत्यात् स्वादीयः स्वादुतरमेतत् स्वादुना दध्यादिना संसृज संसृजामि । पुरुषव्यत्ययः, 'द्व्यचोतस्तिङः' इति संहितायां दीर्घत्वम् । अतस्त्वमपि हे प्रजापते ग्रह एव वा । मधु मधुनः फलस्य साधनमेतत्कर्म मधुना कर्मफलेन सुष्ठु अभियोधि आभिमुख्येन संसृज । 'वा छन्दसि' इत्यपित्त्वाभावेना-

**नाऽभि योधि । उपयामगृहीतोसि प्र-
जापतये त्वा जुष्टं गृह्णाम्येष ते यो-
निः प्रजापतये त्वा । प्राणग्रहान्गृ-
योधि । [2]उपयामगृहीत इत्युपयाम-गृहीतः । अ-
सि । प्रजापतय इति प्रजा-पतये । त्वा । जुष्टम् ।
गृह्णामि । [3]एषः । ते । योनिः । प्रजापतय इति
प्रजा-पतये । त्वा । [4]प्राणग्रहानिति प्राण-ग्रहान् ।**

ङित्त्वात् 'अङितश्च' इति धिभावः, 'उतो वृद्धिः' इति व्यत्ययेन न क्रियते, 'अन्येषामपि दृश्यते' इति उकारस्य संहितायां दीर्घत्वम्, 'सुञः' इति षत्वम् ॥

[2]उपयामगृहीतोसीत्यादि ॥ गतम्* ॥

[3]अनेन गृहीत्वा परिमृज्य सादयति—एष ते योनिः प्रजापतये त्वेत्यादि ॥ 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरत्वम् ॥

[4]प्राणग्रहान् गृह्णातीत्यादि ब्राह्मणम् ॥ एषां मन्त्रास्त्वनन्तरकाण्डे भविष्यन्ति । तत्रायं प्रयोगक्रमः—सन्नद्धस्य राज्ञो नवांशून् प्राच आयातयति 'अयं पुरोभुवः'† इति । 'अयं दक्षिणा विश्वकर्मा'† इति नव दक्षिणा आयातयति । 'अयं पश्चाद्विश्वव्यचाः'† इति नव प्रतीच आयातयति । 'इदमुत्तरात्सुवः'† इति नवोदीच आयातयति । 'इयमुपरि मतिः'† इति नवोपरिष्टात्प्रदक्षिणं पर्यायातयति । तानपानभृद्भिः प्रत्यूहति 'प्राची दिशाम्'‡ इति । वाचयति 'पितरः पितामहाः'‡ इति,

---

*सं १-७-१२.[12] †सं. ४-३-२. ‡सं. ४-३-३.

ह्यात्येतावद्वा अस्ति यावदेते ग्रहा-
स्स्तोमाश्छन्दाꣳसि पृष्ठानि दिशो
यावदेवास्ति तत् ॥२९॥ अव रुन्धे
ज्येष्ठा वा एतान्ब्राह्मणाः पुरा वि-
दामक्रन्तस्मात्तेषाꣳ सर्वा दिशोभि-

गृह्णाति । [5]एतावत् । वै । अस्ति । यावत् । एते ।
ग्रहाः । स्तोमाः । छन्दाꣳसि । पृष्ठानि । दिशः ।
यावत् । एव । अस्ति । तत् ॥ २९ ॥ अवेति ।
रुन्धे । [6]ज्येष्ठाः । वै । एतान् । ब्राह्मणाः । पुरा ।
विदाम् । अक्रन्न् । तस्मात् । तेषाम् । सर्वाः ।
दिशः । अभिजिता इत्यभि-जिताः । अभूवन्न् ।

ये पुरस्ताद्भवन्ति । अथ 'दक्षिणा दिशाम्'* इति ये दक्षिणतो भवन्ति । अथ 'प्रतीची दिशाम्'* इति ये पश्चाद्भवन्ति । अथ 'उदीची दिशाम्'* इति य उत्तरतो भवन्ति । अथ 'ऊर्ध्वा दिशाम्'* इति य उपरिष्टात्प्रदक्षिणं पर्याता भवन्ति ॥

[5]एतावद्वा इत्यादि ॥ एतावदेवास्मिन् जगति पुनरेते ग्रहाः स्तोमास्त्रिवृदादयः, छन्दांसि गायत्र्यादीनि, पृष्ठानि सामानि रथन्तरादीनि । एतदात्मका एते ग्रहाः एतावदेवास्ति सर्वमवरुन्धे ॥

[6]ज्येष्ठा वा इत्यादि ॥ गतम् । विदामक्रन् । विदेर्लुङि 'अभ्यु-

---

*सं. ४-३-३.

जिता अभूवन् यस्यैते गृह्यन्ते ज्यैष्ठ्यमेव गच्छत्यभि दिशो जयति पञ्च गृह्यन्ते पञ्च दिशस्सर्वास्वेव दिक्ष्वृध्नुवन्ति नवनव गृह्यन्ते नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधति प्रायणीये चोदयनीये च गृह्यन्ते गृह्यन्ते प्राणा इति प्राणग्रहा

यस्य । एते । गृह्यन्ते । ज्यैष्ठ्यम् । एव । गच्छति । अभीति । दिशः । जयति । [7]पञ्च । गृह्यन्ते । पञ्च । दिशः । सर्वासु । एव । दिक्षु । ऋध्नुवन्ति । नवनवेति नव-नव । गृह्यन्ते । नव । वै । पुरुषे । प्राणा इति प्र-अनाः । प्राणानिति प्र-अनान् । एव । यजमानेषु । दधति । [8]प्रायणीय इति प्र-अयनीये । च । उदयनीय इत्युत्-अयनीये । च । गृह्यन्ते । प्राणा इति प्र-अनाः । वै । प्राणग्रहा

त्सादयाम्' इत्यादौ आम्प्रत्ययो निपात्यते, 'मन्त्रे घस' इत्यादिना अनुप्रयुज्यमानस्य च्लेर्लुक् ॥

[7]पञ्च गृह्यन्ते इत्यादयो विधयः । नियतमेव नवांशवो गृह्यन्ते । नव वा इति । सप्त शीर्षण्याः, द्वाववाञ्चौ । यजमानेषु दधतीति । सत्रविषयत्वाद्बहुवचनम् ॥

[8]क पुनरेते ग्रहाः गृहीतव्या इत्याह—प्रायणीये चेत्यादि ॥

ह्यन्ते प्राणा वै प्राणग्रहाः ॥ ३० ॥
प्राणैरेव प्र यन्ति प्राणैरुद्यन्ति द-
शमेऽहन्गृह्यन्ते प्राणा वै प्राणग्र-
हाः प्राणेभ्यः खलु वा एतत्प्रजा
यन्ति यद्वामदेव्यं योनेश्च्यवते दश-
मेऽहन्वामदेव्यं योनेश्च्यवते यद्द-

इति प्राण–ग्रहाः ॥ ३० ॥ प्राणैरिति प्र–अनैः । एव । प्रयन्तीति प्र–यन्ति । प्राणैरिति प्र–अनैः । उदिति । यन्ति । दशमे । अहन् । गृह्यन्ते । [9]प्राणा इति प्र–अनाः । वै । प्राणग्रहा इति प्राण–ग्रहाः । प्राणेभ्य इति प्र–अनेभ्यः । खलु । वै । एतत् । प्रजा इति प्र–जाः । यन्ति । यत् । वामदेव्यमिति वाम–देव्यम् । योनेः । च्यवते । दशमे । अहन् । वामदेव्यमिति वाम–देव्यम् । योनेः । च्यवते । यत् । दशमे । अहन् । गृह्यन्ते । प्राणे-

---

एते प्रायणीयोदयनीययोरेव नियुक्ता गृह्यन्ते । 'दशमेहंस्तदु रात्रिसत्रेष्वग्निष्टोम आयातयति वा गृह्णीयादगदो हैव भवति' इत्याचार्याः ॥

[9]प्राणेभ्य इत्यादि ॥ प्राणेभ्यः प्रजायन्ति उपगच्छन्ति तदा, यदा वाम-

शमेऽहंन्गृह्यन्ते प्राणेभ्य एव तत्प्र-
जा न यन्ति ॥ ३१ ॥
प्र देवं देव्या धिया भरता जातवे-
दसम् । हव्या नो वक्षदानुषक् ।

भ्य इति प्र–अनेभ्यः । एव । तत् । प्रजा इति प्र–जाः । न । यन्ति ॥ ३१ ॥

तत्प्राणग्रहास्सप्तत्रिꣳशच्च ॥ १० ॥

[1]प्रेति । देवम् । देव्या । धिया । भरत । जा-
तवेदसमिति जात–वेदसम् । हव्या । नः । वक्षत् ।

देव्यं साम योनेश्चयवते । कदा पुनस्तद्योनेश्चयवते? आह—दश-
मेऽहन्नित्यादि । गतम् । 'वामदेवाङ्चङ्चौ' ॥

इति तृतीये पञ्चमे दशमोनुवाकः.

---

[1]अथ वरुणप्रघासानामग्निप्रणयनीया अष्टौ—प्र देवमिति गा-
यत्री ॥ हे ऋत्विग्यजमानाः देवं जातवेदसं जातानां वेदितारं जात-
धनादिकं वा अग्निं प्रभरत प्रकर्षेण भरत प्रणयत । 'अन्येषामपि
दृश्यते' इति सांहितिको दीर्घः । देव्या दीप्तया धिया प्रज्ञया
कर्मणा वा । 'उदात्तयणः' इति विभक्तेरुदात्तत्वम् । किं प्रयो-

अयमुष्य प्र देवयुर् होता यज्ञाय
नीयते । रथो न योरभीवृतो घृणी-
वाञ्चेतति त्मना । अयमग्निरुरुष्य-

आनुषक् । [2]अयम् । उ । स्यः । प्रेति । देवयुरिति देव–युः । होता । यज्ञाय । नीयते । रथः । न । योः । अभीवृत इत्यभि–वृतः । घृणीवान् । चेतति । त्मना । [3]अयम् । अग्निः । उरुष्यति । अमृतात् ।

जनमिति चेत्? नः अस्माकं हव्या हव्यानि हवींषि । 'शेश्छन्दसि' इति लोपः ॥

[2]अथ द्वितीया—अयमुष्य इत्यनुष्टुप् ॥ अयमु अयमेव स्यः सः देवयुः देवान्यष्टुमिच्छन् । 'न छन्दस्यपुत्रस्य' इतीत्वाभावः, 'क्याच्छन्दसि' इत्युप्रत्ययः । होता देवानामाह्वाता सोयमेव यज्ञाय प्रणीयते । रथो न रथ इव । रंहणशील आदित्यो रथः रथवान्वा, लुप्तमत्वर्थीयः । अभीवृतः ब्राह्मणैर्वेष्टितः । सांहितिकमुपसर्गस्य दीर्घत्वम्, 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । योः मिश्रयिता हविषां देवैः । यौतेर्विच् । घृणीवान् रश्मिवान् । सांहितिकं दीर्घत्वम्, 'छन्दसीरः' इति मतुपो वत्वम्, व्यत्ययेन 'छन्दसि' इति रुर्न प्रवर्तते । चेतति जानाति त्मना आत्मना स्वयमेव यागनिवृत्त्युपायान् वेत्तीति । 'मन्त्रेष्वाङ्यादेः' इति लोपः ॥

[3]अथ तृतीया—अयमग्निरित्यनुष्टुप् ॥ अयं प्रणीयमानोग्निरुरु-

त्यमृतादिव जन्मनः । सहसश्चित्-
सहीयान्देवो जीवातवे कृतः । इ-
डायास्त्वा पदे वयं नाभा पृथिव्या

इव । जन्मनः । सहसः । चित् । सहीयान् । देवः । जीवातवे । कृतः । [4]इडायाः । त्वा । पदे । वयम् । नाभा । पृथिव्याः । अधि । जातवेद इति जात-

---

ष्यति रक्षति यागं रक्षःप्रभृतिभ्यः । यद्वा—रक्षत्यात्मानं आ समा-न्तेरविनाशो वर्तिष्यते । अमृतादिव जन्मनः यथा अमृतादविद्य-मानमरणात् जन्महेतोरविनाशोयं स्तुतो भवति । एवमस्मादाहवनी-याज्जातत्वान्नास्य विनाश इति । उरुष्यतिः कण्ड्वादिः 'नञो जरमर' इत्यमृतशब्दस्योत्तरपदाद्युदात्तत्वम् । सहसश्चित्सहीयान् । सहो बलम् । मत्वर्थीयो लुप्यते । चिच्छब्दोप्यर्थे । बलवद्भ्योपि बलवत्तरः । सहस्वच्छब्दादीयसुनि 'विन्मतोर्लुक्' इति लुक्, 'टेः' इति टिलोपः । देवः दीप्तिमान् । जीवातवे जीवनहेतवे यागाय कृतः प्रणीतः । सोयमग्निः उरुष्यति ॥

[4]अथ चतुर्थी—इडाया इत्यनुष्टुप् ॥ हे अग्ने जातवेदः इडायाः पृथिव्याः अवयवे पदे अस्मिन् स्थाने । कस्मिन्? नाभा उत्तरनाभौ । 'सुपां सुलुक्' इति सप्तम्या डादेशः । पृथिव्याः प्रथिताया उत्तरवेद्या अधि उपरिष्टात् निधीमहि स्थापयामः । धीङ् आधारे, छान्दसे लुङि शपो लुक्, 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः । किमर्थम्? हव्याय वोढवे

आर्धं । जातवेदो नि धीमह्यग्ने ह-
व्याय वोढवे ॥ ३२ ॥ अग्ने विश्वे-
भिस्स्वनीक देवैरूर्णावन्तं प्रथमस्सीं-
द योनिम् । कुलायिनं घृतवन्तꣳ
सवित्रे यज्ञं नय यजमानाय सा-

वेदः । नीति । धीमहि । अग्ने । हव्याय । वोढवे ॥ ३२ ॥ [5]अग्ने । विश्वेभिः । स्वनीकेति सु–अनी-क । देवैः । ऊर्णावन्तमित्यूर्णा–वन्तम् । प्रथमः । सीद । योनिम् । कुलायिनम् । घृतवन्तमिति घृत–वन्तम् । सवित्रे । यज्ञम् । नय । यजमानाय ।

हविर्वोढुं देवेभ्यः । 'तुमर्थे सेसेन्' इति तवेन्प्रत्ययः । हवमर्हतीति हव्यः, दण्डादित्वाद्यः, 'क्रियाग्रहणं कर्तव्यम्' इति संप्रदानत्वम् ॥

[5]अथ पञ्चमी—अग्ने विश्वेभिरिति त्रिष्टुप् ॥ हे अग्ने विश्वेभिस्सर्वैर्देवैः स्वनीकः सुसेनामुखः विश्वैर्देवैस्सह । ऊर्णावन्तं ऊर्णास्तुकया तद्वन्तं योनिं योनिस्थानं प्रथमो मुख्यस्त्वं सीद आस्व । कुलायिनं संभारैस्तद्वन्तं घृतवन्तं व्याघारणभूतेन तद्वन्तम् । तत्रासीनस्त्वं सवित्रे आदित्याय यज्ञं इष्टं हविर्नय प्रापय । सर्वमिष्टं कुर्विति यावत् । यथोक्तम्—'अग्नौ प्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते' । इति । किमर्थम्? यजमानाय साधु यथा

धु । सीद॑ होत॒स्स्व उ॑ लो॒के चि॑कि॒-
त्वान्त्सादया॑ य॒ज्ञꣳ सु॑कृ॒तस्य॒ यो-
नौ॑ । दे॒वावी॑र्दे॒वान् ह॒विषा॑ यजास्य-
ग्ने॑ बृ॒हद्यज॑माने॒ वयो॑ धाः । नि हो-

सा॒धु । [6]सीद॑ । हो॒तः॒ । स्वे । उ॒ । लो॒के । चि॒कि॒-
त्वान् । सा॒दय॑ । य॒ज्ञम् । सु॒कृ॒तस्येति॑ सु—कृ॒तस्य॑ ।
योनौ॑ । दे॒वा॒वीरिति॑ देव—अ॒वीः॒ । दे॒वान् । ह॒विषा॑ ।
य॒जा॒सि॒ । अग्ने॑ । बृ॒हत् । यज॑माने । वयः॑ । धाः॒ ।
[7]नीति॑ । होता॑ । हो॒तृ॒ष॒दन॒ इति॑ होतृ—स॒दने॑ । वि-

यजमानार्थं साधयेद्यागफलम् । 'कृपावाजि' इत्युण्प्रत्ययः । यद्वा—यजमानस्य फलावाप्तये यज्ञं साधु सवितारं नय ॥

[6]अथ षष्ठी—सीदेति त्रिष्टुप् ॥ हे अग्ने होतः आह्वातः स्व उ लोके स्व एव स्थाने उत्तरवेद्यां सीद आस्व । चिकित्वान् स्वव्यापारं जानानः । कित ज्ञाने । सीदंश्च त्वं यज्ञं सुकृतस्य कर्मणः योनौ स्थाने सादय । सांहितिकं दीर्घत्वम् । 'सूपमानात्क्तः' इति सुकृतशब्दोन्तोदात्तः । तदर्थमित्थं कर्तव्यमित्याह—देवावीः देवानामविता रक्षिता तर्पयिता वा । 'अवितृस्तृतन्त्रिभ्य ईः' । यस्मादेवं तस्मात् देवान् हविषा यजासि यज । लोट्याडागमः । इदं च कर्तव्यमित्याह—बृहत् महत् यजमाने वयः अन्नं धाः धेहि स्थापय । दधातेर्हेटि शपो लुक् ॥

[7]अथ सप्तमी—नि होतेति त्रिष्टुप् ॥ होता आह्वाता विदानः

ता॑ होतृष॒दने॒ विदा॑नस्त्वे॒षो दी॑दि॒-
वाꣳ अ॑सदत्सु॒दक्षः॑। अद॑ब्धव्रतप्रम-
ति॒र्वसि॑ष्ठस्स॒हस्र॑म्भ॒रश्शुचि॑जिह्वो अ॒-

दा॑नः। त्वे॒षः। दी॒दि॒वान्। अ॒स॒द॒त्। सु॒दक्ष॒ इति॑ सु–दक्षः। अद॑ब्धव्रतप्रमति॒रित्यद॑ब्धव्रत–प्र॒म॒ति॒ः। वसि॑ष्ठः। स॒हस्र॑म्भर॒ इति॑ स॒हस्र॑–भ॒रः। शुचि॑-

---

स्वाधिकारज्ञः। व्यत्ययेनानुदात्तेत्वमात्मनेपदम्, लसार्वधातुकानुदात्तत्वम्। त्वेषः दीप्तिमान् दीदिवान् ज्वलन्। दीव्यतेश्छान्दसस्य लिटः क्वसुरादेशः। सुदक्षः सुष्ठु शीघ्रः सुपण्डितो वा। 'परादिश्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम्। अदब्धव्रतप्रमतिः अनुपहिंसितकर्मा चासौ प्रकृष्टमतिश्चेति कर्मधारयन्याये दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वम्। अनुपहिंसितकर्मा, प्रकृष्टा मतिर्यस्येति। वसिष्ठः वसुमत्तरः। सहस्रंभरः बहुधनः धनस्य भर्ता। यद्वा—बहुधनो हि सहस्रं भृत्यादीन् बिभर्तीति। भर्तेः 'संज्ञायां भृतृवृजि' इति खः। शुचिजिह्वः शुद्धज्वालः। अतस्सर्वेऽपि देवाः त्वदर्चिर्लीढमदन्ति। ईदृशोग्निः अङ्गनादिगुणयुक्तः होतृषदने न्यषीदत् निषीदतु। 'सदिरप्रतेः' इति षत्वम्। निषण्णश्चास्माकं अभिप्रेतानि साधयत्विति। छान्दसो लुङ्, इरित्वादङ्॥

ग्निः । त्वं दूतस्त्वम् ॥ ३३ ॥ उ
नः परस्पास्त्वं वस्य आ वृषभ प्र-
णेता । अग्नेः तोकस्य नस्तने तनू-

जिह्व इति शुचि—जिह्वः । अग्निः । [8]त्वम् । दूतः ।
त्वम् ॥ ३३ ॥ उ । नः । परस्पा इति परः—पाः ।
त्वम् । वस्यः । एति । वृषभ । प्रणेतेति प्र—नेता ।
अग्नेः । तोकस्य । नः । तने । तनूनाम् । अप्रयु-

---

[8]अथाष्टमी—हे अग्ने नोस्माकं त्वं दूतः देवेषु गन्ता, त्वमेव नः परस्पाः प्रकृष्टः पारयिता । पारस्करादित्वात्सुट् । वस्यः वसुमत्तरः । ईयसुन आद्यक्षरलोपः, व्यत्ययेन नपुंसकत्वम्, क्रियाविशेषणं वा । वसीयः प्रणेतेति । आमन्त्रितं वा हे वसीयः । व्यत्ययेन निघाताभावः । आकारस्समुच्चये वसीयः प्रणेता प्रधानपाकान्तरशोः [पारयित्रोः] पूर्वापेक्षया समुच्चयः । त्वं नः परस्पाः प्रणेता चेति । हे वृषभ वर्षितः अतोस्माकं तोकस्य तने तनयस्य नप्तृदेः । छान्दसो वर्णलोपः, विभक्तिव्यत्ययश्च । तनूनां शरीराणां च त्वमेव गोपाः गोपयिता । आयप्रत्ययान्तात्क्विप्, अतो लोपयलोपौ, 'धातोः' इत्यन्तोदात्तत्वम् । पदकारमते पाता गोपाः । स एव विशेष्यते—अप्रयुच्छन् अप्रमाद्यन् दीद्यत् दीप्यमानः । देदितिर्दीप्तिकर्मा छान्दसः अभ्यस्तधर्मः, 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् । यदुक्तं त्वमेव नः रक्षेति एतत् त्वं बोधि बुद्ध्यस्व । लेटि शपो लुक् । 'वा छन्दसि' इत्यपित्त्वाभावात् लघूपधगुणाभावः । धातोरन्त्यलोपश्छान्दसः । कर्मणि

नामप्रयुच्छन्दीद्यद्बोधि गोपाः । अ-
भि त्वा देव सवितरीशानं वार्या-
णाम् । सदाऽवन्भागमीमहे । मही
द्यौः पृथिवी च न इमं यज्ञं मिमि-

क्षन्नित्यप्र—युच्छन्न् । दीद्यत् । बोधि । गोपा इति गो—पाः । [9]अभीति । त्वा । देव । सवितः । ई-शानम् । वार्याणाम् । सदा । अवन्न् । भागम् । ईमहे । [10]मही । द्यौः । पृथिवी । च । नः । इमम् । यज्ञम् । मिमिक्षताम् । पिपृताम् । नः । भरीम-

---

वा लुङ्, एतत्त्वया बोधि बुध्यतां विदितमिदं तवास्तु त्वमेव नः गोपायितेति । 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः ॥

[9]अत्रैवाग्निमन्थनीयास्त्रयोदश, सर्वा गायत्र्यः, त्रयोदशी त्रिष्टुप् ॥ तत्र प्रथमा—अभि त्वेति ॥ हे देव दानादिगुणयुक्त हे सवितः सर्वस्य प्रसावक त्वामीशानं ईशितारं स्वामिनं वार्याणां वरणीयानां वरिष्ठानां धनानाम् । वृणातेः 'ऋहलोर्ण्यत्', 'ईडवन्द' इत्युदात्तत्वम् । हे सदावन् सर्वदा विश्वरक्षिन् भागं भजनीयं धनं अभीमहे आभिमुख्येन याचामहे । 'कर्षात्वतः' इत्यन्तोदात्तत्वम् ॥

[10]द्वितीया—मही द्यौरिति ॥ व्याख्यातेयं 'सूर्यो देवः'* इत्यत्र । मही महती द्यौः पृथिवी च नोस्माकं इमं यज्ञं

---

*सं ३-३-१०,[6]

क्षताम् । पिपृतां नो भरीमभिः । त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतः । तमु ॥ ३४ ॥ त्वा दध्यङ्ङृषिः पुत्र ईधे

भिरिति भरीम-भिः । [11]त्वाम् । अग्ने । पुष्करात् । अधीति । अथर्वा । निरिति । अमन्थत । मूर्ध्नः । विश्वस्य । वाघतः । [12]तम् । उ ॥ ३४ ॥ त्वा । दध्यङ् । ऋषिः । पुत्रः । ईधे । अथर्वणः । वृत्रह-

---

मिमिक्षतां सिञ्चताम्, पिपृतां प्रीणयतां चास्मान् । भरीमभिः भरणप्रकारैरिति ॥

[11]तृतीया—त्वामग्ने इति ॥ हे अग्ने त्वां अथर्वा ऋषिः पुष्करात्पुष्करपर्णात् अधि उपरि निरमन्थत पुष्करपर्णस्थं मन्थनेन ततो निष्कृष्य अलभत । यथोक्तम्—'पुष्करपर्णे ह्येनमुपश्रितमविन्दत्'* इति । कीदृशात्? मूर्ध्नः मूर्धस्थानीयात् प्रधानभूतात् पुष्करपर्णात् । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । विश्वस्य वाघतः ऋत्विक्समुदायस्य [वाहकात्] उदकात्प्राणो निरमन्थदित्येके ॥

[12]चतुर्थी—तमु त्वेति ॥ तमेव त्वा दध्यङ्ङाम ऋषिः अथर्वणः पुत्रः ईधे दीपयामास । 'इन्धिभवतिभ्यां च' इति कित्त्वात् 'अदिताम्' इति लोपः । वृत्रहणं वृत्रस्यासुरस्य पाप्मनो वा हन्तारं पुरन्दरं पुरामसुरसम्बन्धिनीनां दारयितारम् । 'पूस्सर्वयोः' इति खच्, 'वाचंयमपुरन्दरौ' इति निपात्यते ॥

---

*सं ५-१-४.

अथर्वणः । वृत्रहणं पुरंदरम् । तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तं-मम् । धनंजयꣳ रणेरणे । उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाऽजनि । धनंजयो रणेरणे । आ यꣳ हस्ते

णमिति वृत्र-हनम् । पुरन्दरमिति पुरं-दरम् । [13]तम् । उ । त्वा । पाथ्यः । वृषा । समिति । ईधे । दस्युहन्तमिति दस्यु-हन्तमम् । धनञ्जयमिति धनं-जयम् । रणेरण इति रणे-रणे । [14]उत । ब्रुवन्तु । जन्तवः । उदिति । अग्निः । वृत्रहेति वृत्र-हा । अजनि । धनञ्जय इति धनं-जयः । रणेरण इति रणे-रणे । [15]एति । यम् । हस्ते । न । खा-

---

[13]पञ्चमी—तमु त्वा पाथ्य इति ॥ तमेव त्वां पाथ्यो नाम ऋषिः वृषा प्रधानभूतः समीधे दीपितवान् दस्युहन्तमं दस्यूनां हन्तृतमं हन्तारम् । 'नाङ्स्य' इति नुट् । धनञ्जयं धनानां जेतारं रणेरणे संग्रामे । पूर्ववत्खच् । 'अनुदात्तं च' इति द्वितीयो रणशब्दोनुदात्तः ॥

[14]षष्ठी—उत ब्रुवन्त्विति ॥ उत अपि च जन्तवः मनुष्या ऋत्विगादयः ब्रुवन्तु स्तुतिं कुर्वन्तु । अयमग्निः वृत्रहा पापादेर्हन्ता उदजनि धनंजयो रणेरणे ॥

[15]अथ सप्तमी—आ यमिति ॥ यमग्निमध्वर्युः हस्ते अञ्जलौ

न खादिनꣳ शिशुं जातं न बिभ्र-
ति । विशामग्निꣳ स्वध्वरम् । प्र
देवं देववीतये भरता वसुवित्तमम् ।

दिनम् । शिशुम् । जातम् । न । बिभ्रति । वि-
शाम् । अग्निम् । स्वध्वरमिति सु-अध्वरम् । [16]प्रे-
ति । देवम् । देववीतय इति देव-वीतये । भरत ।
वसुवित्तममिति वसुवित्-तमम् । एति । स्वे ।

बिभ्रति । विभक्तिवचनव्यत्ययः । यद्वा—लेटि अडागमे 'नाभ्य-
स्तस्याचि' इति गुणाभावः । 'ससाधनां क्रियामुपसर्ग आह' इति
आ इत्यागतोग्निरुच्यते । आगतमेवाग्निं बिभर्ति, न खादिनं
हविर्भुञ्जानं ज्वलदवस्थमित्यर्थः । यथाऽऽहुः—'जातमध्वर्युरञ्जलिना
गृह्णाति' इति । शिशुं जातं न जातमिव, यथा मात्रादयो जातमात्रमेव
शिशुं हस्ते बिभ्रति । अग्निर्विशेष्यते—विशां मनुष्याणां स्वध्वरं
शोभनयज्ञम्; अवितथफलसाधनत्वात् । 'नञ्सुभ्याम्' इत्युत्तरप-
दान्तोदात्तत्वम् । 'सावेकाचः' इति विशो विभक्तिरुदात्ता ।
सोयमग्निरुदजनीति ॥

[16]अथाष्टमी—प्र देवमिति ॥ देवमग्निं वसुवित्तमं धनानां लब्धृ-
तमं प्रभरत । सांहितिकं दीर्घत्वम् । देववीतये देवानां यागाय,
देवा वियन्ति भुञ्जतेऽस्मिन्निति । दासीभारादित्वात्पूर्वपदप्रकृतिस्वर-
त्वम् । सोयं स्वे योनौ आहवनीयस्थाने आहवनीये निषीदतु
आगत्यास्ताम् ॥

आ स्वे योनौ निषीदतु । आ ॥३५॥
जातं जातवेदसि प्रियꣳ शिशीता-
तिथिम् । स्योन आ गृहपतिम् ।
अग्निनाऽग्निस्समिध्यते कविर्गृहप-
योनौ । नीतिं । सीदतु । [17]एतिं ॥ ३५ ॥ जातम् ।
जातवेदसीतिं जात–वेदसि । प्रियम् । शिशीत । अतिंथिम् । स्योने । एतिं । गृहपतिमितिं गृह–
पतिम् । [18]अग्निना । अग्निः । समितिं । इध्यते ।
कविः । गृहपतिरितिं गृह–पतिः । युवा । हव्यवा-

---

[17]अथ नवमी—आ जातमिति ॥ जातमिममग्निं जातवेदसि आहवनीये अग्नौ आशिशीत आनीय तीक्ष्णं कुरुत । अध्यर्थे वा आकारः । आहवनीयस्योपरि तीक्ष्णं कुरुतेति । ज्वालावत्तीक्ष्णत्वम्, महत्त्वं वा । प्रियमतिथिमिव, यथा प्रियमतिथिमागतं पूजया तर्पयन्ति एवममुं ग्रहपतिं ग्रहाणां पातारमग्निं स्योने स्थाने वा आशिशीत । आकारस्समुच्चये । शेतेर्लोटि शपश्श्लुः, 'ई हल्यघोः' इतीत्वम् ॥

[18]दशमी—अग्निनेति ॥ 'यस्त्वा हृदा'* इत्यत्र व्याख्याता । अग्निना प्रभूतेनाग्निना आहवनीयः समिध्यते । कविः क्रान्तदर्शनः ग्रहपतिः ग्रहाणां पाता युवा हविषां देवैर्मिश्रयिता ।

---

*सं. १-४-४६,[11]

तिर्युवा । हव्यवाडुह्वास्यः । त्वꣳ
ह्यग्ने अग्निना विप्रो विप्रेण सन्त्स-
ता । सखा सख्या समिध्यसे । तं
मर्जयन्त सुक्रतुं पुरो यावानमाजि-

डिति हव्य—वाट् । जुह्वास्य इति जुहु—आस्यः । [19]त्वम् । हि । अग्ने । अग्निना । विप्रः । विप्रेण । सन् । सता । सखा । सख्या । समिध्यस इति सं—इध्यसे । [20]तम् । मर्जयन्त । सुक्रतुमिति सु—क्रतुम् । पुरोयावानमिति पुरः—यावानम् । आजि-

---

यद्वा—नित्यतरुणः । हव्यवाट् वोढा च हविषाम् । जुह्वास्यः जुहूरास्यस्थानीया यस्येति ॥

[19]एकादशी—त्वं हीति ॥ इयमपि तत्रैव व्याख्याता* । हे अग्ने त्वमग्निना प्रणीयमानेन विप्रः मेधावी विप्रेण तादृशेन सन् समीचीनकामस्सन् सता तादृशेन सखा समानख्यानः सख्या तादृशेन । हि हेतौ । यस्मादीदृशः तस्मादेतेन त्वं समिध्यसे इति ॥

[20]द्वादशी—तमिति ॥ तमग्निं सुक्रतुं शोभनकर्माणम् । 'क्रत्वा-दयश्च' इत्युत्तरपदान्तोदात्तत्वम् । पुरोयावानमग्रेगन्तारम् । 'आतो मनिन्' इति वनिप् । आजिषु यज्ञभूमिषु स्वेषु क्षयेषु स्वेषु स्थानेषु वाजिनं हविषा तद्वन्तं; तत्र तत्र यष्ट-

---

*सं. १-४-४६.[12]

षुं । स्वेषु क्षयेषु वाजिनम् । यज्ञे-
नं यज्ञमयजन्त देवास्तानि धर्माणि
प्रथमान्यासन् । ते ह नाकं महि-

षुं । स्वेषुं । क्षयेषु । वाजिनम् । [21]यज्ञेनं । यज्ञम् ।
अयजन्त । देवाः । तानिं । धर्माणि । प्रथमानिं ।
आसन्न् । ते । ह । नाकम् । महिमानः । सचन्ते ।

व्यत्वात् । 'क्षयो निवासे' इत्याद्युदात्तत्वम् । ईदृशं मर्जयन्त संस्कुर्वन्ति । मृजेर्ण्यन्ताच्छान्दसो लङ्, वृद्ध्यभावश्छान्दसः, 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः । तस्माद्वयमपि संस्कुर्म इति ॥

[21]त्रयोदशी—यज्ञेनेति ॥ इज्यते इति यज्ञोऽग्निः । 'यज याच' इति नङ्प्रत्ययः । तेनेतरमग्निमयजन्त यजन्ते देवाः ऋत्विजः । स एव लङ् । यत्रैव तदेव क्रियते । तानि धर्माणि कर्माणि प्रथमानि मुख्यानि आसन् हिंसारहितानि अभावयन् । 'बहुलमन्यत्रापि' इति णिलुक् । ये त्वेवं कुर्वन्ति ते ह त एव नाकं स्वर्गं महिमवन्तः महिमानः । मत्वर्थीयो लुप्यते । नाको विशेष्यते—यत्र पूर्वे साध्याः साधकाः यजमानाः देवाः देवीभूतास्सन्ति इदानीमपि तत्र विद्यन्ते । साधयतेः 'अचो यत्' इति कर्तरि यत्, णिलोपः, 'यतो नावः'

मानंस्सचन्ते यत्र पूर्वे साध्यास्सन्ति
देवाः ॥ ३६ ॥

यत्र । पूर्वे । साध्याः । सन्ति । देवाः ॥ ३६ ॥

वोढवे दूतस्त्वं तमु सीदत्वा यत्र
चत्वारिं च ॥ ११ ॥

पूर्णर्षयोग्निना ये देवास्सूर्यो मा सं त्वा
नह्यामि वषट्कारस्स खंदिर उपयामगृहीतोसि यां वै त्वे क्रतुं प्र देवमेकादश ॥ ११ ॥

पूर्णा संहजान्तवाग्ने प्राणैरेव
षड्विंशत् ॥ ३६ ॥

पूर्णा सन्ति
देवाः.

इत्याद्युदात्तत्वे उदात्तनिवृत्तिस्वरेण यत उदात्तत्वम् । तस्माद्वयमप्येतेन कर्मणा तद्वनं सचेमहीति ॥

इति श्रीभट्टभास्करमिश्रविरचिते यजुर्वेदभाष्ये ज्ञानयज्ञाख्ये तृतीये काण्डे पञ्चमप्रश्ने एकादशोनुवाकः.

पञ्चमः प्रश्नस्समाप्तः.

समाप्तश्च तृतीयः काण्डः.

शोधनपत्रिका.

पृष्ठे.	पङ्क्तौ.	अशुद्धम्	शुद्धम.
७	६	अस्मात्	अस्मात्
१३	५	स्थांम्	स्थाम्
२३	३	नमो	नमों
२९	१०	पजयेतिं	प्रजयेतिं
७८	६	यः	[5]यः
८१	,,	द्रुह्यते	द्रुह्यते
११२	२	नश्यु	नश्यु
१४२	९	रुद्र	[6]रुद्र
१५८	७	स्कन्दति	स्कन्दंति
१६५	४	हे	हे
१८९	९	तेन	तेनं
१९७	२	व	वं
२००	७	प्रेतिं	[2]प्रेतिं
२४३	१०	प्रजापातिं	प्रजापंति
२९४	५	अन्तर	अन्तर
३१७	७	चन्द्रमाः	[6]चन्द्रमाः
,,	८	मित्रः	[8]मित्रः

पृष्ठ.	पङ्क्ति.	अशुद्धम्.	शुद्धम्.
३३६	२	देवंन	देवंने
,,	११	रथमुख	[5]रथमुख
३४३	१२	द्यम्	द्यंम्
३४६	६	देविकाः	[1]देविंकाः
३४८	१३	एताः	[3]एताः
३६९	५	ब्रह्मा	[4]ब्रह्मा
३८६	७	निव	निवे
३९०	५	वूर्वां	पूर्वां
४०९	८	येनं	[6]येनं
४१२	६	पड	पड्
४३१	५	पायम	पयाम

भाष्यशुद्धपत्रिका.

पृष्ठे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
६	७	निर्ह्नुन्ति	निर्ह्नन्ति
३१	२	यज्ञश्चः	यज्ञश्च
५१	५	स्तीत्सद्धचै	स्तत्सिद्धचै
९४	८	न्नवेदाः	न्नवेदा
१२९	६	हयतामिति	द्वयतामिति
१३२	४	ऋच्छति	ऋच्छति
१६७	३	'तृम्पन्तां होत्राः'	'तृम्पन्तां होत्राः'*
२१२	२	सूर्य इति	सूर्येति
२२८	१	सोममिति	सोमेति
३१८	,,	फलपाकान्ताम्	फलपाकान्तानाम्
३३०	९	द्युलोक्ता	द्युलोकान्त
४१८	३	ईतः	इतः
,,	,,	अस्मा	अस्म
४५२	११	'अदिताम्'	'अनिदिताम्'